414

भागवत महापुराण
(स्कंध १—६)

	Bhāgawata Mahāpurāna		Title
			Author
			Editor
	Skandhas 1 to 6		Year, Vols.
	(+ also 7th incomplete)		Publisher
414			Remarks

भगवती० ॥ॐभगवत्यैनमः॥ ॥सर्वचैतन्यरूपांतांविद्यामाद्यांचधीमहि॥ययाव्याप्तमिदंसर्वं
१ बुद्धिंयानःप्रचोदयात्॥१॥शौनकउवाच॥ ॥सूतसूतमहाभागधन्योसिपुरुषर्षभ॥य
दधीतास्त्वयासम्यक्पुराणसंहिताःशुभाः॥२॥अष्टादशपुराणानिकृष्णेनमुनिनानघ॥
कथितानिसुदिव्यानिपठितानित्वयाकिल॥३॥पंचलक्षणयुक्तानिसरहस्यानिमानद॥
त्वयाज्ञातानिसर्वाणिव्यासात्सत्यवतीसुतात्॥४॥अस्माकंपुण्ययोगेनप्राप्तस्त्वंक्षेत्र
मुत्तमं॥दिव्यंविश्वजनंपुण्यंकलिदोषविवर्जितं॥५॥समाजोमुनीनामत्रश्रोतुंकामा
स्तिपुण्यदां॥६॥पुराणसंहितांसूतब्रूहित्वंनःसमाहितः॥दीर्घायुर्भवसर्वज्ञतापत्रयविव
र्जितः॥कथयाद्यमहाभागपुराणंब्रह्मसंमितं॥७॥श्रोत्रेंद्रिययुताःसूतनराःस्वादविच राम·
क्षणाः॥नशृण्वंतिपुराणानिवंचिताविधिनाहिते॥८॥यथाजिह्वेंद्रियास्वादःषड्रसैःसम १

पद्यते॥तथाश्रोत्रेंद्रियाह्लादोवचोभिःसुधियांस्मृतः॥९॥अश्रोत्राःफणिनःकामंमुह्यंतिहित
नोगुणैःसकर्णायेनशृण्वंतितेप्यकर्णाःकथंनवै॥१०॥अतःसर्वेद्विजाःसौम्यश्रोतुंकामा
हिताः॥वर्तंतेनैमिषारण्येक्षेत्रेकलिभयार्दिताः॥११॥येनकेनाप्युपायेनकालातिवाहनंस्मृ
तं बुधैर्व्यसनैरिहमूर्खाणांज्ञानिनांशास्त्रचिंतनैः॥१२॥शास्त्राण्यपिविचित्राणिजल्पवा
दयुतानिच॥वितंडाछलयुक्तानिगर्वामर्षकराणिच॥१३॥त्रिविधानिपुराणानिशास्त्राणि
विविधानिच॥नानार्थवादयुक्तानिहेतुवंतिबृहंतिच॥१४॥सात्विकंतत्रवेदांतंमीमांसाराज
संस्मृतं॥नामसंन्यायशास्त्रंचहेतुवादाभियंत्रितं॥१५॥तथैवचपुराणानित्रिगुणानिक
थानकैः॥कथितानित्वयासौम्यपंचलक्षणवंतिच॥१६॥तत्रभागवतंपुण्यंपंचमंवेदसं
मतं॥कथितंयत्त्वयापूर्वंसर्वलक्षणसंयुतं॥१७॥उद्देशमात्रेणत्वयाकीर्तितंपरमाद्भुतं॥मु

भगवती० क्रिदं च मुमुक्षूणां कामदं धर्मदं तथा ॥१८॥ विच्चिरेणन दारम्याहि पुराणोत्तमामादरात् ॥ श्रोतुं भा॰ प्र॰ १
२ कामा द्विजाः सर्वे इदं भागवतं शुभं ॥१९॥ त्वं तु जानासि सर्वज्ञ पुराणसंहितां किल ॥ कृष्णेन र
क्तां गुरुणा चैकेनात् सम्यक् सत्त्वगुणाश्रयः ॥२०॥ श्रुतान्यन्यानि धर्मज्ञ त्वन्मुखान्निःसृता
नि च ॥ नैव तृप्तिं व्रजामो हि सुधापाने नरा यथा ॥२१॥ धिक् सुधां पिबतां सूत मुक्तिर्नैव कदा
चन ॥ पिबन् भागवतं सद्यो नरो मुच्येत संकटात् ॥२२॥ सुधापाननिमित्तेनः कृतापत्ताः सह
स्रशः ॥ न शान्तिमधिगच्छामः सूत सर्वात्मनाव यं ॥२३॥ मखानां हि फलं स्वर्गः स्वर्गात्प्रच्यवनं पु
नः ॥ एवं संसारचक्रेस्मिन् भ्रमणं हि निरंतरं ॥२४॥ विना ज्ञानेन सर्वज्ञ नैव मुक्तिः कदाचन ॥
भ्रमतां कालचक्रे च नराणां त्रिगुणात्मके ॥२५॥ अतः सर्वरसोपेतं पुण्यं भागवतं वद ॥ पावनं राम
मुक्तिदं गुह्यं मुमुक्षूणां सदा प्रियं ॥२६॥ ॥इति श्रीभागवते महापुराणे अष्टादशसाहस्र्यां सं २

हितायां प्रथमस्कंधे शौनकप्रश्नो नाम प्रथमोध्यायः ॥१॥ ॥सूत उवाच॥ ॥धन्योहम
स्म्यनुगृहीतोहं पावितोहं महात्मभिः ॥ यत्पृष्टं सुमहत्पुण्यं पुराणं वेदविश्रुतं ॥१॥ तदहं संप्रवक्ष्या
मि सर्वश्रुत्यर्थसंमतं ॥ रहस्यं सर्वशास्त्राणामागमानामनुत्तमं ॥२॥ नत्वायपिद्पंकजं
सुललितं मुक्तिप्रदं योगिनां ब्रह्माद्यैरभिसेवितं स्तुतिपरैर्ध्येयं मुनीन्द्रैः सदा वक्ष्याम्यद्य सुवि
स्तरं बकुरसं श्रीमत्पुराणोत्तमं भक्त्या सर्वरसालयं भगवतीनाम्ना प्रसिद्धं द्विजाः ॥३॥ या विद्ये
त्यभिधीयते श्रुतिपथे शक्तिः सदाद्या परा सर्वज्ञा भवबंधछित्तिनिपुणा सर्वाशये संस्थिता ॥
दुर्ज्ञेया सुदुरात्मभिश्च मुनिभिर्ध्यानास्पदं प्रापिता प्रत्यक्षं भवतीह सा भगवती बुद्धिप्रदा मे
स्तु वै ॥४॥ सृष्ट्वाखिलं जगदिदं सदसत्स्वरूपं शक्त्या स्वया त्रिगुणया परिपाति विश्वं ॥ संहृत्य
कल्पसमये रमते तथैका तां सर्वविश्वजननीं मनसा स्मरामि ॥५॥ ब्रह्मा स्रजत्यखिलमेत

इति प्रसिद्धं पौराणिकेष्वकथितं खलु वेदविद्भिः ॥ विष्णोस्तु नाभिकमले किल तस्य जन्म नेरु
क्तमेव सृजने न हि सः स्वतंत्रः ॥ ६ ॥ विष्णुस्तु शेषशयने स्वपितीति काले तन्नाभिपद्ममुकुले
खलु तस्य जन्म ॥ आधारतां किल गतात्र सकर्षणोस भोधीपतां स भगवान्न कथं मुरारिः ॥ ७ ॥
एकार्णवस्य सलिलं रसरूपमेवापात्रं विना नहि तरस्य स्थितिः कदापि ॥ यासर्वभूतविषये र
किलशक्तिरूपा तां सर्वविश्वजननीं शरणं गतोस्मि ॥ ८ ॥ योगनिद्रामिलीनं तं विष्णुं दृष्ट्वां
बुजे स्थितः ॥ अजस्य प्ट्वास्तवां देवीनाम हं शरणं व्रजे ॥ ९ ॥ तां ध्यात्वा सगुणां मायां मुक्तिदां
निर्गुणां तथा ॥ वक्षे पुराणमखिलं शृण्वंतु मुनयस्त्विह ॥ १० ॥ पुराणं पंचमं पुण्यं श्रीमद्भा
गवताभिधं ॥ अष्टादशसहस्राणि श्लोकास्तत्र सुसंस्कृताः ॥ ११ ॥ स्कंधा द्वादश एवास्तुः राम
क्रमेण विहिताः शुभाः ॥ द्वात्रिंशत्त्रिशतं पूर्णमध्यायाः परिकीर्तिताः ॥ १२ ॥ विंशतिः प्रथ ३

मेतत्र द्वितीये द्वादशैव हि ॥ त्रिंशच्चैव तृतीये तु चतुर्थे पंचविंशतिः ॥ १३ ॥ पंचत्रिंशत्तथाध्यायाः
पंचमे परिकीर्तिताः ॥ एकत्रिंशत्तु संप्रोक्ता षष्ठे चत्वारिंशच्च सप्तमे ॥ १४ ॥ अष्टमे तत्र सं
ख्या च पंचाशन्नवमे तथा ॥ त्रयोदश तु संप्रोक्ता दशमे मुनिना किल ॥ १५ ॥ तथा चैकाद
शे स्कंधे चत्रिंशच्चवमे तथा ॥ त्रयोदश तु संप्रोक्ता द्वादसरिकीर्तिताः ॥ विंशच्चैव तथाध्या
याः द्वादशे मुनिसत्तमाः ॥ १६ ॥ एवं संख्या समाख्याता पुराणेस्मिन्महात्मना ॥ अष्टादशस
हस्री सा संख्या या परिकीर्तिता ॥ १७ ॥ ह्यार एप वासिनः ॥ ब्रह्मणात्र समादिष्टश्चक्रे दत्वाम
नो मयं ॥ सर्गश्च प्रतिसर्गश्च वंशो मन्वंतराणि च ॥ वंशानुचरितं चैव पुराणं पंचलक्षणं ॥
१८ ॥ निर्गुणा या सदा नित्या व्यापका विकृता शिवा ॥ योगगम्याखिलाधारा तुरीया या च
संस्थिता ॥ १९ ॥ तस्यास्तु सात्विकी शक्ती राजसी नाम सी तथा ॥ महालक्ष्मी सरस्वती सोम

हाकालीनितास्त्रयः ॥२०॥ तासांनिसृष्टानां शक्तीनां देहोगीकारजन्मनः ॥ सृष्ट्यर्थं च समा
रंभातः सर्गः शास्त्रविशारदैः ॥२१॥ हरिद्रुहिणरुद्राणां समुत्पत्तिस्ततः स्मृता ॥ पालन
नोत्पत्तिनाशार्थं प्रतिसर्गः स्मृतो हि सः ॥२२॥ सोमसूर्योद्भवानां हि राज्ञां वंशप्रकीर्त्तनं ॥
हिरण्यकश्यपादीनां वंशास्ते परिकीर्त्तिताः ॥२३॥ स्वायंभुवप्रमुख्यानां मनूनां परिव
र्णनं ॥ कालसंख्या तथा तेषां तत्तन्मन्वंतराणि वै ॥२४॥ पंचलक्षणयुक्तानि भवंति मुनि
सत्तमाः ॥ सपादलक्षं च तथा भारतं मुनिना कृतं ॥२५॥ इतिहासमिति प्रोक्तं पंचमं वेद
संमतं ॥ ॥शौनक उवाच॥ ॥कानि तानि पुराणानि ब्रूहि सूत सविस्तरात् ॥ कति
संख्यानि सर्वज्ञ श्रोतुं कामा वयं त्विह ॥२६॥ कलिकालविभीतास्मन्नैमिषारण्यवासि
नः ॥ ब्रह्मणा त्वसमादिष्टा चक्रं दत्ता मनोमयं ॥२७॥२८॥२९॥ कथितं केन नः सर्वान् गच्छं

तु चक्रपृष्ठतः ॥ ननेमिः शीर्यते यत्र स देशः पावनः स्मृतः ॥३०॥ कलेस्तत्र प्रवेशो न कदाचित्सं
भविष्यति ॥ तावत्तिष्ठंतु तत्रैव यावत्सत्ययुगं पुनः ॥३१॥ तच्छ्रुत्वा वचनं तस्य गृहीत्वा तत्क्र
यांगकं ॥ चालयन्निर्गतास्तूर्णं सर्वे देशविवक्षया ॥३२॥ भ्रामात्रे चालयच्चक्रे नेमिः शीर्णोन
पत्रपत ॥ तेनेदं नैमिषं प्रोक्तं क्षेत्रं परमपावनं ॥३३॥ कलिः प्रवेशो नैवात्र तस्मात्स्थानं कृतं
मया ॥ मुनिभिः सिद्धसंघैश्च कलिभीतैर्महात्मभिः ॥३४॥ पशुहीना कृता यज्ञाः पुरोडाशादि
भिः किल ॥ कालातिवाहनं कार्यं यावत्सत्ययुगागमः ॥३५॥ भाग्ययोगेन संप्राप्तस्त्वं चापि
सूत सर्वथा ॥ कथयाद्य पुराणं हि पावनं ब्रह्मसंमतं ॥३६॥ सूत शृणुध्वमृषयः सर्वे वक्ष्या तं मति
मानथ ॥ नित्यापारायणं नूनमेकचित्तास्तथैव च ॥३७॥ तं सूत नवदीर्घायुस्तापत्रयवि
वर्जितैः ॥ कथ्यपाद्यपुराणं हि पुण्यं भागवतं शिवं ॥३८॥ यत्र धर्मार्थकामानां वर्णनं विधिपूर्वकं

भा॰प्र॰ ५ विद्यां प्राप्य तथा मोक्षः कथितो मुनिना किल ॥३९॥ द्वैपायनेन मुनिना कथितं यच्च पावनं तत्प्रा अ॰२
मोक्ष्यं सूत कथां श्रुत्वा मनोरमां ॥४०॥ सकलगुणगणानामेकपात्रं पवित्रमखिलभुवन
मातुः शर्मदं यच्चरित्रं निखिलकलिधुराणां नाशहृत्कामदं च प्रकटय भगवानामयुक्तं पु
राणं ॥४१॥ सूत उवाच ॥ ॥ शृण्वंतु संप्रवक्ष्यामि पुराणानि मुनीश्वराः ॥ यथाश्रुतानि तत्त्वे
न व्यासात्सत्यवतीसुतात् ॥१॥ मद्वयं भद्वयं चैव ब्रत्रयं वचतुष्टयं ॥ अनापलिंगकूस्कं च पुरा
णानि पृथक् पृथक् ॥२॥ चतुर्दशसहस्रं च मत्स्यमाद्यं प्रकीर्तितं ॥ तथा नवसहस्रं तु मार्कं
डेयं महाद्भुतं ॥३॥ चतुर्दशसहस्राणि तथा पंचशतानि च ॥ भविष्यं परिसंख्यातं मुनिभिस्त
त्त्वदर्शिभिः ॥४॥ अष्टादशसहस्रं वै पुण्यं भागवतं किल ॥ तथा चायुतसंख्यातं पुराणं ब्रह्मसं राम ५
ज्ञितं ॥५॥ द्वादशैव सहस्राणि ब्रह्माण्डं च शताधिकं ॥ तथाष्टादशसाहस्रं ब्रह्मवैवर्त्तमुच्य

ते ॥६॥ अयुतं वामनाख्यं च वायव्यं षट्शताधिकं ॥ त्रयोविंशतिसाहस्रं वैष्णवं परमामृतं ॥७॥
चतुर्विंशतिसाहस्रं वाराहं परमाद्भुतं ॥ षोडशैव सहस्राणि पुराणमग्निसंज्ञितं ॥८॥ पंचविंश
तिसाहस्रं नारदीयं परं मतं ॥ पंचपंचाशसाहस्रं पद्माख्यं विपुलं मतं ॥९॥ एकादशसहस्राणि
लिंगाख्यं चातिविस्तरं ॥ एकोनविंशत्साहस्रं गारुडं हरिभाषितं ॥१०॥ सप्तदशैव साहस्रं
पुराणं कूर्मभाषितं ॥ एकाशीतिसहस्राणि स्कंदाख्यं परमाद्भुतं ॥११॥ पुराणसंख्या चाख्या
ता विस्तरेण मयानघ ॥ तथैवोपपुराणानि शृण्वंतु ऋषिसत्तमाः ॥१२॥ सनत्कुमारं प्रथमं
नारसिंहं ततः परं ॥ नारदीयं शिवं चैव दुर्वाससमनुत्तमं ॥१३॥ कापिलं मानवं पुण्यं तथा
चोशनसं स्मृतं ॥ वारुणं कालिकाख्यं च सांबं नंदिकृतं शुभं ॥१४॥ सौरं पाराशरं प्रोक्तं आ
दित्यं चातिविस्तरं ॥ माहेश्वरं भागवतं वासिष्ठं च सविस्तरं ॥१५॥ एतान्युपपुराणानि कथि

तानि माहात्म्यमिति ॥ अष्टादश पुराणानि कृत्वा सत्यवतीसुतः ॥ १६ ॥ भारताख्यानमखिलं चक्रे
तदुपबृंहितं ॥ मन्वंतरेषु सर्वेषु द्वापरे द्वापरे युगे ॥ १७ ॥ प्रादुः करोति धर्मार्थी पुराणानि यथा
विधि ॥ द्वापरे द्वापरे विष्णुर्व्यासरूपेण सर्वदा ॥ १८ ॥ वेदमेकं सुबहुधा कुरुते हितकाम्यया
॥ अल्पबुद्धीनल्पायुषो विप्रान्ज्ञात्वा कलावथ ॥ १९ ॥ पुराणसंहितां पुण्यां कुरुते सौ युगे
युगे ॥ स्त्रीशूद्रद्विजबंधूनां न वेदश्रवणं स्मृतं ॥ २० ॥ तेषामेव हितार्थाय पुराणानि कृतानि
वै ॥ ॥ मन्वंतरे सप्तमेऽत्र शुभे वैवस्वताभिधे ॥ २१ ॥ अष्टाविंशतिमे प्राप्ते द्वापरे मुनिस
त्तमाः ॥ व्यासः सत्यवतीसूनुर्गुरुर्मे धर्मवित्तमः ॥ २२ ॥ एकोनत्रिंशे संप्राप्ते द्रौणिर्व्यासो
भविष्यति ॥ अतीतास्तु तथा व्यासाः सप्तविंशतिरेव च ॥ २३ ॥ पुराणसंहितास्तैस्तु कथिता
स्तु युगे युगे ॥ २४ ॥ ऋषय ऊचुः ॥ ॥ ब्रूहि सूत महाभाग व्यासाः पूर्वयुगोद्भवाः ॥ वक्त

रस्तु पुराणानां द्वापरे द्वापरे युगे ॥ २५ ॥ द्वापरे प्रथमे व्यस्ताः वेदाः स्वयं स्वयंभुवा ॥ प्रजापतिर्द्वि
तीये तु द्वापरे व्यासकार्यकृत् ॥ २६ ॥ तृतीये चोशना व्यासः चतुर्थे तु बृहस्पतिः ॥ पंचमे सविता
व्यासः षष्ठे मृत्युस्तु द्वापरे ॥ २७ ॥ अथर्वा सप्तमे प्राप्ते वशिष्ठश्चाष्टमे स्मृतः ॥ सारस्वतस्तु नवमे त्रि
धामा दशमे तथा ॥ २८ ॥ एकादशे तु त्रिवृतो भारद्वाजस्ततः परं ॥ त्रयोदशे चांतरिक्षो धर्मश्चा
पि चतुर्दशे ॥ २९ ॥ अत्रिरेकोनविंशे त्र्यारुणः पंचदशे षोडशे तु धनंजयः ॥ सप्तदशे मेधाति
थिर्व्रती ह्यष्टादशे तथा ॥ ३० ॥ अत्रिरेकोनविंशेऽथ गौतमस्तु ततः परं ॥ उत्तमश्चैकविंशेऽथ हर्य
त्मा परिकीर्तितः ॥ ३१ ॥ वेणुर्वाजश्रवाश्चैव सोमो मुष्मायणस्तथा ॥ तृणबिंदुस्तथा व्यासो भा
र्गवस्तु ततः परं ॥ ३२ ॥ ततो शक्तिर्जातुकर्णः कृष्णद्वैपायनस्ततः ॥ अष्टाविंशावतिस्त्वेषु सर्व
पं कथिता या मया श्रुता ॥ ३३ ॥ कृष्णद्वैपायनात्प्राप्तं पुराणं तु मया श्रुतं ॥ श्रीमद्भागवतं पुण्यं सर्व

दुःखौघनाशनं ॥३४॥ कामदं मोक्षदं चैव वेदार्थपरिबृंहितं ॥ सर्वागमं भागवतं पुण्यं सर्वदुःखौ
घनाशनं ॥३४॥ कामदं मोक्षदं चैव वेदार्थपरिबृंहितं ॥ सर्वशास्त्ररसारामं मुमुक्षूणां सदाप्रियं ॥
॥३५॥ व्यासेनतत्कृताथशुभंपुराणंशुकायपुत्रायमहात्मनेयत् ॥ वैराग्ययुक्तायपवित्रवेवि
ज्ञायपौराणिसमुद्भवाय ॥३६॥ श्रुतंमयातत्रतथागृहीतंयथार्थवत्व्याससमुखात्मुनीन्द्राः ॥
पुराणगुह्यंसकलंसमस्तंनोगुरोःप्रसादात्करुणानिधेश्च ॥३७॥ सूतेनपृष्टःसकलंजगादपु
राणगुह्यंद्वैपायनस्तदा ॥ अयोनिजेनाद्भुतबुद्धिनावैश्रुतंमयातत्रमहाप्रभावं ॥३८॥ श्रीमद्भा
गवतामरांघ्रिपफलास्वादादरःसत्तमःसंसारार्णवदुर्विगाहसलिलंसंतर्तुकामःशुकः ॥ ना
नाख्यानरसालयंश्रुतिसमंप्रेम्णाश्रृणुयाद्भक्तिलनद्भुतानविमुच्यतेकलिभयादेवंविधःकः
क्षितौ ॥३९॥ पापीयानपिवेदधर्मरहितोस्वाचारहीनोन्तरागेव्याजेनापिशृणोतियःपरमि

दंश्रीमत्पुराणोत्तमं ॥ भुक्त्वाभोगकलापकंक्षितितलेचान्तेपदंवाञ्छितंप्राप्नोतिनिनसंशयंभगवति
नाम्नांकिन्नेसुदरं ॥४०॥ यानिर्गुणाहरिहरादिभिरप्यलभ्याविद्यासतांप्रियतमाथसमाधिगं
म्या ॥ सातस्यचित्तकुहरेप्रकरोतिवासंयःसंशृणोतिसततंचसतीपुराणं ॥४१॥ संप्राप्यमा
नुषभवंसकलांगयुक्तंपोतंभवार्णवजलोत्तरणायकामं ॥ संप्राप्यवाचकमहोनशृणोति
मूढोसावंचितोत्रविधिनासुखदंपुराणं ॥४२॥ संप्राप्यकर्णयुगलंपटुमानुषत्वेरागीशृणोति
सततंचपरापवादान् ॥ सर्वार्थदंरसनिधिंविमलंपुराणंनष्टोनुकिंनशृणुतेनुविमंदबुद्धिः ॥
४३॥ ॥इतिश्रीभगवतीपुराणेतृतीयोध्यायः ॥३॥ ॥ऋषयऊचुः ॥ ॥सौ
म्यव्यासस्यभार्यायांकस्यांजातःसुतःशुकः ॥ कथंवाकीदृशःकामंपाठितोयंसुसंहितां ॥१
अयोनिजःश्रुतःपूर्वंशुकोनाममहातपाः ॥ कथंनिजस्त्वयाप्रोक्तस्तथावारणिजःशुकः ॥ संदेहो

स्ति महात्म्यं त्वत्र कथयाद्य महामते ॥२॥ गर्भयोगीश्वरः पूर्वं शुको नाम महातपाः ॥ कथं च प
ठितं तेन पुराणं ब्रूहि विस्तरं ॥३॥ सूत उवाच ॥ पुरा सरस्वतीतीरे व्यासः सत्यवतीसुतः ॥
आश्रमे कलविंकौ तु दृष्ट्वा विस्मयतां गतः ॥४॥ जातमात्रं शिशुं नीडे मुक्तमंडान्मनोहरं ॥ ता
भ्यां संशुश्रूषमाणं पिच्छांकुरविराजितं ॥५॥ तौ तु भक्ष्यार्थमसक्तं मग्नौ श्रमपरायणौ ॥ शिशोश्च
चुंचुपुटे भक्ष्यं क्षिपंतौ च पुनः पुनः ॥६॥ अंगेनांगानि बालस्य घर्षयंतौ मुदान्वितौ ॥ चुंबंतौ च मु
खं प्रेम्णा कलविंकौ शिशोः शुभे ॥७॥ वीक्ष्य प्रेमाद्भुतं कर्म बालेभ्यश्चटकयोस्तथा ॥ व्यासश्चि
तातुरः कामं मनसा समचिंतयत् ॥८॥ तिर्यंचानामपि प्रेम पुत्रे समभिलक्ष्यते ॥ किं चित्रं य
न्मनुष्याणां सेवाफलमभीप्सतां ॥१०॥ अथवा वार्द्धके मामेष परिचर्यां करिष्यति ॥ पुत्रः पर
मधर्मिष्ठः पुण्यार्थं किल वर्तते ॥११॥ अर्जयित्वाथवा द्रव्यं पित्रोः समर्पयिष्यति ॥ अथवा

मे तेन कार्याणि करिष्यति यथाविधि ॥१२॥ कथं वा वंगपाश्चार्द्धं गत्वा संवितरिष्यति ॥ नीलो
त्सर्गं च विधिवन्मम करिष्यति बालकः ॥१३॥ अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ॥ पुत्र ॥
संसारेत्र समाख्यानं मुख्यानामुत्तमं सुखं ॥ पुत्रगात्रपरिष्वंगः लालनं च विशेषतः ॥१४
अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च । पुत्रादनंतरं नास्ति परलोकस्य साधनं ॥१५॥
मन्वादिभिश्च मुनिभिः धर्मशास्त्रेषु भाषितं । पुत्रवान्स्वर्गमाप्नोति निपुत्रस्तु कथं च ने
१६ ॥ दृष्टांतं तत्र प्रत्यक्षं चानुमानेन साधनं ॥ पुत्रवान्मुच्यते पापात् आमपाकं च शा
ष्वतं ॥१७॥ आतुरो मृत्युकालेपि भूमिशय्यागतो नरः ॥ करोति मनसा चिंतां दुःखितः पुत्रवर्जि
तः ॥१८॥ धनं मे विपुलं गेहे पात्राणि विविधानि च ॥ मंदिरं सुंदरं चेतत्कोस्य स्वामी भविष्यति ॥
१९॥ मृत्युकाले मनस्तस्य दुःखेन भ्रमते पतः ॥ अंते सेस्य दुर्गतिर्नूनं भ्रांतचित्तस्य सर्वदा ॥२०॥

ना.प्र. एवं बहुविधां चिंतां कृत्वा सत्यवतीसुतः॥ निश्वस्य बहुधा चोच्चैर्विमनाः संबभूव ह॥२१॥ क्रियार्थमि
९ न्नसामर्थ्यं कृत्वा सत्यवतीसुतः॥ निश्वस्य बहुधा चोच्चैर्विमनाः स तपसि निश्चयं॥ जगाम च तपस्क
र्तुं मेरुपर्वतसन्निधौ॥२२॥ मनसा चिंतयामास कं देवं समुपास्महे॥ वरप्रदाननिपुणं वांछित
थप्रदं तथा॥२३॥ विष्णुं रुद्रं सुरेंद्रं वा ब्रह्माणं वा दिवाकरं॥ गणेशं कार्त्तिकेयं वा पावकं वरुणं
तथा॥२४॥ एवं चिंतयतस्तस्य नारदो मुनिसत्तमः॥ यदृच्छया समायातो वीणापाणिः समाहितः
॥२५॥ एवं चिंतयतस्तस्य नारदो मुनिसत्तमः॥ तं दृष्ट्वा परमप्रीतो व्यासः सत्यवतीसुतः॥२६॥
कृत्वार्घमासनं दत्वा पप्रच्छ कुशलं मुनिः॥ कृत्वा कुशलप्रश्नं तु पप्रच्छ मुनिसत्तमः॥ चिंतातुरोसि
कस्मात्त्वं द्वैपायन वदस्व मे॥२७॥ व्यास उवाच॥ ॥अपुत्रस्य गतिर्नास्ति न सुखं मानसे तथा राम.
॥तदर्थं दुःखितश्चाहं चिंतयामि पुनः पुनः॥२८॥ तपसा तोषयाम्यद्य कं देवं वांछितप्रदं॥ इति ९

चिंतापरोस्म्यद्य त्वामहं शरणं गतः॥२९॥ सर्वज्ञोसि मुने त्वं वै कथयाशु कृपानिधे॥ कं देवं शरणं या
मि यो मे पुत्रं ददाति हि॥३०॥ सूत उवाच॥ ॥इति पृष्टस्तदा व्यासेन नारदो वेदवित्मुनिः॥ उवाच प
रमप्रीतः कृष्णं प्रति महामनाः॥३१॥ पाराशर्य महाभाग यत्त्वं पृच्छसि मामिह॥ तमेवार्थं पुरा पृ
ष्टः पित्रा मे मधुसूदनः॥३२॥ ध्यानस्थं च हरिं दृष्ट्वा पिता मे विस्मयं गतः॥ पप्रच्छ तं देवेशं श्री
नाथं जगतः पतिं॥३३॥ कौस्तुभोद्भासितं दिव्यं शंखचक्रगदाधरं॥ पीतांबरं चतुर्बाहुं श्रीवत्स
स्य चिह्नितोरसं॥३४॥ कारणं सर्वलोकानां देवदेवं जगद्गुरुं॥ वासुदेवं जगन्नाथं तप्यमानं
महत्तपः॥३५॥ ब्रह्मोवाच॥ ॥देवदेव जगन्नाथ भूतभव्यभवत्प्रभो॥ तपश्चरसि कस्मा
त्त्वं ध्यायसि च जनार्दन॥३६॥ विस्मयोयं ममात्यर्थं त्वं सर्वजगतां प्रभुः॥ ध्यानयुक्तोसि देवेश
किं चित्रमतः परं॥३७॥ त्वन्नाभिकमलाज्जातः कर्ताहमखिलस्य च॥ त्वत्तः कोप्यधिकोप्यस्ति

देवो ब्रूहि रमापते ॥३८॥ जानाम्यहं जगन्नाथ त्वमादिः सर्वकारणं ॥ कर्त्ता पालयिता हन्तासि
समर्थः सर्वकार्यकृत् ॥३९॥ इच्छया ते महाराज सृजाम्यहमिदं जगत् ॥ हरः संहरते काले सोपि ते
वशगः सदा ॥४०॥ सूर्यो भ्रमति चाकाशे वायुर्वाति शुभाशुभः ॥ अग्निस्तपति पर्जन्यो वर्ष
ति च तदाज्ञया ॥४१॥ त्वं च ध्यायसि कं देवं संशयोयं महान्मम ॥ त्वत्परं नैव पश्यामि देवं वै भु
वनत्रये ॥४२॥ कृपां कृत्वा वदस्वाद्य भक्तोस्मीति वसुव्रत ॥ महतां नैव गोप्यं हि प्रियेपि किंचिदि
ति स्मृतिः ॥४३॥ तच्छ्रुत्वा वचनं तस्य हरिराह प्रजापतिं ॥ शृणुष्वेकमना ब्रह्मन्प्रब्रवीमि मनो
गतं ॥४४॥ अहं त्वं शंकरश्चैव स्थितिसृष्ट्यन्तकारणं ॥ जानंति च जनाः सर्वे सदेवासुरमानु
षाः ॥४५॥ स्रष्टा त्वं पालकश्चाहं हरः संहारकारकः ॥ कृता केनेति संतर्कः क्रियते वेदपारगा राम॰
ः ॥४६॥ जगत्संजनने शक्तिस्त्वयि विन्यस्ति राजसी ॥ सात्विकी मयि रुद्रे च तामसी परिकी १०

र्त्तिता ॥४७॥ तया विरहितस्त्वं हि विद्येतत्कारणे प्रभुः ॥ नाहं पालयितुं शक्तः संहर्त्तुं नापि शंक
रः ॥४८॥ तदधीना वयं सर्वे वर्त्तामः सततं विभो ॥ प्रत्यक्षे च परोक्षे च दृष्टान्तं शृणु सुव्रत ॥४९
मम भार्या विरञ्चेहा महालक्ष्मीति विश्रुता ॥ स्वाधीनपतिका सा च तयाऽधीनो ह्यहं सदा ॥५०
कदाचित्कोपमायाति तुष्टिं याति कदाचन ॥ तुष्टायां सुखमस्यां च दुःखं रोषसमुद्भवे ॥५१॥
न मेस्ति चापरा भार्या कामिन्यातिप्रिये न च ॥ वशवर्ती सदैवाहं वर्त्तामि चतुरानन ॥५२॥
तथा त्वमपि साविन्याः पार्वत्याः शंकरस्तथा ॥ तच्चित्तवर्त्तिनः कामं वयं च वशवर्त्तिनः ॥५३
सर्वे वयं पराधीनाः प्रत्यक्षेणोपलक्ष्यते ॥ परोक्षं शृणु वेदज्ञ यथावत्कथयामि ते ॥५४॥ स्व
पामि शेषपर्यंके परतंत्रो न संशयः ॥ तदधीनो तथान्निष्टे काले कालवशं गतः ॥५५॥ तप
श्चरामि सततं पराधीनो ह्यहं सदा ॥ कदाचित्सह लक्ष्म्या वै विहरामि यथासुखं ॥५६॥ क

ना·प्र· दाचिद्दानवैः सार्द्धं संग्रामं न करोम्यहं ॥ दारुणं देहदमनं सर्वलोकभयंकरं ॥५१॥ प्रत्यक्षं त
११ व धर्मज्ञ तस्मिन्नेकार्णवे तदा ॥ पंचवर्षसहस्राणि बाहुयुद्धं मया कृतं ॥५२॥ तौ कर्णमल
जौ दुष्टौ दानवौ मदगर्वितौ ॥ हंतुकामौ सुतपापौ निहतौ मधुकैटभौ ॥५३॥ तदा त्वया किं न ज्ञा
तं सर्वकारणमद्भुतं ॥ मत्स्यकच्छपमहाभागयत्त्वं छसि पुनः पुनः ॥५४॥ यदीच्छया रूपो भूत्वा क्वचि
दस्मिन्महार्णवे ॥ कच्छपः कोलसिंहश्च वामनश्च युगेयुगे ॥५५॥ कस्यापि न प्रियं लोके तिर्यक्यो
निषु जन्म यत् ॥ नाभवं स्वेच्छया कामं वाराहादिषु योनिषु ॥५६॥ विहाय लक्ष्म्याः सह संविहारं को
याति मत्स्यादिषु हीनयोनिषु ॥ शय्यां च मुक्त्वा गरुडासनस्थः करोति युद्धं विपुलं च तत्र ॥५७॥
पुरा पुरस्तेऽजनि शिरो मदीयं गतं धनुर्ज्याप्रबलेन क्वापि ॥ ततस्त्वया वाजिशिरोऽपि छित्वा संयोजि ११
तं शिर्ष्णि विवरेण तत्र ॥५८॥ हयाननोऽहं परिकीर्तितश्च प्रत्यक्षमेतत्र च लोककर्त्तः ॥ विडंबने राम·

यत्किल लोकमध्ये सहेत कोऽस्यात्मकरोहि यः स्यात् ॥५९॥ इति श्रीभगवती भागवते प्रथमस्कंधे
चतुर्थोध्यायः ॥४॥ ॥ ऋषय ऊचुः ॥ सूतास्माकं मनः कामं मग्नं संशयसागरे ॥ तयोक्तं महदा
श्चर्यं जगद्विस्मयकारकं ॥१॥ यन्मूर्धनि मधस्यापि गतं देहान्महात्मनः ॥ हयग्रीवास्तथा जातः स
र्वकर्त्ता जनार्दनः ॥२॥ वेदेपि स्तुतो नित्यं देवैर्देवाः सर्वैः परमाश्रयाः ॥ आदिदेवो जगन्नाथः सर्वकारण
कारणं ॥३॥ तस्याप्यहूनेश्छिन्नं दैवयोगात्कथं न तद् ॥ तत्सर्वं कथयाशु त्वं विस्तरेण महामते ॥४॥ सू
त उवाच ॥ ॥ श्रुणुध्वं तु मुनयः सर्वे सावधानाः समंततः ॥ चरितं देवदेवस्य विष्णोरमिततेजसः ॥५
कदाचिद्दारुणं युद्धं कृत्वा देवः सनातनः ॥ दशवर्षसहस्राणि परिश्रांतो जनार्दनः ॥६॥ समे देशे
श्च भेस्थानि कृत्वा पद्मासनं विभुः ॥ अवलंब्य धनुः सार्द्धं कंठदेशे धरास्थितं ॥७॥ दत्वा भारं धनुःको
ट्यां निद्रामापार माधवः ॥ श्रांतत्वाद्देवयोगत्वाज्जातस्तत्राति निद्रितः ॥८॥ तदा काले न कियता

भा॰प्र॰ देवाः सर्वे सवासवाः॥ ब्रह्मेशसहिताः सर्वे यज्ञं कर्तुं समुद्यताः॥९॥ गताः सर्वे तु वैकुंठं देव

१२ देवं जनार्दनं॥ देवकार्यार्थसिध्यर्थं मखानामधिपं प्रभुं॥१०॥ अदृष्ट्वा तं तदा तत्र ज्ञानदृष्ट्या वि

लोकयन्॥ यत्रास्ते भगवान्विष्णुर्जग्मुस्तत्र तदा सुराः॥११॥ ददृशुस्ते तदासीनं योगनिद्रावशं

गतं॥ विचेतनं विभुं विष्णुं तत्रासांचक्रिरे सुराः॥१२॥ स्थितेषु तेषु देवेषु निद्रासुप्ते जगत्प्रभो॥

चिंतामापुः सुराः सर्वे ब्रह्मरुद्रपुरोगमाः॥१३॥ तानुवाच तदा शंभुर्निद्राभंगो ऽत्र दूषणं॥ का

र्यं चैव प्रकर्तव्यं किं कर्तव्यं सुरोत्तमाः॥ निद्राभंगः कथं कार्यः चिंतयंतु सुराः स्वयं॥१४॥ तमुवाच तदा

ब्रम्ही ब्रह्मणा प्रेरिता विना॥ भक्षणार्थं तदा तस्य धनुषोऽग्रं धरास्थितं॥ गुणभक्षणादेव भंगो निद्राभंगो न दूषणं

कार्यं चैव प्रकर्तव्यं यज्ञस्य सुरसत्तम॥१५॥ भक्षिते ऽग्रे पदा विस्फुरन्मिष्यति शरासनं॥ तदा निद्रावि

मुक्तोऽसौ देवो भविष्यति॥१७॥ देवकार्यं तदा सर्वं भविष्यति न संशयः॥ ब्रम्हीं च संदिदेशाथ देवदेवः १२

सनातनः॥१८॥ तमुवाच तदा सर्वं भविष्यति ब्रम्ही देवदेव रमापते॥ निद्राभंगं कथं देव करोमि

जगतो गुरोः॥१९॥ निद्राभंगः कथं छेदः दंपत्योः प्रीतिभेदकः शिशुमातृविभेदश्च ब्रह्महत्यासमं स्मृ

तं॥२०॥ तत्कथं देवदेवस्य करोमि सुखनाशनं॥ किं फलं भक्षणाद्देव येन पापं करोम्यहं॥२१॥

सर्वो हि स्वार्थवशो लोकः करोमि पातकं किल॥ तस्मादहं करिष्यामि स्वार्थे चेन्मम भक्षणे॥२२

ब्रम्होवाच॥ ॥वयं भागं करिष्यामिमखमध्ये यथा शृणु॥ तेन त्वं कुरु कार्यं नः विष्णुं बोधय

नाचिरं॥२३॥ होमकर्मणि पार्श्वे यद्धव्यं हानासं पतिष्यति॥ तं ते भागं विजानीहि कुरु कार्यं त्वरान्वि

तं॥२४॥ सूत उवाच॥ ॥इत्युक्ता ब्रह्मणा ब्रम्ही धनुषोऽग्रं त्वरान्विता॥ चखादसंस्थितं भूमौ

विमुक्ता ज्या तदाभवत्॥२५॥ विमुक्ता चापमग्रं चापं मुक्ता कोटिस्तथोत्तरा॥ शब्दः समभवत्

घोरस्तेन त्रस्ताः सुरास्तदा॥२६॥ ब्रह्मांडं क्षुभितं सर्वं वसुधा कंपिता पुनः॥ समुद्राश्च समुद्वि

भा॰ प्र॰ ग्रास्त्रेषु च जलं जंतव ॥ २७ ॥ ववुर्वातास्तथा चोग्राः पर्वताश्च चकंपिरे ॥ उल्कापाता महोत्पाता
१३ बभूवुर्दुःखदर्शिनः ॥ २८ ॥ दिशो घोरतराश्चासन् सूर्योप्यस्तं गतो यथा ॥ चिंतामापुः सुराः सर्वे
किं भविष्यति दुर्दिने ॥ २९ ॥ एवं चिंतयतस्तस्य मूर्ध्नि छिन्नोः सकुंडलं ॥ गतं क्वापि समुकुटं देवदे
वस्य तापसः ॥ ३० ॥ अंधकारे तमो घोरे व्याप्ते ब्रह्मा हरस्तदा ॥ शिरोहीनं शरीरं च ददृशाते विलक्ष
णं ॥ ३१ ॥ दृष्ट्वा कबंधं विष्णोस्ते विस्मितासुरसत्तमाः ॥ चिंतासागरमग्नाश्च रुरुदुः शोककर्शिता
३२ ॥ हा नाथ किं प्रभो जातमसद्भुतममानुषं ॥ वेत्तासि सर्वदेवानां देवदेव सनातन ॥ ३३ ॥ मायेयं
कस्य देवस्य यातेयं शिरोहृतं ॥ अच्छेद्यस्त्वमभेद्योसि अमरोप्यसि सर्वदा ॥ ३४ ॥ एवं गते त्वयि विभो
नश्यंते च देवताः ॥ कीदृशास्त्वयि नः स्नेहः स्वार्थेनैव रुदामहे ॥ ३५ ॥ नायं विघ्नः कृतो दैत्यैर्न गंधर्वै राम॰
र्न राक्षसैः ॥ दैवैरेव कृतः स्वामिन् दूषणं कस्य मियते ॥ ३६ ॥ अपराधिनः सुराः सर्वे किं कुर्मः क्व व्रजा १३

म च ॥ शरणं नैव देवेशासुराणां मूढचेतसां ॥ ३७ ॥ न चैषा सात्विकी माया राजसी न च तामसी ॥ य
या छिन्नं शिरस्ते धमायेश स्य जगद्गुरोः ॥ ३८ ॥ क्रंदमानांस्तदा दृष्ट्वा देवान् शिवपुरोगमान् ॥ बृ
हस्पतिस्तदोवाच शाम्यन्न वेदवित्तमः ॥ ३९ ॥ रुदितेन महाभागाः क्रंदितेन तथापि किं ॥ उ
पायश्चात्र कर्तव्यः सर्वथा बुद्धिगोचराः ॥ ४० ॥ दैवं पुरुषकारश्च द्वावेव सदृशावुभौ ॥ उपायश्च
विधातव्यो दैवात्फलति सर्वथा ॥ ४१ ॥ इंद्र उवाच ॥ अवश्यमेव भोक्तव्यं कालेनापादितं च यत्
॥ कालेन प्राप्यते चापि शुभं वाप्यशुभं पुनः ॥ ४२ ॥ दैवमेव परं मन्ये धिक् पौरुषमनर्थकं ॥ विष्णोरपि
शिरश्छिन्नं सुराणामपि पश्यतां ॥ ४३ ॥ ब्रह्मोवाच ॥ हे देवा न सुरवदुःखांतं भोक्तव्ये नात्र संशयः ।
यथा कालवशात्कृत्तं शिरो मे शंभुना पुरा ॥ ४४ ॥ तथैव लिंगपातं च महादेवस्य शापतः ॥ तथै
वाद्य हरेस्तरुपितितं लवणांभसि ॥ ४५ ॥ सहस्रभगसंप्राप्तिः इंद्रस्यैव शचीपतेः स्वर्गाद्भ्रंशास्तु

भा॰ पु॰ १४ याबासः कमले मानसे सरे॥४६॥ एतेन दुःखसंभोक्तारः केन दुःखं न भुज्यते॥ संसारेस्मिन्म
हाभागास्तस्याच्छोकं भजंतु वै॥४७॥ चिंतयंतु महामायां विद्यां देवीं सनातनीं॥ सा विद्या स्मृति
नः कार्यं निर्गुणा प्रकृतिः पुरा॥४८॥ ब्रह्मविद्या जगद्धात्री सर्वेषां जननी तथा॥ यया सर्वमिदं व्याप्तं
त्रैलोक्यं सचराचरं॥४९॥ सूत उवाच॥ ॥इत्युक्तास्ते सुरास्ते ध्यानिमाना दिशा विदु॥ देहवेनच्छी
तान्यसुरकार्यार्थसिद्धये॥५०॥ ब्रह्मोवाच॥ स्तुवंतु परमां देवीं ब्रह्मविद्यां सनातनीं॥ गुणांगीर
च महामायां सर्वकार्यार्थसाधिनीं॥५१॥ तच्छ्रुत्वा वचनं तस्य देवाः सर्वांगसुंदराः॥ तुष्टुवुः शान्तिग
स्वांतं महामायां जगत्स्थितां॥५२॥ देवा ऊचुः॥ ॥नमो देवि महामाये विश्वोत्पत्तिकरे शिवे॥ नि
र्गुणे सर्वभूतेशे मातः शंकरकामदे॥५३॥ त्वं भूमिः सर्वभूतानां प्राणः प्राणवतां तथा॥ धीः राम॰
श्रीः कांतिः क्षमा शांतिः श्रद्धा मेधा धृतिः स्मृतिः॥५४॥ त्वमुद्गीथेर्धमात्रासि गायत्री व्याहृतिर १४

स्तथा॥ जया च विजया धात्री लज्जा कीर्तिस्पृहा दया॥५४॥ त्वमुद्गीथेर्धमात्रासि गायत्री व्याह
तिस्तथा॥ जया च विजया धात्री लज्जा कीर्तिः स्पृहा दया॥५५॥ त्वां संस्तुवाम भुवनत्रयसंविधान
दक्षां दयारसयुतां जननीं जनानां॥ विद्यां शिवां सकललोकहितां सदाद्रौ वाग्बीजवासनि
पुणां भवनाशकर्त्रीं॥५६॥ ब्रह्मा हरः शौरिरसहस्रनेत्रा वाग्वह्निसूर्यभुवनाधिनाथा
॥ते त्वत्कृताः किमिह देवमुख्याः मातस्त्वमेकास्यखिलं गमानां॥५७॥ सकलभुवनमेतत्कर्तु
कामा यदा त्वं सृजसि जननि देवा विष्णुरुद्राजमुख्यान्॥ स्थितिलयजननं तैः कारयस्येकरू
पा न खलु तव कथंचिद्देवि संसारलेशः॥५८॥ न ते रूपं चेदं सकलभुवने कोपि निपुणः न ना
मां संख्यां कथयितुमिह योग्योस्ति पुरुषः॥ अजाद्रीनामप्याकजितविभवा देवि मनसां
कथं पारावाराकजन्चतुरः स्यादितिमतिः॥५९॥ न देवानां कोपि भगवन्ति न वाद्यं च विभवं वि
जाना सेवास्मिन्निह भुवने कासि जननी॥ कथं चेदं विश्वं धरिवि जनयि चोकारणमहो न विभ

भा·म· म्रियमाणं चैवात्र निगमवचनं देवि विहितं ॥६०॥ निरीहा त्वं चास्मिन्निखिलजगतां कारणमहो न
१५ चित्रं किं चात्र भगवति मनो नो मथयति ॥६१॥ जनाजानासि त्वं किमपि ति विधास्येन द्विश्वमपर
सगुणा वापि सकलं न विघ्नो यं कश्चिद्विरचनकलातं त्र रथवा ॥६२॥ जनाजानासि त्वं किमिह जन
नी विक्षोः कहरणं न वा किं ज्ञाता विविदिषमिबलं चास्य सकलं ॥ न वा चाक्रीडे यं न व भगवति का
प्यज्ञजनता विमोहोपादेक निपुणगुणतामात्र रथवा ॥६३॥ उपेक्षं किं वा तव च सुरसमूहा
नि विषमं हरेम्ह धानां शंजनितमिदमाश्चर्यजनकं ॥ सुदुःखं मानः स्तव मसि च जननी छेद कुरा
ज्ञानजानीमो यापि विषय न विलंबः कथमसे ॥६४॥ सा ला दोषं सकलसुरसोसादितं देवि वि
ज्ञे किं वा विलीव मरजनितं दुःकृतं पातितं नो ॥ विश्लोवा किं सम रजनितः कोपि गवांति वेद्यः छे
त्तुंमानस्त्व वविजमितं नैव विघ्नो न भावे ॥६५॥ किं वा दैत्यैः समर विगतैस्तीर्थ देशो सुरं मेकर रामः
त्वो जाप्यस्व पजह वनं तोषिता देवि दक्षैः नो जानीमस्त्व वविजमितं सावगं मेभवानि द्रुष्टुं किं १५

वा विगतनिरसं वा सुरे वं विनोदः ॥६६॥ सिंधोः पुत्र्यारोपिता किं वा माद्येकस्मादेतां प्रेक्ष्ये सेना यडीनां ग
क्षंतव्यं ते स्वाशाया जापराधं चोत्थाप्येन मोदनां मा कुरु ॥६७॥ एते सुरास्त्वं सेतनं नमंति का जेश्रा
मुख्याः धूम्र पतिनम्र भावाः ॥ शोकार्णवान्तारय देवि देवान् दृष्ट्वाम्ब विद्धं सकलाधिनाथे ॥६८॥ ह
रेः कं गतं क्वापि न विप्रश्न माता नाम्नो स्त्र पायखलु जीवने घ्र ॥ प्रयेषा वुधाजीवनकर्म दृष्टा
त्वमेका जगज्जीवनेश्री भवानी ॥६९॥ सूत उवाच ॥ ॥ एवं स्तुता न हा देवी गुणातीता महेश्व
री ॥ दृसन्नापरमा माया वैदेत्सं गे स्वसामगैः ॥६९॥ वाचं न तो वाणी चाराय खाशारीरिणी ॥ दे
वान्मतिसुष्ट्रशाद्वाजनानंदकरी शुभा ॥७०॥ मा कुरुध्वं सुराश्चिंतां स्वस्वास्तिष्ठंतु चामराः ॥ स्व
ताहं निगमैः कामं संतुष्टास्मिन संशयः ॥७१॥ यः पुमान् मानुषे लोके स्तोष्यामामकीं शुभा
पठिष्यति सदा भक्त्या सकान्ति कामानवाप्स्यसि ॥७२॥ शृणोति वा स्तोत्रमिदं मदीयं भक्त्यान्वि
कालं सततं न रोयः ॥ विमुक्त दुःखः स भवेत्सुखी च वेदेकमेतत्त्वनु वेदतुल्यं ॥७३॥ शृणोति का

भा॰प्र॰ १६ रणं चान्यप्रकृतं चैव नंदरे ॥ अकारणं [illegible]कौ च संसारेऽत्र भवतीति ॥ ७४ ॥ तदर्धे त्वनयां विष्णुः संस्थि
तामतिकोपितां ॥ सहासवदनं वीक्ष्य तस्यास्तत्र मनोरमं ॥ ७५ ॥ तया ज्ञाता हरिर्नूनं मां हसति कथं त्विह
॥ विरूपं हरिणा दृष्टं मुखं मे केन हेतुना ॥ ७६ ॥ विना विकारेणा नाधकथं हास्यसंभवः ॥ सपत्नीवा
क्षतानि त्वमनोज्ञा वरवर्णिनी ॥ ७७ ॥ ततः कोपप्लुता जाता महालक्ष्मीः रामो गुणा ॥ तामसी तु त
दा शक्तिस्तस्या देहे समाविशत् ॥ ७८ ॥ केनचित् कालयोगेन देवकार्यार्थसिद्धये ॥ प्रविष्टा तामसी
शक्तिस्तस्या देहेऽतिदारुणा ॥ ७९ ॥ तामस्याविष्टदेहा सा चुकोपातिशयं तदा ॥ शनकैः समुवाच
त्वं पत त्वेदं शिरस्तव ॥ ८० ॥ स्त्रीस्वभावात् भाविनात्कालयोगाद्विरूपिणः ॥ अविचार्य पतिदारक्तः
तामसीशक्तियोगेन स्वसुखनाशनः ॥ ८१ ॥ सपत्नीसंभवं दुःखं वैधव्याद्धिकं त्विति ॥ विचिंत्य मनसे
त्युक्तः तामसीशक्तियोगतः ॥ ८२ ॥ अनृतं साहसं माया मूर्खत्वमतिलोभता ॥ अशौचं निर्दयत्वं च राम॰
स्त्रीणां दोषाः स्वभावजाः ॥ ८३ ॥ सशीर्षं वासुदेवं च करोम्यद्य यथा पुरा ॥ शिरो स चापवेगेन विम १६

ग्रंलवणं बुधौ ॥ ८४ ॥ अन्यच्च कारणं किंचिद्वक्ष्ये ते सुरसत्तमाः ॥ भवतां च मत्कार्यं चेत विष्यति न
संशयः ॥ ८५ ॥ पुरा दैत्यो महाबाहुर्हयग्रीवो ति विश्रुतः ॥ तपश्चकार सरस्वत्यास्तीरे परमदारुणं
८६ ॥ जपन्नेकाक्षरं मंत्रं मायाबीजात्मकं मम ॥ निराहारो जितात्मा च सर्वभोगविवर्जितः
८७ ॥ ध्यायन्मां तामसीशक्तिं सर्वभूषणभूषितां ॥ एवं वर्षसहस्रं स तेपे चक्रे सुदारुणं ॥ ८८ ॥ त
दाहं तादृशं रूपं कृत्वा तत्र समागता ॥ दर्शने पुरतस्तस्य ध्यातं तेन च यादृशं ॥ ८९ ॥ सिंहोपरि स्थि
ता तत्र तमवोच दयान्विता ॥ वरं ब्रूहि महाभाग ददामि तव सुव्रत ॥ ९० ॥ इति श्रुत्वा वचो देव्यं दा
नवः प्रेमपूरितः ॥ प्रदक्षिणाप्रणामं च चकार त्वरितस्तदा ॥ ९१ ॥ दृष्ट्वा रूपं मदीयं स प्रेमोत्फुल्लवि
लोचनः ॥ हर्षाश्रुपूर्णनयनस्तुष्टाव च समां तदा ॥ ९२ ॥ हयग्रीव उवाच ॥ नमो देवि महामाये सृ
ष्टिस्थितिलयकारिणि ॥ भक्तानुग्रहचतुरे कामदे मोक्षदे शिवे ॥ ९३ ॥ धरापस्तेजः पवनः खं पंचानां च

भा॰प्र॰ कारणं ॥ त्वं गंधरसरूपाणां कारणं स्पर्शशब्दयोः ॥ घ्राणं च रसना चक्षुस्त्वक् श्रोत्रमिंद्रिया
१७ णि च ॥ कर्मेंद्रियाणि चान्यानि त्वत्तः सर्वं महेश्वरि ॥ ९५ ॥ श्रीदेव्युवाच ॥ ॥ किं तेऽभिलषितं ब्रूहि ददामि
वांछितं च यत् ॥ परितुष्टास्मि भक्त्या ते तपसा चाद्भुतेन च ॥ ९६ ॥ हयग्रीव उवाच ॥ ॥ यथा मे मरणं
मातर्न भवेच्च तथा कुरु ॥ भवेयममरो योगी तथाजेयः सुरासुरैः ॥ ९७ ॥ श्रीदेव्युवाच ॥ जातस्य हि
ध्रुवं मृत्युर्ध्रुवं जन्म मृतस्य च ॥ मर्यादा चेदृशी लोके भवेच्च कथमन्यथा ॥ ९८ ॥ एवं त्वं निश्चयं कृत्वा
मरणे राक्षसोत्तम ॥ वरं वरय चेष्टं ते विचार्य मनसा किल ॥ ९९ ॥ हयग्रीव उवाच ॥ ॥ हयग्रीवाच्च मे
मृत्युर्नान्यस्माज्जगदंबिके ॥ इति मे वांछितं कामं पूरयस्व मनोगतं ॥ १०० ॥ श्रीदेव्युवाच ॥ ॥ गृ
हं गच्छ महाभाग कुरु राज्यं यथासुखं ॥ हयग्रीवादृते मृत्युर्न ते नूनं भविष्यति ॥ १ ॥ इति दत्वा व राम॰
रं तस्मादंतर्धानं गता तदा ॥ मुदं याः परमिकां प्राप्य सोऽपि स्वभवनं गतः ॥ २ ॥ स घोपीडति दुष्टात्मा मु १७

नीन्देवांश्च सर्वशः ॥ न कोऽपि विद्यते तस्य हंता वै भुवनत्रये ॥ ३ ॥ तस्माच्छीर्षं हयस्याद्य समुद्धृत्य मनोहरं ॥
देहेऽत्र विशिरे शौरेः त्वष्टा संयोजयिष्यति ॥ ४ ॥ हयग्रीवोऽथ भगवान् हनिष्यति तमासुरं ॥ पापिष्ठं दानवं
क्रूरं देवानां हितकाम्यया ॥ ५ ॥ सूत उवाच ॥ ॥ एवं सुरांस्तदा भाष्य स्व
वाणी विरराम ह ॥ देवास्तदाति संतुष्टास्त्वमूचुर्वै विश्वकर्मणं ॥ ६ ॥ देवा ऊचुः ॥ कुरु कार्यं सुराणां
त्वं विष्णोः शीर्षाभियोजनं ॥ दानवं वरदप्तं तं हयग्रीवो हनिष्यति ॥ ७ ॥ सूत उवाच ॥ ॥ इति श्रुत्वा
वचस्तेषां त्वष्टा चातित्वरान्वितः ॥ वाजिशीर्षं चकर्ताशु देवानां सुरसन्निधौ ॥ ८ ॥ विष्णोः शरीरे तेना
शु योजितं वाजिमस्तकं ॥ हयग्रीवो हरिर्जातो महामायाप्रसादतः ॥ ९ ॥ कियता तेन कालेन दानवो
मददर्पितः ॥ निहतस्तरसा संख्ये देवानां रिपुरोजसा ॥ १० ॥ य इदं शृणुयान्मर्त्य आख्यानं तत्तु विमा
नवाः ॥ सर्वदुःखविनिर्मुक्तास्ते भवंति न संशयः ॥ ११ ॥ महामायाचरित्रं च पवित्रं पापनाशनं ॥

भा.अ० पवतां श्रृण्वतां चैव सर्वसंपत्तिदायकं ॥१२॥ ॥इति श्रीभगवतीपुराणे हयग्रीवावतारकथनं ना
१८ म पंचमोध्यायः ॥५॥ ॥ऋषय ऊचुः॥ सौम्य पृच्छत पापोक्तं शौरेर्युद्धं महार्णवे ॥ मधुकैटभयोः
सार्द्धं वर्षपंचसहस्रकं ॥१॥ कस्मात्तौ दानवौ जातौ तस्मिन्नेकार्णवे जले ॥ मधुकैटभनामे· सार्द्धं वि
पंचसहस्रकं ॥ कदा वीर्यैर्दुराधर्षौ देवैरपि सुदुर्जयौ ॥२॥ कथं नाम मरौ जातौ कथं च हरिणा हतौ
॥ तदाचक्ष्व महाभाग चरितं परमाद्भुतं ॥३॥ श्रोतुकामा वयं सर्वे तिं च वक्ता बकुक्ष्मतः ॥ दैवाच्चात्र
वसंजातः संयोगश्च तथा वयोः ॥४॥ मूर्खेण सह संयोगो विषादपि सुदुष्करः ॥ विज्ञेन सह सं
योगः सुधारससमः स्मृतः ॥५॥ जीवंति पशवः सर्वे खादंति मोहयंति च ॥ जानंति विषयज्ञानं वि
वाप सुखमद्भुतं ॥६॥ न तेषां सदसज्ज्ञानं विवेको न च मोक्षदः ॥ तेपि पशुसमाज्ञेयाः येषां न श्रव राम·
णादरः ॥७॥ मृगाद्याः पशवः केचिज्ज्ञानं ति श्रवणसुखं ॥ अश्रोत्राः फणिनश्चैव मुकुनादहि नि १८

पातिताः ॥८॥ पंचानामिंद्रियाणां वै श्रेष्ठं श्रवणसुखं ॥ दर्शनि ॥ श्रवणाद्धस्त विज्ञानं दर्शनाच्चि
त्तरंजनं ॥९॥ श्रवणं त्रिविधं प्रोक्तं सात्विकं राजसं तथा ॥ तामसं च महाभाग सुतोक्तं निश्चया
न्वितं ॥१०॥ सात्विकं वेदशास्त्रादि साहित्यं चैव राजसं ॥ तामसं युद्धवार्त्ता च परदोषप्रकाशकं ॥
११॥ सात्विकं त्रिविधं प्रोक्तं प्रज्ञाविद्भिर्विपश्चितैः उत्तमं मध्यमं चैव तथैवाधममित्युत ॥१२॥
उत्तमं मोक्षफलदं स्वर्गदं मध्यमं तथा ॥ अधमं भोगदं प्रोक्तं निरयांतोदितं बुधैः ॥१३॥ साहित्यं
त्रिविधं प्रोक्तं स्वीयापांचोत्तमं स्मृतं ॥ मध्यमं वारयोषायां परोढायां तथाधमं ॥१४॥ तामसं त्रिवि
धं प्रोक्तं विद्वद्भिः शास्त्रदर्शिभिः ॥ आततायिनि युद्धं यत्तदुत्तममुदाहृतं ॥१५॥ मध्यमं चापि वि
द्वेषात्पांडवानां यथारिभिः ॥ अधमं निर्निमित्तं तु विवादे कलहे यथा ॥१६॥ तदत्र श्रवणं सुखं
पुराणस्य महामते ॥ बुद्धिप्रवर्द्धनं पुण्यं ततः पापप्रणाशनं ॥१७॥ तदाख्याहि महाभागकथां

भा·प्र० पौराणिकींशुभां॥कृतांद्वैपायनासूवंसर्वार्थसाधनींद्विजा॥१८॥सूतउवाच॥ ॥पूर्वंधन्यामहा
१७ भागाधन्योहंपृथिवीतलेयेषांश्रवणबुद्धिश्चममापिकथनेखिला॥१९॥पुराचैकार्णवेजातेविलीं
नेभुवनत्रये।शेषपर्यंकसुप्तेचदेवदेवेजनार्दने॥२०॥विष्णुकर्णमलोद्भूतौदानवौमधुकैट
भौ॥महाबलौचजातौवैविवृद्धौसागरेजले॥२१॥क्रीडमानौस्थितौतत्रविचरेनामितस्ततः
तावेकदामहामायौक्रीडासक्तौषांमहार्णवे॥२२॥चिंतामवापतुश्चित्तेभ्रातराविवसंस्थितौ।
नाकारणंविनाकार्यंसर्वत्रैषापरंपरा॥२३॥आधेयंतुविनाधारंनतिष्ठतिकथंचन॥आधारा
धेयभावस्तुनभाविच्छिन्नगोचरः॥२४॥क्वतिष्ठतिजलंचेदंसुरूपंचसुविस्तरं॥केनसृष्टंकथं
जातमस्माभिर्वाजलेस्थितौ॥२५॥आवांवाकथमुत्पन्नौकेनवोसादिताविव॥पितरौक्वगतौज्ञाने राम·
नास्तिकामंतथावयोः॥२६॥सूतउवाच॥ ॥एवंचिंतयमानौतौनजग्मतुर्विनिश्चयं॥उवाचकैट १७

भस्तत्रमधुंपार्श्वेस्थितंजले॥२७॥कैटभउवाच॥ ॥मधोवामत्रसानित्याशक्तिःकापिमहाबला
॥वर्ततेभ्रातरचलाकारणंसाहिमेमता॥२८॥तयाकृतमिदंतोयंतदाधारंचतिष्ठति।सएवप
रमादेवीकारणंचतथावयोः॥२९॥एवंचिंतयमानौतौविंनौविष्टौपदासुरौ।तदाकाशेस्थितंता
भ्यांवाग्बीजंसुमनोहरं॥३०॥गृहीतंचततस्ताभ्यांतथाभ्यासोदृढःकृतः॥तदासौदामिदंदृ
ष्टागगनेसगुणाकिंताभ्यांखेचोच्छिनाशुभा॥३१॥ताभ्यांविचारितंतत्रमंत्रोयंनात्रसंशयः॥तत्
पाध्यानमिदंदृष्टंगगनेसगुणाकिल॥३२॥निराहारौजितात्मानौतन्मनस्कौसमाहितौ॥
बभूवतुर्विचिंतेवंजपध्यानपरायणौ॥३३॥एवंवर्षसहस्रंतुताभ्यांनप्तंमहत्तपः॥प्रसन्नापरमा
शक्तिर्जातासातपसातयोः॥३४॥खिन्नौतौदानवौदृष्ट्वातपसिकृतनिश्चयौ॥याननयोरनुग्रहा
र्थंवैवागुवाचाशरीरिणी॥३५॥वरंवांवांछितंदैत्यौब्रूतांपरमसुंदरं॥ददामिपरितुष्टास्मिसुवयो

भा॰प्र॰ स्त्व१सा किल ॥३६॥ सूत उवाच ॥ इति श्रुत्वा च तां वाणीं दानवा वृत्र चतुस्त्वरा ॥ सेद्ध्वा पामरणां दे
१८ वी त्वं यदि हि सुव्रते ॥३७॥ वायुवाच ॥ ॥ वांछितं मरणं देवी ते न वनां मत्व सादरं ॥ अजेयो दे
व दैत्यैश्च नान्यैः तन्नात्र संशयः ॥३८॥ सूत उवाच ॥ ॥ इति दत्त्वा वरो देव्या दानवो मदर्पितो ॥ च
क्रतुः सागरे क्रीडां याद्गणैस्समन्वितो ॥३९॥ कालेन कियता विप्रा दानवास्मोपदर्छया ॥ दृष्टः
प्रजापतिर्ब्रह्मा पद्मासनस्थितः प्रभुः ॥४०॥ दृष्ट्वा तो मुदिता वास्मां युद्धकामौ महाबलौ ॥ न मुंच तु
स्तदा त त्र युद्धं वां देहि सुव्रत ॥४१॥ नो चेत्समं परित्यज्य यथेष्टं गच्छ माचिरं ॥ यदि त्वं निर्बलश्च्वासि कथो
गपं स्थ समासनं ॥४२॥ वीरजोग्यमिदं स्थानं कातरो सि त्यजाशु वै ॥ तयो रिति वचः श्रुत्वा चिंतामाप
प्रजापतिः ॥४३॥ दृष्ट्वा च बलिनौ वीरौ किं करोमीति तापसः ॥ चिंताविष्टः तदा तस्थौ चिंतयन्मनसा तदा राम॰
॥४४॥ ॥ इति श्रीभागवते महापुराणे प्रथमस्कंधे ब्रह्माचिंतानाम षष्ठोध्यायः ॥६॥ ॥ सूत उवा॰ १८

नो दृष्ट्वा बलिनौ ब्रह्मा नदीयायान्वचिंतयत् ॥ सामदानभिदादंडैश्च युद्धानृतान् सर्वतंत्रवित् ॥१॥
न जाने हं बलं नूनं तपपोस्मद्यथा तपं ॥ अज्ञाने तु बले कामं नैव युद्धं प्रशस्यते ॥२॥ स्तंति क
रोमि चेद्दैत्यौ दुष्टयो मदमत्तयोः ॥ प्रकाशितं भवेन्नूनं निर्बलत्वं मयास्वयं ॥३॥ वधिष्यति च मां ते
कौ निर्बलत्वे प्रकाशिते ॥ दीनं नैवाद्य पोगं वै मे दुःकार्यं मयाधुना ॥४॥ विष्णुं प्रबोधयाम्यद्य शेषे
सुप्तं जनार्दनं ॥ चतुर्भुजं महावीर्यं दुःखहा स भविष्यति ॥५॥ इति संचिंत्य मनसा पद्मनाल ग
तः कृजः ॥ जगाम शरणं विष्णो र्मनसा दुःखनाशनं ॥६॥ तुष्टाव बोधनार्थं तं श्लोकैः संबोधने
हरिं ॥ नारायणं जगन्नाथं निस्पृहं योगनिद्रया ॥७॥ दीनानाथ हरे विष्णो वामनो त्विष्टगाधम ॥
भक्तार्तिहद्धृषीकेश सर्वावास जगत्पते ॥८॥ अंतर्यामिन्नमेयात्मन्वासुदेव दयानिधे ॥ दुष्टानां
नाशने काम्य चित्र चक्रधरामर ॥९॥ सर्वज्ञ सर्वलोकेश सर्वशक्तिसमन्वितः ॥ अचिंत्यो त्विष्ट देवेश

ना॰प्र॰ दुःखनाशनपाहिमां॥१०॥विश्वंभरविशालाक्ष पुण्यश्रवणकीर्तन॥जगद्योनेर्निराकारसर्ग अ॰७
१९ स्थित्यंतकारक॥११॥इमौदैत्यौमहाराजहंतुंकामौमदोद्धतौ॥नजानास्यखिलाधारकथंमांसं
कटेगतं॥१२॥उपेक्ष्यसेत्रिदुःखार्त्तंपिदिमांशरणागतं॥पालकत्वंकृतेविष्णोगतंलक्ष्मास्वध
र्मकं॥१३॥एवंस्तुतोपिभगवाननबुबोधयदाहरिः॥योगनिद्रासमाक्रांतस्तदाब्रह्माप्यचिं
तयत्॥१४॥नूनंशक्तिसमाक्रांतोविष्णुर्निद्रावशंगतः॥जजागारनसर्वात्माकिंकरोम्यद्य
दुःखितः॥१५॥हंतुंकामावुभौप्राप्तौदानवौमदगर्वितौ॥किंकरोमिक्वगच्छामिनास्तिमेश
रणंक्वचित्॥१६॥इतिसंचिंत्यमनसानिश्चयंप्रतिपद्यच॥तुष्टावयोगनिद्रांतामेकाग्रहृदयः
स्थितः॥१७॥विचार्यमनसाप्येवंशक्तेरपारक्षणेक्षमा॥ययाथचेतनोविष्णुःकृतोस्तिस्पंदव राम
र्जितः॥१८॥वसुर्यथानजानातिगुणान्शाष्ट्यादिकानिह॥तथाहरिर्नजानातितिनिद्रामी १९

लितलोचनः॥१९॥नजहातिप्रियंतोनिद्रांमपावकुस्तनोप्यसौ॥मन्येनास्यवशोनिद्रानिद्रयायंवशी
कृतः॥२०॥योयस्यवशमापन्नःसतस्यकिंकरःकिल॥तस्मात्त्वयोगनिद्रेयंस्वामिनीमीयतेपरं॥
२१॥सिंधुजायावशोतस्याःयथास्वामीवशीकृतः॥नूनंजगदिदंसर्वंभगवत्याःवशेवशं॥२२॥अह
विष्णुस्तथाशंभुःसावित्रीचरमाप्युमा॥सर्वेवयवशोप्यस्याःनात्रकिंचिद्विचारणा॥२३॥हरिरर
प्यवशःशेतेयथान्योप्राकृतोजनः॥यथाभिभूतःकावान्नाकिलान्येषांमहात्मनां॥२४॥स्तौम्यद्य
योगनिद्रांवैयथासुप्तोजनार्दनः॥धाटपिष्पतिपुद्धेतवासुदेवःसनातनः॥२५॥इतिकृत्वामतिं
ब्रह्मापद्मनालस्थितस्तदा॥तुष्टावयोगनिद्रांतांविष्णोरंगेषुसंस्थितां॥२६॥यद्विष्णुरप्यखिल
लोकविवेककर्त्तानिद्रावशंचगमितःपुरुषोत्तमोद्य॥कोवेदतेजननिचेहविलासलीलांमूढोस्म्यहं
हरिरयंविवशश्चशेते॥२७॥इदृक्तयासकलभूतमनोनिवासेचेयत्त्वयाविबुधकोटिषुनिर्गु

भा॰प्र॰ णायाः॥ सांख्या वदंति प्रकृतिं पुरुषप्रियां त्वं चैतन्यभावरहितां जगतश्च कर्त्रीं॥२८॥ किं तादृशा
२० सिकथमत्र जगन्निवासश्चैतन्यतां विरहितो विहितः स्वपापं॥ नाद्यंतनोसि सगुणाविविधप्रका
रं नो वेत्ति कोपि तव कृत्स्न विधानयोगं॥२९॥ ध्यायंति यां मुनिगणा स्फटिकालमेव संध्येति नामप
रिकल्पयुगुणं भवानि॥ त्वं बुद्धिबोधकरणा जगतां सहासि श्रीश्चापि देवि सततं सुखदासुराणां।
३०॥ कीर्त्तिस्त्वथा मतिधृतिः किल कांतिरेव श्रद्धारतिश्च सकलेषु जनेषु मातः॥ नातः परं कि
लवितर्कशतैः प्रमाणं मा॥ त्वं मयापयदीह दुःखगणितं गतेन॥३१॥ त्वं चात्र सर्वजगतां जननीति स
त्वं निज्ञातुता वितनुता हरिणाप्रदिष्टः॥ त्वद्देवि वेद विदुषामपि दुर्विभाव्या वेदोपि नूनमखिलार्थ
तयानवेद॥३२॥ यस्मात्त्वदुद्भवरसौ श्रुतिनाम प्रापः प्रत्यक्षमेव सकलं तव कार्यमेतत्॥ कर रांम
स्ते चरित्रमखिलं नु विवेद धीमान्नाहं तु रिंचिभवो न सुरास्तथान्ये॥३३॥ ज्ञातुं क्षमाश्च मुन २०

यो न मम आत्मजाश्च कुर्वन्ति एवं महिमा तव सर्वलोके॥३४॥ यत्तेषु देवि तव नाम परिनोच्चरंति स्वाहे
ति वेदविदुषो हवनं ततेच॥ नमाप्नुवंति सततं मखभागधेयं देवास्त्वमेव विबुधेष्वपि हन्ति दासि॥३५
त्रांता वयं भगवति प्रथमं त्वया वै देवारिसंभवभयादधुनातथैव॥ भीतोस्मि देवि वरदे शरणं गतोस्मि
घोराद्भवाब्धिमनिरीक्ष्य मधुकैटभेभ्योच॥३५॥ नो वेत्ति विष्णुरधुना मम दुःखमेतत् जानेत्वया च विव
त्रीकृतदेहयष्टिः॥ मुंचामि देव मपवाजहि दानवे द्रोपद्रोभ्य नेतवकुरु घमहानुभावे॥३६॥ जाने र
तिपेनतवदे विपरं प्रभावं ध्यायंति नेहरिहरा नपि मंदचित्ताः॥ ज्ञातं मयाद्य जननि प्रकटं प्रभावं य
द्विष्णुरप्यतितरां विवशोद्य नेते॥३७॥ सिंधूद्भवापि नहरिं प्रतिबोधितुं वै त्वत्कापतिं नवशगानुग
मद्यशक्ता॥ मन्ये त्वया भगवति प्रसभं रमापि प्रस्वापिता न च बुबोध च लीकृते च॥३८॥ धन्यास्त
एव नु विनिक्षिपरास्तवांघ्रौ संत्यज्य देव भजनं त्वधिजीन भावाः॥ त्रीकृते च॥ कुर्वंति देवि भजनं

सनतंतिकामंत्त्वांत्वाथदेवजननीकिलकामधेनु॥३९॥धीःकांतिकीर्त्तिधृतिरिहमतिगनादयस्त्वा
मंविह्रोगतापरहितःक्वचशक्तयोपा॥ वंहीकृतोहरिरसौननुनिद्रयात्रचरात्वातवैकनगव
सतिमानवस्था॥४०॥त्वंशक्तिसर्वजगतामखिलप्रभावात्वंनिर्मितंचसकलंखलुभावमात्रं॥त्वंक्री
डासीतिरचितेसुरदेववृंदेनाट्यंयथाविहरतेस्वकृतेनटोवै॥४१॥विष्णुस्त्वयाप्रकटितःप्रथमंयुगा
दौदत्वाचशक्तिरमलाखलुपालनाय॥पातंचसर्वमखिलंविवशाकृतोद्यकुरुदयांपरिहरस्वमाद्यः
घस्त्वोचनवनथांवकरोषिनूनं॥४२॥मन्येचमांभगवतिक्वनुनाशितुंभवानित्वमीक्षसेमां॥४३॥
ज्ञातंमयानवविचेष्टितमद्भुतंवैकृत्वाखिलंजगदिनुचमीलसित्तिचेत्कुरुदयांपरिहरस्वमानः॥केसा
दिमौप्रकटितौकिलकामरूपौनोचेद्विहोरगादिदंरमसेस्वतंत्रा॥जीनेकरोषिसकलंकिलमांनचैवं
तुत्वमिच्छसिभवानिकिमत्रचित्रं॥४४॥कामंकुरुष्ववधनद्यममैवमातर्दुःखंममैवमरणेसकृदंविके १९

त्र॥कस्तेत्वपांपिविहितःप्रथमंयुगादौदैत्याहनोयमनइस्यपत्नोगारिष्टं॥४५॥त्वमिष्टदेवकुरु
रूपमनन्यभक्तंमांवाविमौजहियथेच्छसिबालकौजे॥नोचेत्प्रबोधयहरिंनिहतेदिमौयस्त्वस्याप्य
मेतदखिलंकिलकार्यजातं॥४६॥सूतउवाच॥ ॥एवंस्तुतातदादेवीतामसीतत्रवेधसा॥नि
स्सृत्यहरिदेहात्तुसंस्थितापार्श्वतस्तदा॥४७॥त्यक्त्वांगानिचसर्वाणिविष्णोरतुलतेजसः॥निर्ग
तायोगनिद्रासानाशायचतयोस्तदा॥४८॥विस्पंदितशरीरोसौपद्मजालोजनार्दनः॥धातापर
मकंप्राप्यमुदंदृष्ट्वाहरिंतथा॥४९॥ ॥इतिश्रीभवानीभागवतेमहापुराणेप्रथमस्कंधेविष्णुप्र
बोधोनामपंचमोध्यायः॥५॥ ॥ऋषयऊचुः॥ ॥संदेहोत्रमहाभागकथायांमहदद्भुतः॥
वेदशास्त्रपुराणेषुनिश्चितंनःसदाबुध॥१॥ब्रह्माविष्णुश्चरुद्रश्चत्रयोदेवाःसनातनाः॥रुद्रःसं
हरतेकालेत्रयएतेत्रकारणं॥२॥नातःपरतरंकिंचिद्ब्रह्मांडेस्मिन्महामते॥ब्रह्मासृजतिलोक

ना॰प्र॰ कान्ते विष्णुः पालयिता जगत्॥ रुद्रः संहरते काले त्रयो वै नात्र संशयः॥३॥ एकमूर्त्तिस्त्रयो देवा ब्रह्मा
२२ विष्णुमहेश्वराः॥ रजः सत्वतमोभिश्च संयुताः कार्यकारकाः॥४॥ तेषां मध्ये हरिः श्रेष्ठो माधवः पुरु
षोत्तमः॥ आदिदेवो जगन्नाथः समर्थः सर्वकर्मसु॥५॥ नान्यः कोपि समर्थोस्ति विष्णोरतुलकर्मणः
॥ स कथं स्वापितः स्वामी विवशो योगनिद्रया॥६॥ क्व गतं तस्य विज्ञानं जीवश्चोपि तं कुतः॥ संदे
होयं महाभाग कथयस्व यथाश्रुतं॥७॥ का सा शक्तिः परा मोक्षा यया विष्णुर्जितः प्रभुः॥ कुतो ल
ब्धा कथं तान्काकाशक्तिर्वद सुव्रत॥८॥ यस्मात्सर्वेश्वरो देवो वासुदेवो जगद्गुरुः॥ परमात्मा परानं
दः सच्चिदानंदरूपधृक्॥९॥ सर्वज्ञः सर्वकर्त्ता च शास्ता विरजः सर्वगः शुचिः॥ स कथं निद्रयानीतः परतं
त्रः परात्परः॥१०॥ एतद्धस्य यन्निगूढ़ं तो हि संदेहो न परंतप॥ छिंधि ज्ञानासिनाऽसूत त्वया सत्त्विष्य महामते॥११ राम॰
सूत उवाच॥ ॥ कः संदेहे छिनत्त्वै लोके सचराचरे॥ मुह्यंति मुनयः कामं ब्रह्मपुत्राः सनातनाः॥१२ २२

नारदः कपिलश्चैव यस्मिन्मुनिसत्तमाः॥ किं ब्रवीमि महाभागाः दुर्घटेस्मिन्न विमन्वति॥१३॥ रुद्रः के
वेदेषु विष्णुकथितः सर्वगः सर्वपालकः॥ यतो विराडिदं सर्वमुत्पन्नं सचराचरं॥१४॥ तं सर्वे समुपास
ते मत्वा देवं परात्परं॥ नारायणं हृषिकेशं वासुदेवं जनार्दनं॥१५॥ तथा केचिन्महादेवं शंकरं लोक
शंकरं॥ त्रिनेत्रं पंचवक्त्रं च शूलपाणिं वृषध्वजं॥१६॥ तथा सर्वेषु देवेषु गीते नाम्नाथ त्र्यंबकं॥ क
पर्दिनं पंचवक्त्रं गौरीदेहार्द्धधारिणं॥१७॥ कैलाशवासनिरतं सर्वशक्तिसमन्वितं॥ भूतवृंदसह
तं देवं सपञ्ज्ञविघानकं॥१८॥ तथासूर्यं वेदविदः सायं प्रातर्दिने दिने॥ मध्यान्हे च महाभागाः स्तु
वंति विधिवत्सवे॥१९॥ तथा वेदेषु सर्वेषु संस्तुतो वेदवित्तमैः॥ इंद्रश्चापि त्रिलोकेशः वरुणश्च तथा
परः॥२०॥ यथा गंगा प्रवाहेश्चव कुर्मिः परिवर्त्तनि॥ तथैव सर्वदेवेषु वेदः प्रवर्त्तते ध्रुवं॥२१॥ श्री
रुपेश्चव प्रमाणानि परिगीतानि पंडितैः॥ प्रत्यक्षं चानुमानं च पंचरात्रं नैवत्तनीयकं॥२२॥ चत्वारि ये
वेतरेश्रौ वोचुरुपमानपुनानि च॥ अर्थापत्तिं पुनस्तेनं पंचमाकृ महादिषय॥२३॥ सततयोरार

भा॰प्र॰ णिकाश्चैव मवदंति मनीषिणः ॥ एतैः प्रमाणैर्ज्ञेयं ब्रह्म परमं च तत् ॥२४॥ वितर्कश्चात्र कर्तव्यो
२३ बुधाश्चैवागमेन च ॥ निश्चयात्मिकया बुद्ध्या विचार्यं च पुनः पुनः ॥२५॥ प्रत्यक्षं तत्र विज्ञानं चिंतं समति
मतां सदा ॥ दृष्टांतेनापि सततं शिष्टमार्गानुसारिणा ॥२६॥ विद्वांसोपि वदंत्येवं पुराणैः परिगीयते ॥ ब्र
ह्मणि सृष्टिशक्तिश्च हरौ पालनशक्त्यपि ॥२७॥ हरौ संहरशक्तिश्च सूर्ये प्रकाशकात् तथा ॥ धराधारण
शक्तिश्च शेषे कूर्मे तथैव च ॥२८॥ कासा शक्तिः परिज्ञेया सर्वस्मिन्या प्रतिष्ठिता ॥ दाहशक्तिस्तथाव
ह्नौ समीरे प्रेरणात्मिका ॥२९॥ शिवोपि शवतां याति कुंडलिन्या विवर्जितः ॥ शक्तिहीनस्तु यः कश्चिद
समर्थः स्मृतो बुधैः ॥३०॥ एवं सर्वत्र भूतेषु स्थावरेषु चरेषु च ॥ ब्रह्मादिस्तंबपर्यंते ब्रह्मांडेस्मिन्महातयाः
३१॥ शक्तिहीनं तु नैव स्यात् वस्तुमात्रं चराचरे ॥ अशक्तश्चानुविजये गमने भोजने तथा ॥३२॥ एवं
सर्वगता शक्तिः सा ब्रह्मेति विविच्यते ॥ सोपास्या विबुधैः सम्यक् विचार्य सुधिया सदा ॥३३॥ विष्णौ च सा रा॰म॰
त्विकी शक्तिः तया हीनोप्यकार्यकृत् ॥ ब्रह्मणि राजसी शक्तिः तया हीनो ह्यसृष्टिकृत् ॥३४॥ शिवे वै च तामस २१

सी शक्तिस्तया संहारकारकः ॥ इत्यूह्य मनसा सर्वं विचार्यं च पुनः पुनः ॥३५॥ शक्तिः करोति ब्रह्मांडं सा
वै पालयतेखिलं ॥ इच्छया संहरत्येषा जगदेतच्चराचरं ॥३६॥ न विष्णुर्न हरः शक्रो न ब्रह्मा न च पावकः ॥
न सूर्यो वरुणः शक्तो स्वे स्वे कार्ये कथंचन ॥३७॥ तया युक्ता हि कुर्वंति स्वानि कार्याणि ते सुराः ॥ सैव
कारणरूपा च प्रत्यक्षेणावगम्यते ॥३८॥ सगुणा निर्गुणा सा च द्विधा प्रोक्ता मनीषिभिः ॥ सगुणा रागि
भिः सेव्या निर्गुणा तु विरागिभिः ॥३९॥ धर्मार्थकाममोक्षाणां स्वामिनी सा निरंकुशा ॥ ददाति वां
छितान्कामान् पूजिता विधिपूर्वकं ॥४०॥ न जानंति जना मूढास्तां सदा मिथ्या पृथक् पृथक्तामवत्र्यैयं
जानंत्यपि नराः केचिन्मोहयंत्यपराणि ति ॥४१॥ पंडिताः स्वोदरार्थं वै पाखंडानि पृथक् पृथक् ॥ प्र
वर्तयंति कलिना प्रेरिता मंदचेतसः ॥४२॥ कलावस्मिन्महाभागाः नानाभेदाः समुचिता ॥ नान्ये
युगे तथा धर्माः वेदबाह्याः कथंचन ॥४३॥ विष्णुश्चरस्तसा वुध्यं तपो वर्षाण्यनेकशः ॥ ब्रह्मा हरस्त
या देवाध्यायंतः कमपि ध्रुवं ॥४४॥ वांछया तेस्तया कामान्नेतेन यः सर्वदेवहि ॥ यजंति पक्षान्वि

भा॰ प्र॰ विधानं ब्रह्मा विष्णु महेश्वर ॥४५॥ नैवै शक्तिं परां देवीं ब्रह्माख्यां परमात्मिकां ॥ ध्यायंति मनसा नित्यं
२४ नित्यां मत्वा सनातनीं ॥४६॥ तस्मात् शक्तिः सदा सेव्या प्रेक्षावद्भिः समंततः ॥ निश्चयः सर्वशास्त्रा
णां ज्ञातव्यो मुनिसत्तमाः ॥४७॥ कृष्णान्मयाप्तं चैतत्तु तेन तु नारदाच्छ्रुतं ॥ पितुः सकाशात्तेनापि
ब्रह्मणा विष्णुवाक्यतः ॥४८॥ नश्रोतव्यं न मंतव्यं मन्ये पांवचनं बुधैः ॥ शक्तिरेव सदा सेव्या विवुद्धिः
कृतनिश्चयैः ॥४९॥ प्रत्यक्षमपि दृश्यमशक्तस्य विचेष्टितं ॥ अतः सर्वेषु भूतेषु ज्ञातव्या शक्तिरेव हि
॥५०॥ ॥ इति श्रीभगवतीभागवते महापुराणे प्रथमस्कंधे आराध्यविचारे अष्टमोध्यायः ॥८
सूत उवाच ॥ ॥ महाविनिर्गमिता निद्रा देहात्तस्य जगद्गुरोः ॥ नेत्रास्यनासिकाबाहुहृदयेभ्यस्तथो
रसः ॥१॥ निःसृत्य गगने तस्थौ तामसी शक्तिरुत्तमा ॥ उदतिष्ठज्जगन्नाथो जृंभमाणः पुनःपुनः ॥२॥
तदापश्यत्स्थितं तत्र भयत्रस्तं प्रजापतिं ॥ उवाच च महातेजा मेघगंभीरया गिरा ॥३॥ विष्णुरुवाच ॥ किं रामं॰
किमत्रासि भगवंस्तपस्त्यक्त्वा तु पद्मज ॥ कस्माच्चिंतातुरोसि त्वं भयाकुलितमानसः ॥४॥ ब्रह्मोवाच २४

त्वत्कर्णमलजौ देव दैत्यौ च मधुकैटभौ ॥ हंतुं मां समुपायातौ घोररूपौ महाबलौ ॥५॥ भयात्तयोः समायात
स्त्वत्समीपं जगत्पते ॥ त्राहि मां वासुदेवाद्य भयत्रस्तं विचेतनं ॥६॥ विष्णुरुवाच ॥ ॥ तिष्ठात्र निर्भयो धात
स्तौ हनिष्याम्यहं किल ॥ मे योगमेत्य मूर्खौ तौ मत्समीपं गतावुभौ ॥७॥ सूत उवाच ॥ ॥ एवं वदति देवेशे
दानवौ तौ महाबलौ ॥ विचिन्वानाव जं चोभौ संप्राप्तौ मदगर्वितौ ॥८॥ निराधारौ जले तत्र संस्थितौ विग
तज्वरौ ॥ तावुचतुर्मदोन्मत्तौ ब्रह्माणं मुनिसत्तमाः ॥९॥ पलायित्वा समायातः किमस्य सन्निधाविहगपु
ंकुरुह हनिष्यामस्त्वामत्र पश्यतोस्य वै ॥१०॥ पश्चादेनं हनिष्यामि सर्पभोगोपरिस्थितं ॥ त्वमद्य कुरु
संग्रामं दासोस्मीति च वा वद ॥११॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं विष्णुस्तावुवाच जनार्दनः ॥ कुरुतां सम
रे कामं मया दानवपुंगवौ ॥१२॥ हरिष्यामि मदं चाहं युवयोर्भक्तियोः किल ॥ आगच्छतां महाभागौ श्रद्धा
चेद्वां महाबलौ ॥१३॥ सूत उवाच ॥ ॥ श्रुत्वा तद्वचनं तौ तु क्रोधव्याकुललोचनौ ॥ निराधारे जले

स्थौ चक्रोधयुक्तौ बभूवतो ॥१४॥ मधुश्च कुपितस्तत्र हरिणा सह संयुगं ॥ कर्तुं प्रवृत्तिनस्तूर्णं कै
टभस्तु तथा स्थितः ॥१५॥ बाहुयुद्धं तयोरासीत् मल्लयोरिव मत्तयोः अश्रांतं मधुकैटभस्तु संग्राम
मकरोत्तदा ॥१६॥ पुनर्मधुकैटभस्तु युयुधाते पुनः पुनः बाहुयुद्धेन रागांधौ विष्णुना प्रभविष्णुना ॥
१७॥ क्षिप्तकस्तु तदा ब्रह्मादेवी चैवांतरिक्षगा ॥ न मम्लतुस्तदा तौ तु विष्णुस्तु ग्लानिमाप्तवान् ॥
१८॥ पंचवर्षसहस्राणि मया युद्धं कृतं किल ॥ हरिणा चिंतितं तत्र कारणं न योः ॥१९॥ पंचवर्षस
हस्राणि मया युद्धं कृतं किल ॥ न श्रांतौ दानवौ घोरौ श्रांतोहं च किमद्भुतं ॥२०॥ क्व गतं मे बलं शौर्यं
कस्मात्क्षेमावनाम मे वै ॥ किमत्र कारणं चिंत्यं विचार्य मनसा त्विह ॥२१॥ इति चिंतापरं दृष्ट्वा हरिं हर्षप
रावुभौ ॥ ऊचतुस्तं मदोन्मत्तौ मेघगंभीरनिःस्वनौ ॥२२॥ नो चेद्बलं हरे नेय श्रांतोसि मधुसूदन ॥ गंम.
ब्रूहि दासोस्मि वां नूनं कृत्वा त्विरसि चांजलिं ॥२३॥ न चेद्युद्धं कुरुष्व श्रांतोसि तथासि महामते ॥ २५

हत्वा त्वां निहनिष्यामः पुरुषं च चतुर्मुखं ॥२४॥ सूत उवाच ॥ ॥ श्रुत्वा तद्भाषितं विष्णुस्तयोः सम्यङ्महोद
धौ ॥ उवाच वचनं श्लक्ष्णं सामपूर्वमना ॥२५॥ हरिरुवाच ॥ ॥ श्रांते भीते त्यक्तशस्त्रे पतिते बालके तथा
॥ प्रहरंति न वीरास्ते धर्म एषः सनातनः ॥२६॥ पंचवर्षसहस्राणि कृतं युद्धं मया त्विह ॥ एकोहं चेतरौ द्वौ
च बलिनौ सहशौ तथा ॥२७॥ कृतं विश्रमणं मध्ये युवाभ्यां च पुनः पुनः ॥ तथा विश्रमणं कृत्वा युध्येहं
वात्रसंशयः ॥२८॥ तिष्ठतां च युवां तावद्बलवंतौ मदोत्कटौ विश्रम्याहं करिष्यामि युद्धं यासपमा
गतः ॥२९॥ सूत उवाच ॥ ॥ इति श्रुत्वा वचस्तस्य विश्रब्धौ दानवोत्तमौ ॥ संस्थितौ दूरतस्तत्र संग्रा
मे कृतनिश्चयौ ॥३०॥ अविदूरे च तौ दृष्ट्वा वासुदेवश्चतुर्भुजः ॥ दध्यौ च मनसा तत्र कारणं मरणे तयो
॥३१॥ चिंतनात्तज्ज्ञानमुत्पन्नं देवी दत्तवरावुभौ ॥ कामवांछितमरणौ मम्लेतु स्म कथं पुनः ॥३२॥ वृ
थामयाकृतं युद्धं श्रमोयं मे वृथा गतः ॥ करोम्यथ कथं युद्धमेवं ज्ञात्वा विनिश्चयं ॥३३॥ अकृते चेत् तथा

मा॰म॰ युद्धेकष्टमेनैगमिष्यतः॥विनाशाद्दुःखदौनित्यंदानवौवरदर्पितौ॥३४॥भगवत्सावरोदत्तस्तयोःसो
२६ पित्वद्दुर्घटः॥मरणंस्वेच्छयाकामंदुःस्थितोपिनवांछति॥३५॥शेषश्रमोपिदीनोपिनचमृत्योरितिकश्च
न॥कथंचेमौमदोन्मत्तौमर्तुकामौभविष्यतः॥३६॥नत्वधर्मरणंमायाविद्यांशक्तिंसुकामदां॥विनातद
पानमिथ्यंतिकामाःसम्यक्प्रसन्नया॥३७॥एवंचिंत्यमानस्तुगगनेसंस्थितांशिवां॥अपश्यत्भगवान्
विष्णुर्योगनिद्रांमनोहरां॥३८॥कृतांजलिर्महेमेयात्मातांचतुष्टावयोगवित्॥विनाशार्थंतयोस्तत्रवरदां
भुवनेश्वरीं॥३९॥विष्णुरुवाच॥ ॥नमोदेविमहामायेसृष्टिसंहारकारिणि॥अनादिनिधनेचंडिभु
क्तिमुक्तिप्रदेशिवे॥४०॥नतेरूपंविजानामिसगुणंनिर्गुणंतथा॥चरित्राणिकुतोदेविसंख्यातीतानि
यानिते॥४१॥अनुभूतंमयातेद्यप्रभावंचातिदुर्घटं॥यदहंनिद्रयालीनःसंजातोस्मिविचेतनः॥४२ रांम॰
ब्रह्मणाचातियत्नेनबोधितोपिपुनःपुनः॥परतंत्रस्तथासमाक्षींतोमोहनेयोगनिद्रया॥४३॥अचे २६

तनत्वौसंग्रामःसमावावन्त्वचांबिके॥तयायुक्तःप्रबुद्धोहंयुद्धंचबहुधाकृतं॥४४॥श्रांतोहंनचतौश्रांतौ
तथादत्तवरावुभौ॥ब्रह्माणंहंतुमायातौदानवौमदगर्वितौ॥आहूतौचमयाकामंद्वंद्वयुद्धायमानदे
४६॥कृतंयुद्धंमहाघोरंमयाताभ्यांमहार्णवे॥मरणेवरदानंतेतस्मोज्ञातंमहाद्भुतं॥४७॥ज्ञात्वाहंश
रणंप्राप्तस्त्वामद्यसुमनिमदां॥सहाय्यंकुरुमेमातःखिन्नोहंयुद्धकर्मणि॥४८॥दृप्तौतौवरदानेन
नववदेवान्निनाशने॥हंतुंमामुद्यतौपापौकिंकरोमिक्वयामिच॥४९॥सूतउवाच॥ ॥इत्युक्तासात
दादेवीस्मितपूर्वमुवाचह॥प्रणमंतंजगन्नाथंवासुदेवंसनातनं॥५०॥देवदेवहरेविष्णोकुरुयु
द्धंपुनःस्वयं॥वंचयित्वात्विमौशूरौहंतव्यौचविमोहितौ॥५१॥मोहयिष्याम्यहंनूनंदानवौव
क्रपाददृशा॥जहिनारायणाशुत्वंममसायाविमोहितौ॥५२॥सूतउवाच॥ ॥तच्छुत्वावच
नंविष्णुस्तस्याःप्रीतिरसान्वितं॥संग्रामस्थलमासाद्यतस्थौतत्रमहार्णवे॥५३॥तदायातौचतौ

भा॰ प्र॰
२७

वीरौ योद्धुं कामौ महाबलौ ॥ वीक्ष्य विष्णुं स्थितं तत्र हर्षयुक्तौ बभूवतुः ॥५४॥ तिष्ठ तिष्ठ महाभा
ग कुरु युद्धं चतुर्भुज ॥ दैवाधीनौ विदित्वाद्य नूनं जयपराजयौ ॥५५॥ सबलेस्मानिमापाति दैवा
ज्जयाति दुर्बलः ॥ सर्वथैव न कर्त्तव्यो हर्षशोकौ महात्मना ॥५६॥ पुरा त्वं बहवो दैत्या जिता दा
नवसूदन ॥ अधुना चावयोः सार्धं युध्यमानः पराजितः ॥५७॥ सूत उवाच ॥ ॥ इत्युक्त्वा तौ
महाबाहू युद्धाय समुपस्थितौ ॥ वीक्ष्य विष्णुर्जघानाशु मुष्टिनाद्भुतविक्रमः ॥५८॥ तावप्य
तिबलोन्मत्तौ जघ्नतुर्मुष्टिना हरिं ॥ एवं परस्परं जातं युद्धं परमदारुणं ॥५९॥ युध्यमानौ महा
वीर्यौ दृष्ट्वा नारायणस्तदा ॥ अपश्यत्सन्मुखं देव्याः कलादीनां दशां हरिः ॥६०॥ सूत उवाच
तं वीक्षितादृशं विष्णुं करुणारससंयुतं ॥ जहासातीव ताम्राक्षी वीक्ष्यमाणा तदासुरौ ॥६१॥ राम
तौ जघान कटाक्षैश्च कामबाणैरिवापरैः ॥ मंदस्मितयुतैः कामं प्रेमभावयुतैरनु ॥६२॥ दृष्ट्वा २७

ममुदतुः पापौ देव्या वक्रावलोकनं ॥ वक्राग्रे पतितं त्वा कामबाणातिपीडितौ ॥६३॥ वीक्ष्यमाणौ
स्थितौ तत्र तां देवीं विशदप्रभां ॥ हरिणापि च तद्दृष्टं देव्यास्तत्र चिकीर्षितं ॥६४॥ मोहितौ परिज्ञाय भ
गवान्कार्यवित्तमः ॥ उवाच तौ हसन्श्लक्ष्णां मेघगंभीरया गिरा ॥६५॥ वरं वरयतं वीरौ वां यो
भिवांछितस्तदा ॥ ददामि परमप्रीतो युद्धेन युवयोः किल ॥६६॥ दानवा बहवो दृष्टा युध्यमाना मया
पुरा ॥ युवयोः सदृशः कोपि न दृष्टो न च वै श्रुतः ॥६७॥ तस्मात्तुष्टोस्मि कामं वै निस्तुलेन बलेन
बलेन वै ॥ भ्रातरौ वांछितं कामं प्रयच्छामि महाबलौ ॥६८॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं विष्णोः
साभिमानौ स्मरातुरौ ॥ वीक्ष्यमाणौ महामायां जगदानंदकारिणीं ॥६९॥ तमूचतुश्च कामार्तौ
विष्णुं कमललोचनं ॥ त्वया वरो हरे रावां त्वं किं दातुमिहेच्छसि ॥७०॥ ददाव तुभ्यं देवेश दातारौ
नौ न याचकौ ॥ प्रार्थयस्व हृषीकेश मनोभिवांछितं वरं ॥७१॥ तुष्टोस्मि तव युद्धेन वासुदेवाद्भुते

भा॰ प्र॰ नवा ॥७२॥ सूत उवाच ॥ तयोस्तद्वचनं श्रुत्वा हरिराह हसन्निव ॥ प्रार्थयामि महाभागौ दत्तु
२८ वांछितं वरं ॥७३॥ भवेतामद्य मे तुष्टौ मम वध्यावुभावपि ॥ नान्यद्वरं ममाभिलषितं वांछितं मया
७४॥ सूत उवाच ॥ तच्छ्रुत्वा वचनं विष्णोर्दानवौ चातिविस्मितौ ॥ वंचितावितिमन्वानौ तस्थतुः शोक
संयुतौ ॥७५॥ वीक्ष्य जलमयं सर्वं मिथस्तौ विवर्जितं ॥ विचार्य मनसा तौ तु विष्णुमूचतुर्दानवौ
॥७६॥ हरेरावां वरो दत्तस्त्वया प्राक् वै जनार्दन ॥ सत्यवागसि देवेश देहि वांछितं वरं ॥७७॥ निर्ज
ले विपुले देशे हन त्वं मधुसूदन ॥ वध्यावावां तवाशक्तौ त्वं सत्यवाग्भव माधव ॥७८॥ स्मृत्वा चक्रं त
दा विष्णुस्तावुवाच हसन् हरिः ॥ हन्म्यद्य वां महाभागौ निर्जले विपुले स्थले ॥७९॥ इत्युक्त्वा देव
देवेश ऊरू कृत्वातिविस्तरं ॥ दर्शयामास तौ तत्र निर्जलं च जलोपरि ॥८०॥ नास्त्यत्र दानवौ वारि शि राम॰
रसितुं चनामिति ॥ सत्यवागहमद्यैव भवावाव वपुर्वोस्तथा ॥८१॥ तदाकर्ण्य वचस्तस्य विचिंत्य मनसा २८

चनौ ॥ वर्धयामासतुर्देहं योजनानि सहस्रशः ॥८२॥ भगवान्द्विगुणं चक्रे जघनं विस्मितौ तदा ॥ शी
र्षे विदधतो तत्र जघने परमाद्भुते ॥८३॥ रथांगेन ततश्छिन्ने विष्णुना प्रभविष्णुना ॥ जघनोपरि वेगेन प्रकृ
ष्टे शिरसी तयोः ॥८४॥ गतप्राणौ तदा जातौ दानवौ मधुकैटभौ ॥ सागरो सकलो व्याप्तस्तदेव मेदसा नृप
॥८५॥ मेदिनीति ततो जाता नाम पृथ्व्याः समंततः ॥ अभक्ष्या मृत्तिका तेन कारणेन मुनीश्वराः ॥८६॥ इति
वः कथितं सर्वं यत्पृष्टो ऽस्मि विनिश्चयं ॥ महाविद्या महामाया सेवनीया सदा बुधैः ॥८७॥ समाराध्या पर
मा शक्तिः सर्वैरपि सुरासुरैः ॥ नातः परतरं किंचिदधिकं भुवनत्रये ॥८८॥ सत्यं सत्यं पुनः सत्यं वेदशास्त्रार्थ
निर्णयं ॥ पूजनीया पराशक्तिर्निर्गुणा सगुणाथवा ॥८९॥ ऋषय ऊचुः ॥ सूत पूर्वं त्वया प्रोक्तं व्यासेनामि
ततेजसा ॥ कृतं पुराणमखिलं शुकायाध्यापितं शुभं ॥१॥ ततः कस्मात्तु व्यासेन कथमुत्पादितः शुकः ॥ वि
स्तरं ब्रूहि सकलं पृच्छतां कृष्णतनस्त्वया ॥२॥ सूत उवाच ॥ प्रवक्ष्यामि शुकोत्पत्तिं व्यासात्सत्यवतीसुता

इति श्रीभा॰ महा॰ प्रथ॰ स्कं॰ सप्तमो॰ ७

भा०प्र० त॥ यथोत्पन्नः शुकः साक्षात् योगीनां प्रवरो मुनिः॥३॥ मेरुशृंगे महारम्ये व्यासः सत्यवतीसुतः॥ तपश्च
२९ चार सोत्युग्रं पुत्रार्थं कृतनिश्चयः॥४॥ जपन्नेकाक्षरं मंत्रं वाग्बीजं नारदाच्छ्रुतं॥ ध्यायन्परां महामायां पु
त्रकामस्तपोनिधिः॥५॥ अग्नेर्भूमेस्तथा वायोरंतरिक्षस्य चाप्ययं॥ वीर्येण संमितः पुत्रो मम भूयादि
ति स्पृहा॥६॥ अतिष्ठन्मारुताहारः शतं किल समाः प्रभुः॥ आराधयन्महादेवीं देवीं चैव सदाशिवां॥७॥
शक्तिः सर्वत्र पूज्येति विचार्य च पुनः पुनः॥ अशक्तो निंद्यते लोके शक्तस्तु परिपूज्यते॥८॥ तत्र पर्वतशृंगे वै
कर्णिकारवनावृते॥ क्रीडंति देवताः सर्वे मुनयश्च तपोधनाः॥९॥ आदित्या वसवो रुद्रा मरुतश्चा
श्विनौ तथा॥ गंधर्वाप्सरसः सर्वे क्रीडंति स्वेच्छया किल॥१०॥ नारदः पर्वतश्चैव लोमशः कपिलस्तथा॥
वसंति मुनयस्तत्र ये चान्ये ब्रह्मवित्तमाः॥११॥ तत्र हेमगिरेः शृंगे संगीतध्वनिनादिते॥ तपश्चचार धर्मा राम·
त्मा व्यासः सत्यवतीसुतः॥१२॥ ततोस्य तेजसा विश्वं व्याप्तं सर्वं चराचरं॥ अग्निवर्णजटाजाता पाराशर्य २९

स्य धीमतः॥१३॥ ततोस्य तेजसा विश्वं व्याप्तं सर्वं चराचरं॥ अग्निवर्णजटाजाता पाराशर्यस्य धीमतः॥१३॥ आल
क्ष्य भयभीतोत्र शचीपतिः॥ किं करिष्यत्यसौ तस्मात्तपसीत्थं महामुनिः॥१४॥ जगाम त्वरितः शक्रो भयभीतः शत
क्रतुः॥ असकृत्त्राहि त्राहीति ब्रुवंस्तत्र दिवस्पतिः॥१५॥ तुरासाहं तथा दृष्ट्वा तपसस्तं श्रमातुरं॥ उ
वाच भगवान् रुद्रो मघवंतं तथास्थितं॥१६॥ शंकर उवाच॥ कथमिंद्राद्य भीतोसि किं दुःखं ते सुरेश्वर॥ अ
मर्षो नैव कर्त्तव्यो तापसेषु कदाचन॥१७॥ तपश्चरंति मुनयो ध्यायन्तः शक्तिसंयुतं॥ न ते ते परमिच्छंति ता
पसाः सर्वथैव हि॥१८॥ इत्युक्तवचनं शक्रः तमुवाच वृषध्वजं॥ कस्मात्तपति व्यासोयं कोर्थश्चास्य मनोग
तं॥१९॥ शिव उवाच॥ ॥पाराशर्यस्तु पुत्रार्थी तपश्चरति दुश्चरं॥ पूर्णं वर्षशतं जातं ददाम्यद्य
शुभं सुतं॥२०॥ ॥सूत उवाच॥ ॥इत्युक्त्वा वासवं रुद्रो दयामुदितमानसः॥ गत्वा तु स समीपं त
तमुवाच जगद्गुरुः॥२१॥ उत्तिष्ठ वासवीपुत्र पुत्रस्ते भविता शुभः॥ सर्वतेजोमयो ज्ञानी कीर्त्तिकर्त्ता

भा·प्र· तवानघ॥२२॥अखिलस्यजनस्यात्रवक्तात्वमसिसुव्रतः॥सर्वात्मविद्यानिपुणैःसात्विकैःसत्यविक्रम
३० ॥२३॥सूतउवाच॥ ॥तदाकर्ण्यवचःश्लक्ष्णंसहृद्वैपायनस्तदा॥सूनुपाणिंनमस्कृत्यजगामाश्रमम्
मात्मनः॥२४॥सगत्वाश्रममेवाशुवृद्धेवपुषिआतुरः॥अरणीसहितंगृह्यममंथाग्निचिकीर्षया॥२५॥मं
थानंकुर्वतस्तस्यचिंताविष्टेकुरुस्तदा॥प्रादुर्बभूवसहसासुतोऽस्यनोमहात्मनः॥२६॥मंथानारणिसं
योगात्मंथनात्स्वसमुद्भवःपावकस्यनवेदस्त्रदृष्टांतंपरमाद्भुतं॥२७॥कुत्रारणिसमाख्यातासाममाधनि
बुध्यते॥तरुणीरूपसंपन्नाकुलोत्पन्नापतिव्रता॥२८॥कथंकरोमिकांतांचपादयोःशृंखलासमा॥पु
त्रोसारतरक्षांचनित्यंपतिव्रतेस्थिरां॥२९॥पतिव्रतापिदक्षापिरूपवत्यपिकामिनी॥सदाबंधन
रूपावैस्वेच्छासुखविघातिनी॥३०॥शिवोपिवशगोनित्यंकामिनीपार्श्वयंत्रितः॥कथंकरोम्यहंचात्रदु
र्घटंवमहाश्रमं॥३१॥एवंचिंतयतस्तस्यघृताचीदिव्यरूपिणी॥प्राप्तादृष्टिपथंतत्रसमीपेगगने राम·
स्थिता॥३२॥तांदृष्ट्वाचपलापांगींसमीपस्थांवराप्सरां॥पंचबाणपरीतांगीतूर्णमासीत्स्थतव्रतः ३०

॥३३॥चिंतयामासचतदाकिंकरोम्यद्यसंकटे॥धर्मस्यपुरतःप्राप्तसेवैधीनावेकुरासदे॥३४॥अंगीकरोमिय
द्येनांवंचनार्थमिहागतां॥हसिष्यंतिमहात्मानस्तापसामांसुविक्लवं॥३५॥तपस्त्वामहाघोरंपूर्णं
वर्षशतंत्विह॥दृष्ट्वाप्सरांचविवशःकिंचनिंद्यास्पदंततः॥३६॥कामेनिंद्यापिभवितुपरिस्थात्तत्सुखं
॥गृहस्थाश्रमसंभूतंसुखदंपुत्रकामदं॥३७॥स्वर्गदंचतथासंतेज्ञानिनांमोक्षदंतथा॥नभविष्य
तितन्मेनमनयादेवकन्यया॥३८॥नारदाच्छ्रुतमयापूर्वंकृतमस्तिकथानकं॥यथोर्वशीवशोराजाप
राभूतःपुरूरवा॥३९॥ ॥इतिश्रीभगवतिभागवतेमहापुराणेप्रथमस्कंधेदशमोध्यायः॥१०
ऋषयऊचुः॥ ॥कोसौपुरुरवोराजाकोर्वशीदेवकन्यका॥कथंकष्टंचसंप्राप्तंतेनराज्ञाम
हात्मना॥१॥एतत्कथानकंब्रूहिलोमहर्षणजवाधुना॥श्रोतुंकामावयंसर्वेत्वत्मुखाच्च्युतंरसं
२॥अमृतादपिमिष्टानेवाणीसूतरसात्मिका॥नतृप्यामवयंसर्वेकथांदिव्यांमनोरमां॥३॥सूतउ·

शृणुध्वं मुनयः सर्वे कथां सुधारसायनां॥ वक्ष्यामि ह यथाबुध्या कृतं मासान्तरोत्तमात्॥४॥ गुरोस्त्र
दयिता भार्या तारानाम्ना निविक्रता॥ रूपयौवनयुक्ता सा चार्वंगी मदविह्वला॥५॥ गते कदाचिद्धीधाम यज
मानिनी॥ दृष्टा चन्द्रात्रिना सर्वरूपयौवनशालिनी॥६॥ कामातुरस्तदाजातश्चन्द्रस्तारामुखीं प्रति॥
सापि वीक्ष्य विधुं कामं जाता मदनपीडिता॥७॥ तावन्योन्यं प्रेमयुक्तौ बभूवतुः स्मरातुरौ॥ ताराशशी
मदोन्मत्तौ कामबाणप्रपीडितौ॥८॥ रमाते मदमत्तौ तौ परस्परस्पृहान्वितौ॥ दिनानि कतिचित्तत्र
जातानि रममाणयोः॥९॥ रमन्ते मदमत्तौ तौ बृहस्पतिकृदूरतौ तौ तारामानयितुं गृहं॥ प्रेषयामास
शिष्यं तु नायाता सा वशीकृता॥१०॥ पुनः पुनर्यदा शिष्यं परावर्तत्ययं क्रमा॥ बृहस्पतिस्तदा क्रुद्धः जगा
मस्वयमेव हि॥११॥ गत्वा सोमगृहं तत्र वाचस्पतिर्महामतिः॥ उवाच चन्द्रात्रिनं क्रुद्धः स्वपामानं मुदार
न्वितं॥१२॥ किं कृतं किल शीतांशो कर्म धर्मविगर्हितं॥ रक्षिता मम भार्या किं सुंदरी केन हेतुना॥१३॥ स

र्वदेवगुरुश्चाहं यजमानोसि मे विधा॥ गुरुभार्या कथं मूढ मुक्ता किं रक्षिता त्वया॥१४॥ ब्रह्महा हेमहारि
च सुरापो गुरुतल्पगः॥ महापातकिनश्चैते तत्संसर्गी च पंचमः॥१५॥ महापातकयुक्तस्त्वं दुराचारो
ति गर्वितः॥ न देवसदनार्होसि पदि भुक्तालयांगना॥१६॥ मुंचेमामसितापांगीं नयामि सदनं मम
॥ न चेद्दक्ष्यामि मंदात्मन् गुरुदारापहारणं॥१७॥ सूत उवाच॥ ॥ इत्येवं भाषमाणं तमुवाच रोहि
णीपतिः॥ गुरुं क्रोधसमायुक्तं कांताविरहदुःखितं॥१८॥ इंदुरुवाच॥ क्रोधं त्यज दुराराध्य ब्राह्मणाः
क्रोधवर्जिताः॥ पूज्या हि धर्मशास्त्रज्ञा वर्ज्जनीयास्ततोन्यथा॥१९॥ आगमिष्यति सा कामं गृहं ते वरव
र्णिनी॥ अद्यात्र संस्थिता बाला कांते हानिरिहानघ॥२०॥ इच्छया संस्थिता चात्र सुखकामार्थिनी हि
सा॥ दिनानि कतिचित्स्थित्वा स्वेच्छया चागमिष्यति॥२१॥ तथैवोढा हि तं पूर्वं धर्मशास्त्रे महामते॥ न
स्त्रीदुष्यति जारेण न विप्रो वेदकर्मणा॥२२॥ नापो मूत्रपुरीषाभ्यां नाग्निर्दहनकर्मणा॥ तस्मात्स्वज

भा॰ प्र॰ हिक्रोधंसांप्रतंगच्छमंदिरं॥२३॥इत्युक्तःशचीनाथेनगुरुरत्यंतदुःखितः॥जगामस्वगृहंतूर्णंचिंतावि
३२ ष्टःस्मरातुरः॥२४॥दिनानिकतिचित्तत्रस्थित्वाचिंतातुरोगुरुः॥ययावथगृहंतस्यत्वरितस्त्वोषधीपतेः
२५॥स्थितःकृतोनिषिद्धोसौद्वारदेशेरुषान्वितः॥तत्रजगामशर्मीस्तत्रचुकोपातिबृहस्पतिः॥२६
वायुवाचातिकोपार्तोद्वारदेशेस्थितोवहिः॥किंशेषेभवनेमंदपापाचारसुराधम॥२७॥देहिमेकामिनीं
पापिनोचेच्छापंददामिते॥करोमिभस्मसात्त्वंनददासिप्रियांमम॥२८॥सूतउवाच॥ ॥इत्यादी
नीतिक्रूराणिभाषमाणंबृहस्पतिं॥श्रुत्वाद्विजपतिर्शीघ्रंनिर्गतोवहिः॥२९॥तमुवाचहसन्सोमः
किंमंदवक्तुंभाषसे॥नतेयोग्यासितापांगीसर्वलक्षणसंयुता॥३०॥त्वमसद्वंशीकुरूपोत्वंगृहाणा
न्यांस्त्रियंद्विज॥भिक्षुकस्यगृहेयोग्यानेदृशीवरवर्णिनी॥३१॥रतिस्त्वस्सदृशोकांतनतापिःकिलत्वनि राम॰
ह्रत्निं॥नत्वंजानासिमंदात्मन्कामशास्त्रविनिर्णयं॥३२॥यथेष्टंगच्छदुर्बुद्धेनाहंदास्यामिकामिनीं॥ ३२

पच्छक्यंकुरुतेकांतौयथेच्छसितथाकुरु॥३४॥सूतउवाच॥ ॥इत्युक्तःशशिनाचेज्यःस्थितोसौपरम
माकुलः॥जगामतरसासम्यक्क्रोधयुक्तःशचीपतेः॥३५॥दृष्ट्वाशतक्रतुस्तत्रगुरुंदुःखातुरंस्थितंआ
सनाद्युत्थायपाद्यैःपूजयामाससुस्थितं॥३६॥पप्रच्छपरमोदारस्तंतथावस्थितंद्विजं॥काचिंतातेमहा
भागत्रोकार्त्तोसिकथंमुने॥३७॥केनापमानितोसित्वंममराज्येगुरुश्रमे॥त्वदधीनमिदंसर्वंसैन्यं
लोकाधिपैःसह॥३८॥विष्णुर्ब्रह्मातथाशंभुर्येचान्येदेवसत्तमाः॥करिष्यंतिसहायंतेकाचिंतावद
सांप्रतं॥३९॥गुरुरुवाच॥ ॥शशिनापहृताकांतातारामममसुलोचना॥नददातिसदुष्टात्मा
प्रार्थितोपिपुनःपुनः॥४०॥किंकरोमिसुरेशाद्यत्वमेवशरणंमम॥कुरुसाहाय्यंदेवेशदुःखितोस्मि
शतक्रतो॥४१॥इंद्रउवाच॥ ॥माशोकंगमधर्मज्ञदासोस्मितवसुव्रत॥आनयिष्याम्यहंतू
र्णंभार्यांतवमहामते॥४२॥प्रेषितेद्यमयादूतेनदास्यतिमहाकुले॥ततोयुद्धंकरिष्यामिदेवसैन्यैःस

मा व्रतः ॥४३॥ इत्याकर्ण्य स्वगुरुं शक्रो दूतं चक्रे विचक्षणं ॥ प्रेषयामास सोमाय शामितं क्षेशमद्भुतं ॥४४॥
स गत्वा शशिलोकं तु त्वरितः सुविचक्षणः ॥ उवाच विनयेनैव वचनं रोहिणीपतिं ॥४५॥ प्रेषितोऽहं महाभा
ग शक्रेणातीव विवक्षया ॥ कथितं प्रभुणा यच्च तद्ब्रवीमि महामते ॥४६॥ धर्मज्ञोऽसि महाबाहो नीतिं जा
नासि सुव्रत ॥ अत्रिः पिता ते धर्मात्मा न निंद्यं कर्तुमर्हसि ॥४७॥ त्वापरिरक्ष्यैः सर्वभूतैस्त्वया शक्तित्वतं
द्विजैः ॥ तदर्थे कलहः कामं त्वविता नात्र संशयः ॥४८॥ यथा तव तथा तस्य यत्नः स्वदाररक्षणे ॥ आ
त्मवत्सर्वभूतानि चिंतय त्वं सुधानिधे ॥४९॥ अष्टाविंशतिसंख्यातेकामिन्यो दक्षजाः शुभाः ॥ गुरोः प
त्नीं कथं मोहात्धर्तुमिच्छसि शीतगो ॥५०॥ स्वर्गेप्सरासक्त वर्त्तंते मेनकाद्याः मनोरमाः ॥ ईश्वराय दि
कुर्वंति जुगुप्सितं महत्तमाः ॥५१॥ भुंक्ष्व ताः स्वेच्छया कामं मुंच पत्नीं गुरोरपि ॥ प्रजास्तत्र तु वर्त्तंते तदा
धर्मक्षयो भवेत् ॥५२॥ तस्मात्त्वं च महाभाग गुरोः पत्नीमनिंदितां ॥ कलहस्त्वन्निमित्तोऽघसुराणां न ३३

भवेद्यथा ॥५३॥ सूत उवाच ॥ ॥ सोपसमगविचः श्रुत्वा किंचित्क्रोधसमाकुलः ॥ अंप्याप्रति वचः प्राह
शक्रदूतं प्रतिवादी ॥५४॥ इंदुरुवाच ॥ ॥ धर्मज्ञोऽसि महाभाग देवानामधिपः स्वयं ॥ पुरोधापि
च ते नाहं कस्तु वयोः सदृशामति ॥५५॥ परोपदेशे कुशलाः भवंति बहवो जनाः ॥ दुर्लभस्तु स्वयं कर्त्ता प्रा
प्येक मर्च सर्वदा ॥५६॥ बार्हस्पत्यस्त्वस्मेरितिं च शास्त्रं गृह्णंति मानवाः ॥ को विरोधोऽत्र देवेश कामायानां भ
जन्त्रियं ॥५७॥ स्वकीयं बलीनां सर्वं दुर्बलानां न किंचन ॥ स्वीया च परकीया च भ्रामोयं मंदचेतसां ॥५८
नारा मम्पनु रक्ता च यथा न तु तथा गुरौ ॥ कथं सा जामन्तु रक्तायमतो न्यायतस्त्वया ॥५९॥ गृहारंभ रक्ता
रक्तायां विरक्तायां कथं भवेत् ॥ विरक्तैषं तदा जाता च कमेनच कामिनी ॥६०॥ न दास्येहं वरारोहां ग
च्छ दूत वदस्व तं ॥ ईश्वरोऽसि सहस्राक्ष यदीच्छसि कुरुष्व तत् ॥६१॥ सूत उवाच ॥ ॥ इत्युक्तः शशिना दूतः
प्रस्थाय स्वपयायविधः ॥ इंद्रायाथ वदत्सर्वं यदुक्तं शशिनाऽथवा ॥६२॥ तुराषाडपि तच्छ्रुत्वा क्रोधयुक्तो ब

न्नवत्‌॥ सेनायोगं तदा चक्रे सहायार्थं गुरोर्विभुः॥६३॥ शुक्रस्तु विग्रहं ज्ञात्वा गुरुद्वेषात्समाययौ॥ साहाय्य
र्थेति तं चन्द्रमुवाच शशिनं पुनः॥६४॥ सहायं ते करिष्यामि मंत्रवान्नाम हामते॥ भविता यदि संग्राम
स्तव वैरेण मारिष॥६५॥ शंकरस्तु तदाकर्ण्य गुरुदाराभिमर्शनं॥ गुरुपुत्रं गुरुं मत्वा साहाय्यमक
रोत्तदा॥६६॥ संग्रामस्तु महानासीद्देवदानवयोस्तदा॥ बहूनि तत्र वर्षाणि तारकामय इत्यथ॥
६७॥ देवासुरकृतं युद्धं दृष्ट्वा तत्र पितामहः॥ हंसारूढो जगामाशु तं देशं लोकशान्तये॥६८॥ राकापतिं
प्रत्युः प्राह मुंच भार्यां गुरोः शशिन्॥ नो चेद्विष्णुं समाहूय करिष्यामि सुसंक्षयं॥६९॥ भृगुं निवारयामास
ब्रह्मा लोकपितामहः॥ किमन्यायमतिर्जातः संगृहे पापमहामते॥७०॥ निषेधयामास ततो गु
रुस्तमोषधिपतिं॥ मुंच भार्यां गुरोरद्य पित्राहं प्रेरितस्त्वया॥७१॥ सूत उवाच॥ ॥द्विजराजस्तु तच्छ्रु
त्वा न गोर्वचनमस्तुतं॥ ददावथ प्रियां भार्यां गुरोर्भगवतीं शुभां॥७२॥ प्राप्य भार्यां गुरुर्हृष्टः स्वगृहे

मुदितोऽपयौ॥ ततो देवास्तथा दैत्याः ययुः स्वानि गृहाणि च॥७३॥ ब्रह्मा स्वसदनं प्राप्तः कैलासं चापि
शंकरः॥ ततो देवास्तथा दैत्याः प्रययुः स्वानि गृहाणि च॥७३॥ ब्रह्मा स्वसदनं प्राप्तः कैलासं चापि शंकरः॥
बृहस्पतिः सुसंहृष्टः प्राप्य भार्यां मनोरमां॥७४॥ ततः काले तु कियता तारा सूतसुतं शुभं॥ सुदिने शुभ
नक्षत्रे तारापतिसमं सुतं॥७५॥ दृष्ट्वा पुत्रं गुरुर्जातं चकार विधिपूर्वकं॥ जातकर्मादिकं सर्वं प्रहृष्टेनांत
रात्मना॥७६॥ श्रुत्वा तं चंद्रमा जन्म पुत्रस्य मुनिसत्तमाः॥ दूतं च प्रेषयामास गुरुं प्रति महामतिः॥७७
न तेऽयं किल पुत्रोऽस्ति मम वीर्यसमुद्भवः॥ कथं त्वं कृतवान्कामं जातकर्मादिकं विधिं॥७८॥ तच्छ्रुत्वा व
चनं तस्य दूतस्य च बृहस्पतिः॥ उवाच मम पुत्रोऽयं सदृशो नात्र संशयः॥७९॥ पुनर्विवादः संजातः मि
लिता देवदानवाः॥ युद्धार्थमागतास्तेऽपि समाजः समजायत॥८०॥ तत्रागतः स्वयं ब्रह्मा शांतिका
मः प्रजापतिः॥ निवारयामास संरब्धे संस्थितान्युद्धदुर्मदान्॥८१॥ तारां पप्रच्छ धर्मात्मा कस्यायं त

तुजः शुभे ॥ सत्यं वद वरारोहे यथाक्लेशः स्वशाम्यति ॥ ६२ ॥ तमुवाचासितापांगी लज्जमाना त्वधोमुखी
॥ चंद्रस्येति त्रिनेत्रस्त्वं जगाद वरवर्णिनी ॥ ६३ ॥ जग्राह तं सुतं सोमः प्रहृष्टेनांतरात्मना ॥ नाम चक्रे बुध
इति जगाम स्वगृहं पुनः ॥ ६४ ॥ ययौ ब्रह्मा स्वकं धाम सर्वे देवासुरास्तथा ॥ यथागतागतं सर्वैः सर्वशः प्रे
क्षकैर्जनैः ॥ ६५ ॥ कथितेयं बुधोत्पत्तिः गुरोः क्षेत्रे च सोमतः ॥ यथा श्रुता मया पूर्वं व्यासात्सत्यवतीसुता
त् ॥ ६६ ॥ ॥ इति श्रीभगवती भागवते महापुराणे प्रथमस्कंधे बुधोत्पत्तिकथनं नामैकादशोध्यायः
११ ॥ सूत उवाच ॥ ॥ ततः पुरूरवा जज्ञे इलायां कथयामि वः ॥ बुधपुत्रोतिधर्मात्मा यज्ञकृद्दानतत्प
रः ॥ १ ॥ सुद्युम्नो नाम भूपालः सत्यवादी जितेंद्रियः ॥ सैंधवं हयमारुह्य जगाम मृगयां वने ॥ २ ॥ युक्तः
कतिपयामात्यैः दंशितैश्चारुकुंडलः ॥ धनुराजगवं गृह्य चचार वनमद्भुतं ॥ ३ ॥ स भ्रमन्वनदेशेषु हन्य
मानो रुरून्मृगान् ॥ शशांश्च शूकरांश्चैव खड्गांश्च गवयांस्तथा ॥ ४ ॥ सामरान्महिषांश्चैव सरभान्व ३५

नकुकुटान् ॥ निघ्नन्मेध्यान्पशून्राजा कुमारवनमाविशत् ॥ ५ ॥ मेरोरधस्तले दिव्यं मंदारद्रुमराजि
तं ॥ अशोकलतिकाकीर्णं बकुलै रतिवासितं ॥ ६ ॥ शालैस्तालैस्तमालैश्च चंपकैः पनसैस्तथा ॥ आ
म्रनीपैर्मधुकैश्च माधवीमंडपावृतं ॥ ७ ॥ दाडिमैर्नालिकेरैश्च कदलीखंडमंडितं ॥ यूथिकामालतीपुष्प
सोमवल्लीसमाकुलं ॥ ८ ॥ कोकिलारावसंघुष्टं कुतुराजविराजितं ॥ वापीसरससमायुक्तं सरसीजलशी
तलं ॥ ९ ॥ हंसकारंडवाकीर्णं कीचकध्वनिनादितं ॥ भ्रमरालिरुतारावं वनं सर्वसुखप्रदं ॥ १० ॥ दृष्ट्वा
प्रमुदितो राजा सुद्युम्नः सैनिकैर्वृतः ॥ वृक्षान्सुपुष्पितान्वीक्ष्य कोकिलारावमंडितान् ॥ ११ ॥ प्रवि
ष्टस्तत्र राजर्षिः स्त्रीत्वमापन्नस्ततः ॥ अश्वोपि वडवा जाता चिंताविष्टः स भूपतिः ॥ १२ ॥ किमेतदि
ति चिंतार्त्तः श्चिंतयमानो पुनः पुनः ॥ दुःखं बहुतरं प्राप्तः सुद्युम्नो लज्जयान्वितः ॥ १३ ॥ किं करोमि कथं
यामि गृहं स्त्रीभावसंयुतः ॥ कथं राज्यं करिष्यामि केन वा वंचितोस्म्यहं ॥ १४ ॥ ऋषय ऊचुः ॥ ॥ सू

भा.प्र.
३६

नाश्चर्यमिदं प्रोक्तं त्वया धन्यो महर्षिणा ॥ सुद्युम्नः स्त्रीत्वमापन्नो नृपतिर्देवसन्निभः ॥१५॥ किं तत्कारण
माचक्ष्व वने तत्र मनोहरे किं कृतं तेन राज्ञा च विस्तरं वद सुव्रत ॥१६॥ सूत उवाच ॥ ॥ एकदा गिरिशं
द्रष्टुमृषयः सनकादयः ॥ दिशो वितिमिराभासः कुर्वंतः समुपागमन् ॥१७॥ तस्मिंश्च समये तत्र शंक
रः प्रमदायुतः ॥ क्रीडासक्तो महादेवो विवस्त्रा कामिनी शिवा ॥१८॥ उत्संगे संस्थिता भर्तुः रममाणा
मनोरमा ॥ तान् विलोक्यांबिका देवी विवस्त्रा व्रीडिता भृशं ॥१९॥ भर्तुरंकात् समुत्तीर्य वस्त्रमादाय
पर्यधात् ॥ लज्जाविष्टा स्थिता तत्र वेपमानेव मानिनी ॥२०॥ ऋषयोपि तयोर्वीक्ष्य प्रसंगं रममाणयोः
परिवृत्य ययुस्तूर्णं नरनारायणाश्रमं ॥२१॥ ऋषयोपि ययोर्वी ह्रीयुतां कामिनीं वीक्ष्य प्रोवाच भ
गवान् हरः ॥ कथं लज्जातुरासि त्वं सुखं ते प्रकरोम्यहं ॥२२॥ अद्यप्रभृति यो मोहात् पुमान् कोपि व राम.
रानने ॥ वनं च प्रविशेदेतत् स वै योषिद्भविष्यति ॥२३॥ इति शप्तं वनं तेन ये जानंति जनाः क्वचित् ॥ व ३६

र्जयंति हि ते कामं जानंतो दोषमुत्कटं ॥२४॥ सुद्युम्नस्तु तदज्ञानात् प्रविष्टः सचिवैः सह ॥ त
थैव स्त्रीत्वमापन्नस्तैः सहेति न संशयः ॥२५॥ चिंताविष्टः स राजर्षिः जगाम स्वगृहं ह्रिया ॥ विचचा
र बहिस्तस्माद्वनदेशादितस्ततः ॥२६॥ इलेति नाम संप्राप्तं स्त्रीत्वेनेन महात्मना ॥ विचरंस्तत्र
संप्राप्तो बुधः सोमसुतो युवा ॥२७॥ स्त्रीभिः परिवृतां तां तु दृष्ट्वा कांतां मनोरमां ॥ हावभावकलायु
क्तां चकमे भगवान् बुधः ॥२८॥ सापि तं चकमे कांतं बुधं सोमसुतं पतिं ॥ संयोगस्तत्र संजातस्त
योः प्रेमणा परस्परं ॥२९॥ स तस्यां जनयामास पुरूरवसमात्मजं ॥ इलायां सोमपुत्रस्तु च
क्रवर्तिनमुत्तमं ॥३०॥ सा प्रसूतसुता बाला चिंताविष्टा वने स्थिता ॥ सस्मार स्वकुलाचार्यं व
सिष्ठं मुनिसत्तमं ॥३१॥ साता तस्माद्दशां वीक्ष्य सुद्युम्नस्य दयान्वितः ॥ अतोषयन्महादेवं शं
करं लोकशंकरं ॥३२॥ तस्मै स भगवान् तुष्टः प्रददौ वांछितं वरं ॥ वसिष्ठः प्रार्थयामास पुंस्त्वं

राज्ञः प्रियस्य वै॥३३॥ शंकरस्य निजां वाचमृतां कुर्वन्नुवाच ह॥ मासं पुमान्स भविता मासं स्त्री नृपति
किल॥३४॥ इत्थं प्राप्य वरं राजा जगाम स्वगृहं पुनः॥ चक्रे राज्यं स धर्मात्मा वसिष्ठस्याप्यनुग्रहात्॥३५
स्त्रीत्वे तिष्ठति हर्म्येषु पुंस्त्वे राज्यं प्रशास्ति॥ प्रजास्तस्मिन्नसुव्यग्रास्तेनाभ्यनंदन्महीपतिं॥३६॥ काले
तु यौवनं प्राप्तः पुत्रः पुरुरवा परः॥ प्रतिष्ठानपतिस्तस्मै दत्वा राज्यं वनं गतः॥३७॥ गत्वा तस्मिन्वने रम्ये
नानाद्रुमसमाकुले॥ नारदान्मंत्रमासाद्य नवाक्षरमनुत्तमं॥३८॥ जजाप मंत्रमसर्थं प्रेमपूरित
मानसः॥ परितुष्टा तदा देवी सगुणा तामसी शिवा॥३९॥ सिंहारूढा स्थिता चाग्रे दिव्यरूपा मनोरमा
॥ वारुणीपानसंमत्ता मदाघूर्णितलोचना॥४०॥ दृष्ट्वा तां दिव्यरूपां च प्रेमव्याकुललोचनः॥ प्रण
म्य शिरसा प्रीतस्तुष्टाव जगदंबिकां॥४१॥ इल उवाच॥ दिव्यं च ते भगवति प्रथितं स्वरूपं दृष्टं म राम· ३७
या सकललोकहितानुरूपं॥ वंदे त्वदंघ्रिकमलं सुरसंघसेव्यं स्तुवंति न त्व मुनयश्च सुराश्च सर्वे॥४२

को वेत्ति ते विभवमस्मनतनुर्निकामं विस्मयो मे॥४३॥ विष्णुर्हरश्च द्रुहिणो मघवा रविश्च वित्तेश्वरा
वह्निवरुणाः पवनश्च सोमः॥ जानंति नैव वसवोपि हि ते प्रभावं जानन्कथं नवगुणानगुणा मनुष्याः
॥४४॥ जानाति विष्णुरमितद्युतिरंब साक्षात्त्वां सात्विकीमुदधिजां सकलार्थदां च॥ को राजसीं
हररूपां किल तामसीं त्वां वेदांबिके न तु पुनः खलु निर्गुणां त्वां॥४५॥ क्वाहं सुमंदमतिरप्रथित
प्रभावः क्वायं भवानि निपुणेमपि सुप्रसादः॥ जाने भवानि चरितं करुणासमेतं यत्सेवकान्दयपसे
त्वयि भावयुक्तान्॥४६॥ वृत्तस्त्वपाहरिसान निजेच्छया किं नैवाचरत्सपि प्रियं मधुसूदनस्ते॥ पा
दौ न वादिपूरुषः किल यावकेन कृत्वा करोति च करेण शुभौ च रक्तौ॥४७॥ वांछत्यसौ हरिरशोक
वदाति कामं पादाहतिं प्रमुदितः पुरुषः पुराणः॥ न त्वं करोषि कृपिता पमणते च पादौ द्रष्टायतिस्स
कलं देवनुतं स्मरारे॥४८॥ वक्षस्थले वसति देवि सदैव तस्य पर्यंकवत्सुचरिते विपुलेति सा मे॥

सौदामिनीवसुधने ननु भूषिते वः किं तेन वाहनमसौ जगदीश्वरोपि ॥४९॥ त्वं चेत्त्वदासि मधुसू
दामिनी वसुधने ननु भूषिते वः किं तेन वाहनमसौ जग ॥ न मं ब कोपा ज्ञानेवसोपि न बभौ किंत
त्क्षीहीनः ॥ प्रत्यक्षमेव पुरुषं स्वजनास्तजं निशं तं श्रियोक्षितमनी वशुरोश्च युक्तो ॥५०॥
ब्रह्मादयः सुरगणाः ननु किं युवत्योषा सन्तु पुरे वसु खदेन बल्ली विहारे ॥ मन्येत्वये वविहिताः
खलु ते पुमांसः किं वक्ष्यन्ति रनंतवीर्ये ॥५१॥ न त्वं पुमान्ननु पुमान्निति मे विकल्पो याकासि देवि स
गुणाः ननु निर्गुणा वा ॥ तां त्वां नमामि सन्त तं किल भावबुद्ध्यो वांछामि भक्तिरचलात्वयि मात
रंते ॥५२॥ सूत उवाच ॥ ॥ इति स्तुत्वा महीपालो जगाम शरणं तदा ॥ परितुष्टा ददौ देवी तस्मा
योन्यमात्मनि ॥५३॥ सुद्युम्नस्तु ततः प्राप पदं परमकं स्थिरं ॥ तस्या देव्याः प्रसादेन दुर्लभं मुनिनापि
॥५४॥ ॥ इति श्रीभगवतिभागवते महापुराणे प्रथमस्कंधे सुद्युम्नस्तुति नाम द्वादशोध्याय

॥१३॥ ॥ सूत उवाच ॥ ॥ सुद्युम्ने तु दिवं याते राज्यं चक्रे पुरूरवाः ॥ सुगुणश्च सुरूपश्च प्रजारं
जनतत्परः ॥१॥ प्रतिष्ठाने पुरे रम्ये राज्यं सर्वनमस्कृतं ॥ चकार सर्वधर्मज्ञः प्रजारंजनतत्परः ॥२॥ मं
त्रः सुगुप्तस्तस्यासीत् सरत्र परज्ञानता यथा ॥ सदैवोत्साहशक्तिश्च प्रभुशक्तिस्तथोत्तमा ॥३॥ सामदाना
दयः सर्वे वशगास्तस्य भूपतेः ॥ वर्णाश्रमान् स्वधर्मस्थान् कुर्वन् राज्यं शशास ह ॥४॥ यज्ञांश्च विवि
धांश्चक्रे स राजा बहुदक्षिणान् ॥ दानानि च विचित्राणि ददावथ नराधिपः ॥५॥ तस्य रूपगुणौ
दार्यशील द्रविण विक्रमान् ॥ श्रुत्वोर्वशी भूनाचकमे तं नराधिपं ॥६॥ ब्रह्मशापाभितप्ता सा र
मानुषं लोकमास्थिता ॥ गुणिनं तं नृपं मत्वा वरयामास मानिनी ॥७॥ समयं चेह शंकृत्वा स्थिता नत्र वरांगना
॥ एतौ पुत्रकौ राजन्न्यसामि वतु मानद ॥८॥ घृतं मे भक्षणं नित्यं नान्यं नान्यत् किंचिन्नृपाशनं ॥ ने
क्षे त्वां च महाराज नग्नमन्यत्र मैथुनात् ॥९॥ भाषाबंधमिमं राजन्नृपाद्भिन्नं भविष्यति ॥ तदा त्यक्त्वा

गमिष्यामि तथ्यमेतद्ब्रवीम्यहं॥१०॥अंगीकृतं तदा राज्ञा कामिन्या भाषितं च यत्॥स्थिता सा प्रण
बंधे नृगायानुग्रहकाम्यया॥११॥रेमे तया स नृपो जो जीनो वर्षगणान्बहून्॥धर्मकर्मादि
कं त्यक्त्वा उर्वश्या सह मोहितः॥१२॥एकचित्तस्य संजातस्तन्मनस्को महीपतिः॥तत्र्वात्राक
तयाद्दीनः क्षणमप्यतिमोहितः॥१३॥एवं वर्षगणं नेतु स्वर्गस्थः पाकशासनः॥उर्वशीं
च गतां दृष्ट्वा गंधर्वानाह देवराट्॥१४॥उर्वशीमानयध्वं भो गंधर्वाः सर्व एव वै॥दलारणो
गृहादस्य नृपतेः समर्पकिल्ला॥१५॥उर्वशीरहितं स्थानं मदीयं नाति शोभते॥येन केनाप्युपाये
न तामानयतु कामिनीं॥१६॥इत्युक्तास्ते च गंधर्वा विश्वावसुपुरोगमाः॥ततो गत्वा महाराज्ञे तम
सिन्नसुपस्थितो॥१७॥जह्रुस्तावुरणौ देवा रममाणं विलोक्य तां॥चक्रंदतुस्तदा तौ तु हीयमा
णौ विहायसि॥१८॥उर्वशी तु दुःपाकर्ण्य क्रंदितं सुतयोरिव॥कुपितो वाच राजानं समपोपंक्त

नो मया॥१९॥नष्टाहं न वृविश्वासान्नद्धतौ चौरैर्ममोरणौ॥राजन्पुत्रसमौ मह्यं किं शेषे घस्त्रि मास
मः॥२०॥हतास्म्यहं कुनाथेन त्वया राजन्नना थवत्॥उरणौ मे गतौ चाद्य सदा प्राणप्रियौ मम॥२१॥इ
ति विलप्यमानां तां दृष्ट्वा राजा विमोहितः॥नग्न एव ययौ तूर्णं पृष्ठतः पृथिवीपतिः॥२२॥विद्युत्कान्ति
तान्ततो गंधर्वैर्निर्मिता वेश्मनि॥नग्न एव तया दृष्टो नृपतिर्गंतुकाम्यया॥२३॥सक्कोरूणौ गताः सर्वे गं
धर्वाः पथि पार्थिव॥नयोजग्माह तौ श्रांतो जगाम स्वगृहं प्रति॥२४॥तदोर्वशीं गतां दृष्ट्वा विललाप
पि दुःखितः॥नग्नं वीक्ष्य पतिं नारी गता सा वरवर्णिनी॥२५॥क्रंदन्नसदेवा देवेषु बन्नाम नृपतिः स्व
यं॥तच्चित्तो विक्लवः शोचन् विवशः काममोहितः॥२६॥भ्रमन् वै सकलां पृथ्वीं कुरुक्षेत्रे ददर्श ह
॥दृष्ट्वा प्रहृष्टवदनः प्राह सूक्तं नृपोत्तम॥२७॥अये जाये तिष्ठ घोरे न त्यक्तुमर्हसि॥मां च त्वम्मा
न संक्रांतं वराङ्गे चाप्यनागसं॥२८॥संदेहो पंपनस त्र देवि दूरं हृतस्त्वया॥खादंत्येनं वृकाः काकाः स्व

भा॰ प्र॰ या सक्तं वरोरु यत् ॥२९॥ एवं विलपमानं तं राजानं प्राह चोर्वशी ॥ दुःखितं कृपणं श्रान्तं कामार्तं त्वविवे
६० कि नं नृपं ॥३०॥ उर्वश्युवाच ॥ ॥मूर्खोसि नृपशार्दूल ज्ञानं कुत्र गतं तव ॥ क्वापि सख्यं न वै स्त्रीणां वृ
काणामिव पार्थिव ॥३१॥ न विश्वासो हि कर्तव्यः स्त्रीषु चौरेषु पार्थिव ॥ गृहं गच्छ सुखं भुंक्ष्व मा विषादे म
नः कृथाः ॥३२॥ इत्येवं बोधितो राजा न विवेदाति मोहितः ॥ दुःखं च परमं प्राप्तः स्वैरिणी स्नेहयंत्रितः ॥३३॥
सूत उवाच ॥ ॥इति सर्वं समाख्यातमुर्वशीचरितं महत् ॥ वेदे विस्तारितं चैतत् संक्षेपात्कथितं म
या ॥३४॥ ॥इति सर्वं समाख्यानमुर्वशीचरितं मद्धूरति श्रीभगवतिभागवते महापुराणे प्रथ
मस्कंधे त्रयोदशोध्यायः ॥१३॥ सूत उवाच ॥ ॥दृष्ट्वा तामसितापांगीं व्यासश्चिंतापरोभवत् ॥
किं करोमि न मे योग्या देवकन्येयमप्सरा ॥१॥ एवं चिंतयमानं तं दृष्ट्वा व्यासं तदाप्सरा ॥ भयभीता तिसं राम॰
जाता शापं मां विसृजेदयं ॥२॥ सा कृत्वाथ शुकीरूपं निर्गता भयविह्वला ॥ कृष्णस्तु विस्मयं प्राप्तो विह ६०

गीं तां विलोकयन् ॥३॥ कामस्तु देहे व्यासस्य दर्शनादेव संगतः ॥ मनोतिविह्वलं जातं सर्वगात्रे
षु विस्तृतं ॥४॥ स तु धैर्येण महता निगृह्णन् हृच्छयं मुनिः ॥ न शशाक नियंतुं तत् व्यासस्यामितं
तेजयप्रविसृतं मनः ॥५॥ बहुशो गृह्यमाणं च घृताच्यां मोहितं मनः ॥ भाविवान्नानिवृत्तं तत् व्या
सस्यामिततेजसः ॥६॥ मंथानं कुर्वतस्तस्य मुनेरग्निचिकीर्षया ॥ अरण्यामेव सहसा तस्य शु
क्रमथापतत् ॥७॥ सोविचिंत्य तथा पातं ममंथारणिमेव च ॥ तस्माच्छुकः समुद्भूतो व्यासाकृति
मनोहरः ॥८॥ विस्मयं जनयन्बालः शुकस्तदारणीसुतः ॥ यथाध्वरे समिद्धोग्निर्भाति हव्यमुपात्त
वान् ॥९॥ व्यासस्तु सुतमालोक्य विस्मयं परमं गतः ॥ किमेतदिति संचिंत्य वरदानाच्छिवस्य च
॥१०॥ तेजोरूपः शुको जातः स्वरणीगर्भसंभवः ॥ द्वितीयोग्निरिवात्यर्थं दीप्यमानः स्वतेजसा
॥११॥ विलोकयामास तथा व्यासस्तं मुदितः शुकं ॥ दिव्येन तेजसा युक्तं गार्हपत्यमिवापरं ॥१२

भा० प्र०

४१

गंगानं स्नापयामास समागत्य गिरेस्तदा ॥ पुष्पवृष्टिः खे जाता नानाविधोरु पररिता तापसाः ॥१३॥ जा
तकर्मादिकं चक्रे व्यासस्तस्य महात्मनः ॥ देवदुंदुभयो नेदुर्ननृतुश्चाप्सरोगणाः ॥१४॥ जगुर्गंध
र्वपतयो मुदितास्ते दिदृक्षवः ॥ विश्वावसुर्नारदश्च तुंबरुः शुकसंभवे ॥१५॥ तुष्टुवुर्मुदिताः सर्वे दे
वा विद्याधरास्तदा ॥ दृष्ट्वा व्याससुतं दिव्यमरणीगर्भसंभवं ॥१६॥ अंतरिक्षात्पपातोर्व्यां दिव्यं दंडः कृ
ष्णाजिनं शुभं ॥ कमंडलुं तथा दिव्यं शुकस्यार्थे द्विजोत्तमाः ॥१७॥ सद्यः स ववृधे बालो जातमात्रोऽति
दीप्तिमान् ॥ तस्योपनयनं चक्रे व्यासः सर्वविधानवित् ॥१८॥ उत्पन्नमात्रं तं वेदाः सरहस्याः स
संग्रहाः ॥ उपतस्थुर्महात्मानं यथास्य पितरं तथा ॥१९॥ यथा दृष्टं शुकीरूपं घृताच्याः संभवे त
दा ॥ शुकेति नाम पुत्रस्य चकार मुनिसत्तमः ॥२०॥ बृहस्पतिमुपाध्यायं कृत्वा व्यासः सुतस्य च ॥
व्रतानि ब्रह्मचर्यस्य चकार विधिपूर्वकं ॥२१॥ सोऽधीत्य निखिलान्वेदान्सरहस्यान्ससंग्रहान् ॥ ध

र्मशास्त्राणि सर्वाणि कृत्वा गुरुकुले शुकः ॥२२॥ गुरवे दक्षिणां दत्त्वा समावृत्तो मुनिस्तदा ॥
आजगाम पितुः पार्श्वं कृष्णद्वैपायनस्य च ॥२३॥ दृष्ट्वा व्यासः शुकं प्राप्तं प्रेम्णोत्थाय ससत्वरः ॥ आ
लिलिंग तथा घ्राय मूर्ध्नि तस्य चकार ह ॥२४॥ पप्रच्छ कुशलं व्यासस्तथा चाध्ययनं शुचिः ॥ आश्वास्य
स्थापयामास शुकं तत्राश्रमे शुभे ॥२५॥ दारकर्म ततो व्यासः शुकस्य परिचिंतयन् ॥ कन्यां मुनिसु
तां कां नाम मार्गयच्च इति वेगवान् ॥२६॥ शुकं प्राह सुतं व्यासः वेदोऽधीतस्त्वयानघ ॥ धर्मशास्त्राणि स
र्वाणि कुरु भार्यां महामते ॥२७॥ गार्हस्थ्यं च समासाद्य यज देवान्पितॄंस्तथा ॥ ऋणान्मोचय मां
पुत्र प्राप्य दारान्मनोरमां ॥२८॥ अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च नैव च ॥ तस्मात्पुत्र महाभाग कु
रु धन्यं गृहाश्रमं ॥२९॥ कृत्वा गृहाश्रमं पुत्र सुखिनं कुरु मां शुक ॥ आशा मे महती पुत्र पूरयस्व
महामते ॥३०॥ तपस्त्वा महाघोरं प्राप्तोऽसि त्वं मया निजः ॥ देवरूपो महाप्राज्ञ मा हि मां पितरं शु

३

भा॰भ॰ कः॥३१॥ ॥सूत उवाच॥ ॥इति वादिनमत्यासे व्यासे प्राह स्म कल्लदा॥ विरक्तः सोऽतिरिक्तं तं सार
४२ क्षालितरमात्मनः॥३२॥ तत्त्वेषं धृतपक्षं तं मया पुत्र शृंते समाः॥ प्राप्तस्त्वं चातिदुःखेन शिवस्याराध
नेन च॥३३॥ नार्थं किं रुमाद्या प्राज्ञ प्रार्थयितान्न भूपतिं॥ सुखं दुःखं महाप्राज्ञ प्राप्य यौवनमुत्तमं॥३४
श्रीशुक उवाच॥ ॥किं सुखं मानुषे लोके ब्रूहि तात निरामयं॥ दुःखविद्धं सुखं प्राज्ञा न वदंति सुखं कि
ल॥३५॥ स्त्रियं कृत्वा महाभाग भवामि तद्वशानुगः॥ सुखं किं परतंत्रस्य स्त्रीजितस्य विशेषतः॥३६
कदाचिदपि मुच्येत लोहकाष्ठादियंत्रितः॥ पुत्रदारानिबद्धस्तु न विमुच्येत कर्हिचित्॥३७॥ विण्मूत्रसं
भवो देहो नारीणां तन्मयस्तथा॥ का प्रीतिस्तत्र विप्रेंद्र विबुधः कर्तुमिच्छति॥३८॥ अयोनिजोऽहं वि
प्रर्षे योनौ मे का रतिर्गतिः॥ न वांछाम्यहमप्येतद्योनावेव समुद्भवं॥३९॥ विट्सुखं किंनु वांछामि
स्वात्मसुखमव्ययं॥ आत्मारामाश्च मुनयो न भवंति तिलोलुपाः॥४०॥ प्रथमं पठिता वेदा मया ४२

विस्मारिताश्च ते॥ हिंसाप्राया पितेसर्वे कर्ममार्गप्रवर्त्तकाः॥४१॥ बृहस्पतिर्गुरुः प्राज्ञः सोऽपि भोगग
ह्रार्णवे॥ अविद्याग्रस्तहृदयः कथं तारयितुं क्षमः॥४२॥ रोगग्रस्तो यथा वैद्यः पररोगचिकित्सकः॥ त
था गुरुर्मुमुक्षो वै गृहस्थे यं विडंबना॥४३॥ कृत्वा प्रणामं गुरवे त्वत्समीपमुपागतः॥ त्राहि मां ज्ञानबो
धेन भीतं संसारसर्पतः॥४४॥ संसारेऽस्मिन्महाघोरे भ्रमणं भ्रमचक्रवत्॥ न च विश्रमणं कालेसूपरि
स्पेव दिवानिशं॥४५॥ किं सुखं तात संसारे सारे तत्त्वविचारणात्॥ मूढानां सुखबुद्धिस्तु विट्सु कीटसु
खं यथा॥४६॥ अधीत्य वेदशास्त्राणि संसारे रागिणश्च ये॥ तेभ्यः परो न मूर्खोस्ति सधर्मः श्वानसू
करैः॥४७॥ मानुष्यं दुर्लभं प्राप्य वेदशास्त्राण्यधीत्य च॥ बध्यते यदि संसारे को मुच्येत मानवः॥४८
नातः परतरं लोके कश्चिदाश्चर्यमद्भुतं॥ पुत्रदारगृहासक्तः पंडितः परिगीयते॥४९॥ न बध्यते यः
संसारे नरो मायागुणैस्त्रिभिः॥ स विद्वान्स च मेधावी शास्त्रपारंगतो हि सः॥५०॥ किं वृथाध्ययने

ना॰ प्र॰ नात्रदृढबंधकेरेणच॥ पत्नित्वंतदेवाशुमोचयेद्वंधबंधनात्॥५१॥ गृहान्निपुरुषंयस्मात्तग्र
४३ हंतेनप्रकीर्त्तितं॥ क्रमुरवंबंधनागारेतेननीतोस्म्यहंपितः॥५२॥ तेवुधामंदमतयोविधिनावंचि
ताश्चये॥ येप्राप्यमानुषंजन्मपुनर्बंधंविशंत्युत॥५३॥ व्यासउवाच॥ ॥नगृहंबंधनागारंबंधने
मनकारणं॥ मनसायोविनिर्मुक्तोगृहस्थोपिविमुच्यते॥५४॥ न्यायागतधनंकुर्वन्वेदोक्तंविधि
वत्क्रमात्॥ गृहस्थोपिविमुच्येतश्राद्धकृत्सत्यवाक्शुचिः॥५५॥ ब्रह्मचारीयतिश्चैववानप्रस्थो
व्रतेस्थितः॥ गृहस्थंसमुपासंतेमध्याह्नातिक्रमेसदा॥५६॥ जलान्नपानदानेनवाचासूनृत
यातथा॥ उपकुर्वंतिधर्मस्थागृहाश्रमनिवासिनः॥५७॥ गृहाश्रमात्परोधर्मोनदृष्टोनचवि
श्रुतः॥ वसिष्ठादिभिराचार्यैर्ज्ञानिभिःसमुपाश्रितः॥५८॥ किमसाध्यंमहाभागवेदोक्तानिच
कुर्वतः॥ स्वर्गोमोक्षःसुजन्मवायद्यदिच्छतितद्भवेत्॥५९॥ आश्रमादाश्रमंगच्छेदितिधर्मविदो ४३

विदुः॥ तस्मादग्निंसमाधायकुरुकर्माणियत्नतः॥६०॥ देवानृषीन्मनुष्यांश्चसंतर्प्यविधिव
त्सुत॥ पुत्रमुत्पाद्यधर्मज्ञसंयोज्यचगृहाश्रमे॥६१॥ सर्वंत्यक्त्वागृहंवनंगत्वाकर्त्रासितपसुव्रत॥ वा
नप्रस्थाश्रमंकृत्वासंन्यासंचततःपरं॥६२॥ इंद्रियाणिमहाभागमादकानिसुनिश्चितं॥ त्वदारस्स
दुरंतानिपंचैवमनसासह॥६३॥ तस्मादरण्यंकुर्वीततज्जयायमहामते॥ वार्द्धकेतपआतिष्ठेदि
तिशास्त्रोदितंवचः॥६४॥ विश्वामित्रोमहाभागतपःकृत्वातिदुश्चरं॥ त्रीणिवर्षसहस्राणिनिरा
हारोजितेंद्रियः॥६५॥ मोहितःसमहातेजामेनकायावनेस्थितः॥ शकुंतलासमुत्पन्नापुत्रीत
द्वीर्यजाशुभा॥६६॥ दृष्ट्वादाससुतांकालींपितामम्परात्परः॥ कामबाणाहतःकामंतांजग्राहो
पस्थितः॥६७॥ ब्रह्मापिदुहितादृष्ट्वापंचबाणप्रपीडितः॥ धावमानस्तुरुद्रेणनिर्भिन्नःस्थितिश्च
निवारितः॥६८॥ तस्मात्त्वमपिकल्याणकुरुमेवचनंहितं॥ कुलजांकन्यकांगृह्य वेदमार्गसमाश्र

भा॰प्रा॰ य॥६९॥इतिश्रीभगवतीभागवतेमहापुराणेप्रथमस्कंधेचतुर्दशोऽध्यायः॥१४॥ ॥श्रीशुकउवाच॥
४४ नाहंगृहंकरिष्यामिदुःखदंसर्वदापितः॥वागुरासदृशंयानिसंबंधनंसर्वदेहिनां॥१॥धनचिंतातुरा
णांहिकसुखंनादृशंचते॥स्वजनैःखलुपीड्यंतेनिर्धनोलोलुपोजनः॥२॥इंद्रोपिनसुखीतादृक्श
दृशोभिक्षुर्निःस्पृहः॥कोनस्यादिहसंसारेत्रिलोकीविभवेसति॥३॥तपंतंतापसंदृष्ट्वामघवादुःखि
तोभवत्॥विघ्नान्बहुविधान्तस्यप्रकरोतिदिवस्पतिः॥४॥ब्रह्मापिनसुखीविद्वन्लक्ष्मीमाप्यम
नोरमां॥खेदंप्राप्नोतिसततंसंग्रामेश्चसुरैःसह॥५॥करोतिविपुलान्यत्नान्तपश्चरतिदुश्चरं॥
रमापतिरपिश्रीमान्कस्यास्तिविपुलंसुखं॥६॥शंकरोपिसदादुःखीभवत्येवचवेद्म्यहं॥यादृ
द्रतःप्रमद्यारुष्टयाचैवचोमया॥७॥कदाचिन्नसुखीतेनधनवानपिलोलुपः॥निर्धनस्तुकथंतां राम॰
तसुखमाप्नोतिमानवः॥८॥जानन्नपिमहाभागगणपुत्रंमोवीर्यसंभवे॥निपातोस्तिमहाघोरेसंसा ४४

रेदुःखदेसदा॥९॥जन्मदुःखंजरादुःखंदुःखंचमरणेतथा॥गर्भवासेपुनर्दुःखंविष्टामूत्रान्वयेपिच॥
१०॥तस्मादतिशयंदुःखंतृष्णालोभसमुद्भवं॥याञ्चायापरमंदुःखंमरणादपिमानद॥११॥प्रतिग्रह
धनाविप्रानबुद्धिबलजीविनः॥पराशायरमंदुःखंमरणंचदिनेदिने॥१२॥पठितासकलान्वेदान्शा
स्त्राणिचसमंततः॥गत्वाचधनिनांकार्यस्कितिःसवर्त्मनाबुधैः॥१३॥एकोदरस्यकाचिंतापत्रमू
लफलादिभिः॥येनकेनाप्युपायेनसंतुष्टस्यप्रपूर्यते॥१४॥भार्यापुत्रास्तथापौत्राःकुटुंबेविपुलेसति
॥पूरणार्थंमहदुःखंकसुखंपितरञ्जुनं॥१५॥योगशास्त्रंवदविभोज्ञानशास्त्रंसुखकरं॥कर्मकां
डेखिलेतातनरमेहृंकदाचन॥१६॥वदकर्मक्षयोपायंप्रारब्धंसंचितंतथा॥वर्त्तमानंपथान
त्रेपच्चविधंकर्मभूजनतः॥१७॥जलूकेवसदानारीरुधिरंपिबतीनिवै॥मूर्खस्तेनविसर्वस्वंकथ्ये
जानातिमोहितोभावचेष्टितैः॥१८॥भोगेवीर्यंधनंपूर्वंमनःकुटिलभाषणैः॥कोनाहरतिसर्वस्वं

कस्तेन स्याद्दशोपरः ॥१९॥ निद्रासुखविनाशार्थं सुखस्फिष्टारसंग्रहं ॥ विनिर्मितास्स्वयंधात्रा दुःखा
यन सुखाय च ॥२०॥ सूत उवाच ॥ ॥ एवंविधानि वाक्यानि श्रुत्वा व्यासः शुकस्य च ॥ सम्प्राप मह
तीं चिंतां किं करोमीति संश्रयं ॥२१॥ सुश्राव अश्रूणि व्यासस्य लोचने दुःखजानि च ॥ वेपथुश्च श
रीरे भूत्तस्यानि प्रायमनस्तथा ॥२२॥ शोचंतं पितरं दृष्ट्वा दीनं शोकपरिप्लुतं जहासारणिजः साहवि
स्मयोत्फुल्ललोचनः ॥२३॥ अहो माया बलं चोग्रं यन्मोहयति पंडितं ॥ वेदान्तस्य च कर्तारं सर्वज्ञं वेद
संमतं ॥२४॥ न जाने का च सा माया किंस्वरूपा च दुःकजा ॥ या मोहयति विद्वांसं व्यासं सत्यवती सु
तं ॥२५॥ पुराणानां प्रवक्तारं निर्मातारं भारतस्य च ॥ विभागकर्त्ता वेदानां सोपि मोहमुपागतः ॥
२६॥ तां यामि शरणं देवीं या मोहयति वै जगत् ॥ ब्रह्मा विष्णुं हरादींश्च कथान्येषां च कीदृशी ॥२७॥ को
प्यास्ति त्रिषु लोकेषु यो न मुह्यति मायया ॥ यन्मोहं गमिताः पूर्वं विष्णुब्रह्महरादयः ॥२८॥ अहो बलम

हो वीर्यं देव्याः खलु विनिर्णितं ॥ मोयाधे वा वक्रोद्दृष्ट्वा व्यासं सर्वज्ञमीश्वरं ॥२९॥ विष्वंशो संभवो व्यासः इति
पौराणिका जगुः ॥ सोपि मोहार्णवे मग्नो नग्नयो तो वणिक् यथा ॥३०॥ अश्रुपातं करोत्यद्य विवशः प्रा
कृतो यथा ॥ अहो माया बलं चैतद्दुःस्त्यजं पंडितैरपि ॥३१॥ कोहं कोहं कथं त्वेहं कीदृशोयं भ्रमः किल
॥ पंचभूतात्मके देहे पिता पुत्रेति वासना ॥३२॥ बलिष्टा खलु मायेयं मायिनामपि मोहिनी ॥ यया
भिभूतो कृष्णोपि करोति रोदनं द्विजः ॥३३॥ सूत उवाच ॥ ॥ तां नता मनसा देवीं सर्वकामफलप्रदां
॥ मायां च परमां देवीं ब्रह्मादीनां तथेश्वरीं ॥३४॥ पितरं प्राह दीनं तं शोकार्णवपरिप्लुतं ॥ अरणी सं
भवो व्यासे हेतुमद्वचनं शुभं ॥३५॥ पाराशर्य महाभाग सर्वेषां बोधदः स्वयं ॥ किं शोकं कुरुषे स्वामि
न्यथाज्ञः प्राकृतो नरः ॥३६॥ अद्याहं तव पुत्रोयं न जाने पूर्वजन्मनि ॥ कोहं कस्त्वं महाभाग विभ्रमो
हानि यं महामते ॥३७॥ क्षुधा निवृत्ति भक्षेण न पुत्र दर्शनेन च ॥ पिपासा जलपानेन याति नैवात्मजेक्षे

कुरुषे यत्प्रबुद्धस्त्वमा विषादे मनः कृपाः ॥ मोहजालमिदं मत्वा मुंच शोकं महामते ॥३८॥ ण त्व॥३९

घ्राण सुखं सुगंधेन कर्णजं श्रवणेन च ॥ स्त्री सुखं तु स्त्रिया नूनं पुत्रोहं किं करोम्यहं ॥४०॥ अजिग

न्नै न पुत्रोपि ह स्निग्धं न्नाप्नुभुजे ॥ पञ्चकामाप यज्ञार्थं हन्तो मोल्पेन सर्वथा ॥४१॥ सुखानां साधनं

द्रव्यं सुखसमन्वयं धनं ॥ धनमर्जयतो नश्चेत पुत्रोहं किं करोमि ते ॥४२॥ मां प्रबोधय बुध्या त्वं

दृष्टोसि महामते ॥ यथा मुच्येइ मस्तं त गर्भवासभयान्मुने ॥४३॥ दुर्लभं मानुषं जन्म कर्मभूमा वि

हानघ ॥ तत्रापि ब्राह्मणत्वं वै दुर्लभं चोत्तमे कुले ॥४४॥ वद्धोइ मिति मे बुद्धिनोपसर्प निवित्ततः ॥

संसारवासनाजाले नाक्लिष्टं हृद्धिगामिना ॥४५॥ सूत उवाच ॥ ॥ इत्युक्तस्तु तदा व्यासः पुत्रेणा

मितबुद्धिना ॥ प्रत्युवाच शुकं शांतं चतुर्थाश्रमं मानसं ॥४६॥ व्यास उवाच ॥ ॥ पठ पुत्र महाभा

गमपा भागवतं शुभं ॥ कृतं न चाति विस्तीर्णं पुराणं वेदसंमतं ॥४७॥ स्कंधा द्वादश यत्रैव पंचलक्ष

ण संयुतं ॥ सर्वेषां च पुराणानां भूषणं मे मतं शुभं ॥४८॥ सद्यस्तत्त्वविज्ञानं कृत मात्रेण जायते

न भागवतेनेह तेपठस्व महामते ॥४९॥ वटपत्रशायानाय विष्णवे बालरूपिणे ॥ पादांगुष्ठं मुखे क्षि

प्त्वा रममाणाय जिष्णवे ॥५०॥ कोहं कस्मात्समुत्पन्नः कार्पनिकारणादते ॥ केनास्मि बालभावेन नि

र्मितोहं चिदात्मना ॥५१॥ किमर्थं केन द्रव्येन कथं जानामि चाखिलं ॥ इत्येवं चिंतमानाय मुकुंदा

य महात्मने ॥५२॥ श्लोकार्द्धेन तदा प्रोक्तं भगवत्साखिलार्थदं ॥ सर्वं खल्विदमेवाहं नान्यदस्ति सना

तनं ॥५३॥ तद्धृतं विष्णुना पूर्वं सविज्ञानं मनस्यपि ॥ केनोक्ता वागियं सत्या चिंतयाने न चे

तसा ॥५३॥ कथं वेद्मि प्रवक्तास्याः वाचः पुंस्त्री नपुंसकं ॥ इति चिंता प्रपन्ने न धृतं भागवतं हृदि

५४॥ पुनः पुनः कृतात्मासे तस्मिन्नेवास्त चेतसा ॥ वटपत्रे शयानः सन् नूनं चिंतासमन्वितः ॥५५॥

तदा च सा तिकीर्णाकिः प्रादुरासच्चतुर्भुजा ॥ शंखचक्रगदापद्मवरायुधधारिणी वा ॥५६॥ दिव्यां

भा॰प्र॰ वरधरा देवी दिव्यभूषणभूषिता॥ संयुता सह शक्तिभिश्च सखीभिः स्वप्रभूतिभिः॥५७॥ प्रादुर्बभूव तस्या
५१ ग्रे विष्णोरमिततेजसः॥ मंदहास्य प्रयुंजाना महालक्ष्मीः शुभानना॥५८॥ सूत उवाच॥ ॥तां तथा
संस्थितां दृष्ट्वा हरिः कमललोचनः॥ विस्मितः सलिले तस्मिन्निराधारां मनोरमां॥५९॥ रतिर्भूति
स्तथा बुद्धिर्मतिः कीर्तिः स्मृतिर्धृतिः॥ श्रद्धा मेधा स्वधा स्वाहा क्षुधा निद्रा दया गतिः॥६०॥ तुष्टिः पुष्टिः
क्षमा लज्जा जृंभा तंद्रा च शक्तयः॥ संस्थिता पार्श्वे महालक्ष्म्याः पृथक् पृथक्॥६१॥
वरायुधधराः सर्वाः नानाभूषणभूषिता॥ मंदारमालाकलिता मुक्ताहारविराजिता॥६२॥ तां
दृष्ट्वा ताश्च संवीक्ष्य तस्मिन्नेकार्णवे जले॥ विस्मयाविष्टहृदयः संबभूव जनार्दनः॥६३॥ चिंतया
मास सर्वात्मा मायां दृष्ट्वाति विस्तरां॥ कुतो भूताः स्त्रियः सर्वाः कुतोऽहं वटपल्लवे॥६४॥ अस्मि राम॰
न्नेकार्णवे घोरे न्यग्रोधः कथमुच्छ्रितः॥ केनाहं स्थापितोऽस्म्यत्र शिशुं कृत्वा शुभाकृतिं॥६६॥ म ५१

मेयं जननी नो वा माया वा कापि दुर्विदा॥ दर्शनं केनचिल्लब्धं केनचिन्नैव हेतुना॥६७॥ किं मया चात्र
वक्तव्यं गंतव्यं वा न वा क्वचित्॥ मौनमाधाय तिष्ठेऽहं बालभावादतंद्रितः॥६८॥ ॥इति श्रीभ
गवती भागवते महापुराणे प्रथमस्कंधे पंचदशोऽध्यायः॥१५॥ व्यास उवाच॥ ॥दृष्ट्वा तं
विस्मितं देवं शयानं वटपत्रके॥ उवाच सस्मितं वाक्यं विष्णो किं विस्मितोऽसि॥१॥ महाश
क्त्याः प्रभावेन तव महं चापरास्तथा॥ भवंत्येव महालयेषु यथा भूत्वा पुनः पुनः॥२॥ निर्गुणा सा परा श
क्ति सगुणस्त्वं तथाप्यहं॥ सात्त्विकः सात्त्विकी चाहं मे नाम वा विभूतयः॥३॥ तन्नाभिकमलाद्ब्रह्मा
भविष्यति प्रजापतिः॥ कर्ता हि सर्वलोकस्य रजोगुणसमुद्भवः॥४॥ स तत्त्वा तपस्तापं पुष्क
न्न प्राप्य शक्तिमनुत्तमां॥ राजसीं रक्तवर्णां च करिष्यति जगत्त्रयं॥५॥ स गुणा संचभूतान्यस्मु
सोद्य महामतिः॥ इंद्रियाणींद्रियेशांश्च मनः पूर्वान्सुसंहितान्॥६॥ करिष्यति ततः सर्गं तेन क

ना.प्र. त्त्वमसि उच्यते ॥ विश्वस्यास्य महाभाग त्वं वै पालयिता तथा ॥ ७ ॥ न त्वं क्वचोर्मिभिर्देवेश क्रोधाद्यैर्न वि
४८ ष्यति ॥ तपः कृत्वा महाघोरं प्राप्य त्वं किं तु नाम सी ॥ ८ ॥ कस्मात्तेऽमोपि संहृत्य निविष्पति महामते ॥ ते
नाहं त्वामुपायातास्मि ति कीर्त्तमवेहि मां ॥ ९ ॥ त्वाम्पेइं लक्ष्मीपरं त्वासदाहं मधुसूदन ॥ हृदये ते कृता
वासा नवामि सततं कि जा ॥ १० ॥ विष्णुरुवाच ॥ ॥ श्लोकस्यार्थमयापूर्वं श्रुतं देवि स्फुटाक्षरं ॥ तत्के
नोक्तं वरारोहे रहस्यं परमं शिवं ॥ ११ ॥ तन्मे ब्रूहि वरारोहे संशयोपीयं वरानने ॥ निर्द्वन्द्वो हि यथाद्व्यं त
स्मरामि पुनः पुनः ॥ १२ ॥ व्यास उवाच ॥ ॥ विष्णोस्तद्वचनं श्रुत्वा महालक्ष्मीसितानना ॥ उवाच प
रयामीसा वचनं चारुहासिनी ॥ १३ ॥ महालक्ष्मी उवाच ॥ ॥ शृणु शौरे वचो मह्यं सगुणाहं च तत्तुनि
॥ तां च जानामि जानामि निर्गुणां सगुणत्रयां ॥ १४ ॥ त्वं जानीहि महाभाग तया यत्स्वीकृतं ॥ पु राम.
राणं भागवतं विद्धि वेदसारं श्रुताक्षरं ॥ १५ ॥ कल्पं चमहंतीमन्ये दे व्यासः त्वा नूनि सूदन ॥ पयायाप्रोक्तं परं ४८

गुह्यं हि तायतवसुव्रत ॥ १६ ॥ रक्षणीयं सदा चित्तेन विख्याप्यं कदाचन ॥ सारं च सर्वशास्त्राणां महा
विद्याप्रकाशनं ॥ १७ ॥ नातः परं वेद्मि तत्त्वं वर्त्तते भुवनत्रये ॥ प्रियोसि त्वं खलु देवास्ते न ते ख्यातं तव च
१८ ॥ व्यास उवाच ॥ ॥ इति श्रुत्वा वचो देव्याः महालक्ष्म्याश्चतुर्भुजः ॥ दधार हृदये नित्यं समत्वात्मंत्रम
नुत्तमं ॥ १९ ॥ कालेन कियता पुत्र तन्नाभिकमलोद्भवः ॥ ब्रह्मा देसमयात्रस्तो जगाम शरणं हरेः
२० ॥ ततः कृत्वा महद्युद्धं हत्वा तौ मधुकैटभौ ॥ जजाप भगवान् विष्णुः श्लोकार्द्धं विशदाक्षरं ॥ २१ ॥ ज
पंतं वासुदेवं च दृष्ट्वा देवः प्रजापतिः ॥ अपृच्छत्परमप्रीतः कंजजः कमलापतिं ॥ २२ ॥ किं त्वं जपसि देवेश
तत्त्वः कोप्यधिकोस्ति वै ॥ यं स्मृत्वा पुंडरीकाक्ष प्रीतोसि जगदीश्वर ॥ २३ ॥ हरिरुवाच ॥ ॥ मयि त्व
यि च पार्श्वक्तिः क्रियाकरणलक्षणा ॥ विचारय महाभाग सा का भगवती शिवा ॥ २४ ॥ यस्याधारे जगत्
सर्वं तिष्ठत्यत्र महार्णवे ॥ सा कापि वर्त्तते शक्तिरप्रमेया सनातनी ॥ २५ ॥ यावै विसृज्यते विश्वं जगदेतच्च

राचरं ॥ सैषा प्रसन्ना वरदा नृणां भवविमुक्तये ॥ २६ ॥ सा विद्या परमा मुक्तेर्हेतुभूता सनातनी ॥ संसा
रबंधहेतुश्च सैव सर्वेश्वरेश्वरी ॥ २७ ॥ अहं त्वमृषिजं विश्वं तस्माच्छिद्धि किं संभवं ॥ विधिब्रह्मन्न संदेहः कृ
त्स्नं यः सर्वथानघः ॥ २८ ॥ श्लोकार्धेन तया प्रोक्तं तद्वै भागवतं किल ॥ विस्तारं भविता तस्येच्छया परादौ यु
गे तथा ॥ २९ ॥ व्यास उवाच ॥ ॥ ब्रह्मणा संगृहीतं च विष्णोर्मुखपंकजात् ॥ नारदाय च तेनोक्तं
पुत्रायामितबुद्धये ॥ ३० ॥ नारदेन तथा मह्यं दत्तं हि मुनिना पुरा ॥ मया कृतमिदं पूर्णं द्वादशस्कंध
विस्तरं ॥ ३१ ॥ तस्मात्त्वं महाभाग पुराणं ब्रह्मसंमतं ॥ पंचलक्षणसंयुक्तं देवाश्चरितमुत्तमं ॥ ३२
तत्वज्ञानरसोपेतं सर्वेषामुत्तमोत्तमं ॥ धर्मशास्त्रसमं पुण्यं वेदार्थेनोपबृंहितं ॥ ३३ ॥ वृत्रासुरवधो
पेतं नानाख्यानकथायुतं ब्रह्मविद्यानिधिं पूर्णं संसारार्णवतारकं ॥ ३४ ॥ गृहाण त्वं महाभाग योग्यो
सि मतिमत्तरः ॥ पुण्यं भागवतं नाम पुराणं पुरुषर्षभ ॥ ३५ ॥ अष्टादश सहस्राणां श्लोकानां कुरु संग्र ४९

हं ॥ अज्ञाननाशनं दिव्यं ज्ञानभास्करबोधकं ॥ ३६ ॥ सुखदं शांतिदं धन्यं दीर्घायुष्यकरं शिवं ॥ श्रव
तां पठतां चेदं पुत्रपौत्रविवर्धकं ॥ ३७ ॥ शिष्योयं मम धर्मात्मा लोमहर्षणसंभवः ॥ पठिष्यति तवासार
र्द्धं पुराणसंहितां शुभां ॥ ३८ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा तेन पुत्राय मह्यं च कथितं किल ॥ मया गृहीतं त
त्सर्वं पुराणं चातिविस्तरं ॥ ३९ ॥ शुकोधीत्य पुराणं तु स्थितो व्यासाश्रमे शुभे ॥ न लेभे शर्म धर्मात्मा ब्रह्मा
त्मज इवापरः ॥ ४० ॥ एकांतसेवी विकलः शून्य इव लक्ष्यते ॥ नासक्तभोजनासक्तो नोपवासरतस्तथा ॥
४१ ॥ चिंताविष्टं शुकं दृष्ट्वा व्यासः प्राह सुतं प्रति ॥ किं पुत्र चिंत्यसे नित्यं कस्माद्विग्नोसि मानद ॥ ४२ ॥ नाध्यय
न मनाः सर्वं मृगेण स्त्रस्तवाधनः ॥ का चिंता वर्तते पुत्र मयि पितरि तिष्ठति ॥ ४३ ॥ सुखं भुंक्ष्व यथाकामं मु
च शोकं मनोगतं ॥ ज्ञाने चिंतय यत्रात्मोक्तं विज्ञानेन मनस्विनं कुरु ॥ ४४ ॥ न ते मनः सिद्धेच्छांति चेत्सामप्रसु
व्रत ॥ गच्छ त्वं मिथिलां पुत्र पालितां जनकेन ह ॥ ४५ ॥ स ते मोहं महाभाग नाशयिष्यति भूपतिः ॥ जनको

भा·प्र· ५० नामधर्मात्मा विदेहः सत्यसागरः ॥४६॥ तं गत्वा नृपतिं पुत्र संदेहं स्वं निवर्तय ॥ वर्णाश्रमाणां धर्मांस्त्वं
पृच्छ पुत्र यथातथं ॥४७॥ जीवन्मुक्तः स राजर्षिर्ब्रह्मज्ञानमतिः शुचिः ॥ तथ्यवक्तातियोगज्ञो यो
गी योगप्रियः सदा ॥४८॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्य व्यासस्यामिततेजसः ॥ प्रत्युवाच
महात्मासौ शुकश्चारणिसंभवः ॥४९॥ दंभोयं किल धर्मज्ञ भाति चित्ते ममाधुना ॥ जीवन्मुक्तो विदेह
श्च राज्यं शास्ति सुतान्वितः ॥५०॥ वंध्यापुत्र इवाभाति राजासौ जनकः पितः ॥ कुर्वन् राज्यं विदेहः किं सं
देहोयं ममाद्भुतः ॥५१॥ द्रष्टुमिच्छाम्यहं भूपं विदेहं नृपसत्तमं ॥ कथं तिष्ठति संसारे पद्मपत्रमिवांभ
सि ॥५२॥ संदेहोयं महान् तात हृदये परिवर्तते ॥ मोक्षः किं वदतां श्रेष्ठ सौगतानामिवापरः ॥५३॥ कथं
मुक्तममुक्तं स्यात् कृतं चाकृतं कथं ॥ व्यवहारः कथं त्याज्य इंद्रियाणां महामते ॥५४॥ माता पुत्री तथा राम·
भार्या भगिनी कुलटा तथा ॥ भेदाभेदः कथं तस्याः समत्वेन मुक्तता कथं ॥५५॥ कटुक्षारं तथा तिक्तं क ५०

षायं मिष्टमेव च ॥ जिह्वा यदि विजानाति मुक्तो भोगाननुत्तमान् ॥५५॥ शीतोष्णसुखदुःखादिपरि
ज्ञानं यदा भवेत् ॥ मुक्तता कीदृशी तात संदेहोयं ममाद्भुतः ॥५६॥ शत्रुमित्रपरिज्ञानं वैरं प्रीतिकं
सदा ॥ व्यवहारे परे निष्टं कथं न कुरुते नृप ॥५७॥ चौरं वा तापसं वापि समानं मन्यते कथं ॥ अस
मा यदि बुद्धिः स्यात् मुक्तता तर्हि कीदृशी ॥५८॥ दृष्टपूर्वो न मे कश्चित् जीवन्मुक्तश्च भूपतिः ॥ मायायं म
हातीतः गृही मुक्तः परंतप ॥५९॥ दिदृक्षा महती जाता त्वत्तः तं नृपतिं तथा ॥ संदेहविनिवृत्त्यर्थं
गच्छामि मिथिलां प्रति ॥६०॥ ॥ इति श्रीभगवति भागवते महापुराणे प्रथमस्कंधे षोडशोध्यायः
१६॥ ॥ सूत उवाच ॥ ॥ इत्युक्त्वा पितरं पुत्रः पादयोः पतितः शुकः ॥ बद्धांजलिरुवाचेदं गंतुका
मो महामनाः ॥१॥ आपृच्छे त्वां महाभाग यदुक्तं वचनं मया ॥ वैदेहीं नृपं द्रष्टुमिच्छामि पालितां ज
नकेन तु ॥२॥ विना दंडं कथं राज्यं करोति जनकः किल ॥ धर्मेण वर्तते लोको दंडश्चेन्न भवेद्भुवि

भा॰प्र॰ ३॥धर्मस्य कारणं देहो मन्वादिप्रणितः सदा॥स कथं वर्त्तते राजा संतापोयं महान्मम॥४॥
५१ ममामाता लियं वै ध्यानच्छान्तिविच्छिन्नं॥न मामिलां महाभाग गच्छामि च परंतप॥५॥सू
तउवाच॥ ॥नंदद्रष्टागंतुकामं च शुकं सत्यवतीसुतः॥आलिंग्योवाच पुत्रं तं ज्ञानिनं निःस्पृहं
दृढं॥६॥व्यासउवाच॥ ॥स्वस्त्यस्तु शुक दीर्घायुर्भव पुत्र महामते॥सत्यां वाचं प्रदत्वा मे गच्छचाश्च
यथासुखं॥७॥आगंतव्यं पुनर्गत्वा ममाश्रममनुत्तमं॥नकुत्रापि च स्थातव्यं त्वया पुत्र कथंचन॥
॥८॥सुखं जीवाम्यहं पुत्र दृष्ट्वा ते मुखपंकजं॥अपश्यन्दुःखमाप्नोति प्राणस्त्वमसि मे सुत॥९॥द
ष्ट्वा तं जनकं पुत्र संदेहं विनिवर्त्य च॥अत्रागत्य सुखं तिष्ठ वेदाध्ययनतत्परः॥१०॥सूतउवाच॥ ॥
इत्युक्तः सोभिवाद्याथ पितरं चैव प्रदक्षिणं॥चलितस्त्वरसातीव धनुर्मुक्तः शरो यथा॥११॥संपश्यन् राम
विविधान्देशान्लोकांश्च वित्तधर्मिणः॥वनानि पादपांश्चैव क्षेत्राणि च फलानि च॥१२॥तापसा ५१

न्तप्यमानांश्च याजकान्दीक्षपालितान्॥योगाभ्यासरतान्योगीन्वानप्रस्थान्वनौकसः॥१३॥
शैवान्पाशुपतांश्चैव सौरांश्च शाक्तिकांस्तथा॥वीक्ष्य नानाविधान्धर्मान्जगामातिसविस्म
यः॥१४॥वर्षद्वयेन मेरुं च समुत्तीर्य महामतिः॥हिमाचलं च वर्षेण जगाम मिथिलां प्रति॥१५॥प्र
विष्टो मिथिलामध्ये पश्यन्नृपमनुत्तमं॥प्रजाश्च सुखिताः सर्वसदाचाराः सुसंस्थिताः॥१६॥
क्षत्त्रा निवारितस्तत्र कस्त्वं समागतः कुतः॥किं ते कार्यं वदस्वेति पृष्टस्तेन च चाब्रवीत्॥१७॥
निःसृत्य नगरद्वारात्संस्थितः स्थाणुरिवाचलः॥विस्मितोतिहसन्तत्र स्थो कथं नोवाच किंचन॥१८
प्रतिहारउवाच॥ ॥ब्रूहि मूकोसि किं ब्रह्मन्किमर्थं त्वमुपागतः॥चलनं च विना कार्यं न भवेदि
ति मे मतिः॥१९॥राजाज्ञया प्रवेष्टव्यं नगरेस्मिन्सदा द्विज॥अज्ञातकुलशीलस्य प्रवेशो ना
त्र सर्वथा॥२०॥तेजवानासि विद्वान्त्वं ब्रह्मण्यो वेदवित्तम॥कुलं कार्यं च मे ब्रूहि यथेष्टं गच्छमा

नरः ॥२१॥ शुक उवाच ॥ ॥ यदर्थमिमागतोस्म्यत्र तन्मां त्वं वचनान्नृप ॥ विदेहनगरं द्रष्टुं वैरोप
न्न दुर्लभं ॥२२॥ मोहोयं मम दुर्बुद्धेः पद्भ्यां ध्यं गिरिद्वयं ॥ राजानं द्रष्टुकामोहं पर्यटन्समुपागतः ॥२३
वंचितोहं त्वयं पित्रा दूषणं कस्य दीयते ॥ भ्रामितोहं महाभाग कर्मणा बाधरानले ॥२४॥ नाशाय
पुरुषस्येह परिश्रमणकारणं ॥ सा मे नास्ति तथाप्यत्र संयोक्तोस्मि श्रमाकिल ॥२५॥ निराशस्य
सुखं नित्यं यदि मोहे न मकृति ॥ निराशोहं महाभाग मग्नोस्मि मोहसागरे ॥२६॥ क्रमेण मिथिला
केयं पश्चाच्च समुपागतः ॥ परिश्रमफलं किं मे वंचितो विधिना किल ॥२७॥ प्रारब्धं किल भोक्तव्यं
शुभं वाप्यशुभं तथा ॥ उद्यमस्तत्परो नूनं कारयत्येव सर्वथा ॥२८॥ नतीर्थं नैव दैवोत्र यदर्थमिह मेश्र
मः ॥ श्रमवेत्रे पुरे त्वातो विदेहो नामनृपतिः ॥२९॥ इत्युक्त्वा विरराम सौ ध्यानंभूतः स्थितः
शुकः ॥ ज्ञातोसि प्रतिहारेण ज्ञानी कश्चिद्द्विजोत्तमः ॥३०॥ इत्युक्त्वा विरराम सौ ध्यानंभूतः ५२

स्थितः मानपूर्वमुवाचासौ तं क्षत्ता संस्थितं मुनिं ॥ गच्छ सोयत्र ते कार्यं यथेष्टं द्विजसत्तम ॥३१॥ अ
पराधं मया तेद्य यन्निवारितवानहं ॥ तत्क्षन्तव्यं महाभाग विमुक्तं नास्ति मावृतं ॥३२॥ शुक
उवाच ॥ ॥ किं ते त्र दुःक्त तं क्षत्रः परतंत्रोसि सर्वदा ॥ भुकार्ये प्रेकृत्स्नत्वं सेवकेन यथोचितं
३३ ॥ न नृपं दूषणं चात्र यदहं रक्षितस्त्वया ॥ चौरशत्रुपरित्राणं कर्त्तव्यं सर्वथा नृपे ॥३४॥ ममैव
सर्वथा दोषं यदहं समुपागतः ॥ गमनं परगेहे यत्तल्लघुतायाश्च कारणं ॥३५॥ प्रतिहार उवाच
॥ ॥ किं सुखं द्विज दुःखं किं कार्यं सुखमिच्छता कः शत्रुर्हितकर्त्ता कः ब्रूहि सर्वं ममाद्य ते ॥३६॥ शुक
उवाच ॥ ॥ द्वैविध्यं सर्वलोकेषु सर्वत्र द्विविधो जनः ॥ रागी चैव विरागी च तयोश्चित्तं द्विधा पुनः
३७॥ रागी तु द्विविधः प्रोक्तो मूर्खश्च चतुरस्तथा ॥ चातुर्यं द्विविधं तत्र शास्त्रजं मतिजं तथा ॥३८॥ म
तिस्तु द्विविधा लोके युक्तायुक्तेति सर्वथा ॥३९॥ प्रतिहार उवाच ॥ ॥ यदुक्तं भवता विद्वन्नार्थ

सोऽहं द्विजोत्तम भगवन्सर्वं विस्तरेण यथार्थवित्सत्तम ॥४०॥ शुक उवाच ॥ ॥ रागी यस्त्वत्र
संसारे स रागी प्रोच्यते ध्रुवं ॥ दुःखं बहुविधं तत्र सुखं च विविधं पुनः ॥४१॥ धनं प्राप्य सुतान्दा
रान्मानत्वं पूजनं तथा ॥ तदप्राप्य महद्दुःखं भवत्येव क्षणे क्षणे ॥४२॥ कार्यं तस्य सदोपा
यः कर्तव्यः सुखसाधने ॥ तस्यारातिः स विज्ञेयो सुखे विघ्नं करोति यः ॥४३॥ सुखोत्साहप्रदो मि
त्रं रागयुक्तस्य सर्वदा ॥ चतुरो नैव मुह्येत मूर्खः सर्वत्र मुह्यति ॥४४॥ विरक्तस्य च मुक्तस्य सु
खमेकान्तसेवनं ॥ आत्मानुचिंतनं चैव वेदान्तस्य विचिंतनं ॥४५॥ दुःखं तदितरं सर्वं संसारकथ
नादिकं ॥ शत्रवो बहवस्तस्य विज्ञस्याप्यनुमिच्छत ॥४६॥ कामः क्रोधश्च लोभश्च प्रमादो व्रात्र
वः किं न बन्धुः संतोष एवास्य नान्योस्ति भुवनत्रये ॥४७॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्य
मैत्रावतं ज्ञानिनं द्विजाः क्षत्ता प्रवेशयामास कक्षां चातिमनोरमां ॥४८॥ नगरं वीक्ष्यमाणः सन्नै

विध्यजनसंकुलं ॥ नानाविपणिरथ्याढ्यं क्रयतत्परं ॥४९॥ रागद्वेषयुतं कामक्रोधलोभमोहाः
कुलं तथा ॥ विवदं जनाकीर्णं सुपूर्णमिह तत्परं ॥५०॥ पश्यन्स विविधान्लोकान्प्रसर
न्राजमंदिरं ॥ प्राप्तः परमतेजस्वी द्वितीय इव भास्करः ॥५१॥ निवारितश्च तत्रैव प्रतिहारेण का
ष्ठजः ॥ तत्रैव स्थितो द्वारि मोक्षमेवानुचिंतयन् ॥५२॥ छाया पामा तपे चैव समदर्शी महामना
ध्यानं ध्यानस्थैकांते स्थितः स्थाणुरिवाचलः ॥५३॥ तं मुहूर्तादिवागम्य राज्ञो मंत्री कृतांज
लिः ॥ प्रवेशयत्ततः कक्षां द्वितीयां राजवेश्मनः ॥५४॥ तत्र दिव्यं वनं रम्यं पुष्पितं दिव्यपा
दपं ॥ महोद्यानं दर्शयित्वा कृत्वा चातिथिसत्क्रियां ॥५५॥ वारमुख्याः स्त्रियस्तत्र राजसेवाप
रायणाः ॥ गीतवादित्रकुशला कामशास्त्रविशारदाः ॥५६॥ ताश्चादिश्य च सेवार्थं शुकस्य सं
चिंत्य मंत्री निर्गतस्सदनात्तस्मात् व्यासपुत्रः स्थितस्तदा ॥५७॥ पूजितः परया भक्त्या ताभिस्त्री

भा॰प्र॰ भिर्यथाविधि॥ देशकालोपपन्नेन धनेनेनयथार्हतः॥५८॥ कृतवान्समहात्मासशुकःपरमधर्म
५४ वित्॥ सुरम्यंदर्शयामाससुरंगनाःकाममोहिताः॥५९॥ सपुत्रोवारूपवान्कांतोमृदुभाषीमनोर
मः॥ दृष्ट्वातामुमुक्षुःसर्वानिंचकाममिवापरं॥६०॥ जितेंद्रियंमुनिंमत्वासर्वाःपर्यचरंस्तथा॥ आर
णेयस्तुशुभात्मामानभावमकल्पयत्॥६१॥ आत्मारामोजितक्रोधोनहृष्यतिनतप्यति॥ पश्य
न्नासांविकारांश्चस्वस्थएवसतत्त्ववित्॥६२॥ तस्मैदाप्यांसुरम्यांचदत्वानृपिःसुसंस्कृतां
परार्ध्यास्तरणांरम्यांनानोपस्करसंवृतां॥६३॥ सकृत्वापादशौचंचकुशपाणिरतंद्रितः॥ उपा
स्यपश्चिमांसंध्यांनममेवान्वपद्यत॥६४॥ याममेकंस्थितोध्यानेसुष्वापतदनंतरं॥ सुप्त्वायाम
चयंतत्रचोदतिष्ठत्ततःपरं॥६५॥ पाश्चात्यंसंयामिनीयामंध्यानमेवान्वपद्यत॥ स्नात्वाप्रातःक्रि
यांकृत्वापुनरास्तेसमाहितः॥६६॥ ॥इतिश्रीभगवतीभागवतेमहापुराणेप्रथमस्कंधेस ५४

प्तदशोऽध्यायः॥१७॥ ॥सूतउवाच॥ ॥श्रुत्वागतंराजामंत्रिभिःसहितःशुचिः॥
पुरोपुरोहितंकृत्वागुरुपुत्रंसमभ्ययात्॥१॥ कृत्वार्हणंनृपःसम्यक्दत्वासनमनुत्तमं॥
पप्रच्छकुशलंगांचविनिवेद्यपयस्विनीं॥२॥ सचतांनृपपूजांवैमत्वागृह्ययथाविधिः॥ पप्रच्छ
कुशलंराज्ञेस्वंनिवेद्यनिरामयं॥३॥ कृत्वाकुशलसंप्रश्नंसोपविष्टःसुखासने॥ शुकंव्यासमुनें
द्रांतंपर्यप्रच्छतपार्थिवः॥४॥ किंनिमित्तंमहाभागनिःस्पृहस्यचमांप्रति॥ जातंयागमनंब्रूहिका
र्यंतन्मुनिसत्तम॥५॥ शुकउवाच॥ ॥व्यासेनोक्तोमहाराजकुरुदारपरिग्रहं॥ सर्वेषामाश्रमा
णांचगृहस्थाश्रमउत्तमं॥६॥ मयानांगीकृतंवाक्यंमत्वाबंधंगुरोरपि॥ नबंधोस्तीतितेनो
क्तोनाहंतत्कृतवान्मुने॥७॥ इतिसंदिग्धमनसंमत्वामांमुनिसत्तमः॥ उवाचवचनंतथ्यं
मिथिलांगच्छमाशुच॥८॥ याज्योस्तिजनकस्तत्रजीवन्मुक्तोनराधिपः॥ विदेहोलोकविदितः

पानिराज्यमकंटकं॥९॥कुर्वन्राज्यंतथा राजा मायापाशैर्नबध्यते॥ त्वं बिभ्यसि कथं पुत्र वनस्थ
स्त्रिः परंतप॥१०॥पश्यतं नृप शास्त्रदृष्टिं यन्मोहं च मनो गतं॥कुरु दारान्महाभाग पृष्टवान्नृप
तिं च तं॥११॥संदेहो मे मनो जातः कथयिष्यामि पार्थिव॥तच्छ्रुत्वा वचनं तस्य मामेहि नरसत्तमुत
न॥१२॥संप्राप्तो हं महाराज त्वत्सुरे हितराज्ञया॥मोक्षकामोस्मि राजेंद्र ब्रूहि कृत्यं ममानघ॥१३
तपस्तीर्थं प्रव्रज्या वा स्वाध्यायस्तीर्थसेवनं॥ज्ञानं वा वद राजेंद्र मोक्षं प्रति च कारणं॥१४॥जनक
उवाच॥ ॥शृणु विप्रेण कर्तव्यं मोक्षमार्गाश्रितेन यत्॥उपनीतो वसेद्दादौ वेदाभ्यासाय वै गुरुं
॥१५॥अधीत्य वेदान्वेदं वा दत्वा च गुरुदक्षिणां समावर्त्तस्त्वग्ग्रहस्थे सदाश्चनिवसेन्मुनिः॥१६॥
न्यायवृत्तिरसंतोषी निराशो गतकिल्बिषः अग्निहोत्रादिकर्माणि कुर्वाणः सततं वाक्शुचिः
॥१७॥पुत्रपौत्रान्समुत्पाद्य वानप्रस्थाश्रमं वसेत्॥तपसा चेंद्रियान्जित्वा नार्यं पुत्रे निवेश्य च॥१८

रो
सर्वेनग्निं पथान्यायमात्मन्यासे न्यास्य यथोक्तधर्मवित्॥वसेत्तुर्याश्रमे गंतस्तु वैराग्य संभवे॥१९॥विर
क्तस्याधिकारोस्ति सन्यासे न्यायतोक्तचित्॥वेदवाक्यमिदं तथ्यं सत्यं चैव द्विजोत्तम॥२०॥मुका
श्चत्वारिंशद्वै संस्कारा वेदबोधिनाः चत्वारिंशद्गृहस्थस्योक्तास्त्रमहात्मभिः॥२१॥अष्टौ च
मुक्तिकामस्य प्रोक्ताः शमदमादयः अभ्रमाद्यश्रमं गच्छेदिति शिष्टानुशासनं॥२२॥शुक उ०
उत्पन्ने हृदि वैराग्ये ज्ञानविज्ञान संभवे॥अवश्यमेव वस्तव्यं आश्रमेषु वनेषु च॥२३॥जनक उ
इंद्रियाणि बलिष्ठानि मनसु क्तानि मानद॥अपक्कस्य प्रकुर्वंति विकारांस्तान्मनेक्त॥२४॥
भोजनेच्छा सुखेच्छा च शय्येच्छा न्याश्च कामन॥यतीभूत्वा कथं कुर्याद्विकारे समुपस्थिते॥२५॥दु
र्जरं वासनाजालं न शांतिमुपयाति वै॥अतस्तच्छमनायापि क्रमणं च परिसिजेत्॥२६॥ऊर्ध्वं
सुप्तोपतस्सेवनशयानोपतनस्सधः॥परिक्रिज्य परिक्रिष्टो समागंतिन नेतेनरः॥२७॥यथापि पिलि

श्राम॰ कामं ज्ञाश्वारवांसमधिरोहति ॥ शनैः शनैः फले याति सुखेन मंदगापि वै ॥ २८ ॥ विहगस्तरसाप्याति
५६ विघ्नशंकातुतस्य वै ॥ श्रांता विश्रम्य विश्रम्य सुखं याति पिपीलिका ॥ २९ ॥ मनस्कप्रवशंकाममजेय
मक्रतात्मभिः ॥ अतः क्रमेणजेतव्य माश्रमानुक्रमेण च ॥ ३० ॥ गृहस्थाश्रमसंस्थोपि शांतः सुमतिरा
त्मवान् ॥ न जहर्षेन्न च नयेछ्या लाभे समो भवेत् ॥ ३१ ॥ विहितं कर्म कुर्वाण न स्सृजन्विहितं चयत्न
॥ आत्मलाभे सुसंतुष्टो मुच्यते नात्र संशयः ॥ ३२ ॥ यथाहं राज्यसंस्थोपि जीवन्मुक्तो यथानघ ॥ विच
रामि यथाकामं न मां किंचित्स्य बाध्यते ॥ ३३ ॥ भुंजानो विविधान् भोगान् कुर्वन् कार्याण्यनेकशः ॥ न
लिप्यामि यथाहं त्वं तथा मुक्तो भवानघ ॥ ३४ ॥ कथ्यते खलु पद्मस्य मदरूप बध्यते कुतः ॥ दृश्यानि प्रपं
चभूतानि गुणास्तेषां तथा पुनः ॥ ३५ ॥ आत्मगम्योनुमानेन न प्रत्यक्षः कदाचन ॥ स कथं बध्यते ब्रह्मन्नि
र्विकारो निरंजनः ॥ ३६ ॥ मन एव सुखदुःखानां कारणं विद्धि बुद्धितः ॥ निर्मले चक्रते तस्मिन्सर्वं भवति ५६

निर्मलं ॥ ३७ ॥ भ्रमन् सर्वेषु तीर्थेषु स्नात्वा स्नात्वा पुनः पुनः ॥ अक्षालितं मनो यावत्तावत्सर्वं निरर्थकं ॥ ३८ ॥ न
देहो न च जीवात्मा नेन्द्रियाणि परंतप ॥ मन एव मनुष्याणां कारणं बंधमोक्षयोः ॥ ३९ ॥ शुद्धो मुक्तः सदैवा
त्मा न वै बध्येत कर्हिचित् ॥ बंधमोक्षौ मनःसंस्थौ तस्मिन् शांते प्रशाम्यति ॥ ४० ॥ शत्रुर्मित्रमुदासीनभेदाः
सर्वे मनोगताः ॥ एकात्मत्वे कथं भेदः स भवेत् द्वैतदर्शनात् ॥ ४१ ॥ शत्रुर्मित्रं जीवो ब्रह्म सदा चैव नात्र का
र्यविचारणा ॥ भेदबुद्धिस्तु संसारे वर्तमाने प्रवर्तते ॥ ४२ ॥ अविद्येयं महाभाग विद्या च तन्निवर्तनी ॥ अ
विद्याविनाशात् कथं विद्यां च वेत्ति वै ॥ ४३ ॥ विद्याविद्येच विज्ञेये सर्वदैव विचक्षणैः ॥ विना तपेन छाया
पाः ज्ञापते च कथं सुखं ॥ ४४ ॥ गुणा गुणेषु वर्त्तन्ते भूतानि च तथैव हि ॥ इंद्रियाणीन्द्रियेष्वेव को दोषस्त
त्र चात्मनः ॥ ४५ ॥ मर्यादारक्षार्थं कृताः वेदेषु सत्क्रियाः ॥ अन्यथा धर्मनाशः स्यात् सौगतानामिवान
घ ॥ ४६ ॥ धर्मनाशे विनष्टो भूत्कमचार विवर्जितः ॥ अतो वेदोपदिष्टेन मार्गेण गच्छतां शुभं ॥ ४७ ॥

भा॰ प्र॰ शुकउवाच ॥ ॥ संदेहोवर्त्ततेराजन्निवृत्तिमेतिमेकिल ॥ भवताकथितंपत्र्वत्त्रश्रण्वतोमेनराधिप ॥
५७ ४९ ॥ वेदधर्मेतुहिंसास्यादधर्मविज्ञाहिसा ॥ कथंमुक्तिप्रदोधर्मवेदोक्तोवनन्नृपते ॥ ५० ॥ प्रत्यक्षे
णत्वनाचारोसोमपानेनराधिप ॥ पशूनांहिंसनंतद्वन्नभक्षणंचामिषस्यच ॥ ५१ ॥ सुत्रामणौन
थाप्रोक्तः प्रत्यक्षेणसुराग्रहः ॥ द्यूतक्रीडातथाप्रोक्ताज्ञासानांचविक्रेयनः ॥ ५२ ॥ नात्रचित्रमरौ
तिसास्त्रोक्तःप्रत्यक्षेणसुराग्रहः ॥ धूत्स्वासवंजायतेराजसत्तम ॥ अग्निहोत्रंगवालंभस्तथावैगो
सवःस्मृतः ॥ ५३ ॥ पुराश्रुतंपुराणेषुरंतिदेवोनृपोत्तमः ॥ गोसवाविहितास्तेननवहश्वसदक्षिणाः
५४ ॥ चर्मणांपर्वतेजातेविंध्याचजसमःपुनः ॥ मेद्यंबुप्लावनाज्जातानानदीचर्मणवतीशुभा ॥ ५५ ॥
सोपिराजादिवंयातोकीर्त्तिस्याखिलाभुवि ॥ एवंधर्मेषुवेदेषुनमेबुद्धिःप्रवर्त्तते ॥ ५६ ॥ स्त्रीसं
गेचतथाभोगेसुखमाप्नोतिमानवः ॥ अज्ञानेदुःखमत्यर्थंञोवत्तुंक्तःकथंभवेत् ॥ ५७ ॥ जनर ५७

कउवाच ॥ ॥ हिंसापरेषुप्रत्यक्षासाहिंसापरिकीर्त्तिता ॥ उपाधियोगतोहिंसानास्त्यपेतिवि
निर्णयः ॥ ५८ ॥ यथाइंधनसंयोगादग्नौधूमःप्रवर्त्तते ॥ तद्वियोगात्तथातस्मिन्निर्धूमत्वंविभाति
वै ॥ ५९ ॥ अहिंसाचतथाविद्धिवेदोक्तामुनिसत्तम ॥ रागिणांसाविहिंसैवनिस्पृहाणांनसात
था ॥ ६० ॥ रागेक्कंतंचयत्कर्मतथाहंकारसंभवं ॥ अकृतंवेदविदांसाःप्रवदंतिमनीषिणः ॥ ६१ ॥
इतिश्रीभगवतीभागवतेमहापुराणेप्रथमस्कंधेअष्टादशोध्यायः ॥ १८ ॥ ॥ शुकउवाच
॥ संदेहोयंमहाराजवर्त्ततेहृदयेमम ॥ मायामध्येवर्त्तमानःसकथंनिस्पृहोभवेत् ॥ १ ॥ शा
स्त्रज्ञानंचसंप्राप्यनित्यानित्यविचारणं ॥ त्यजतेनमनोमोहंकथंमुच्येतसोनरः ॥ २ ॥ अंत
र्गततमःछेत्तुंशास्त्रबोधोहिनक्षमः ॥ यथानन्दप्रतिमःकृतपादीपवन्तिया ॥ ३ ॥ अद्रो
हःसर्वभूतेषुकर्त्तव्यःसर्वदाबुधैः ॥ सकथंराजशार्दूलगृहस्थस्यभवेत्तथा ॥ ४ ॥ वित्तेषि

भा.प्र.
५८

णा न ते त्रांता न तथा राजन् सुरवैरिणः॥ जपैर्वैरिणा च संग्रामे जीवन्मुक्तः कथं भवान्॥५॥ चौरेषु र
चौरबुद्धिस्ते साधुबुद्धिस्तु तापसे॥ स्वपरत्वं गतं नास्ति विदेह त्वं कथं नृप॥६॥ कटुतीक्ष्णकषाया
म्लरसान् वेत्सि शुभाशुभान्॥ शुभेषु रमते चित्तं नाशुभेषु तथा नृप॥७॥ जाग्रत्स्वप्नसुषुप्तिश्च तव
राजन् भवंति हि॥ अवस्थात्रयधा कालं तुरीये सि कथं नृप॥८॥ गजाश्वरथपादाता सर्वे चैव त्वागाम
म॥ स्वाम्यहं चैव सर्वेषां मन्यसे त्वं न मन्यसे त्वं न मन्यसे॥९॥ मिष्टमश्नासि दा राजन् समुद्दिप्तो विमनावि
षे॥ मानापमानं च तथा सपेसि मदकन्नन्दपोत्तम॥१०॥ विमुक्तस्त्वं भवे राजन् समलोष्टाश्मकांचनः॥ एका
त्मबुद्धिः सर्वत्र हितकृत्सर्वबंधुषु॥११॥ न मे परमने चित्तं गृहदारादिषु नृप॥ एकाकी निस्पृहो सर्वेचरे
ह मिति मे मतिः॥१२॥ निःसंगो निर्ममः शांतोऽपन्नमूलफलाशनः॥ मृगवद्विचरिष्यामि निर्द्वंद्वो निःपरिग्र राम
हः॥१३॥ किं मे गृहेण वित्तेन भार्यया वा सुरूपया॥ निःसंगमनसः कामगुणातीतस्य पार्थिव॥१४॥ चिंतंतेविवि ५८

धाकारं नानारागसमाकुलं॥ दंभोयं खलु मे भाति विमुक्तोसीति भाषसे॥१५॥ कदाचिद्धर्मजा चिंता
निश्चिंतोसि कदा नृप॥१६॥ वैराग्यं न साधयेमुनयो मिताहारा जितव्रताः॥ तेपि मुह्यंति संसारे जानन्मि
थ्येति सर्वथा॥१७॥ तव वंशसमुद्भवानां विदेहाइति भूपते॥ रौढिकं नाम जानीहि नान्यथेति कदाचन॥१८
विद्याधरो यथा मूर्खो जन्मांधस्तु दिवाकरः॥ लक्ष्मीधरो दरिद्री च नामैतेषां निरर्थकं॥१९॥ तव वंशो
द्भवाः पूर्वे श्रृणु ताराजन्म यथा नृप॥ विदेहा इति विख्याता नामतः कर्मतो न ते॥२०॥ निमिर्नाम भवद्रा
जा पूर्वं तव कुले नृप॥ यज्ञार्थं स तु राजर्षिर्वसिष्ठं स्वगुरुं मुनिं॥२१॥ निमंत्रयामास यदा तदोवाच न
पं मुनिः॥ निमंत्रितोस्मि यज्ञार्थं देवेंद्रेणाधुना किल॥२२॥ कृत्वा तस्य मखं पूर्णं करिष्यामि तवापि
वै॥ तावत्कुरु धराजेंद्र संभारं तु शनैः शनैः॥२३॥ इत्युक्त्वा निर्ययौ सोथ महेंद्रयजने मुनिः॥ निमि
रन्यं गुरुं कृत्वा चकार मखमुत्तमं॥२४॥ तच्छ्रुत्वा कुपितोत्यर्थं वसिष्ठो नृपतिं पुनः॥ शशाप च ततः

भा.प्र० देहस्ते गुरुलोपकः ॥२५॥ राज्ञापि तं शुकं पृष्ठं तदा पिच्चप्रतिलिति ॥ अन्योन्यं तत्रापास्य निवेतौ तौ विवचमयाश्रु
५९ तं ॥२६॥ विदेहो यदि राजेंद्र कथं ज्ञातो गुरुः स्वयं ॥ विनोदं वमे चित्रे विभाति नृप सत्तम ॥२७॥ जनक
उवाच ॥ ॥ सत्यमुक्तं त्वया तात मिथ्या किंचिदिदं मतं ॥ तथापि शृणु विप्रेंद्र गुरुर्मे सिसु पूजितः
२८ ॥ पितुः संगं परित्यज्य वनं गंतुं त्वमिच्छसि ॥ मृगैः सह सुसंबंधो भविता ते न संशयः ॥२९॥ महा
भूतानि सर्वत्र निःसंगः कथं भविष्यसि ॥ आहारार्थं सदा चिंता निश्चिंतः स्यात्कथं मुने ॥३०॥ दंडाजिन
कृता चिंता यथा तव वनेपि च ॥ तथैव राज्यचिंता मे चिंतया न स्ववा न वा ॥३१॥ विकल्पोपहतस्त्वं वै दू
रदेशमुपागतः ॥ न मे विकल्पसंदेहो निर्विकल्पोस्मि सर्वदा ॥३२॥ सुखं स्वपामि विप्राहं सुखं भुंजामि
सर्वदा ॥ न बद्धोस्मीति बुध्याहं सर्वदैव सुखी मुने ॥३३॥ त्वं तु दुःखी सदैवासि बद्धोहमिति शंकया ॥ इति रा.म.
शंकां परित्यज्य सुखी भव समाहितः ॥३४॥ देहोयं मम बद्धोयं न ममेति विमुक्तता ॥ तथा गृहं न मे ५९

राज्यं न ममेति च निश्चयः ॥३५॥ सूत उवाच ॥ ॥ तच्छ्रुत्वा वचनं तस्य शुकः प्रीतमना भवत् ॥ आपृच्छ्य तं जगामा
शु व्यासाश्रममनुत्तमं ॥३६॥ आगच्छंतं शुकं दृष्ट्वा व्यासोपि सुखमाप्तवान् ॥ आलिंग्याघ्राय पप्रच्छ कुशलं
च पुनः पुनः ॥३७॥ स्थितस्तत्राश्रमे रम्ये पितुः पार्श्वे समाहितः ॥ वेदाध्ययनसंपन्नः सर्वशास्त्रविशा
रदः ॥३८॥ जनकस्य दशां दृष्ट्वा राज्यस्थस्य महात्मनः ॥ स निर्वृतिं परां प्राप्य पितुराश्रमसंस्थितः ॥
३९॥ पितॄणां सुभगा कन्या पीवरी नाम सुंदरी ॥ शुकश्चकार पत्नीं तां योगमार्गस्थितोपि हि ॥४०
स तस्यां जनयामास पुत्रांश्चतुर एव च ॥ कृष्णं गौरप्रभं चैव भूरिं देवश्रुतं तथा ॥४१॥ कन्यां
कृत्वीं सुसाध्व्यां सुपुत्रः प्रतापवान् ॥ ददौ विभ्राजपुत्राय त्वणुहाय महात्मने ॥४२॥ अणुहस्य सुतः
श्रीमान् ब्रह्मदत्तः प्रतापवान् ॥ ब्रह्मज्ञः पृथिवीपालः शुककन्यासमुद्भवः ॥४३॥ कालेन कियता तत्र
नारदस्योपदेशतः ॥ ज्ञानं परकं प्राप्य योगमार्गमनुत्तमं ॥४४॥ कैलासशिखरे रम्ये त्यक्त्वा संगं पितुः शु

भा॰प्र॰ कः॥ ध्यानमास्थाय विपुलं स्थितः संगपरासुखः॥४५॥ उत्तमानगिरेः शृंगात्सिद्धिं च परमां गतः॥
६० आकाशगो महातेजा विराजते यथा रविः॥४६॥ गिरेः शृंगं द्विधा जातं शुकोत्पतपीनेन तदा॥ उत्साता
बहवो जाताः शुकस्याकाशगो भवत्॥४७॥ अंतरिक्षे यथा वायुः स्तूयमानः सुरर्षिभिः॥ तेजसा तिविरा
जन्वै द्वितीय इव भास्करः॥४८॥ व्यासस्तु विरहाक्रांतः क्रंदन् पुत्रेति चासकृत्॥ गिरेः शृंगे गतस्तत्र
शुको पथा स्थितो भवत्॥४९॥ क्रंदमानं तथा व्यासं मतादीनं समाकुलं॥ गता सर्वगतः साक्षी प्रति
शब्द महात्मना॥५०॥ तदाद्यापि गिरेः शृंगे प्रतिशब्दः स्फुटो भवत्॥ रुदंतं तं समालक्ष्य व्यासं शोक
समन्वितं॥५१॥ पुत्र पुत्रेति भाषंतं विरहेण परिप्लुतं॥ शिवस्तत्र समागत्य पाराशर्यं प्रबोधयत्॥५२
मा शोकं कुरु व्यासाद्य पुत्रस्ते योगवित्तमः॥ परमां गतिमापन्नो दुर्लभां चाकृतात्मभिः॥५३॥ तस्य शोको रामः
न कर्तव्यो भवता स वै द्विजा नता॥ कीर्तिस्ते विपुला जाता तेन पुत्रेण चानघ॥५४॥ व्यास उ॰॥ न शोको यार ६०

ति देवेश किं करोमि जगत्पते॥ अतृप्ते लोचने मेद्य पुत्रदर्शनलालसे॥५५॥ श्रीमहादेव उवाच॥ ॥
छायां पुत्रसमां पार्श्वस्थां सुमनोहरां॥ तां वीक्ष्य मुनिशार्दूल शोकं जहि परंतप॥५६॥ सूत उवा॰
तदा ददर्श व्यासस्तु छायां पुत्रस्य सुप्रभां॥ दत्वा वरं हरस्तस्मै तत्रैवांतरधीयत॥५७॥ अंतर्हिते महादे
वे व्यासः स्वाश्रममभ्यगात्॥ शुकस्य विरहेणाति तप्तः परमदुःखितः॥५८॥ ॥इति श्रीभगवति भा
गवते महापुराणे प्रथमस्कंधे शुकांतर्धानं नाम एकोनविंशोध्यायः॥१९॥ ऋषय ऊचुः॥ ॥शुक र
स्तु परमां सिद्धिं प्राप्तवान् देवसंमतः॥ किं चकार ततो व्यासस्तन्नो ब्रूहि सविस्तरं॥१॥ सूत उवाच॥ ॥शि
ष्या व्यासस्य ये व्यासन् वेदव्यासपरायणाः॥ आज्ञामादाय ते सर्वे गताः पूर्वं महीतले॥२॥ असितो देव
लश्चैव वैशंपायन एव च॥ जैमिनिश्च सुमंतुश्च गताः सर्वे महातपाः॥३॥ तानागतान्न वीक्ष्य पुत्रं च लो
कांतरितमप्युत॥ व्यासः शोकसमाक्रांतो गमनायाकरोन्मतिं॥४॥ सस्मार मनसा व्यासः तां निषादसु

भा॰ प्र॰ तां श्रुत्वा॥ मातरं जाह्नवीतीरे शुकं शोकसमन्वितां॥५॥ स्मृतमात्रस्तु वै व्यासस्त्यक्त्वा तं पर्वतोत्तमं॥ आज
६१ गाम महातेजा जन्मस्थानं स्वकं मुनिः॥६॥ द्वीपं प्राप्य पप्रच्छ क्व गता सा वरानना॥ निषादास्तं समाच
ख्युर्दत्वा राज्ञे पिकन्यका॥७॥ सरस्वत्यास्तटे रम्ये चकाराश्रममंडलं॥ व्यासस्तत्र समायुक्तस्तत्रैवास
समाहितः॥८॥ सत्यवत्यां सुतौ जातौ शंतनोरमितद्युतेः॥ मत्वा तं भ्रातरौ व्यासः सुखमाप वने स्थितः
॥९॥ चित्रांगदः प्रथमजो रूपवान् दर्शनोत्तमः॥ बभूव नृपतेः पुत्रः सर्वलक्षणसंयुतः॥१०॥ विचित्र चि
वीर्यनामासौ द्वितीयः समजायत॥ सोपि सर्वगुणोपेतः शंतनोः सुखवर्धनः॥११॥ गांगेयः प्रथमस्त
स्य महावीरो बलाधिकः॥ तथैव तौ सुतौ जातौ सत्यवत्या महाबलौ॥१२॥ शंतनुस्तान् सुतान् वीक्ष्य स
र्वलक्षणसंयुतान्॥ अमंस्त कृपणमात्मानं देवादीनां महामनाः॥१३॥ अथ कालेन कियता शं राम
तनुः कालपर्यये॥ तत्याज देहं धर्मात्मा देही जीर्णमिवांबरं॥१४॥ कालधर्मं गते राज्ञि भीष्मश्चक्रे ६१

विधानतः॥ प्रेतकार्याणि सर्वाणि दानानि विविधानि च॥१५॥ चित्रांगदं ततो राज्ये स्था प
पयामास धर्मवित्॥ स्वयं न कृतवान् राज्यं तस्माद्देवव्रतो भवेत्॥१६॥ चित्रांगदस्तु वीर्येण मत्तः परदुः
खदः॥ बभूव बलवान् वीरः सत्यवत्यास्थितः शुचिः॥१७॥ अथैकदा महाबाहुः सैन्येन महता वृतः॥
प्रचचार वनोद्देशे पश्यन् वध्यान् मृगान् रुरून्॥१८॥ चित्रांगदस्तु गंधर्वो दृष्ट्वा तं मार्गगं नृपं॥ उत्तरे
निकटं भूमेर्विमानवरसंस्थितः॥१९॥ तत्राभूच्च महद्युद्धं तयोः सदृशनामयोः॥ कुरुक्षेत्रे महास्थाने
त्रीणि वर्षाणि तापसाः॥२०॥ सेंद्रलोकमवापाशु गंधर्वेण हतो रणे॥ भीष्मः कृत्वा चकाराशु चौर्ध्वदे
हिकमेव तत्॥२१॥ गांगेयः कृतशोकस्तु मंत्रिभिः परिवारितः॥ विचित्रवीर्यं राज्ये वै स्थापयामास धर
र्मवित्॥२२॥ कृताभिषेकः सचिवैः क्षिप्तैर्वेदविदोत्तमैः॥ राज्यं चकार धर्मात्मा भीष्मस्यानुमते स्थि
तः॥२३॥ सत्यवत्यपि संतुष्टा बभूव वरवर्णिनी॥ व्यासोपि भ्रातरं श्रुत्वा राज्ये पोषितं मुदितोऽभवत्

॥२४॥ यौवनं परमं प्राप्य स सत्यवत्यासुतः शुभः ॥ चकार चिंतां भीष्मोपि विवाहार्थं कनीयसः ॥२५॥
काशिराजसुतास्तिस्रः सर्वलक्षणसंयुताः ॥ तेन राज्ञा विवाहार्थं स्थापिताश्च स्वयंवरे ॥२६॥ राजा
नो राजपुत्राश्च समाहूताः सहस्रशः इच्छास्वयंवरार्थं वै पूज्यमानाः ॥ समागताः ॥२७॥ तत्र भीः
ष्मो महातेजास्ताजहार बलेन वै ॥ निर्भर्त्स्य राजकं सर्वं रथेनैकेन वीर्यवान् ॥२८॥ स जित्वा पार्थि
वान्सर्वान्ताश्चादाय महारथः ॥ बाहुवीर्येण तेजस्वी ह्याससाद गजाह्वयं ॥२९॥ मातृवद्भगि
नीवच्च चिंतयन् पुत्रिवत्किल ॥ तिस्रः समानयामास कन्याः कमललोचनाः ॥३०॥ सत्यवत्यै निवेद्याशु
द्विजानाहूय सत्वरः ॥ दैवज्ञान्वेदविदुषः पर्यपृच्छत् शुभं दिनं ॥३१॥ कृत्वा विवाहसंभारं यदा तं भ्रात
रं निजं ॥ विचित्रवीर्यं धर्मिष्ठं विवाहयति सोपदा ॥३२॥ तदा ज्येष्ठाप्युवाचेदं कन्या वा जान्हवीसुतं ॥ राम·
॥ लज्जमाना सीतापांगी तिसृणां चारुलोचना ॥३३॥ गांगपुत्र कुरुश्रेष्ठ धर्मज्ञ कुलदीपक ॥ हरि

मया स्वयंवरे शाल्वो वृतोस्ति मनसा नृप ॥३४॥ वृताहं तेन राज्ञा वै चित्ते प्रेमसमाकुले ॥ यथा योग्यं
कुरुष्वाद्य कुलस्याचरितस्य च ॥३५॥ तेनाहं हृतपूर्वास्मि त्वं च धर्मभृतां वरः ॥ बलवानसि गांगेय
यदिच्छसि तथा कुरु ॥३६॥ सूत उवाच ॥ ॥ एवमुक्तस्तया तत्र कन्यया कुलनंदनः ॥ अपृच्छत् ब्रा
ह्मणान् वृद्धान् मातरं सचिवांस्तथा ॥३७॥ सर्वेषां मतमाज्ञाय गांगेयो धर्मवित्तमः ॥ गच्छेति कं
न्यकां प्राह यथारुचि वरानने ॥३८॥ विसर्जिता तु सा तेन गता शाल्वनिकेतनं ॥ उवाच तं वरारोहा रा
जानं मनसेप्सितं ॥३९॥ विनिर्मुक्तास्मि भीष्मेण त्वन्मनस्केति धर्मतः ॥ आगतास्मि महाराज गृहा
णाद्य करं मम ॥४०॥ धर्मपत्नीं न वांछंतं भवामि नृपसत्तम ॥ चिंतितोसि मया पूर्वं त्वया हं नात्र संशयः ॥४१॥ शाल्व उवाच ॥ ॥ गृहीतां त्वं वरारोहे भीष्मेण पश्यतो मम ॥ रथे च स्थापिता तेन न
गृह्णीष्ये करं तव ॥४२॥ परोद्धिष्टां च कः कन्यां गृह्णाति मतिमान्नरः ॥ अतोहं न ग्रहिष्यामि सत्का

भीष्मे करं तव रणमास्य वन्॥४३॥ रुदंती विलपंती सा सक्ता नेन महात्मना॥ पुनर्भीष्मं समागत्य रु
दती चेदमब्रवीत्॥४४॥ त्वाल्वो मुक्ता तपावीर न गृह्णाति करेण मां॥ त्वं गृहाण महाभाग मरिष्याम्य
न्यथा ह्यहं॥४५॥ ॥भीष्म उवाच॥ ॥अन्यचित्तां कथं त्वां वै गृह्णामि वरवर्णिनी॥ पितरं स्वं वरारोहे व्र
ज शीघ्रं निराकुला॥४६॥ तथोक्ता वाथ भीष्मेण जगाम वनमेव हा॥ तपश्चकार विजने तीर्थे परमपा
वने॥४७॥ क्षेमार्थे चातिरूपाढ्ये तस्य राज्ञो बभूवतुः॥ अंबां अंबालिकां चाथ काशिराजसुते शुभे
॥४८॥ राजा विचित्रवीर्योसौ ताभ्यां सह महाबलः॥ रेमे नाना विहारैश्च गृहे चोपवने तथा॥४९॥ वर्षा
णि नव राजेंद्र कुर्वन् क्रीडां मनोरमां॥ प्राप्तो सौ मरणं भूपो गृहीतो राजयक्ष्मणा॥५०॥ मृते पुत्रे नि
दुःखान्नजाता स सवती तदा॥ कारयामास पुत्रस्य प्रेतकार्याणि मंत्रिभिः॥५१॥ भीष्ममाह तदा कांतेव
चनं चातिदुःखिता॥ राज्यं कुरु महाभाग पितुस्ते शांतनोः सुत॥५२॥ भ्रातृभार्ये गृहाण त्वं वंशं च परि

रक्षयः॥ यथा न नाशमायाति पातेवं शामि सत्तम॥५३॥ भीष्म उवाच॥ ॥संश्रुति मे श्रुता मातः पित्र्यर्थे
पामया कृत॥ नाहं राज्यं करिष्यामि न चापि दारसंग्रहं॥५४॥ तथा मिं तातुरा काली कथं वंशो भवेदिति
॥ नास सादसुखं नत्र समुत्सन्नेह राजके॥५५॥ गांगेयस्तामुवाचेदं मा चिंतां कुरु मामिनि॥ पुत्रं वि
चित्रवीर्यस्य क्षेत्रजं चोपपादय॥५६॥ कुलीनं द्विजमाहूय वध्वा सह नियोजय॥ नात्र दोषोस्ति वेदेपि
कुलरक्षाविधौ किल॥५७॥ गोलकं सुतमुत्पाद्य राज्ये देहि सुचिस्मिते॥ अहं च पालयिष्यामि तस्य शा
सनमेव हा॥५८॥ तच्छ्रुत्वा वचनं तस्य काली तं स्वसुतं मुनिं॥ जगाम मनसा व्यासं द्वैपायनमकल्मषं॥
५९॥ स्मृतमात्रस्ततो व्यास राजगाम स तापसः॥ कृत्वा च प्रेममात्रेय संस्थितो धीमान् मुनि॥६०॥ भी
ष्मेण पूजितः कामं सत्यवत्या च मानितः॥ तस्थौ तत्र महातेजा विधूमोग्निरिवापरः॥६१॥ तमुवाच मुनिं माता
पुत्रमुत्पादयाधुना॥ क्षेत्रे विचित्रवीर्यस्य सुंदरं तव वीर्यजं॥६२॥ व्यासः श्रुत्वा वचो मातुरासवाक्यमम

स्थितः ॥इत्युक्त्वा च स्थितस्तत्र ऋतुकालमचिंतयत् ॥६३॥ अंबिका च यदा जाता नारी ऋतुमती तदा ॥ संगं
प्राप्य मुनेः पुत्रमसूतांधं महाबलं ॥६४॥ जन्मांधं च सुतं मत्वा दुःखिता सत्यवत्यपि ॥ द्वितीयं च वधूं प्राह पु
त्रमुत्पादयाशु वै ॥६५॥ ऋतुकालेथ संप्राप्ते व्यासेन सहसंगता ॥ तथा चांबालिका राज्ञी गर्भं नारी द
धार ह ॥६६॥ सोपि पांडुः सुतो जातो राजयोग्यो न संशयः ॥ पुत्रार्थे प्रेरयामास वर्षांते च पुनर्वधूं ॥ ६७
आहूय च ततो व्यासं संप्रार्थ्य मुनिसत्तमं ॥ प्रेषयामास राज्ञी सा शयनागारमुत्तमं ॥६८॥ नागता च
वधूस्तत्र प्रेष्या संप्रेषिता तया ॥ तस्यां च विदुरो जातः दास्यां धर्मांशतः शुभः ॥६९॥ एवं व्यासेन ते पुत्राः
धृतराष्ट्रादयस्त्रयः ॥ उत्पादिता महावीरा वंशरक्षणहेतवे ॥७०॥ एतद्वः सर्वमाख्यातं तस्य वंशसमु
द्भवं ॥ व्यासेन रक्षितो वंशो भ्रातुर्धर्मविदानघाः ॥७१॥ ॥इतिश्रीभगवतीभागवते महापुराणेअष्टा
दशसाहस्र्यां संहितायां प्रथमस्कंधे विंशोध्यायः ॥२०॥ ॥ प्रथमस्कंधः समाप्तः ॥ शुभंभवतु

भा॰दे॰ ॥श्रीगणेशायनमः॥ ॥ॐनमः श्रीभगवत्यै॥ ॥याविम्भुं विततोतिपालयति यासंहर्त्रिकल्पक्ष
१ येब्रह्माणंचहरिंहरंचमनजैरुत्पादयत्रीत्रिगुणैः॥ सावित्रीचरमाभुमांचतनुजांदत्वाथतेभ्यःस्व
यक्रीडत्यापरस्पतिर्हृत्रूपमेवसंकल्पतांनौमिविश्वेश्वरीं॥१॥ यैर्नश्रुतंभागवतंपुराणंनाराधि
तायैः प्रकृतिःपुराणः॥ प्राप्तंनतत्त्वंगुरुवक्त्रपद्मात्तेषांवृथाजन्मगतंनराणां॥२॥ पुराणान्यन्या
निहरीहरकथाकलापकलितानिकविःकृत्वासौत्रिगुणविरचितानिबुद्धिविभवेनगुणाती
तंस्फीतंगुणैरसविलाससंयुतकंचपुराणश्रेष्ठंविरतिगुतिपरंचकारकिलकृष्णः॥३॥ श्रुत्वा
भागवतंपुराणंमुच्यतेभवसंकटात्। पंचलक्षणसंयुक्तंविद्याविलसितान्वितं॥४॥ ॥ऋषयऊ
चुः॥ ॥आश्चर्यकरमेतत्तेवचनंहेतुगर्भकं॥ संदेहोत्रसमुत्पन्नः सर्वेषांनस्तपस्विनां॥५॥ मा १
ताव्याससस्यमेधाविन्नाम्नासत्यवतीतिच॥ विवाहितापुराराज्ञानारीत्वंतनुनाकथं॥६॥ कस्य

पुत्रीकथंव्यासःसुतोभवत्। क्वस्थितासाकथंराज्ञापुनःशंतनुनावृता॥७॥ तयापुत्रौवरौजातौतत्त्वं
कथयसुव्रत। विस्तरेणमहाभागकथांपरमपावनीं॥८॥ उत्पत्तिंवदव्याससस्यसत्यवत्यास्तथापुनः॥
श्रोतुकामावयंसर्वेऋषयः संशितव्रताः॥९॥ ॥सूतउवाच॥ ॥प्रणम्यपरमंशक्तिंचतुर्वर्गप्रदायि
नीं॥ आदिशक्तिंवदिष्यामिकथांपौराणिकींशुभां॥१०॥ यस्योच्चारणमात्रेणसिद्धिर्भवतिशाश्वती
॥वाग्जेनापिहिबीजस्यवाग्भवस्याविशेषतः॥११॥ सम्यक्समर्चितासर्वैः सर्वकामार्थसिद्धये॥ स
र्वव्यापसर्वग्यादेवीवांछितार्थप्रदायिनी॥१२॥ राजोपरिचरोनामधार्मिकःसत्यसंगरः॥ चेदिदेशा
पतिः श्रीमान्ब्रह्मवाद्विजपूजकः॥१३॥ तपसातस्यतुष्टेनविमानंस्फाटिकंशुभं। दत्तमिंद्रेणनृ
तस्मैस्वगमंचातिसुंदरं॥१४॥ तेनारूढस्तुसर्वत्रयातिदिव्येननृपतिः॥ नभूमावुपरिस्थोसौते
नोपरिचरोवसुः॥१५॥ विख्यातः सर्वलोकेषुधर्मनित्यः सनृपतिः॥ तस्यभार्याविराटोहागिरिका

भा॰ द्वि॰
२

नामसुंदरी॥१६॥पुत्राश्चास्यमहावीर्याःपंचासन्नमितौजसः॥ पृथग्देशेषुराजानःस्थापितास्ते
नतनुजाः॥१७॥ वसोस्तुपत्नीगिरिकाकामार्त्ताकालेन्यबोधयत्॥ऋतुकालमनुप्राप्तस्नातापुंसवनेशु
चिः॥१८॥तदहःपितरश्चैनमूचुर्जहिमृगानिति।तच्छ्रुत्वाचिंतयामाससन्नायमितुमंतितथा॥१९॥
पितृवाक्यंगुरुंमत्वाकर्तव्यमितिनिश्चितः।चचारमृगयांराजागिरिकांमनसास्मरन्॥२०॥व
नेस्थितस्यराजर्षेश्चित्तेसस्मारभामिनीं॥वटपत्रेतुतद्राजास्कन्नमात्रंसमाक्षिपत्॥२१॥अती
वरूपसंपन्नांसाक्षात्श्रियमिवापरां।तस्यरेतःप्रचस्कंदस्मरतस्तांचकामिनीं॥२२॥इदंहथाप
रिस्कंन्नरेतोवैनत्ववेत्कथं।ऋतुंकालंचविज्ञायामितंचक्रेनृपस्तदा॥२३॥अमोघंसर्वथावीर्यं
ममवैतन्नसंशयः॥प्रियायैप्रेषयाम्येतदितिबुद्धिमकल्पयत्॥२४॥शुक्रप्रस्थापनेकालंम
हिष्याश्चसमीक्ष्यसः॥अभिमंत्र्याथतद्वीर्यंवटपर्णपुटेकृतं॥२५॥ पार्श्वस्थंश्येनमाज्ञाप्य २

जोवाचद्विजं॥प्रति॥गृहाणेदंमहाभागगच्छशीघ्रंगृहंमम॥२६॥मत्प्रियायार्थमिदंसौम्यगृहाणत्वय
द्विजोत्तमः॥गिरिकायैप्रयच्छाशुऋतुःस्यात्साद्यनघवै॥२७॥ ॥सूतउवाच॥ ॥इत्युक्त्वाप्रददौपर्णंसे
नायनयसत्तमः॥सगृहीत्वोत्पपाताशुगगनंगतिवित्तमः॥२८॥गच्छंतंगगनेश्येनंधृत्वाचंचुपुटे
पुटं।तमपश्यत्तथायांतंखगंश्येनस्तथापरः॥२९॥आमिषंसतुविज्ञायतूर्णंमभ्यद्रवत्खगं॥तुंड
युद्धंमथाकाशेतावुभौसंप्रचक्रतुः॥३०॥युध्यतोरपतद्रेतस्तच्चापियमुनांभसि॥खगौतौनि
गतौकामंपुटकेपतितेतदा॥३१॥ एकस्मिन्समयेकेचिदद्रिकानामचाप्सरा॥ब्राह्मणंसम
तुधाप्तासंध्यावंदनतत्परं॥३२॥कुर्वतीजलकेलिंसाजलेमग्नाचचारसा॥जग्राहचरणंना
री॥द्विजस्यवरवर्णिनी॥३३॥प्राणायामपरःसोथदृष्ट्वातांकामचारिणीं॥शशापभवमत्स्यी
त्वंध्यानविघ्नकरीयथा॥३४॥सातुशापात्मुनिमुख्येनबभूवयमुनाचरी॥शफरीरूपसंपन्ना

भा॰ दि॰ त्यद्रिकाचवराप्सरा॥३४॥श्येनपादपरिभ्रष्टंतच्छुक्रमथवासवं॥जग्राहत्वरसोपेत्यसाद्रि
कामत्स्यरूपिणी॥३५॥अथकालेनकियतामत्सींतांमत्स्यजीविनः॥संप्राप्तेदशमेमासिबौ
२ दाम्नातिमनोरमं॥३६॥उदरंविददारास्तस्याश्चमत्स्यजीविनः॥युग्मंविनिसृतंतस्मादुदरा
न्मानुषाकृति॥३७॥बालःकुमारःसुभगस्तथाकन्याशुभानना॥दृष्ट्वाश्चर्यमिदंसोथविस्म
यंपरमंगतः॥३८॥राज्ञेनिवेदयामासपुत्रीपुत्रौझषोद्भवौ॥राजापिविस्मयाविष्टोसुतंज
ग्राहतंशुभं॥३९॥मत्स्योनामराजासीद्धार्मिकःसत्यसंगरः॥वसुपुत्रोमहातेजापित्रासं
गृहीतःशिशुः॥४०॥बालिकांवसुनादत्तांतरसाजलजीविने॥नाम्नाकालीतिविख्याता राम॰
तथामत्स्योदरीतिच॥४१॥मत्स्यगंधेतिनाम्नावैगुणेनसमजायत॥विवर्द्धमानादासस्यगृ २
हेसावासवीशुभा॥४२॥ऋषयऊचुः॥अद्रिकामुनिनाशापात्मत्सीजातावराप्सरा॥वि

दारिताचदासेनमृताचभक्षितापुनः॥४३॥किंबभूवमहामत्सीरप्सरायावदस्वतत्॥शाप
स्यांतंकथंसूतकथंस्वर्गमवापसा॥४४॥सूतउवाच॥स्नाययदासामुनिनाविस्मितासं
बभूवहा।स्तुतिंचकारविप्रस्यदीनेवरुदतीतदा॥४५॥दयावान्ब्राह्मणःप्राहतांतदारुद
तींस्त्रियं।माशोकंकुरुकल्याणिशापांततेवदाम्यहं॥४६॥मत्क्रोधशापयोगेनमत्स्ययो
निंगताशुभेमानुषौजनयित्वात्वंशापमोक्षमवाप्ससि॥४७॥इत्युक्त्वातेनसाशापमत्सीदे
हंनदीजले।बालकौजनयित्वासामृतामुक्ताचशापतः॥४८॥संत्यज्यमत्स्यरूपंसादी
व्यंरूपमवाप्यच।जगामतरसास्वर्गंशापांतेवरवर्णिनी॥४९॥एवंसायवसोपुत्रीम
त्स्यगंधावरानना।पुत्रीचपाल्यमानाचदासगेहेव्यवर्द्धत॥५०॥मत्स्यगंधातदाजाताकि
शोरीचातिसुप्रभा॥तस्यकार्याणिकुर्वाणावासवीचातिसुप्रभा॥५१॥ ॥इतिश्री

भागवते महापुराणे द्वितीयस्कंधे मत्स्यगंधोत्पत्तिर्नाम प्रथमोध्यायः ॥ १ ॥ सूत उवाच ॥
भा०द्वि एकदा तीर्थयात्रायां व्रजन्पराशरो मुनिः ॥ आजगाम महातेजाः कालिंद्यास्तटमुत्तमं ॥ १ ॥ नि
ध षादं महाधर्मात्मा कुर्वंतं भोजनं तदा ॥ प्रापयस्वापरं पारं कालिंद्या उडुपेन मां ॥ २ ॥ दासः श्रु
त्वा मुनेर्वाक्यं कुर्वाणो भोजनं तटे ॥ उवाच तां सुतां बालां मत्स्यगंधां मनोरमां ॥ ३ ॥ उडुपेन
मुनिं बाले परं पारं नय स्वहं ॥ गंतुकामोस्ति धर्मात्मा तापसोयं शुचिस्मिते ॥ ४ ॥ इत्यु
क्ता सा तदा पित्रा मत्स्यगंधाथ वासवी ॥ उडुपे मुनिमासीनं संवाहयत भामिनी ॥ ५ ॥ व्र
जन्सूर्यसुतातोये भावित्वाद्दैवयोगतः ॥ कामार्त्तस्तु मुनिर्जातो दृष्ट्वा तां चारुलोचनां ॥ ६ ॥
गृहीतुकामः स मुनिर्दृष्ट्वांकुरितयौवनां ॥ दक्षिणेन करेणाथ तस्याः स्पृष्टा दक्षिणे करे ॥ ७ ॥ त ध
माह मसितापांगी स्मितपूर्वमिदं वचः ॥ कुलस्य सदृशं वः ॥ किं श्रुतस्य तपसश्च किं ॥ ८ ॥

त्वं वै वशिष्ठदायादः कुलशीलसमन्वितः ॥ किं चिकीर्षसि सर्मज्ञ मन्मथेन प्रपीडितः ॥ ९ ॥ दु
र्लभं मानुषो जन्म भुवि ब्राह्मण सत्तम ॥ तत्रापि दुर्लभं मन्ये ब्राह्मणत्वं विशेषतः ॥ १० ॥ कुलेन
शीलेन तथा श्रुतेन द्विजोत्तमस्त्वं किल धार्मविज्ञः ॥ अनार्यभावं कथमद्य यासि विप्रेंद्र मां वी
क्ष्पचमीनगंधां ॥ ११ ॥ मदीये शरीरे द्विजो मोहबुद्धे शुभं किं समालोक्य पाणिं गृहीतुं समीपं
समायासि कामातुरस्त्वं कथं नाभिजानासि धर्मं स्वकीयं ॥ १२ ॥ अहो मंदबुद्धिर्द्विजोयं गृही
ष्यनूजले मग्न एवा घमां वै गृहीत्वा ॥ मनोजाकुलं पंचबाणातिविद्धं न कोपीह शक्तः प्रतीपं
हि कर्तुं ॥ १३ ॥ इति संचिंत्य सा बाला तमुवाच मुनिं मृदु ॥ धैर्यं कुरु महाभाग परं नयामि वै
॥ १४ ॥ ॥ सूत उवाच ॥ ॥ पराशरस्तु तच्छ्रुत्वा वचनं हितपूर्वकं ॥ करं त्यक्त्वा स्थितस्तत्र
सिंधोः पारं गतः पुनः ॥ १५ ॥ मत्स्यगंधां समग्राह मुनिः कामातुरस्तदा ॥ वेपमाना तिसाक

न्यातमुवाच पुरःस्थितं ॥१६॥ दुर्गंधाहं मुनिश्रेष्ठ कथं त्वं नोपलक्षसे । समानरूपयोः कामं
संयोगस्तु सुखावहः ॥१७॥ तेन सा तपसा कृत्वा क्षणमात्रेण कामिनी । कृता योजनगंधा सा
रूपा च वरानना ॥१८॥ मृगनाभिसुगंधिं तां कृत्वा कांतां मनोहरां । गृहीतुकामं मुनिं प्राह ना
म्ना सत्यवती कृता ॥१९॥ मुने पश्यति लोकोयं पिता मे च तटे स्थितः ॥ पशुधर्मे न मे प्रीतिं ज
नयत्यतिदारुणं ॥२०॥ प्रतीक्षस्व मुनिश्रेष्ठ यावद्भवति यामिनी । रात्रौ व्यवाय उद्दिष्टो दिवा
न मानुषस्य हि ॥२१॥ दिवासंगे महान्दोषः पश्यंति किल मानवाः ॥ कामं यच्छ महाबुद्धे लोक
निंदाकरा सदा ॥२२॥ तच्छ्रुत्वा वचनं तस्याः युक्तमुक्तमुदारधीः ॥ नीहारं कल्पयामास शी
घ्रं तपोबलेन वै ॥२३॥ नीहारे च समुत्पन्ने तटेऽतितमसावृते । कामिनी तं मुनिं प्राह मृदुपूर्व
मिदं वचः ॥२४॥ कन्याहं द्विजशार्दूल भुक्त्वा गंतासि कामतः ॥ अमोघवीर्यस्त्वं ब्रह्मन् का ग ५

तिर्मे भवेदिति ॥२५॥ पितरं किं ब्रवीम्यद्य सगर्भा चेद्भवाम्यहं । त्वं गमिष्यसि भुक्त्वा मां किं करो
मि वद स्वतः ॥२६॥ पराशर उवाच ॥ कांतेद्य मत्प्रियं कृत्वा कन्यैव त्वं भविष्यसि । वृणीष्व वचनं
भीरु यं त्वमिच्छसि भामिनी ॥२७॥ ॥ सत्यवत्युवाच ॥ ॥ यथा मे पितरौ लोको न जानाति च मा
नद । कन्याव्रतं न मे हन्यात्तथा कुरु द्विजोत्तम ॥२८॥ पुत्रश्च त्वत्समः कामं वेदद्भुततेजवान् ॥
गंधोयं सर्वदा मम स्याद्यौवनं च नवं नवं ॥२९॥ ॥ पराशर उ॥ ॥ शृणु सुंदरि पुत्रस्ते विष्णुरा
संभवः शुचिः ॥ भविष्यति च विख्यातः त्रैलोक्ये वरवर्णिनि ॥३०॥ केनचित्कारणेनाहं जात
ः कामातुरस्त्वयि । कदाचिन्न च संमोहो भूतपूर्व वरानने ॥३१॥ दृष्ट्वा चाप्सरसां रूपं सदा
हं धैर्यमावहं । दैवयोगेन वीक्ष्य त्वां कामस्य वशगोभवं ॥३२॥ तत्किंचित्कारणं विद्धि दैवं हि
दुरतिक्रमं ॥ दृष्ट्वा त्वां चातिदुर्गंधामगमं मोहमाप्नुयत् ॥३३॥ पुराणकर्ता पुत्रस्ते भविष्यति

वराननेः॥ वेदविभागकर्त्ताचख्यातस्त्रिभुवनत्रये॥३४॥ ॥सूतउवाच॥ इत्युक्त्वातांवरारोहां
भा॰द्वि॰ तांभुक्त्वासमुनिसत्तमः॥ जगामतरसास्नात्वाकालिंदीसलिलेमुनिः॥३५॥ सापिसत्यवती
६ जातासद्योगर्भवतीसती॥ सुषुवेयमुनाद्वीपेपुत्रंकाममिवापरं॥३६॥ जातमात्रस्तुतेज
स्वीतामुवाचस्वमातरं। तवस्येवमनःकृत्वाविद्धिंत्राम्यातिवीर्यवान्॥३७॥ गच्छमातर्यथाकामं
गच्छाम्यहमतःपरं। तपःकर्त्तुंमहाभागेदर्शयिष्यामिवैस्मृतः॥३८॥ मातर्यदाभवेत्कार्यंत
वकिंचिदनुत्तमं। स्मर्त्तव्योहंतदाशीघ्रमाग — — मितेंतिकं॥३९॥ तपस्यद्यगमिष्यामि
स्वस्तिमातास्तुखंवत्सा। इत्युक्त्वानिर्ययौव्यासःसापिपित्रोंतिकंगति॥४०॥ द्वीपेन्यस्तस्त
याबालस्तस्माद्द्वैपायनोभवत्। जातमात्रोजगामाशुवृद्धिंविह्वंत्रायोगतः॥४१॥ तीर्थेतीर्थे ६
कृतस्नानश्चचारतपमुत्तमं॥ एवंद्वैपायनोयज्ञेसत्यवत्यांपराशरात्॥४२॥ चकारवेदशा

खाश्चप्राप्तंज्ञात्वायुगंकलिं। वेदविस्तारकरणात्व्यासनामाभवन्मुनिः॥४३॥ चक्रेपुराणसं
हितांमहाभारतमुत्तमं॥ शिष्यानध्यापयामासवेदान्कृत्वाविभागशः॥४४॥ सुमंतंजैमिनिं
पैलंवैशंपायनमेवच। असितंदेवलंश्चैवशुकंचैवस्वमात्मजं॥४५॥ ॥सूतउवाच॥ एतच्च
कथितंसर्वंकारणंमुनिसत्तमाः॥ सत्यवत्याश्चव्यासस्यसमुत्पत्तिंतथाशुभां॥४६॥ संशयो
त्रनकर्त्तव्योसंभवेमुनिसत्तमाः॥ महतांचरितेचैवगुणग्राह्यामुनेरिति॥४७॥ कारणाच्च
समुत्पत्तिःसत्यवत्याःकृषोदरे॥ परासरेणसंयोगःपुनःशांतनुनातथा॥४८॥ अन्यथातुम
नेश्चित्तंकथंकामाकुलंभवेत्। अनार्यजुष्टंधर्मस्सकृतवान्सकथंमुनिः॥४९॥ सकारणे
यमुत्पत्तिःकथिताश्चर्यकारिणी। श्रुत्वापापविनिर्मुक्तोनरोभवतिकश्चनः॥५०॥ यएत
त्सुचमाख्यानंशृणोतिमतिमान्नरः॥ नदुर्गतिमवाप्नोतिसुखीभवतिसर्वदा॥५१॥ ॥

भा॰द्वि॰ इतिश्रीभागवतेमहापुराणेद्वितीयस्कंधेव्यासोत्पत्तिर्नामद्वितीयोध्यायः॥ ॥२॥ ॥ऋषयऊचुः
॥उत्पत्तिस्तुत्वयाप्रोक्ताव्यासस्यामिततेजसा॥ सत्यवत्यास्तथासूतविस्तरेणत्वयानघ॥१॥तया
७ प्येकस्तुसंदेहोचित्तेस्माकंसुसंस्थितः॥ ननिवर्त्ततिसर्वज्ञकथितेनतवाधुना॥२॥माताव्यास
स्ययाप्रोक्तानाम्नासत्यवतीशुभा॥ साकथंनृपतिप्राप्ताशंतनुंधर्मवित्तमं॥३॥निषादपुत्री
सकथंवृतवान्नृपतिःस्वयंधर्मिष्टः पौरवोराजाकुलहीनामसंवृतां॥४॥शंतनोःप्रथमाप
त्नीकाप्रसूतकथयाधुना॥ भीष्मःपुत्रोयमेधावीवसोरंशः कथंपुनः॥५॥त्वयाप्रोक्तंपुरासू
तराजाचित्रांगदःकृतः॥ सत्यवत्याःसुतोवीरोभीष्मेणामिततेजसा॥६॥चित्रांगदेहतेवी
रेकृतस्तदनुजस्तथा॥ विचित्रवीर्यनामासौसत्यवत्याःसुतोनृपः॥७॥ज्येष्ठेभीष्मेस्थितेपूर्वे ७
धर्मिष्टेरूपवत्यपि॥ कनीयान्सकथंराज्येस्थापितस्तेनजानता॥८॥मृतेविचित्रवीर्येतुस

त्यवत्यतिदुःखिताबधूभ्यांगोलकौपुत्रौजनयामाससाकथं॥९॥कथंराज्यंनभीष्मायदत्तौ
सावरवर्णिनी॥ नकृतस्तुकथंतेनवीरेणदारसंग्रहः॥१०॥अधर्मस्तुकृतःकस्माद्व्यासेनामि
ततेजसा॥ भ्रातुर्ज्येष्टस्यभार्यायांपुत्रावुत्पादिताविति॥११॥पुराणकर्त्ताधर्मात्मासकथंकृत
वानिदं॥ सेवनंपरदाराणांभ्रातुश्चैवविशेषतः॥१२॥जगुप्सितमिदंकर्मसकथंकृतवान्मु
निः॥शिष्टाचारकथंसूतवेदानुमितिकारकः॥१३॥व्यासशिष्योसिमेधावीसंदेहंछेत्तुमर्ह
सिश्रोतुकामावयंसर्वेधर्मस्तत्रेकृतक्षणाः॥१४॥ ॥सूतउवाच॥ ॥इक्ष्वाकुवंशप्रभवोरा
जामहाभिषःपुरा॥ सत्यवान्धर्मशीलश्चचक्रवर्तीनृपोत्तमः॥१५॥अश्वमेधसहस्रेणवा
जपेयशतेनच॥ तोषयामाससदेवेंद्रंस्वर्गंप्रापमहामतिः॥१६॥एकदाब्रह्मसदनंगतोराजाम
हाभिषः॥सुरासुर्वेसमाजग्मुःसेवनार्थंप्रजापतिं॥१७॥तत्रगंगासमायातास्त्रीरूपधारि

णीनदी॥ नानारूपगणरत्नाभातीवगणर्यंप्रजापति॥१८॥ तस्यावासः समूहूतंमारुतेनतरस्विन
भा॰ द्वि॰ ॥ अधोमुखाः सुराः सर्वेह्यतन्वीक्ष्यचतांतथा॥१९॥ राजामहाभिषस्तांतुनिःशंकः समपश्य
८ त॥ सापितंप्रेमसंयुक्तंनृपत्तानवतीनदी॥२०॥ दृष्ट्वातौप्रेमसंयुक्तौनिर्लज्जौकाममोहितौ
॥ ब्रह्माचुकोपतौतूर्णंसत्रापचरुषान्वितः॥२१॥ मर्त्यलोकेषुभूपालजन्मप्राप्यपुनर्दि
वंपुण्येनमहताकृत्वात्वमवाप्स्यसिसर्वथा॥२२॥ गंगांतथोक्तवान्ब्रह्मावीक्ष्यप्रेमवतीं
नृपे विमनस्कौतुतौतूर्णंब्रह्मशापचरुषान्वितः॥२३॥ मर्त्यलोकेषुभूपालजन्मप्राप्यपुनर्दि
वंपुण्येनमहताकृत्वानिस्तौब्रह्मणोंतिकात्॥२३॥ सनृपान्चिंतयित्वाथभूलोकेध
र्मतत्परान्प्रतीपंचिंतयामासपितरंपुरुवत्सलं॥२४॥ एतस्मिन्समयेचाष्टौवसवस्त्री ८
समन्विताः॥ वशिष्ठस्याश्रमंप्राप्तारममाणायथेच्छया॥२५॥ पृथ्व्यादीनांवसूनांचमध्येको

वसुरुत्तमः॥ द्यौर्नामतस्यभार्याचददर्शनंदिनींचगां॥२६॥ दृष्ट्वापतिंपप्रच्छासौकस्येयंधेनुरु
त्तमा॥ द्यौस्तामाहवशिष्ठस्यगौरियंशृणुसुंदरि॥२७॥ ततश्रुत्वासुंदरीप्राहमर्त्यलोकेस्तिमे
सा॥ उशीनरस्यराजर्षेः पुत्रीपरमशोभना॥२८॥ दुग्धमस्यापिबेद्यस्तुनारीवापुरुषोपवा॥
अयुतायुर्भवेन्नूनंसदैवागतयौवनः॥२९॥ तस्याहेतोर्महाभागसवत्सांगांमनोस्मितां॥ आन
यस्वामरश्रेष्ठनंदिनींकामदां॥३०॥ यावदस्याःपयःपीत्वासखीममसदैवहिमानुषेषुभवत्ये
काजरारोगविवर्जिता॥३१॥ ततश्रुत्वावचनंतस्याःद्यौर्जहारचनंदिनीं॥ अवमन्यमुनिंदांतंपृ
थ्वादिभिःमहानघाः॥३२॥ हृतायामथनंदिन्यांवशिष्ठस्तुमहातपाः॥ आजगामाश्रमपदंफ
लान्यादायसत्वरः॥३३॥ नापश्यतयदाधेनुंसवत्सांस्वाश्रमेमुनिः॥ मृगयामासतेजस्वीवेषुगव्ह
रेष्वपि॥३४॥ नासादितायदाधेनुश्चुकोपातिशयंमुनिः॥ मृगयामासतेजस्वीवनेषुगव्हरेष

पि।वारुणिरपिविज्ञायध्यानेनवसुभिर्हृतां॥३५॥वसुभिर्मेहृताधेनुर्यस्मान्मांवावमन्यवै।त
स्मात्सर्वेजनिष्यंतिमानुषेषुनसंशयः॥३६॥एवंसशापधर्मात्मावसूंस्तान्वारुणिस्स्वयं।शाप्ता
विमनसःसर्वेययुर्दुःखान्वितास्ततः॥३७॥शापास्मइतिजानंतऋषिंतमुपचक्रमुः॥प्रसादयंत
स्तमृषिंवसवःशरणंगताः॥३८॥मुनिस्तानाहधर्मात्मावसून्दीनान्पुरःस्थितान्।अनुसंवत्स
रात्सर्वेशापमोक्षमवाप्स्यथ॥३९॥येनेयंविहृताधेनुर्नंदिनीममवःस्वमं।तदसौमानुषेदेहे
दीर्घकालंवसिष्यति॥४०॥तेशप्तापथिगच्छंतीगंगांदृष्ट्वासरिद्वरां।ऊचुस्तांप्रणतास्सर्वेशापं
चिंतातुरांनदीं॥४१॥प्रविशामोवयंदेविकथंदेवामृताशनाः।मानुषाणांचजठरेचिंतेयं
महतीहिनः॥४२॥तस्मात्त्वंमानुषीभूत्वाजनयास्मान्सरिद्वरे।शांतनुनामराजर्षिस्तस्यभार्या
भवानघे॥४३॥जाताञ्जातान्जलेचास्मान्क्षिक्षिपस्वसुरापगे।एवंशापविनिर्मोक्षोभविताना

त्रसंशयः॥४४॥तथेत्युक्त्वास्थतेसर्वेजग्मुर्लोकंस्वकंपुनः॥गंगापिनिर्गतादेवीचिंतयमानापुनः
पुनः॥४५॥महाभिषस्तुनृपोजातःप्रतीपस्यसुतस्तदा।शांतनुर्नामराजर्षिर्धर्मात्मासागरः॥४६॥
प्रतीपस्तुसुतंदृष्ट्वासुरूपंप्राप्तयौवनं।इदमाहमहातेजाप्राप्तकालंसुतंप्रति॥४७॥पुराहंतप
सायुक्तोगंगातीरेवसंसुत।आधियानःस्तुतिकामंसूर्यस्यामिततेजसः॥४८॥तदाचसलिला
त्स्मान्निसृतावरवर्णिनी।दक्षिणंशालसंकाशमूरुंमेभेजेशुभानना॥४९॥अंकेस्थितास्त्रि
यंचाहमपृच्छंकिंवरानने।ममोरावास्थितासित्वंकिमर्थंदक्षिणेशिवे॥५०॥सातमाहवरारो
हापत्यर्थंराजसत्तमं।स्थितास्म्यंकुरुश्रेष्ठकामयान्त्वांभजस्वमां॥५१॥तामवाचमहवेदंरू
पयौवनशालिनीं।स्नुषाणांहंपरस्त्रियंकामारूढेयंचालोलोचने॥५२॥स्थितादक्षिणमू
रुमेत्वमाश्लिष्यचभामिनी।अपत्यानांस्नुषाणांचस्यांविद्धिशुचिस्मिते॥५३॥स्नुषामेभवक

भा०द्वि०

त्याणिजातेपुत्रेतिवांछिते। भविष्यतिचमेपुत्रोतवपुण्यान्नसंशयः॥५४॥ तथेत्युक्त्वागतासा
वैकामिनी।दिव्यदर्शना॥ अहंचापिगृहंप्राप्तश्चिंतयन्नूतांस्त्रियंपुनः॥५५॥ यदोपयातिसाबा
१० लावांवनेचारुहासिनी॥ कामयानवरारोहातांभजेथामनोरमां॥५६॥ नदृष्टात्तकासिमत्रि
योगान्नराधिपः॥ धर्मपत्नीचतांकृत्वाभवितात्वंसुखीकिल॥५७॥ सूतउवाच॥ एवंसंदिश्य
तंपुत्रंनृपतिःप्रीतिमानसः॥ दत्वाराज्यश्रियंसर्वांवनंराजाविवेशह॥५८॥ तत्रापिचतप
स्तप्त्वासमाराध्यजनार्दनं॥ जगामस्वर्गंराजासौदेहंत्यक्त्वावनेनृपः॥५९॥ राज्यप्रापमहाते राम०
जास्तंतनुःसार्वभौमिकं॥ प्रजांवैपालयामासधर्मदंडोमहापतिः॥६०॥ इतिश्रीभागवते १०
महापुराणेद्वितीयस्कंधेनंतीयोध्यायः॥ सूतउवाच॥ प्रतीपेथदिवंयातेशंतनुःसत्य
विक्रमः॥ बभूवमृगयाशीलोनिघ्नन्वन्यान्मृगान्नृपः॥१॥ सकदाचिद्वनेघोरेगंगातीरे

चरन्नृपः॥ ददर्शमृगनेत्रावाक्षींसुंदरींचारुभूषणां॥२॥ दृष्ट्वानृपतिर्मेनेपित्रोक्तेयंवरानना॥
रूपयौवनसंपन्नासाक्षाल्लक्ष्मीरिवापरा॥३॥ पिबन्मुखांबुजंतस्यानतृप्तिमगवन्नृपः॥ हृष्टरो
मामनोजेनव्याप्तचित्तइवाभवत्॥४॥ सापिमहाभिषंमत्वाप्रेमयुक्ताबभूवह॥ किंचिन्मंदस्मि
तंकृत्वातस्यावग्रेनृपस्यच॥५॥ वीक्ष्यतामसितापांगीराजाप्रीतमनानृपः॥ उवाचमधुरंवाक्यं
सांत्वयन्श्लक्ष्णयागिरा॥६॥ देवीवात्वंचवामोरुमानुषीवावरानने॥ गंधर्वीवाथयक्षीवाना
गकन्याप्सरापिवा॥७॥ यासिकासिवरारोहेभार्यामेभवसुंदरि॥ प्रेमयुक्तोस्मितेवत्सेधर्मप
त्नीभवाद्यमे॥८॥ सूतउ॥ राजातंनाभिजानातिगंगेयमितिनिश्चयं॥ महाभिषंसमुत्प
न्नंनृपंजानातिजाह्नवी॥९॥ पूर्वप्रेमसमायोगात्कृत्वाचंमैनृपसत्तं॥ उवाचनारीराजानंस्मि
तंपूर्वमिदंवचः॥१०॥ स्त्र्युवाच॥ जानामित्वांनृपश्रेष्ठप्रतीपतनयंनृपं॥ काकानवांछति

ना०दि चार्वंगी तु वितस्त्रं हृद्यां पतिं ॥११॥ वाग्बंधेन नृपश्रेष्ठ वरिष्यामि पतिं किल। शृणु मे समयं राज
न्वृणोमि त्वां नृपोत्तम ॥१२॥ यच्च कुर्यामहं कार्यं शुभं वा यदि वाऽशुभं ॥ न निषेध्या त्वया राज
११ न्न वक्तव्या तथाऽप्रियं ॥१३॥ यदा वै त्वं नृपश्रेष्ठ न करिष्यसि मे वचः। तदा मुक्त्वा गमिष्यामि य
थेष्टं देव्रामारिष ॥१४॥ स्मृत्वा जन्म वसूनां सा प्रार्थनापूर्वकं हृदि। प्रेमं महाभिषं साऽथ वि
चिंत्यैव च जाह्नवी ॥१५॥ तथेत्युक्त्वा यदा तां स चकार नृपतिं पतिं॥ एवं वृता नृपेणाथ गंग
मानुषरूपिणी। नृपस्य मंदिरं प्राप्ता सुभगा वरवर्णिनी ॥१७॥ नृपतिस्तां समादाय चक्रीडोपव
नेशुभे। सापि तं रमयामास सम्राजं वैहर्विवरांगना ॥१८॥ न बुबोध नृपः क्रीडन्नागतान्वर्षगणा ११
न्याः सतया मृगनया वाक्ष्या ताच्या यातक्रतुयथा ॥१९॥ सा सर्वगुणसंपन्ना सोपि कामवि
चक्षणः। रेमाते मंदिरे दिव्ये रमानारायणाविव ॥२०॥ एवं गच्छति काले सा दधार नृपतेस्त

दा। गर्भं गंगा वसुं पुत्रं सुषवे चारुलोचनं ॥२१॥ जातमात्रं सुतं तं तु चिक्षेपांभसि जाह्नवी। स्व
कीये च नृपः पश्यन्नोवाच प्रियमप्रियं ॥२२॥ परित्यागाद्भयाद्राजा दुःखितोपि न चोक्तवान्
। शुभं वाप्यशुभं वापि मौनमाधाय संस्थितः ॥२३॥ द्वितीयोपि तथा क्षिप्तो जातमात्रोऽम्भसि
प्रियः। तृतीयोथ चतुर्थश्च पंचमो षष्ठ एव च ॥२४॥ सप्तमे वा हि ते पुत्रे राजा चिंतातुरोऽभवत्
॥ किं करोम्यद्य वंशो मे कथं स्यात्सुस्थिरो भुवि ॥२५॥ सप्त पुत्रा हृता नूनामनया पापरूपया
॥ निवारयामि यद्येवं त्यक्त्वा यास्यति सर्वथा ॥२६॥ अष्टमोयं सुसंप्राप्तो गर्भे मे मनसि स्थितः॥
न वारयामि चेदस्य सर्वथेयं जले क्षिपेत् ॥२७॥ भविता वा न वा चाग्रे संतायेयं ममाद्भुतः॥ संत
वेपि च दुष्टेयं रक्षयेत्वा न रक्षयेत् ॥२८॥ एवं संज्ञायिते कार्ये किं कर्तव्यं मयाधुना। वंशस्य रक्ष
णार्थं वै यत्नः कार्यः परो भवत् ॥२९॥ एवं कृते यदा याति पुत्रं दत्वा मनोहरं। विकृते यं तदा तु सु

भा०द्वि० नतिष्ठतुमेगृहे॥३०॥विचार्यमनसाप्येवंस्थितःपार्थिवसत्तमः॥प्रसूतिसमयेजातस्तदाष्टोर
ष्टमोवसुः॥३१॥मुनेर्येनहृताधेनुर्नंदिनीस्त्रीजितेनह॥तंदृष्ट्वानृपतिःपुत्रंतामुवाचपतन्प
१२ दे॥३२॥दासोस्मितवतन्वंगिप्रार्थयामिशुचिस्मिते॥पुत्रमेकंत्वमेतस्यदेहिजीवंतमद्यमे
॥३३॥हिंसितासप्तपुत्रामेकरभोरुत्वयाशुभाः॥अष्टमंरक्षसुश्रोणिपतामितवपादयोः॥
३४॥अन्यद्वैप्रार्थितंतेद्यददामिदुर्लभंयदि॥वंशोमेरक्षणीयोद्यत्वयापरमशोभने॥३५॥
अपुत्रस्यगतिर्नास्तिस्वर्गेवेदविदोविदुः॥तस्माद्यवरारोहाप्रार्थयाम्यष्टमंसुतं॥३६॥इ
त्युक्त्वापिगृहीत्वातंयदागंतुंसमुत्सुका॥तदातिकुपितोराजातामुवाचातिदुःखितः॥३७॥पापि
ष्ठेकिंकरोष्यद्यनिरयान्नबिभेषिकिं॥कासिक्षियाचरणात्वंपुत्रीपापरतासदा॥३८॥यथेष्टं
गच्छवातिष्ठपुत्रोमेम्रियतामिह॥किंकरोमित्वयापापेवंशांतकरयानया॥३९॥एवंवदतिनृ

पालेसागृहीत्वासुतंशिशुं॥इत्युवाचनृपंगच्छन्वचनंकोपसंयुता॥४०॥॥स्त्र्युवाच॥॥पुत्रका
मवचस्त्वेयंपालयामिमहावने॥समयोमेगमिष्यामिवचनेमन्ययाकृते॥४१॥गंगामांत्वंविजानि
हिदेवकार्यार्थमागतां॥वसवस्तुपुराशप्तावशिष्ठेनमहात्मना॥४२॥व्रजंतुमानुषींयोनिंते
ऽपिचिंतातुरास्तुमां॥दृष्ट्वेदंप्रार्थयामासुःजननीनोभवानघे॥तेभ्योदत्त्वावरंजातापत्नीतेनृप
सत्तम॥देवकार्यार्थसिद्ध्यर्थंजानीहिसंभवोमम॥४४॥सप्ततेवसवःपुत्राःमुक्ताःशापाद्वृषे
स्तुते॥एकोयंकियंतंकालंतवपुत्रोभविष्यति॥४५॥गंगादत्तमिमंपुत्रंगृहाणशंतनोस्व
यं॥वसुदेवंविदित्वेनंसुखंतुष्टस्तुतोद्भवं॥४६॥गांगेयोयंमहाभागभविष्यतिबलाधिकः
॥अद्यतत्रनयाम्येनंयत्रत्वंवैमयावृतः॥४७॥दास्यामियौवनप्राप्तंपालयित्वामहीपते॥नमा
त्ररहितःपुत्रोजीवेन्नचसुखीभवेत्॥४८॥इत्युक्त्वांतर्दधेगंगातंगृहीत्वाचबालकं॥राजाचा

भा·द्वि·

१३

तीव्रदुःखार्त्तः संस्थितो निजमंदिरे ॥४९॥ नार्या विरहजं दुःखं तथा पुत्रस्य चाद्भुतं । सर्वदा चिंतत
न्नास्त राज्यं कुर्वन्नू महीपतिः ॥५०॥ एवं गच्छति काले या नृपतिर्मृगयां गतः । निघ्नन्मृगगणा
न्वाराहान्महिषान्वनसूकरान् ॥५१॥ गंगातीरमनुप्राप्तः स राजा त्वं तनुस्तदा । नदीं स्तोकज
लां दृष्ट्वा विस्मितः स महीपतिः ॥५२॥ तत्रापश्यत्कुमारं तं मुंचंतं विशिखान्बहून् । आत्म
व्यचमहच्चापं क्रीडंतं सरितस्तटे ॥५३॥ तं वीक्ष्य विस्मितो राजा न प्रत्यायत किंचन । नोपलेने
स्मृतिं नृपः पुत्रोयं मम वा न वा ॥५४॥ दृष्ट्वाप्यमानुषं कर्म बाणेषु लघुहस्ततां । विद्यां चाप्र
तिमां रूपं देवदेवस्य सन्निभं ॥५५॥ पप्रच्छ विस्मितो राजा कस्य पुत्रोसि चानघ । नोवाच किं
चद्वीरः सोंतु चादृष्टिलीमुखान्नथ ॥५६॥ अंतर्धानं गतः सोथ राजा चिंतातुरोभवत् । कोयं मम ॥१३॥
सुतो वास्यात् । किं करोमि व्रजामि किं ॥५६॥ गंगां तुष्टाव नृपाल स्थित्वा तत्र समाहितः । दर्श

नं सा ददावाय चारुरूपा यथा पुरा ॥५७॥ दृष्ट्वा तां चारुसर्वांगीं बभाषे नृपतिः स्वयं । कोयं गंगे ग
तो बालो मम त्वं दर्शयाधुना ॥५८॥ गंगोवाच ॥ पुत्रोयं तव राजेंद्र रक्षितश्चाष्टमो वसुः । दत्ता
मि सुखदस्तेस्तु गांगेयोयं महामुने ॥५९॥ कीर्त्तिकर्त्ता कुलस्यास्य जनिता तव सुव्रतः । याचि
तस्त्वखिलान्वेदान् धनुर्वेदं च शाश्वतं ॥६०॥ वसिष्ठस्याश्रमे दिव्ये संस्थितोयं सुतस्तव । सर्व
विद्याविधानज्ञः सर्वार्थकुशलः शुचिः ॥६१॥ यद्वेद जामदग्न्योसौ तद्वेदायं सुतस्तव । गृहा
ण गच्छ राजेंद्र सुखी भव नराधिप ॥६२॥ इत्युक्त्वांतर्दधे गंगा दत्वा पुत्रं नृपाय वै । नृपतिस्तु सु
दायुक्तो बभूवातिसुखान्वितः ॥६३॥ समालिंग्य सुतं राजा समाघ्राय स मस्तकं । समारोप्य
रथे पुत्रं स्वपुरं संप्रचक्रमे ॥६४॥ गत्वा गजाह्वयं राजा चकारोत्सवमुत्तमं । दैवज्ञं च समाहूय
पप्रच्छ स शुभं दिनं ॥६५॥ समाहूय प्रजाः सर्वाः सचिवान्सर्वतः शुभान् । यौवराज्येथ गांगे

भा०द्वि
१५ यं स्थापयामास पार्थिवः ।।६६।। ज्ञात्वा तं युवराजानं पुत्रं सर्वगुणान्वितं ।। सुखमास स धर्मात्मा न स
स्मार च जाह्नवी ।।६७।। ।।सूत उवाच।। ।। एतद्वः कथितं सर्वं कारणं वसुशापजं। गांगेयस्य — चोत्प
त्तिं तात व्यासं संभवं तथा ।।६८।। गंगावतरणं पुण्यं वसूनां संभवं तथा यः शृणोति नरः पापान्मुच्य
ते नात्र संशयः ।।६९।। पुण्यं पवित्रमाख्यानं कथितं मुनिसत्तमाः ।। यथा मया श्रुतं व्यासात्पुरा
णं वेदसंमतं ।।७०।। श्रीमद्भागवतं पुण्यं नानाख्यानकथान्वितं। द्वैपायनमुखोद्भूतं पंचलक्ष
णसंयुतं ।।७१।। शृण्वतां सर्वपापघ्नं श्रुतिदं सुखदं तथा ।। इतिहासमिदं पुण्यं कीर्तितं मुनिस
त्तमा ।।७२।। ।। इति श्रीभागवते महापुराणेष्टादशसाहस्र्यां संहितायां द्वितीयस्कंधे गंगा
वसुषाऽत्पत्तिर्नाम चतुर्थोध्यायः ।।४।। ।। ऋषय ऊचुः ।। वसूनां संभवः सूत कथितः १५
शापकारणात्। गांगेयस्य — चोत्पत्तिः कथिता लोमहर्षणे ।।१।। माता व्यासस्य धर्मात्मा नाम्ना

सत्यवती सती। कथं शंतनुना प्राप्ता भार्या गंधवती किल ।।२।। तन्ममाचक्ष्व विस्तारं दाशपुत्री कथं
हृता। राजा धर्मवरिष्ठेन संशयं छिंधि सुव्रत ।।३।। ।।सूत उवाच।। ।। शंतनुनाम राजर्षिर्मृगयाभिर
तः सदा वनं जगाम निघ्नन्वै मृगांश्च महिषान्रुरून् ।।४।। चत्वार्यैव तु वर्षाणि पुत्रेण सह भूपति
।। रममाणः सुखं प्राप कुमारेण यथा हरः ।।५।। एकदा विक्षिपन्बाणान्विहनखड्गश्च कारान् ।।
स कदाचिद्वनं प्राप्तः कालिंदीं सरितां वरां ।।६।। महीपतिरनिर्दिष्टं पमाजिघ्रंधमुत्तमं। तस्य प्र
भावमन्विछन्संचचार वनं तदा ।।७।। न मंदारस्य गंधोयं नायं मृगमदस्य च। चंपकस्य न माल
त्या न केतकामनोहरं ।।८।। अननुभूतपूर्वोयं वाति गंधवहः शुभः ।। कुतोयमेति वायुर्वै मम
घ्राणविमोहनः ।।९।। ।। इति संचिंत्यमानोसौ बभ्राम वनमंडलं। मोहितो गंधलोभेन शंत
नुः पवनानुगः ।।१०।। स ददर्श नदीतीरे संस्थितां चारुलोचनां ।। शृंगाररहितां कांतां सुस्थि

ना० द्वि तांमलिनांबरां॥११॥ दृष्ट्वातामसितापांगीं विस्मितः समहीपतिः॥ अस्यादेहस्यगंधोयमिति
संजातनिश्चयः॥१२॥ तदङ्गंतद्रूपमतीवसुंदरं। तथैवगंधोयमखिललोकसंमतः॥ वयश्चतां
१५ दृष्ट्वनवयौवनस्थंदृष्ट्वैवराजाकिलविस्मितोभवत्॥१३॥ केयंकुतोवासमुपागताधुनादेवां
गनावाकिमुमानुषानवा॥ गंधर्वपुत्री किलनागकन्यकाजानामिचैनांकथमद्य कामिनी॥
१४॥ संचिंत्यचैवंमनसानृपोसौनानिश्चयंप्राप्ययदाततस्तां।गंगांस्मरन्कामवशंगतोथ।प
प्रच्छकांतांतटसंस्थितांच॥१५॥ कासित्वंप्रियेकस्यसुतासिकस्मादिहस्थितात्वंविजनेवरोरु॥
एकाकिनीकिंवदचारुनेत्रे विवाहितावात्वविवाहितासि॥१६॥ संजातकामोहमरालनेत्रेत्वां
वीक्ष्यकांतांचमनोज्ञगंधां। ब्रूहिप्रियेयासिचिकीर्षसित्वंकिंचेतिसर्वंममविस्तरेण॥१७॥ इ १५
त्येवमुक्तासुदती। नृपेणप्रोवाचतंसास्मितमंबुजेक्षणा। दासस्यपुत्रींत्वमवेहिराजन्कन्यां

पितुःशासनसंस्थितांच॥१८॥ तरीमिमांधर्मनिमित्तमेवसंवाहयामिह्यजलेनृपेंद्र॥ पितागृहे
मेद्यगतोस्तिकामंसत्यंब्रवीम्यर्थपतेतवाग्रे॥१९॥ इत्येवमुक्त्वाविररामबालाकामातुरस्तांनृप
तिर्बभाषे। कुरुष्ववीरंकुरुमांपतित्वेवृथानगच्छत्वनुयौवनंते॥२०॥ नचास्तिपत्नीममवैद्वि
तीयात्वंधर्मपत्नीभवमेमृगाक्षि। दासोस्मितेहंवरागःसदैवमनोभवस्तापयतिप्रियेमां॥२१॥
गताप्रियामांपरिकृत्यगंगानान्यावृताहंविधुरोस्मिकांते। त्वांवीक्ष्यसर्वप्रियवातिरम्यांम
नोतिजातंविवशंमदीयं॥२२॥ श्रुत्वामतास्वादरसंनृपस्यवचोतिरम्यंखलुदासकन्या॥
उवाचतंसात्विकभावयुक्ताकृत्वाविधेयंनृपतिंसुगंधा॥२३॥ यथाद्यराजन्मपितत्तथैवम
न्येहमत्यंततथ्यं॥ वचस्त्वनास्मिन्स्वतंत्रात्वमवेहिकामंदातापितातांकिलप्रार्थयाशु॥२४
॥ नास्वैरिणीहास्म्यपिदासपुत्रीपितुर्वशोहंसततंचरामि। सचेद्ददातिप्रथितःपितामेग

हाणपाणिंवरांगास्मितेहं॥२५॥ मनोभवस्त्वांनपकिंऽनोतियथापुनर्मांनिश्चयौवनंचाऽनो
भा०द्वि० तितथापिहिरक्षणीयाधृतिकुलाचारपरंपरासु॥२६॥ ॥सूतउ०॥ ॥इत्याकर्ण्यवचस्तस्यानृ
१६ पतिःकाममोहितः॥ गतोदासपतेर्गेहंयाचनार्थंसुलोचनां॥२७॥ दृष्ट्वानृपतिमायांतंदासो
ऽतिविस्मयंगतः॥ कृत्वार्थमासनंदत्वाकृतांजलिरभाषत॥२८॥ सोस्मितवनृपालकृतार्थो
हंतवागमे। आज्ञांदेहिमहाराजयदर्थमिहागमः॥२९॥ राजोवाच॥ पुत्रीतेह्यमयाद
ष्टाकालिंदीकूलसंस्थिता। देहिमेत्वंमहाभागधर्मपत्नींकरोम्यहं॥३०॥ सूतउवाच॥ कन्या
वरायदातव्याधर्मएषःसनातनः। विनाभाग्यंकथंराजन्त्वत्समोलभ्यतेपुनः॥३१॥ सत्येना
हंप्रदास्यामिप्रार्थितंकुरुषेयदि। समयःसर्वथापाल्यस्त्वयामयानृपते॥३२॥ राजोउ॥ १६
धर्मपत्नींकरिष्यामियत्त्वंप्रार्थयसेनथा। दातव्यंचेत्प्रदास्यामिनतदेयंकथंचन॥३३॥ अ

स्यापुत्रोमहाराजनृत्वदंतेपृथिवीपतिः॥ सर्वथाचाभिषेक्तव्योनान्यपुत्रस्तवेतिवै॥३४॥ ॥सू
तउ०॥ श्रुत्वावाक्यंतुदासस्यराजाचिंतातुरोभवत्॥ गांगेयंमनसाकृत्वानोवाचनृपतिस्तदा॥
३५॥ कामातुरोगृहंप्राप्तश्चिंताविष्टोमहीपतिः। नसस्नौनबुभोजाथनसुष्वापसदनंगतः॥३६
॥ चिंतातुरंतुतंदृष्ट्वापुत्रोदेवव्रतस्तदा। गत्वापप्रच्छभूपालंतदसंतोषकारणं॥३७॥ ऽर्क
यःकोस्तिशत्रुस्तंकरोमिवशगंतव। काचिंतानृपशार्दूलसत्यंवदनृपोत्तम॥३८॥ किंते
नजातेनसुतेनराजन्दुःखंनजानातिननात्रायेद्यस्त्राणंगृहीतुंसमुपागतोसौप्रागुज
न्मजंनात्रविचारणात्र॥३९॥ विमुच्यराज्यंरघुनंदनोपितातात्तयादाशरथिस्तुरामः॥
वनंगतोलक्ष्मणजानकीभ्यांसहैवशैलंकिलचित्रकूटं॥४०॥ सुतोहरिश्चंद्रनृपस्य—
योरोहितास्येतिप्रसिद्धनामा। क्रीतोथपित्राविपणेधृतश्चदासायितोविप्रगृहेतिनूनं

भा०द्वि०
१७
॥४१॥ तथाजिगर्त्तस्य सुतो वरिष्ठो नाम्नाः शुनःशेफ इति प्रसिद्धः॥ क्रीतस्तु पित्रा च यूपे
निबद्धः संमोचितो गाधिसुतेन पश्चात्॥४२॥ पिताज्ञया जामदग्न्येन पूर्वं छिन्नं शिरो
मातुरिति प्रसिद्धं॥ असत्यमप्याचरितं च तेन गुरोरनुज्ञा गरीसी कृता॥४३॥ इदं त्वदारी
रं तव भूप तेन क्षमोस्मि नूनं वद किं करोम्यहं। न शोचनीयं च मयि वर्त्तमाने प्यसाध्यमर्थं
प्रतिपादयाम्यहं॥४४॥ प्रब्रूहि राजंस्तव कास्ति चिंता निवारयाम्यद्य धनुर्गृहीत्वा। देहे
न मे चेच्चरितार्थता वा नवत्र मोघा ज्ञवता च्छिकीर्षा॥४५॥ धिक्तं सुतं यो पितुरीप्सिता
र्थं क्षमोपि—सन्नातिपादयेत। जातेन किं तेन सुतेन कामं किं यं न किं तात समुद्धवंति १७
॥४६॥ सूत उवाच॥ निशम्येति वचस्तस्य पुत्रस्य शंतनुर्नृपः॥ लज्जमानस्त्वमनसा त
माह सरितः सुतं॥४७॥ राजोवाच॥ चिंता मे महती पुत्र यत्त्वमेकोसि मे सुतः॥ शूरो

ति बलवान्मानी संग्रामेष्वपराङ्मुखः॥४८॥ एकामत्यस्य मे तात तद्धथेदं जीवितं किल॥
मृते त्वयि मृधे क्वापि किं करोमि निराश्रयः॥४९॥ एषा मे महती चिंता तेन दुःखितोस्म्य
हं॥ नान्या चिंतास्ति मे पुत्र यया तप्ये वदाम्यहं॥५०॥ सूत उवाच॥ तदाकर्ण्य पि गांगेयो मं
त्रिवृद्धान पृच्छत॥ न मां वदति भूपालो लज्जया च परिप्लुतः॥५१॥ चिंतावान्निमपस्या
घहद्वा यूयं विनिश्चयात्॥ सत्यं ब्रुवंतु मा सर्वं तत्करोमि निराकुलः॥५२॥ तच्छ्रुत्वा ते
नृपं गत्वा संविज्ञाय तु कारणं॥ शशंसुर्विदितार्थस्तु गांगेयस्तदचिंतयत्॥५३॥ स हि
तस्तैर्जगामाशु दाशस्य सदनं तदा॥ प्रेमपूर्वमुवाचेदं विनम्रो जाह्नवीसुतः॥५४॥ पित्रे
देहि सुतां तेद्य प्रार्थयामि सुमहामते॥ माता मे स्तु सुतेयं ते दासोस्म्यस्याः परंतपः॥५५॥ त्वं
गृहाण महाभाग पत्नीं कुरु नृपात्मजां॥ पुत्रोस्या न भवेद्राजा वर्त्तमाने त्वयीति वै॥५६॥

गांगेय उवाच ॥ मातेयं मम दासेयी राज्यं नैव करोम्यहं ॥ पुत्रोस्याः सर्वथा राज्यं करीष्यति
नसंशयः ॥ ५७ ॥ दाश उ० ॥ सत्यवाक्त्वं मया ज्ञात पुत्रस्ते बलवान्भवेत् । सोपि राज्यं बला
न्नूनमगृह्णादिति निश्चयः ॥ ५८ ॥ गांगेय उ० ॥ न दारग्रहणं नूनं करिष्यामि हि सर्वथा ॥ स
त्यमेव वचनं तात मया भीष्मव्रतं कृतं ॥ ५९ ॥ सूत उ० ॥ एवं कृतां प्रतिज्ञां तु निशम्य झषजीवक
॥ ददौ सत्यवतीं तस्मै राज्ञे सर्वांगशोभनां ॥ ६० ॥ अनेन विधिना तेन हृता सत्यवती प्रिया । न
जानामि परं जन्म व्यासस्य नृपसत्तम ॥ ६१ ॥ ॥ इति श्रीभागवते महापुराणे द्वितीयस्कंधे पंच
मोध्यायः ॥ ५ ॥ सूत उ० ॥ एवं सत्यवती तेन हृता शंतनुना किल । द्वौ पुत्रौ च तया जातौ मृतौ
कालवशादपि ॥ १ ॥ व्यासवीर्यात्तु संजातो धृतराष्ट्रोंध एव च । मुनिं दृष्ट्वाथ कामिन्या नेत्रसंमी
लने कृते ॥ २ ॥ स्वेता रूपा यदा जाता दृष्ट्वा व्यासं नृपात्मजा । व्यासकोपात्समुत्पन्नः पांडुस्तेन न

संशयः ॥ ३ ॥ संतोषितस्तथा व्यासो दास्या स्या कामजादिभिः ॥ विदुरस्तु समुत्पन्नो धर्मांशः स
त्यवान्शुचिः ॥ ४ ॥ राज्ये संस्थापितः पांडुः कनीयानपि मंत्रिभिः ॥ अंधत्वाद्धृतराष्ट्रोसौ नाधि
कारविनिश्चितं ॥ ५ ॥ भीष्मस्यानुमते राज्यं प्राप्तः पांडुर्महाबलः ॥ विदुरोप्यतिमेधावी मंत्रिका
र्ये नियोजितः ॥ ६ ॥ धृतराष्ट्रस्य द्वे पत्नी गांधारी सौबली स्मृता ॥ द्वितीया च तथा वैश्या गाह
स्थ्ये सुप्रतिष्ठिता ॥ ७ ॥ पांडोरपि तथा पत्न्यौ द्वे प्रोक्ते वेदवादिभिः ॥ शूरसेनसुता कुंती माद्री
च मद्रदेशजा ॥ ८ ॥ गांधारी सुषुवे पुत्रशतं परमसुंदरं । वैश्याप्येकं सुतं कांतं युयुत्सुं सु
षुवे प्रियं ॥ ९ ॥ कुंती तु प्रथमं कन्यां सूर्यात्कर्णं मनोहरं ॥ सुषुवे पितृगेहस्था पश्चात्पांडु
परिग्रहः ॥ १० ॥ ॥ ऋषय उ० ॥ किमेतत्सूत चित्रं त्वं ॥ भाषसे मतिमत्तर जनितश्च सुत
कर्णः पांडुना सा विवाहिता ॥ ११ ॥ सूर्यात्कर्णः कथं जातः कन्यायां वद विस्तरात् । पुनः क

न्या कथं जाता पांडुना या विवाहिता ॥१२॥ सूत उ० ॥ सूरसेनसुता कुंती बालभावे यदा द्वि-
भा॰ द्वि॰ जा ॥ कुंतीभोजेन राज्ञा तु प्रार्थिता कन्यका शुभा ॥१३॥ कुंतीभोजेन सा बाला पुत्रित्वे परिक-
१९ ल्पिता ॥ सेवनार्थं च विप्रस्य विहिता चारुहासिनी ॥१४॥ दुर्वासास्तु मुनिः प्राप्तश्चातुर्मा-
स्ये स्थितो द्विजः ॥ परिचर्यां कृता कुंती मुनिस्तोषपरं गतः ॥१५॥ ददौ मंत्रं शुभं तस्यै येना-
हूतः सुरः स्वयं ॥ समायाति तथा कामं पूरयत्येव वांछितं ॥१६॥ गते मुनौ ततः कुंती निश्चया-
य गृहे स्थिता ॥ चिंतयामास मनसा कं सुरं समचिंतये ॥१७॥ उदितं तु तदा भानुं तया दृ-
ष्टो दिवाकरः ॥ मंत्रोच्चारं तथा कृत्वा आहूतस्तिग्मगुस्तदा ॥१८॥ मंडलान्मानुषं रूपं कृत्वा
त्वं चातिपेशलं ॥ अवतरत्तदाकाशात्समीपे तत्र मंदिरे ॥२०॥ दृष्ट्वा देवं समायांतं कुं- १९
ती जातं सुविस्मिता ॥ वेपमाना रजोदोषं प्राप्ता सद्य एव भामिनी ॥२१॥ कृत्वांजलिं स्थिता

सूर्यं बभाषे चारुलोचना ॥ सुप्रीता दर्शनेनाद्य गच्छ त्वं निजमंदिरं ॥२२॥ ॥ सूर्य उ० ॥ आहूतो-
स्मि कथं सुभ्रु त्वया मंत्रबलेन वै ॥ न मां भजसि कस्मात्त्वं समाहूय पुरोगतं ॥२३॥ कामार्तोस्मि
सितापांगि भज मां भावसंयुतं ॥ मंत्रेणाधीनतां प्राप्तं मामवमानय मानिनि ॥२४॥ कुंत्युवाच
॥ कन्यास्म्यहं तु धर्मज्ञ सर्वसाक्षिन्नमाम्यहं ॥ तवास्म्यहं सुदुर्वाच्या कुले कामं कृपानिधे ॥२५॥
सूर्य उवाच ॥ ॥ लज्जा मे महती चाद्य यदि गच्छाम्यहं वृथा ॥ हास्यतां सर्वदेवानां चागवनात्र सं-
शयः ॥२६॥ वक्ष्यामि तं द्विजं चाद्य येन मंत्रः समर्पितः ॥ तव वा पितरं कांते नोचेन्मां त्वं भवि-
ष्यसि ॥२७॥ कन्याधर्मं ते स्यात् न त्वा स्यं जनाः किल ॥ मत्समस्तु तथा पुत्रो भविता ते वरान-
ने ॥२८॥ इत्युक्त्वा तरणिः कुंतीं तन्मनस्कां सुलज्जितां ॥ भुक्त्वा जगाम देवेशः वरं दत्त्वातिवांछि-
तं ॥२९॥ गर्भं दधार सुश्रोणी सुगुप्ते मंदिरे स्थिता ॥ धात्री वेद प्रिया चैका न माता न कस्तथा ॥

॥३०॥ गुप्तसद्मनि पुत्रस्तु जातश्चातिमनोहरः॥ कवचेनातिरम्येण कुंडलाभ्यां समन्वितः॥
भा० द्वि ३१॥ द्वितीय इव सूर्यस्तु कुमार इव चापरः॥ करे कृत्वाथ धात्रेयी तामुवाच सुलज्जिता॥३२॥
२० का चिंता करभोरु त्वां बाधते ह्यस्थिता स्म्यहं। मंजूषायां सुतं धृत्वा नयाम्यहमतंद्रिता॥३३॥ व
ने सरित्प्रवाहे वा त्यक्त्वा सुबालकं तव। आगमिष्याम्यहं नूनं यथा न वेद कश्चन॥३४॥ मंजू
षायां सुतं कुंती मुंचती चातीदुःखिता रुरोदातीव चिंतार्ता किं यं दृक्ष्येत्यहं पुनः॥३५॥ समा
लिंग्य सुतं कुंती विलप्यापातिदुःखिता। किं करोमि सुतात्वां हि त्यजे त्वां प्राणवल्लभं॥३६॥
मंदभाग्या त्यजामि त्वां सर्वलक्षणसंयुतं। रक्षणीयः कुलाचारः पराधीनं च जीवनं॥३७॥ राम०
पातु त्वां सगुणागुणा भगवती सर्वेश्वरी चांबिका सत्वं यं सैव ददाति विश्वजननी कात्यायनी २०
कामदा। दृक्ष्ये दं सुखपंकजं सुललितं प्राणप्रिया हं कदा त्यक्त्वा त्वां विजने वने रविजनोऽ

ह्यवशा स्वैरिणी॥३८॥ पूर्वस्मिन्नपि जन्मनि त्रिजगतां माता न वाराधिता न ध्यातं पदपंकजं
सुखकरं देव्याः शिवाया स्थिरं। तेनाहं सुतदुर्भगास्मि सततं त्यक्त्वा पुनस्त्वां वने तप्यामि
प्रियपातकं स्मृतवती बुध्वा कृतं यत्स्वयं॥३९॥ ॥सूत उ०॥ इत्युक्त्वा तं सुतं कुंती मंजूषायां
धृतं क्षिप्त्वा धात्री हस्ते ददौ गीता जनदर्शनिस्तदा॥४०॥ सामुक्त्वा यमुनातोये मंजूषां तरसा
सखी। कुंत्याः समीपमागम्य समाश्वासयदाशु तां॥४१॥ स्नाता स्वस्थाऽतदा कुंती पितृवेश्म
नि संस्थिता। मंजूषा वहमाना च प्राप्ता चाधिरथेन ह॥४२॥ राधासूतस्य भार्यैव तथा सोपा
लितः सुतः कर्णेन्नू हलयान्वीर पालितः सूतसद्मनि॥४३॥ कुंती विवाहिता कन्या पांडुना
सा स्वयंवरे। माद्री चैव सुता नाना यमिद्र राजसुता शुभा॥४४॥ मृगया रममाणस्तु वने पांडुम
हाबलः। जघान मृगरूपेण रममाणं मुनिं वने॥४५॥ शप्तस्तेन तदा पांडुः शोकसमन्वि

त॥त्यक्त्वा राज्यं वने वासं चकार नृप दुःखितः॥४५॥शप्तस्तेन तदा पांडुः मुनिना कुपितेन च
आ॰दि॰ ॥स्त्रीसंगं यदि कर्त्तासि तदा ते मरणं ध्रुवं॥४६॥इति शप्तस्तु मुनिना पांडुः शोकसमन्वित
२१ :त्यक्त्वा राज्यं वने वासं चकार नृप दुःखितः॥४७॥कुंती माद्री च भार्ये द्वे जग्मतुः सह संगते॥
सर्वे नार्यस्सती धर्मसंश्रिते मुनिसत्तमः॥४८॥गंगातीरे स्थितः पांडुर्मुनिनामाश्रमे भुव
।शृण्वानो धर्मशास्त्राणि चकार दुष्करं तपः॥४९॥कथायां वर्त्तमानायां कदाचिद्धर्मसं
श्रितां॥अशृणोद्वचनं राजा सुपुष्टं मुनिभाषितं॥५०॥अपुत्रस्य गतिर्नास्ति स्वर्गो नैव च
नैव चा येन केनाप्युपायेन पुत्रस्य जननं चरेत्॥५१॥औरसः पुत्रिकापुत्रः क्षेत्रजो गोलक
स्तथा।कुंडः सहोढः कानीनः क्रीडाः प्राप्तस्तु यावने॥५२॥दत्तः केनापि चारण्याधनया २१
हीसुताः स्मृताः॥उत्तरोत्तरतः पुत्रा निकृष्टा इति निर्णयः॥५३॥इत्याकर्ण्य तदा प्राह कुंती

कमललोचनां।सुतमुत्पादयाशु त्वं मुनिं गत्वा तपोन्वितं॥५४॥ममातयान दोषस्ते पुरारा
ज्ञा महात्मना॥वशिष्ठाज्जनितः पुत्रो ह्यकृतपे तत्तु मया॥५५॥तं कुंती वचनं प्राह मम पुत्रो
स्ति कामदः॥दत्त्वा दुर्वाससा पूर्वं सिद्धिदः सर्वथा प्रभो॥५६॥निमंत्रयेहं यं देवं मंत्रेणानेन पा
र्थिवा आगमे सर्वथा सो वै मम पार्श्वे नियंत्रितः॥५७॥तत्तु वाक्येन मातत्र स्मृत्वा धर्मं सुरोत्तमं
।संगम्य सुषुवे पुत्रं प्रथमं च युधिष्ठिरं॥५८॥वायोर्वृकोदरं पुत्रं जिष्णुं चैव शतक्रतोः॥वर्षे
वर्षे त्रयः पुत्राः कुंत्या जाता महाबलाः॥५९॥माद्री प्राह पतिं मंत्रो न मेस्ति कुरुसत्तमः॥किं
करोमि महाराज दुःखेनाप्याययेम प्रभो॥६०॥प्रार्थिता पतिना कुंती ददौ मंत्रं दयान्विता॥एक
पुत्रप्रबंधेन माद्री पतिमते स्थिता॥६१॥स्मृत्वा तदाश्विनौ देवौ मद्रराजसुता सुतौ।नकुलः
सहदेवश्च सुषुवे वर्णिनी॥६२॥एवं ते पांडवाः पंच क्षेत्रोत्पन्नाः सुरात्मजाः॥वर्षं वर्षांतिरेजा

तावनेतस्मिन्द्विजोत्तमः॥६३॥एकस्मिन्समयेपांडुर्मद्रींदृष्ट्वाथनिर्जने॥आश्रमेचाति
ना॰द्वि॰ कामार्त्तोजिघ्राहगतवैस्मृतः॥६४॥मामामामेतिबहुधानिषिद्धोपितयानृपः॥आलि
२२ लिंगप्रियांदैवात्पपातधरणीतले॥६५॥यथावृक्षगतावह्नीछिन्नेपततिवैद्रुमे॥त
थासापतिताबालाकुर्वतीब——कुः॥६६॥प्रत्यागतातदाकुंतीरुदतीबालकास्तथा
मुनयश्चमहाभागाःकृत्वाकलाहलंमहत्॥६७॥मृतंपांडुंतदासर्वेमुनयःसंस्थितव्रा
ताः॥सहाग्निनिर्विधिंकृत्वागंगातीरेददाहवै॥६८॥कृतंसहैवगमनंमाद्र्यांदत्वासुतौ
शिशू॥कुंत्यैधर्मंदूपस्कृत्यसतीनांसत्यकामया॥६९॥जलदानादिकंकृत्वामुनयस्तत्र सम॰
वासिनः॥पंचपुत्रयुतांकुंतींमुनयोहस्तिनापुरं॥७०॥तांप्रापमाचसमानीतायगांगेयोवि २२
दुरस्तथा॥नागराधृतराष्ट्रस्यसर्वेतत्रसमाययुः॥७१॥प्रवृद्धचनदीजस्तांपुत्राकस्यवरा

ननौ॥पांडोःशापसमानायकुंतीदुःखान्वितातदा॥७२॥तमुवाचसुराणांवैपुत्राःकुरुकु
लोत्तम॥विश्वासार्थंसमाकृताःकुंत्यासर्वेसुरास्ततः॥७३॥आगत्यस्वेतदातैस्तुकथितंन
:सुताःकिंचभीष्मेणांगीकृतंवाक्यंदेवानांग्रहीतासुताः॥७४॥गतानागपुरेसर्वेतानादा
यसुतान्बंधुंभीष्मादयःप्रीतमनाःपालयामाससुरर्थतः॥७५॥एवंपार्थाःसमुत्पन्ना
गांगेयेनाथपालिताः॥बभूवुर्बलिनःसर्वेधनुर्वेदस्यपारगाः॥७६॥इतिश्रीभागवते
महापुराणेद्वितीयस्कंधेपांडवउत्पत्तिर्नामषष्ठोध्यायः॥६॥सूतउ॰॥पंचानांद्रुपदी
भार्यासामान्यासाधवीतथा॥पंचपुत्रास्तुतस्यास्तुःपंचेभ्योतीवसुंदराः॥१॥अर्जुनस्यत
थाभार्याकृष्णस्यभगनीशुभा॥सुभद्रायाहृताकांताजिष्णुनाहरिसंमते॥२॥तस्यांजातो
महावीर्योनिहतोसौरणाजिरे॥अभिमन्युर्हतास्तत्रद्रौपद्याश्चसुताःकिल॥३॥अभि

भा०द्वि मत्स्योदराभार्यावैराटीचातिसुंदरा॥कुंत्यांतेसुषुवेपुत्रंमृतंबाणाग्निनाश्रिमुं॥४॥जीवितः
२२ सतुकृष्णेनजाणिनेयस्सुतःस्वयं॥द्रौणिबाणाग्निनिर्दग्धःप्रतापेनाच्युतेनच॥५॥परिक्षी
णेषुवंशेषुजातोयस्मात्वरःसुतः॥तेनपरिक्षितोनामाविख्यातःपृथिवीतले॥६॥निहते
षुचपुत्रेषुधृतराष्ट्रोतिदुःखितः॥संस्थोपांडवेराज्येवैभीमवाग्बाणपीडितः॥७॥गांधा
रीचतथाकुंतिपुत्रशोकातुरान्नरा॥सेवांतयोर्दिवारात्रंचकाराश्रियुधिष्ठिरः॥८॥विदु
रोप्यातिधर्मात्माप्रज्ञाचक्षुंप्रबोधयन्॥युधिष्ठिरस्यानुमतेत्त्रानपार्श्वेव्यतिष्ठतः॥९॥
धर्मपुत्रोतिधर्मात्माचकारसेवनंपितुः॥पुत्रशोकोद्भवंदुःखंतस्यविस्मारयन्निव॥
१०॥यथाशृणोतिवृद्धोसौतथाभीमोतिरोषितः॥वाग्बाणेनाहनत्तंतुश्रावयन्त्संस्थि २२
तान्जनान्॥११॥मयापुत्राहताःसर्वेदुष्टस्यांधस्यतेरणे॥दुःशासनस्यरुधिरंपीतंहृष्टे

तथाभवान्॥१२॥अंधोयांतुजनेपिंडंमयादत्तंगतत्रपः॥ध्वांक्षवत्भ्वानवच्चापिवृथास्य
जीवितंजनाः॥१३॥एवंविधानरोक्ष्याणिश्रावयत्यनुवासरं॥आश्वासयतिधर्मात्मामूर्खो
यमितिचब्रुवन्॥१४॥अष्टादशैववर्षाणिस्थित्वातत्रातिदुःखितः॥धृतराष्ट्रोवनेयानं
प्रार्थयामासधर्मजं॥१५॥अजाचतधर्मपुत्रंधृतराष्ट्रोमहीपतिः॥पुत्रेभ्योहंददाम्यद्य
निर्वापंविपूर्वकं॥१६॥वृकोदरेणसर्वेषांकृतंयत्रोर्ध्वदेहिकं॥नकृतंममपुत्राणांपूर्ववै
रमनुस्मरन्॥१७॥ददामिचेद्धनंमत्यंकृत्वाचैवोर्ध्वदेहिकं॥गमिष्येहंवनेतप्तुंतपःस्व
र्गफलप्रदं॥१८॥एकांतेविदुरेणोक्तोराजाधर्मसुतःशुचिः॥धनंदातुमनश्चक्रेधृतरा
ष्ट्रायचार्थिने॥१९॥समाहूयानुजान्सर्वानुवाचपृथ्वीपतिः॥धनंदद्योमहाभागाःपित्रे
निर्वापकामुके॥२०॥तच्छ्रुत्वावचनंभ्रातुर्भेष्टस्यामितविक्रमः॥तंहसन्नाहहासेन

मा०द्वि०

२४

मारुतिः कुपितोब्रवीत्॥२१॥ त्वद्धर्मत्रितेनार्यदुःखं प्राप्ता वने वयं॥ द्रौपदी च महाभासा
समानीता दुरात्मना॥२२॥ विराटस्य वने वासः प्रसादात्तव सुव्रत॥ सदा त्वं च कृतं सर्वैर्मत्स्य
स्यामित्रविक्रमैः॥२४॥ देविता त्वं न चोत्स्येष्ट त्वेवं यं वदस्व वः कथं॥ रूपकारो विराटस्य हत्वा त्र
पस्य मागधं॥२५॥ बृहन्नडा कथं जिष्णुस्त्वेव द्वालस्य नर्त्तकः॥ कृत्वा पेयम हाबाहो योषाया
वासवात्मज॥२६॥ गांडीवग्रोज्जिनौ हस्तौ कंकणैर्नो जिनौ मातुषं वपुसं प्राप्य क्लीडः खं
स्यात्रतः परे॥२७॥ दृष्ट्वा वेणीकृतां मूर्ध्नि कज्जलं लोचने तथा॥ अर्जुनस्य महाराजः खि
तोहं तदा भवं॥२८॥ अचिंतयं कुधा चित्ते कर्णचार्यस्य सर्वथा॥ असिंग्रही त्वा तरसा वे
ण्यहं नान्यया सुखं॥२९॥ अदृष्ट्वा लां महीपाल निक्षिप्ताग्निम हागृहे॥ दग्धुकामस्य पापा
त्मानिर्दग्धो सौ पुरोचन॥३०॥ कीचका निहताः सर्वे तामपृष्ट्वा जनाधिप॥ न तथा न हत्वा २५

पूर्वमस्माया धृतराष्ट्रजाः॥३१॥ मूर्षत्वं तव राजेंद्र गंधर्वैस्त्वमोचिताः॥ दुर्योधनादयः का
मं भ्रात्रवो निगडीकृताः॥३२॥ दुर्योधनहिताया द्यधनं दातुं त्वमिच्छसि नाहं ददे महीपाल स
र्वथा तव वैरितः॥३३॥ इत्युक्त्वा निर्गते भीमे नृपः परिहृतो नृपः॥ ददौ वित्तं सुवकं स्वं धृत
राष्ट्राय धर्मजः॥३४॥ कारयामास विधिवत् पुत्राणां चौर्ध्वदेहिकं॥ ददौ दानानि विप्रेभ्यो
धृतराष्ट्रो विकासुतः॥३५॥ कृत्वौर्ध्वदेहिकं सर्वं गांधारी सहितो नृपः॥ विवेश वनं तू
र्णं कुंत्या च विदुरेण च॥३६॥ संजयः परिचर्यार्थं निर्गतो सौ महामतेः॥ पुत्रैर्विचार्यमाण
पि सूरसेन सुतागता॥३७॥ विलपन् भीमसेनोपि तथान्ये बांधवाः किल गंगातीरात्पराव
त्य ययुः सर्वे गजाह्वयं॥३८॥ ते गत्वा जाह्नवीतीरे स्नातपूताश्रमं शुभं॥ कृत्वा पर्णकु
टीं तत्र स्तेपुस्तपसमाहिताः॥३९॥ गते वर्षाणि षट् तेषां यदा जाता नितापसाः॥ युधि

भा॰ द्वि॰ ष्ठिरस्तुविरहाद्दनुज्ञानिदमब्रवीत्॥४०॥स्वप्नेदृष्टामयाकुंतीऽवृत्तावनसंस्थिता॥म
२५ नोमेतपतेद्रष्टुंमातरौपितरंतथा॥४१॥विदुरंचमहात्मानंसंजयंचमहामतिं॥रोचते
यदिवंसर्वान्व्रजामइतिमेमतिः॥४२॥ततस्तेभ्रातरःसर्वेसुभद्राद्रौपदीतथावैरा
टीमहाभागातथानागरिकोजनाः॥४३॥जग्मुःसर्वेजनैःसार्द्धंपांडवादर्शनोत्सुकाः॥
ज्ञातयूपाश्रमंप्राप्यददृशुःसर्वएववने॥४४॥विदुरोनयदादृष्टःपृष्टंधर्मसुतेनवै॥क्वास
स्तेविदुरोधीरानूतमाहद्वंबिकासुतः॥४५॥विरक्तश्चरतेस्नात्वानिरीहोनिःपरिग्रहः॥
कृत्वाप्येकांतसंवासीनध्यायतःसनातनं॥४६॥गंगांगच्छन्नदितीयेकिवनेराजायुधि
ष्ठिरः॥ददर्शविदुरंक्षामंतमसासंसितव्रतं॥४७॥दृष्टोवाचमहीपालोवदेहंत्वांयु २५
धिष्ठिरः॥तस्योक्त्वाथविदुरंस्थाणुभूतइवानघ॥४८॥क्षणेनविदुरदेहान्निःसृतंते

जचाद्भुतं॥लीनंयुधिष्ठिरस्यास्येधर्मांशात्वात्परस्परं॥४९॥क्षत्राजहौतदाप्राणंस्तत्रोचाभि
युधिष्ठिर॥दाहार्थंतस्यदेहस्यकृतवानुद्यमंनृप॥५०॥श्रुएवतस्तुतदाराज्ञोवागुवाचा
चारीरिणी॥विरक्तोयंनदाहोयियेष्टंगच्छनृपते॥५१॥श्रुत्वातांभ्रातरःसर्वेसस्तुगंगा
जलेमले॥गत्वानिवेदयामासधृतराष्ट्रायविस्तरात्॥५२॥शुश्रोचचांबिकाःसुनुःकुं
तीचसौबलीतथा॥स्थितास्तत्राश्रमेसर्वेपांडवानागरैःसह॥५३॥तत्रसत्यवतीसुनु
र्नारदश्चसमागतः॥मुनयोन्येमहात्मानश्चागताधर्मनंदनः॥५४॥कुंतीप्राहतदाव्या
ससंस्थितश्चुत्वंनदृश्नंकृष्णकर्णस्तुपुत्रोमेजातमात्रस्तुवीक्षितः॥५५॥मनोमेतप्य
तेत्यर्थंदर्शयस्वंतपोधन॥समर्थोसिमहाभागकुरुमेवांछितंविभो॥५६॥॥गांधारी
रुवाच॥॥दुर्योधनरणेगच्छन्वीक्षितोमेमयामुने॥तंदर्शयमुनिश्रेष्टपुत्रमेनसहानु

जं॥५७॥ सुभद्रउवाच॥ अभिमन्युं महावीरं प्राणादप्यधिकं प्रियं। द्रष्टुकामास्मि स
र्वज्ञ दर्शयाद्य तपोधन॥५८॥ सूत उवाच॥ एवं विधानि वाक्यानि श्रुत्वा सत्यवतीसुत
॥ प्राणायामं ततः कृत्वा दध्यौ देवीं सनातनीं॥५९॥ संध्याकाले प्रसंप्राप्ते गंगायां मुनि
सत्तमः॥ सर्वांस्तांश्च समाहूय युधिष्ठिरपुरोगमान्॥६०॥ तुष्टाव विश्वजननीं स्नात्वा पु
ण्ये सरिज्जले। प्रकृतिं पुरुषाराध्यां सगुणां निर्गुणां तथा॥६१॥ यथा न ब्रह्मा न च विष्णु
रीश्वरो न वासवो नैव जलाधिपस्तथा। न वित्तपो नैव यमश्च पावकः॥६२॥ तदासि देवि त्व
महं नमामि तां॥६२॥ जलं न वायुर्न धरा न चांबरं गुणा न तेषां न च वेंद्रियाण्यहं। मनो न
बुद्धिर्न च तिग्मगुः न्नाग्नि तदासि देवि त्वमहं नमामि तां॥६३॥ इदं जीवल्लोकं समाधाय चि
त्ते गुणैर्लिंगकोशस्य नीत्वा समाधौ। स्थिता कल्पकालेन यस्याप्तत्राम कोप्यस्ति वेत्तां

विकेतें गितस्य॥६४॥ प्रार्थयत्येष मां लोको मृतानां दर्शनं पुनः॥ नाहं क्षमोस्मि मातस्त्वं द
र्शयाशु जनान्मृतान्॥६५॥ सूत उ॥ एवं स्तुता तदा देवी माया विश्वेश्वरी शुभा॥ स्वर्गाद्
रूय सर्वान्वै दर्शयामास पार्थिवान्॥६६॥ दृष्ट्वा कुंती च गांधारी सुभद्रा च विराटजा॥ पांडवाशु
मुदः सर्वे वीक्ष्य प्रत्यागतान्सकान्॥६७॥ पुनर्विसर्जिताः सर्वे व्यासेनामिततेजसा॥
स्मृत्वा देवीं महामायामिंद्रजालमिवायतं॥६८॥ तदा प्रतस्थुः सर्वे पांडवा मुनयस्तथा
।राजानागपुरं प्राप्तकुर्वन्व्यासकथां पथि॥६९॥ इति श्रीभागवते महापुराणे द्वितीयस्कं
धे सप्तमोध्यायः॥७॥ सूत उवाच॥ ततो वर्षेत्रितीये च धृतराष्ट्रः सनृपतिः॥ दावाग्नि
ना वने दग्धः सभार्यः कुंतीसंयुतः॥१॥ संजयस्तीर्थयात्रायां गतस्त्यक्त्वा महीपतिः॥ श्रु
त्वा युधिष्ठिरो राजा नारदात् दुःखमाप्तवान्॥२॥ षट्त्रिंशे गते वर्षे कौरवाणां क्षयात्पुनः

भा०दि प्रभासेयादवाःसर्वेविप्रशापात्क्षयंगताः॥३॥तेपीत्वामदिरांमत्ताहत्वायुद्धंपरस्परं।क्षयंप्रा
प्तामहात्मानःपश्यतोरामकृष्णयोः॥४॥देहंतत्याजरामस्तुकृष्णःकमललोचनः॥व्याधबा
२७ णाहतःशापंपालयन्भगवान्हरिः॥५॥वसुदेवस्तुतच्छ्रुत्वादेहत्यागंहरेस्तथा।जहौप्राणा
न्सुचार्तस्त्वाहारवत्यांमहामतिः॥६॥संस्कारंलम्भयामासपापघ्नस्यमहात्मनः।तंपत्न्योनु
ययुःसर्वाःवसुदेवमहामतिं॥७॥अर्जुनस्तुततस्त्वत्रभासेचातिदुःखितः।संस्कारंतत्रस
र्वेषांयथायोग्यंचकारह॥८॥समीक्ष्यापिहरेर्देहंकृत्वाकाष्ठस्यसंचयं।अष्टाभिःसहप
त्नीभिर्दाहयामासचार्जुनः॥९॥देहंरामस्यरेवत्यासहदृष्ट्वाविनावसौ।अर्जुनोद्वार
कामेत्यपुरान्निःकासयर्जुनः॥१०॥पुरीसावासुदेवस्यसमुद्रेणैवप्लाविता।अर्जुनस २७
र्वलोकान्गृहीत्वानिर्गतस्तदा॥११॥इंद्रप्रस्थेसमागम्यवज्रोराजाकृतस्तदा।हस्तप

न्तमार्गेचौराभीरैश्चलुंठिता॥१२॥धनंसर्वंगृहीतंचनिस्तेजश्चार्जुनोऽभवत्॥१२॥इंद्रप्र
स्थेसमागम्यवज्रोराजाकृतस्तदा।अनिरुद्धसुतःश्रीमान्पार्थेनामिततेजसा॥१३॥व्यासा
यकथितंदुःखंतेनोक्तोसौमहारथ।पुनर्यदाहरिस्त्वंचभविताऽसिमहामते॥१४॥तदातेजस्त
वाप्यंभविष्यतिपुनर्युगे।तच्छ्रुत्वावचनंपार्थोगत्वानागपुरेऽर्जुनः॥१५॥दुःखितोधर्मराजा
नंवृत्तांतंसर्वमब्रवीत्॥देहत्यागंहरेःश्रुत्वायादवानांक्षयंगतं।गमनायमतिंचक्रेराजा
हिमाचलंप्रति॥१६॥षट्त्रिंशद्वार्षिकंराज्येस्थापयित्वोत्तरासुतं।निर्जगामवनंराजाद्रौप
द्याभ्रातृभिःसह॥१७॥षट्त्रिंशच्चवर्षाणिकृत्वाराज्यंगजाह्वये।गत्वाहिमाचलेषट्तेज
हुःप्राणान्पृथासुताः॥१८॥परिक्षिदपिराजर्षिःप्रजाःसर्वाःधार्मिकः।अपालयच्चरा
ज्येद्वाषष्टिवर्षाण्यपंतंद्वितः॥१९॥वभूवमृगयायातोजगामवचनंमहत्।विद्धंमृगंविचि

भा॰दे॰ न्वानोमध्याह्नेनृपतिस्स्वयं॥२०॥त्रिषितश्चपरिश्रांतः क्षुधितश्चोत्तरासुतः॥तथाधर्मेण
२८ तप्तश्चददर्शमुनिमंतिके॥२१॥ध्यानस्थंतंमुनिंराजाजलंपप्रच्छ चातुरः॥नोवाचकिंचि
मौनस्थश्चुकोपनृपतिस्तदा॥२२॥मृतंसर्पंतदादायधनुःकोट्याक्षुधातुरः॥कलिनावि
ष्टचित्तस्तुकंठेतस्यनिवेशायत्॥२३॥आरोपितेतथासर्पेनोवाचमुनिसत्तमः॥नाकु
ञ्चत्तपसायुक्तोराजाथस्वगृहं ——॥२४॥मित्राण्याक्रुतस्यपुत्रोतितेजस्वीमविजातोम
हातपाः॥शृंगीततोयस्य श्रावक्रीडमानोवनांतिके॥२५॥मित्राण्याक्रुश्चतंपुत्रंपितुकं राम॰
ठेतवाधुनालग्नितोस्तिमृतःसर्पःकेनापीतिमुनिश्वरः॥२६॥तेषांतद्वचनंश्रुत्वाचु
कोपातिशायंतदा॥सशापन्नृपतिक्रुद्धोःगृहीत्वायकरेजलं॥२७॥पितुःकंठेधमेयेन २८
मृतःसर्पोनिवेशितः॥तंधक्षत्वप्पसोमास्तक्षकःसप्तमेहनि॥२८॥इतिशापस्तदाते

नराजाश्रुत्वास्यवैपितिः॥पुत्रंतंनिवेद्यवेगेनराज्ञेशापंनिवेदयत्॥२९॥मुनेःशिष्योथराजा
नंसमुपेत्यगृहेस्थितं॥शापनिवेदयामासमुनिपुत्रेणचार्पितं॥३०॥अनिमन्तुसुश्रु
त्वाशापंदत्तंद्विजेनवै॥अविचार्यमविज्ञायमंत्रेहत्वानुवाचह॥३१॥शप्तोहंद्विजपुत्रे
णममदोषादसंशयं॥किंविधेयंमयामात्याउपायचिंत्यतामहः॥३२॥मन्तुःकिलानुनिवा
येविवदंतिवेदवादिनः॥यत्नस्तथापिशास्त्रोक्तःकर्त्तव्यस्सर्वथाबुधैः॥३३॥उपाय
वादिनःकेचिन्त्रवदंतिमनीषिणः॥वित्तोपायेनसिद्ध्यंतिकार्याणिनतरस्यवै॥३४॥
र्याणि कुरु कमलसंनवः॥४६॥ नवाक्षरमिदं मंत्रं बीजध्यानयुतं सदा॥ जप
न्सर्वाणि कर्माणि कुरु कमलसंनव॥४७॥ मंत्राणामुत्तमो यं वै त्वं जानीहि म
हामते॥ हृदये ते सदा धार्यः सर्वकार्यार्थसिद्धये॥४८॥ ब्रह्मोवाच॥ ॥इत्युक्त्वा मां
जगन्माता हरिं प्राह सुचिस्मिता॥ विष्णो त्वं निगृह्णेमां महालक्ष्मीं मनोहरां॥
४९॥ सदा वक्षस्थलस्था नेनविता नात्र संशयः॥ क्रीडार्थं ते मया दत्ता शक्तिः स
र्वार्थदा शिवा॥५०॥ त्वयेयं तावमंतव्या माननीया च सर्वदा॥ लक्ष्मीनारायणाख्यो
यं योगो वापि दितो मया॥५१॥ जीवतार्थं कृता पश्चादेवानां सर्वथा मया॥ अवि
रोधेन सततं न्नवितव्यं त्रिभिः सदा॥५२॥ त्वं च ब्रह्मा शिवस्त्वेते देवा मनु गुणसंन

पान्या:
मा.त० वा:॥ पूज्यास्य सर्वेषां न विष्यथ न संशयं॥५३॥ ये विघ्नं द्वंकरिष्यंति मानवा मूढचे
तसः॥ निरयं ते गमिष्यंति विघ्नेन नात्र संशयः॥५४॥ यो हरिः स शिवः साक्षाद्यः
२२ शिवः स स्वयं हरिः॥ एतयोर्भेदमातिष्ठन्नरकायान्नवेन्नरः॥५५॥ तथैव द्रुहिणोत्ते
यो नात्र कार्या विचारणा॥ अपरो गुणभेदोस्ति शृणु विष्णो ब्रवीमि ते॥५६॥ मु
ख्यः सत्वगुणस्तेस्तु परमात्मनिचिंतने॥ गौणत्वेप्यवरोस्यातां रजोगुणतमो
गुणौ॥५७॥ लक्ष्म्या सह विकारेषु नानाभेदेषु सर्वदा॥ रजोगुणयुतो भूत्वा विह
रस्वानया सह॥५८॥ दैत्यानां यातने काले तमोगुण पुनः सदा॥ विनाशं घो
ररूपाणां कर्त्तवितं मयाकृतः॥५९॥ गृहाणेदं महाभाग वाग्बीजं परमं मम
कामराजं द्वितीयं वै मायाबीजं तृतीयकं॥६०॥ मंत्रोयं त्वं रमाकांत मद्दत्तः परमा

यदि:॥ गृहीत्वा प्रजपन्नित्यं विहरस्व यथासुखं॥६१॥ नते मृत्युर्भयं विष्णो न काल
ब्रम्नवं नयं॥ यावदयं विहारो मे न विष्याति सुनिश्चितः॥६२॥ संहरिष्याम्यहं स
र्वं यदा विश्वचराचरं॥ नवितोपि तदा नूनं मयि लीनो न विष्यथ॥६३॥ स्मर्त
व्योयं सदा मंत्रः कामहेशेमा सहस्रथा॥ उभौथे न च संत्यक्तः कर्त्तव्यःस्तु न मि
छता॥६४॥ कारयित्वा च वैकुंठं निवासाय पुरुषोत्तमं॥ विहरस्व यथाकामं चिं
तयन् पुरुषं परं॥६५॥ ब्रह्मोवाच॥ ॥इत्युक्त्वा वासुदेवे सा त्रिगुणा प्रकृतिः परा॥
निर्गुणाच्चाकरं देवं ममोचदमृतं वचः॥६६॥ देव्युवाच॥ गृहाण हर गौरीत्वं महाका
लीमनोहरं॥ कैलाशं कारयित्वा च विहरस्व यथासुखं॥६७॥ मुख्यस्तमोगुण
स्तेस्तु गौणौ सत्वरजोगुणौ॥ विहारासुरनाशार्थे रजोगुणतमोगुणौ॥६८

ना.तं. तपस्तप्तुं तथा कर्तुं स्मरणं परमात्मनः ॥ परमसत्वगुणः शंभो गृहीतव्यः सदानघ
६९ ॥ सर्वथा त्रिगुणायुक्तं सृष्टिस्थित्यंतकारणं का ॥ एभिर्विहीनसंसारे वस्तु नै
२३ वास्ति कुत्रचित् ॥ ७० ॥ वस्तुमात्रं तु यद्दृश्यं संसारे त्रिगुणं हि तत् ॥ दृश्यं च नि
र्गुणं लोके न भूतं न भविष्यति ॥ ७१ ॥ निर्गुणः परमात्मासौ न तु दृश्यः कदाचन ॥
सगुणा कारणत्वाद्वै निर्गुणा पुरुषांतिके ॥ ७२ ॥ सगुणा निर्गुणा चाहं समये
शंकरानघ ॥ सदाहं कारणं शंभो न च कार्यं कदाचन ॥ स ७३ ॥ महत्तत्वं महं
कारो गुणाः शब्दादयस्तथा ॥ कार्यं च कारणं चैव सप्त एते परस्परं ॥ ७४ ॥ महद्
भूतस्त्वहंकारस्तेनाहंकारणं शिव ॥ अहंकारश्च मे कार्यं त्रिगुणेसौ प्रतिष्ठि
तः ॥ ७५ ॥ अहंकारान्महत्तत्वं बुद्धिः सा परिकीर्तिता ॥ कार्यत्वं च महत्तत्वमहं

कारो हि कारणं ॥ ७६ ॥ तन्मात्राणि त्वहंकारादुत्पद्यंते सदैव हि ॥ कारणं पंचभू
तानां तानि सर्वसमुद्भवे ॥ ७७ ॥ कर्मेंद्रियाणि पंचैव ज्ञानेंद्रियाणि पंच वै ॥ महा
भूतानि पंचैव मनः षोडश एव च ॥ ७८ ॥ कार्यं न कारणं चैव गणोयं षोडशात्मकं
परमात्मा पुमानाद्यो न कार्यं न च कारणं ॥ ७९ ॥ एवं समुद्भवः शंभो सर्वेषामादिसं
भवे ॥ संक्षेपेण मया प्रोक्तस्तव तत्र समुद्भवः ॥ ८० ॥ व्रजंत्वद्य विमानेन कार्यार्थि
ममरोत्तमाः ॥ स्मरणाद्दर्शनं तुभ्यं दास्येहं विषमे स्थिते ॥ ८१ ॥ स्मर्तव्याहं सदा देवाः
परमात्मा सनातनः ॥ चोभयोः स्मरणादेव कार्यसिद्धिरसंशयं ॥ ८२ ॥ ब्रह्मोवाच ॥
इत्युक्त्वा विससर्जास्मान्दत्वा शक्तीः सुसंस्कृताः ॥ विष्णवे थ महालक्ष्मीं महा
कालीं शिवाय च ॥ ८३ ॥ महासरस्वतीं मह्यं स्थानात्तस्माद्विसर्जिताः ॥ स्थानांत

रंसमासाद्यसंजाताःपुरुषावयं॥८४॥चिंतयंतःस्वरूपंतत्परभावंपरमाद्भुतं॥विमानं
तत्समासाद्यसंभूतास्तत्रवैत्रयः॥८५॥नदीपोतोनदेवीसासुधासिंधुस्तथैवच॥पु
नर्दृष्टंविमानंवैतत्रास्माभिर्नचान्यच॥८६॥आसाद्यतस्मिन्विततेविमानेशशा
वयंपंकजसंनिधिंच॥महार्णवेयत्रहतौउरस्यौमुरारिणातौमधुकैटभाख्यौ॥
८७॥ ॥इतिश्रीभागवतेमहापुराणेतृतीस्कंधेषष्ठोऽध्यायः॥६॥ ॥ब्रह्मोउ॥
एवंभगवतीसादेवीमयादृष्टाथविस्तृता॥शिवेनापिमहाभागाशाशाप्ताद्भ्यःपृथक्
पृथक्॥१॥ ॥व्यासउवाच॥ ॥इत्याकर्ण्यपितुर्वाक्यंनारदोमुनिसत्तम॥पप्रच्छपर
मप्रीतःप्रजापतिमिदंवचः॥२॥नारदउ॥ ॥पुमानाद्योविनाशीयोनिर्गुणोच्युतर
व्ययः॥दृष्टश्चैवानुभूतश्चतद्वदस्वपितामह॥३॥त्रिगुणीत्विताशक्तिनिर्गुणाकीद

त्रीपितः॥तस्याःस्वरूपंमेब्रूहिपुरुषस्यचपद्मज॥४॥यदर्थंचमयातपाहृष्टाभि
धामहात्मानस्तापसागतमन्यवः॥५॥परमात्मानसंप्राप्तोमयासौदृष्टिगोचरः॥पु
नःपुनस्तपस्तीव्रंकृतंतत्रप्रजापते॥६॥भवतासगुणाशक्तिर्दृष्टातातमनोरमा॥
निर्गुणानिर्गुणश्चैवकीदृशौतौवदस्वमे॥७॥व्यासउवाच॥ ॥इतिपृष्टःपितातेन
नारदेनप्रजापतिः॥उवाचवचनंतथ्यंस्मितपूर्वंपितामहः॥८॥ब्रह्मोवाच॥नि
र्गुणस्यमुनेरूपंनभवेदृष्टिगोचरं॥दृश्यंचनश्वरंयस्माद्रूपंदृश्यतेकथं॥९॥नि
र्गुणादुर्गमाशक्तिर्निर्गुणश्चतथापुमान्॥ज्ञानगम्यस्तुयोगीनांभावनीयाश्चतेज
स्ता॥१०॥अनादिनिधनौविद्धिसदाप्रकृतिपूरुषौ॥विश्वासेनाधिगम्यौतौनावि
श्वासेनकर्हिचित्॥११॥चैतन्यंसर्वभूतेषुयत्तद्विद्धिपरात्मकं॥तेजःसर्वत्रगंनि

त्वंन्नाविष्णुसकलेषुच॥१२॥ तंचतांचमहात्मानागव्यापकौविधिसत्तमौ॥ तासांविहीनंसं
सारेकिंचिद्वस्तुनविद्यते॥१३॥ तौविचित्यौसदादेहेमिश्रीभूतौसहाव्ययौ॥ एकरूपो
चिदात्मानौनिर्गुणौनिर्मलावुभौ॥१४॥ याशक्तिःपरमात्मासौयोसौसापरमात्म
ता॥ अंतरंनैतयोःकोपिसूक्ष्मंवेदत्वनारद॥१५॥ अधीत्यसर्वशास्त्राणिवेदाःसांगाश्च
नारद॥ नजानातितयोःसूक्ष्मंअंतरंविरतिंविना॥१६॥ अहंकारस्ततःसर्वविश्वस्याव
रजंगमं॥ कथंनइहितंपुत्रमवेत्कल्मशातैरपि॥१७॥ निर्गुणंसगुणःपुत्रकथंपश्य
तिचक्षुषा॥ सगुणेनमहाबद्धेचेतसासंविचारय॥१८॥ पित्तेनाछादितानिजिह्वाच
क्षुश्चमुनिसत्तम॥ कटुपीतंविजानातिरसंरूपंनतत्तथा॥१९॥ गुणैःसमावृतंचे
तःकथंपश्यतिचक्षुषा॥ सगुणेनमहाबुद्धेचेतसासंविचारय॥२०॥ गुणैःसमावृतं

चेतःकथंजानामिनिर्गुणं॥ अहंकारोद्भवंतच्चतद्विहीनंकथंभवेत्॥२१॥ यावन्नगु
णविच्छेदस्तावत्तद्दर्शनंकुतः॥ तंपश्यतितदाचित्तेयदाहंकारवर्जितः॥२२॥ नारद
उ॥ ॥ स्वरूपंदेवदेवस्यत्रयाणांमेतिविस्तरात्॥ गुणानांयस्वरूपोस्तित्वहंकारस्त्वि
रूपकः॥२२॥ सात्विकोराजसश्चैवतामसस्तथापरः॥ भिन्नेहेनस्वरूपाणिवद
स्वपुरुषोत्तमः॥२३॥ यत्ज्ञात्वाप्रविमुच्येहंज्ञानंतद्वदमेप्रभो॥ गुणानांलक्षणान्यद्य
विततानिविनागशः॥२४॥ ब्रह्माउ॥ ॥त्रयाणांशक्तयस्तिस्रःप्रब्रवीमितवानघ॥
ज्ञानशक्तिःक्रियाशक्तिर्द्रव्यशक्तिस्तथापरा॥२५॥ सात्विकस्यज्ञानशक्तिराजस
सक्रियात्मिका॥ द्रव्यशक्तिस्तामसस्यतिस्रश्चकथितास्तव॥२६॥ तेषांकार्याणिवक्ष्या
मिश्रृणुनारदतत्वतः॥ तामसाद्द्रव्यशक्तेश्चशब्दस्पर्शरससमुद्भवः॥२७॥ रूपरसश्चगंध

ना॰त॰ श्चतन्मात्राणिप्रचक्षते॥शब्दैकगुणमाकाशंवायुस्पर्शगुणस्तथा॥२८॥स्वरूपैकगुणो
२६ ग्निश्चजलंरसगुणात्मकं॥पृथ्वीगंधगुणाज्ञेयासूक्ष्माण्येतानिनारद॥२९॥स्तैतामि
लितातुद्रव्यशक्तियुतानिवै॥तामसाहंकारजोयंसर्गस्सदनुवृत्तिकः॥३०॥राज
सात्त्वक्रियाशक्तेरुत्पन्नानिशृणुष्वह॥श्रोत्रंत्वक्चक्षुरसनाघ्राणंचैवचपंचमं॥३१
ज्ञानेंद्रियाणिचैतानितथाकर्मेंद्रियाणिच॥वाक्पाणिपादपायुश्चगुह्यंतानिचपंच
वै॥३२॥प्राणोपानस्तथाव्यानस्समानोदानवायवः॥पंचक्रियाभिर्मिलितैर्वराजसःसर्गउ
च्यते॥३३॥साधनानिकिलैतानिक्रियाशक्तिकृतानिच॥उपादानंकिलैतेषांचि
दनुवृत्तिरुच्यते॥३४॥ज्ञानशक्तिसमायुक्तासात्विकात्तुसमुद्भवः॥दिशोवायुश्च
सूर्यश्चवरुणश्चाश्विनाविति॥३५॥ज्ञानेंद्रियाणांपंचानांपंचाधिष्ठादेवताः॥च

न्द्रोब्रह्मातथारुद्रःक्षेत्रज्ञश्चचतुर्थकः॥३६॥इत्यंतःकारणस्यास्यनूनंचतुष्टयस्य
च॥चत्वार्येवतथोक्तायाःकिलाधिष्ठातृदेवताः॥३७॥मनसासहचैतानिनूनंपंच
दशैवतु॥सात्विकस्यतुसर्गोयंसाधकाख्यःप्रकीर्तितः॥३८॥तथानंदानुवृत्तिश्च
स्युपादानंप्रचक्षते॥साधकस्यचसाध्यत्वाच्चादिरूपपरात्मनः॥३९॥शरीरंसू
क्ष्ममेवेदंपुरुषस्यप्रकीर्तितं॥मनश्चैवशरीरंवैसूत्रमित्ययमेववै॥३०॥स्थूलंश
रीरंवक्ष्यामियत्तस्यपरमात्मनः॥शृणुनारदयत्नेनयच्छ्रुत्वाप्रविमुच्यते॥३१॥त
न्मात्राणिपुरोक्तानिभूतसूक्ष्माणियानिवै॥पंचीकृत्यचतान्येवपंचभूतसमुद्भ
वः॥३२॥पंचीकरणभेदोयंशृणुसंक्षेपतःकिल॥प्रथमंरसतन्मात्रमुपादायम
नस्यपि॥३३॥कल्पयेच्चतथातद्वैयथाभवतिचोदकं॥शिष्टानांचैवभूतानामंशा

भा॰तृ॰ भुक्त्वा पृथक्पृथक्॥३४॥ उदकेमिश्रयेच्चांशान्भुक्तेरसमयेतदा॥ भूतंविभागे
चास्यदेहेचैतन्येचप्रवेशिते॥३५॥ चैतन्यस्यप्रवेशात्तुतदाहमितिसंभवः॥ इतीयमा
२१ नेतेनैवविशेषेणाभिमानतः॥३६॥ आदिनारायणोदेवोभगवानितिवोच्यते॥ धनी
भूतेषभूतानांविभागेस्यष्टतांगते॥३७॥ पृथिव्याप्यगुणेश्चैत्यंएकैकगुणवर्धितः
आकाशस्यगुणश्चैकः शब्दएवनचापरः॥३८॥ शब्दस्पर्शौचवायोर्वैद्वौगुणौपरि
कीर्तितौ॥ अग्नेःशब्दस्पर्शश्चरूपमेवंत्रयोगुणाः॥३९॥ शब्दस्पर्शरूपरसा
श्चत्वार्येवसमीरणे॥ स्पर्शशब्दपरसोरूपंगंधश्चपृथिवीगुणाः॥४०॥ एवंमिलित
योगैश्चब्रह्मांडोत्पत्तिरुच्यते॥ सर्वेजीवानिमिलित्वैवब्रह्मांडांशसमुद्भवः॥४१॥
चतुराशीतिलक्षाश्चप्रोक्तावैजीवजातयः॥ तानिस्थूलशरीराणिमिलित्वासर्व
मेवहि॥४२॥ विराडित्युच्यतेब्रह्मन्स्थूलंरूपंपरात्मनः॥ ज्ञातव्यंकथितंसर्वंमया
तेमुनिसत्तम॥४३॥ ॥इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेसृष्टिनिरूपणेस
प्तमोऽध्यायः॥७॥ ॥ब्रह्मोवाच॥ ॥सर्गोयंकथितस्तातयत्पृष्टोत्वयाधुना॥ गुणानां
रूपसंस्थांवैशृणुष्वेकाग्रमानसः॥१॥ सत्त्वंप्रीत्यात्मकंज्ञेयंसुखात्प्रीतिसमुद्भवः॥
आर्जवंचतथासत्यंशौचंश्रद्धाक्षमाधृतिः॥२॥ अनुकंपातथालज्जाशांतिःसंतो
षएवच॥ एतैःसत्त्वप्रतीतिश्चजायतेनिश्चलासदा॥३॥ श्वेतवर्णस्तथासत्त्वंधर्मे
प्रीतिकरंसदा॥ सच्छ्रद्धोमादकंनिमसच्छ्रद्धानिवारकं॥४॥ सात्त्विकीराजसी
चैवतामसीचतथापरा॥ श्रद्धातुत्रिविधाप्रोक्तामुनिभिस्तत्त्वदर्शिभिः॥ रक्तव
र्णंरजःप्रोक्तमप्रीत्यात्मकमद्भुतं॥ अप्रीतिर्दुःखयोगत्वाद्भवेत्येतत्सुनिश्चितं॥६॥

ना॰पु॰ प्रद्वेषोथतथाद्रोहोमत्सरःस्तंभएवच॥उत्कंठाचतथानिंदाश्रधातत्रचराजसी॥७
मानमदस्तथागर्वोरजसाकिलजायते॥प्रत्येतव्यंजनस्तैतैर्लक्षणैश्चविचक्षणैः॥८॥कृ
२८ ष्णवर्णंतमःशोकंमोहश्चविषादकृत॥आलस्यंचतथाज्ञाननिद्रादैन्यंभयंतथा
९॥विषादश्चैवकार्पण्यंकौटिल्यंरोषएवच॥वैषम्यंचातिनास्तिक्यंपरदोषानु
दर्शनं॥१०॥प्रत्येतव्यंतमश्चैतैर्लक्षणैःसर्वथाबुधैः॥तामस्याश्रधयायुक्तंपर
तापोपपादकं॥११॥सत्वंप्रकाशायीतमंनियंतव्यंरजसदा॥संहर्तव्यंतपःकामं
जनेनतपमिच्छता॥१२॥अन्योन्यमिथुनाश्चैतेविरुध्यंतिपरस्परं तथान्योन्याश्रया २८
ःसर्वेनतिष्टंतिनराश्रयाः॥१३॥सत्वंनकेवलंक्वत्रनरजोनतमस्तथा॥मिलिताश्च
सदासेवंतिनान्योन्याश्रयाःस्मृताः॥१४॥अन्योन्यमिथुनाच्चैवविस्तरंकथयाम्यहं

श्रृणुनारदयज्ज्ञात्वामुच्यतेभवबंधनात्॥१५॥संदेहोत्रनकर्तव्योज्ञात्वैतुक्रंम
यावचः॥ज्ञातंतदनुभूतंयत्परिज्ञानंकलेसति॥१६॥श्रवणाद्दर्शनाच्चैवसंप
र्कात्त्वमहामते॥सत्संगाच्चानुभवाच्चैवपरिज्ञानंनजायते॥१७॥कृतंतीर्थपिवि
त्रैचश्रथोत्पन्नाचराजसी॥निर्गतस्तत्रतीर्थेवैदृष्टंसर्वंयथाश्रुतं॥१८॥स्नातस्त
त्रकृतंकृत्संदर्शनंचराजसं॥स्थितस्तत्रकियत्कालंरजोगुणसमावृतः॥१९॥
रागद्वेषान्ननिर्मुक्तःकामक्रोधसमावृत॥पुनरेवगृहंप्राप्तोयथापूर्वंतथास्थि
तः॥२०॥श्रुतंचनानुभूतंवैतेनतीर्थंनरोत्तम॥नप्राप्तंचफलंयस्मात्कृतंवि
धिनारद॥२१॥निःपापत्वंफलंविधितीर्थस्यतिसत्तम॥कृषेःफलंयथालोके
निष्पन्नात्तस्यतत्क्षणं॥२२॥पापंदेहेविकारायेकामक्रोधादयोपरे॥लोभो

ना॰ त॰ मोहस्तथा तृष्णा द्वेषो रागस्तथा मदः ॥२३॥ असूयेर्ष्या क्षमा शांतिः पापान्येतानि
नारद ॥ निर्निर्गतानि देहात्तु तावत् पापयुतो नरः ॥२४॥ कृतेतीर्थे यदेतानि देहा
२९ न्न निर्गतानि चेत्तु ॥ निःफलः श्रमएवैक कर्षकस्य यथा तथा ॥२५॥ श्रमेणापी दि
तश्री रंकस्ता न्नूमिः सुदुर्घटा ॥ वृषबीज महर्घं च विहिता वर्त्तिरूहा रुता ॥२६॥ अ
होरात्रं परिक्लिष्टो रक्षणार्थं सकार्मुकः ॥ मालेसु मस्तु हेमंते वने व्याघ्रान्तरा ॥२७॥
तेक्षितं शालन्नेस्स वं निराशाश्च पुनः कृतः ॥ तद्वत्तीर्थश्रमं पुत्र कष्टदं तफलप्रदं ॥२८
सत्वसमुत्कटं जातं प्रवृद्धं शास्त्र दर्शनात् ॥ वैराग्यं तत्फलं ज्ञातं मया र्थेषु च नारद
॥२९॥ तत्र थानिर्न्नवत्येव रजस्तमसु नेस्तुते ॥ रजस्तूत्कटता शातं प्रवृद्धं चातिदेष
तः ॥३०॥ तत्र दानिनवत्येव तमस्सुनेस्तुत ॥ तमस्तथोत्कटं नूता प्रवृद्धं मोह

योगतः ॥३१॥ तस्सत्वरजंसी चोन्ने संगस्यानिनवत्यपि ॥ वित्तरंकपया म्यद्य यु
थानिन्नवतीतिवै ॥३२॥ यदा सत्वं प्रवृद्धं वै मतिधर्मे स्थिता तदा ॥ न चिंतयति चार्थं
तु रजस्तमससमुद्भवं ॥३३॥ अर्थमत्वसमुद्भूतं गृह्णाति च न चान्यथा अनायास
कृतं चार्थं धर्मे पात्रे च वांछति ॥३४॥ सात्विके षेवन्नागेषु कामं वै कुरुते सदा ॥
राजसेषु नमोन्नार्थी तामसेषु पुनः कथं ॥३५॥ एवं जित्वा रजः पूर्वं ततश्च तमसो ज
यः ॥ चेत्सत्वं केवलं पुत्र तदा न वर्तिनि मर्जं ॥३६॥ यदा रजः प्रवृद्धो वै तस्काथमर्
ज्ञनालनान् ॥ अन्यथा कृतेधर्मनिश्चयधां जाप्यतु राजसी ॥३७॥ राजसा दर्थसिंह
धिस्तथा भोगस्तु राजसः ॥ सत्वं विनिर्जितं तेन तमसश्चापि निग्रहः ॥३८॥ यद्यातमो
विद्दधंस्यादुत्कटं संबन्नूवह ॥ तथा वेदेन विश्वासो धर्मशास्त्रे तथापिनः ॥३९॥ श्र

धांचतामसीश्चाप्यकरोतिचधनात्ययं॥ मोहंसर्वत्रकुरुतेनशांतिमधिगच्छति॥
४०॥ जित्वासत्वंरजश्चैवक्रोधनोदुर्मतिःशठः॥ वर्त्ततेकामचारात्मभावेषुवितथेषुच
४१॥ एकंसत्वंनभवतिरजश्चैकंतमस्तथा॥ सहामाश्रित्यवर्त्तंतेगुणामिथुनधर्मि
णः॥४२॥ रजोविनानसत्वंस्यात्रजःसत्वंविनाक्वचित्॥ तमोविनानतेत्वेमौव
र्त्ततेपुरुषर्षभ॥४३॥ तमस्ताभ्यांविहीनंतुकेवलंनकदाचन॥ सर्वेमिथुनधर्मे
णगुणाःकार्यांतरेणवै॥४४॥ अन्योन्यसंश्रिताःसर्वेतिष्ठंतिनवियोजिताः॥ अ
न्योन्यजननकाश्चैवयतःप्रसवधर्मिणः॥४५॥ कदाचित्सत्वरजसीतमसीजनय
त्युत कदाचित्तुरजःसत्वतमसीजनयत्यपि॥४६॥ कदाचित्तुतमःसत्वरजसीज
नयत्युत॥ जनयंत्येवतेन्योन्यंमृत्पिंडश्चघटंयथा४७॥ बुद्धिस्थास्तेगुणाःकार्यं

बोधयंतिपरस्परं॥ देवदत्तविष्णुमित्रयज्ञदत्तादयोतथा॥४८॥ यथास्त्रीपुरुष
श्चैवमिथुनौचपरस्परं॥ तथागुणाःसमायांतिस्त्रीभावंपरस्परं॥४९॥ रजसो
मिथुनंसत्वंसत्वस्यमिथुनंरजः॥ उभेचसत्वरजसीतमसोमिथुनंविदुः॥५०॥ ना
रदउ॥ ॥इत्येतत्कथितंपित्रागुणरूपमनुत्तमं॥ श्रुत्वाप्यतद्ध एवाहंतमपृच्छंपि
तामहं॥५१॥ ॥इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेऽष्टमोऽध्यायः॥८॥ना
रदउ॥ ॥गुणानांलक्षणंतातभवताकथितंकिल॥ नतृप्तोस्मिपिबन्मिष्टंत्वन्मु
खात्कथितंरसं॥१॥ गुणानांसुपरिज्ञानंयथावदनुवर्णय॥ यच्छ्रुत्वापरमांशांति
मधिगच्छामिचेतसि॥२॥ व्यासउ॥ ॥इतिपृष्टस्तुपुत्रेणनारदेनमहात्मना॥ उ
वाचचजगत्कर्त्तारजोगुणसमुद्भवः॥३॥ ब्रह्मोवाच॥ शृणुनारदवक्ष्यामिगुणानांपरि

वर्णनं॥ सम्यक्त्वाहं विजानामि यथामति ब्रवीमि ते॥४॥ सत्वं निःकेवलं नैव क्वचा
भा॰तं॰ पि परिलक्ष्यते॥ मिश्रभावात्तु तेषां वै मिश्रत्वं प्रतिभाति वै॥५॥ यथा काचिद्वरा ना
२१ री सर्वभूषणभूषिता॥ हावभावयुता कामं भर्तुः प्रीतिकरा भवेत्॥६॥ माता पि
त्रोस्तथा सैव बंधुवर्गस्य प्रीतिदा॥ दुःखमोहं सपत्नीषु जनयत्यपि सैव हि॥७
एवं सत्वेन तेनैव स्त्रीत्वमायादिनं त च॥ रजसस्तमसश्चैव जनिता हृत्तिरन्यथा
८॥ रजसा स्त्रीकृते नैव तमसा च तथा पुनः॥ अन्योन्यस्य समायोगादन्यथा प्रति
भाति वै॥९॥ अवस्थानां स्वभावेषु न वै जात्यंतराणि च॥ जस्त्वं ते विपरीतानि
ना नियोगाच्छक्नुवन्ति च॥१०॥ यथा रूपवती नारी यौवनेन विभूषिता॥ लज्जा
माधुर्ययुक्ता च तथा विनयसंयुता॥११॥ कामशास्त्रविधिज्ञा च धर्मशास्त्रेपि

संमता॥ भर्तुः प्रीतिकरात्यर्थं सपत्नीनां च दुःखदा॥१२॥ मोहदाश्च स्वभावस्या सत
स्यैस्तुच्यते जनैः॥ तया सत्वं किंक्वर्णिमन्यभावं विजानाति वै॥१३॥ यथा च क्षत्रियः
शूरो सर्वायुधधरः सुतः॥ संनधो भ्रूहितश्चैव निघ्नं चौरांश्च शत्रवान्॥१४॥ ते
न सा स्त्री स्वभावस्था रजोरूपा विजानाति वै॥ चौरे रूपकुतानां च साधूनां तु खदा
भवेत्॥१५॥ दुःखामूढा च दस्यूनां सेव सेना तथा गुणाः॥ विपरीतवृत्तीति वै जं
नयंति स्वभावतः॥१६॥ यथा च दुर्दिनं जातं महामेघवृतं घनं॥ विद्युत्स्तनित
संयुक्तं तिमिरेणावगुंठितं॥१७॥ संचित्तन्न मिनप्रवर्षन् वै तमोरूपं सुदारुणं॥
तदेव कर्षुकाणां वै तथैवार्ती दुर्दिनं॥१८॥ बीजोपस्कर युक्तानां सुखदं प्रत्नं वै सुत
स्यष्टकुन्नगृहाणां वै दुर्भगानां विशेषतः॥१९॥ तृणकाष्ठविहीनानां दुःखदं ग

हमेधिनां॥ शोषितानर्तकीणां वैमोहदं प्रभवत्यपि॥२०॥ सत्वावस्था गुणाः स
र्वे विपरीतानि जानाति वै॥ लक्षणानि पुनस्तेषां शृणु पुत्र ब्रवीम्यहं॥२१॥ लघु प्रका
शकं सत्वं निर्मलं विशदं सदा॥ यदांगानि लघून्येव विशदानीन्द्रियाणि च॥२२॥
निर्मलं च तथा चेतो गृह्णाति विषयानिजान्॥ तदा सत्वं शरीरे वै मंतव्यं च समु
त्कटं॥२३॥ उत्तेजकमत्यर्थं चलं चैव रजः पुनः॥ यदा तदुत्कटं जातं देहे यस्य च
कस्यचित्॥२४॥ कलिं मृगयते कर्तुं गंतुं ग्रामांतरं तथा॥ चलच्चित्तस्य सोत्सर्थं विवा
देचोद्यतस्तथा॥२५॥ गुरुवरणकं कामं तयो भवति तद्यथा॥ यदांगानि गुरूण्या
श्रुयभन्नवं त्याहतानि च॥२६॥ तदा तमः प्रवृद्धं वै ज्ञातव्यं सर्वथा बुधैः॥ इंद्रियाणा
वृतान्येव गृह्णाति विषयानिव॥२७॥ नारद उ॥ विभिन्नलक्षणाः प्रोक्ता गुणास्त्र

यपितामह॥ कथमेकत्र संस्थास्ते कार्यं कुर्वंति वद स्वमे॥२९॥ ब्रह्मो उ॥ शृणु पु
त्र वक्ष्यामि गुणास्ते दीपवत्त्रयः॥ प्रदीपस्तु यथा कार्यं करोत्यर्थं वदर्शनं॥३०॥ वर्ति
स्तैलं तथा वह्निस्त्रिविरुधाश्च परस्परं॥ एकत्रस्थाः पदार्थानां प्रकुर्वंति प्रकाशनं॥
३१॥ विरुधं हि तथा तैलमग्निना सह संगतं॥ तैलं वर्त्तिर्विरोधी च पावकेपि परस्प
रे॥ एकत्रस्था॥३२॥ तथा सत्वादयः कार्यं पुरुषार्थं सह स्थिताः॥ विरुधाश्चापि कु
र्वंति त्रयस्ते मिलिताः किल॥३३॥ नारद उ॥ ॥ एवं प्रकृतिजाः प्रोक्ताः गुणाः सत्य
वतीसुत॥ विश्वस्य कारणं ते वै मया पूर्वं यदा कृतं॥३४॥ ॥ व्यास उ॥ ॥ इत्युक्ते
नारदेनाथ मम सर्वं सविस्तरं॥ गुणानां लक्षणं सर्वं कार्यं चैव विभागशः॥३५
आराध्या परमा शक्तिर्यया सर्वमिदं ततं॥ सगुणा निर्गुणा चैव कार्यार्थे देस दैवहि

ना·तं· ३६॥ अकर्त्तापुरुषःपूर्णोनिरीहःपरमोऽव्ययः॥ करोत्येषामहामायाविश्वंसदसदात्म
कं॥३७॥ ब्रह्माविष्णुस्तथारुद्रःसूर्यश्चंद्रःशचीपतिः॥ अश्विनौवसवस्त्वष्टाकुवेरोया
३३ दसांपतिः॥३८॥ वह्निर्वायुस्तथापूषासेनानीचविनायकः॥ सर्वेशक्तियुताःशक्ताः
कर्तुंकार्याणिस्वानिच॥३९॥ अन्यथातेप्यशक्तावैप्रस्पंदितुमपीश्वराः॥ साएव
कारणंराजन्जगतःपरमेश्वरी॥४०॥ समाराधयतांनृपकुरुयज्ञंनराधिपः॥ पू
जनंपरयाशक्त्यातस्याएवविधानतः॥४१॥ महालक्ष्मींमहाकालींतथामहासरस्व
तीं॥ ईश्वरींसर्वभूतानांसर्वकारणकारणं॥४२॥ सर्वकामार्थदांशांतांसुखसे
व्यांदयान्वितां॥ नामोच्चारणमात्रेणवांछितार्थप्रदांशिवां॥४३॥ देवैराराधितां
पूर्वंब्रह्मविष्णुमहेश्वरैः॥ मोक्षकामैश्चमुनिभिस्तापसैर्विजितात्मभिः॥४४॥ अ

स्पष्टमपियन्नामप्रसंगेनापिभाषितं॥ ददातिवांछितानर्थान्दुर्लभानपिसर्वथा
४५॥ ऐऐनयाब्रुवांस्तेनदृष्ट्वाव्याघ्रादिकंवने॥ बिंदुहीनमपीसुक्तंवांछितंप्रददाति
वै॥४६॥ तत्रसत्यव्रतस्यैवदृष्टांतंनृपसत्तम॥ प्रत्यक्षमेवचास्माकंमुनीनांभावितात्म
नां॥४७॥ ब्राह्मणानांसमाजेषुतस्योदाहरणंबुधैः॥ कथ्यमानंमयाराजन्श्रुतंसर्व
सविस्तरं॥४८॥ अनक्षरोमहामूर्खोनाम्नासत्यव्रतोद्विजः॥ श्रुत्वाक्षरंकोलमु
खात्समुच्चार्यस्वयंततः॥४९॥ बिंदुहीनप्रसंगेनजातोसौविबुधोत्तमः॥ ऐकारोच्चा
रणाद्देवीतुष्टाभगवतीतदा॥५०॥ चकारकविराजानंदयार्द्रापरमेश्वरी॥ त्रैलोक्ये
विश्रुतस्त्वासीत्कविःसत्यव्रतोद्विजः॥५१॥ अनाराध्यमहाकालींशुष्काऽस्मामहे
श्वरी॥ अतस्त्वांनृपशार्दूलप्रब्रवीमिपुनःपुनः॥५२॥ यज्ञंकुरुमहाराजविधिनेक

थयाम्यहं ॥५३॥ ॥इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेनवमोऽध्यायः॥९॥जन
मेजयउ॰॥ ॥कोसौसत्यव्रतोनामब्राह्मणोद्विजसत्तमः॥कस्मिन्देशेसमुत्पन्नःकी
दृशश्चवदस्वमे॥कथंतेनश्रुतःशब्दःकथमुच्चरितःपुनः॥सिद्धिश्चकीदृशीजाताता
स्यमूर्खस्यतत्क्षणात्॥२॥कथंतुष्टाभवानीसासर्वज्ञासर्वसंस्थिता॥विस्तरेण
वदस्वाद्यकथामेतामनोरमां॥३॥सूतउ॰॥ ॥इतिपृष्टस्तदाराज्ञाव्यासःसत्यवती
सुतः॥उवाचपरमोदारंवचनंरसवच्छुचिः॥४॥ ॥व्यासउवाच॥ ॥शृणुराजन्प्रव
क्ष्यामिकथांपौराणिकींशुभां॥श्रुतांमुनिसमाजेषुमयापूर्वंकुरूद्वह॥५॥एकदा
हंकुरुश्रेष्ठकुर्वन्तीर्थाटनंशुचिः॥संप्राप्तोनैमिषारण्यंपावनंमुनिसेवितं॥६॥प्र
णम्याहंमुनीन्सर्वान्स्थितस्तत्रवराश्रमे॥विधिपुत्रास्तुयात्रासन्जीवन्मुक्तामहा

व्रताः॥७॥कथाप्रसंगएवासीत्तत्रविप्रसमागमे॥जमदग्निस्तुपप्रच्छमुनीनेवं
समास्थितः॥८॥जमदग्निरुवाच॥ ॥संदेहोस्तिमहाभागममचित्तेतिमानुषा
ःसमाजेत्रमुनीनांवैनिःसंदेहोभवाम्यहं॥९॥ब्रह्माविष्णुश्चरुद्रश्चयमोवावरु
णोनलः॥कुबेरःपवनस्त्वष्टासेनानीश्चगणाधिपः॥१०॥सूर्योश्विनौभगःपूषा
निशानाथोग्रहास्तथा॥आराधनीयतमःकोत्रवांछितार्थफलप्रदः॥११॥सुख
सेव्यश्चसततमाशुतोषश्चमानदः॥ब्रुवंतुमुनयःशीघ्रंसर्वज्ञाःसंशितव्रताः॥१२॥
एवंपृष्टेकृतेतत्रलोमशःप्रब्रवीत्तदा॥शृणुसत्यवतीसूनोयत्पृष्टंवैत्वयाधुना॥
१३॥सेवनीयतमाशक्तिःसर्वेषांशुभमिच्छतां॥पराप्रकृतिराद्याचसर्वगासर्व
दाशिवा॥१४॥देवानांजननीसैवब्रह्मादीनांमहात्मनां॥आदिप्रकृतिमूलं

ना॰त॰ सा संसारपारयत्र्यर्णवे ॥१५॥ स्मृता चोच्चारिता देवी ददाति किं च वांछितं ॥ सर्वदेवा
दीजिह्वा सा वरदा नायसेव्यता ॥१६॥ इतिहासं प्रवक्ष्यामि श्रेष्ठ एवं तु मुनयः श्रुतं ॥ स्व
३५ रोच्चारणाद्देव यथा प्राप्तं द्विजेन वै ॥१७॥ कोशलेषु द्विजः कश्चिद्देवदत्तेति वि
श्रुतः ॥ अनपत्यश्चकारेष्टिं पुत्रीयां विश्रुतः ॥ अनपत्यश्चकारेष्टिं पुत्रीयां विधि
पूर्वकं ॥१८॥ तमसातीरमासाद्य कृत्वा मंडपमुत्तमं ॥ द्विजानाकार्य तद्ज्ञान् सूत्र
कर्मविशारदान् ॥१९॥ कृत्वा वेदीं विधानेन स्थापयित्वा विभावसूनू ॥ पुत्रेष्टिविधि
वत्तत्र चकार द्विजसत्तम ॥२०॥ ब्रह्माणं कल्पयामास सुहोत्रं विमुनिसत्तमं ॥ अध्वर्यं
याज्ञवल्क्यं च होतारं च बृहस्पतिः ॥२१॥ प्रस्तोतारं तथा कांएवं उद्गातारं च गोभिलं ॥ र
थंतरमगायन स्वरितेन समन्वितं ॥२२॥ सभ्यान्नत्वा मुनीन् कृत्वा विधिवद्वरदे वत्

उद्गाता सामगः श्रेष्ठः सप्तस्वरसमन्वितं ॥ रथंतरमगायनं स्वरितेन समन्वितं ॥२३॥
तदास्य स्वरभंगोऽभूच्छ्वासे कृते मुहुर्मुहुः ॥ देवदत्तश्चुकोपाथ गोभिलं प्रत्युवाच ह ॥
२४॥ मूर्खोसि मुनिमुख्याद्य स्वरभंगस्त्वया कृतः ॥ काम्यकर्मणि पुत्रार्थं पुत्रार्थयज
तश्च मे ॥२५॥ गोभिलस्तु तदोवाच देवदत्तं सुकोपितः ॥ मूर्खस्ते भविता पुत्रः श
ब्दविवर्जितः ॥२६॥ नवमे शरीरं तु श्वासोच्छ्वासस्तु दुर्ग्रहः ॥ नात्र मे दूषणं किं
चित्स्वरभंगे महामते ॥२७॥ तच्छ्रुत्वा वचनं तस्य गोभिलस्य महात्मनः शापाद्भी
तो देवदत्तस्तमुवाचाथ दुःखितः ॥२८॥ कथं क्रुध्यसि विप्रेंद्र कथं शप्तस्त्वयाप्यहं ॥
अपुत्रोहं सुतप्तस्तु पुनः शापयुतः कृतः ॥२९॥ स्वल्पेपराधे विप्रेंद्र वृथा मयि नि
रागसि ॥ अक्रोधता हि मुनयो भवंति सुखदाः सदा ॥३०॥ मूर्खपुत्राद पुत्रत्व वरं

वेदविदोविदुः॥ तथापिब्राह्मणोमूर्खःसर्वेषांनिंद्य एवहि॥३२॥ पशुवच्छूद्रवच्चैव
नयोग्यःसर्वकर्मसु॥ किंकरोमिहिपुत्रेणमूर्खेणद्विजसत्तम॥३३॥ यथाशूद्र
स्तथामूर्खब्राह्मणोवेदवर्जितः॥ राज्ञाशूद्रसमोज्ञेयोनियोज्यसर्वकर्मसु॥३४
कर्षकस्तुद्विजःकार्योब्राह्मणोवेदवर्जितः॥ राज्ञाशूद्रसमुक्तेयोनियोज्यःसर्वक
र्मसु॥३४॥ कर्षकिस्तुद्विजेःकार्योब्राह्मणोवेदवर्जितः॥ करदःशूद्रवच्चैवमतश्च
सचतुर्नुजः॥३५॥ नासनंपितृकार्येषुदेवकार्येषुब्राह्मणः॥ मूर्खसमुपवेश्यैवका
र्यस्यफलमिच्छता॥३६॥ विनाविप्रेणकर्तव्यंश्राधंकुशाचटेनवै॥ नतुमूर्खेणवि
प्रेणश्राधंकार्यंकदाचन॥३७॥ आहारादधिकंचान्यनदातव्यमपंडिते॥ दाता
नर्कमवाप्नोतिगृहीतानुविशेषतः॥३८॥ धिक्राज्यंतस्यराज्ञोवैयस्यदेशेबुधाज

मु

नाः॥ पूज्यंतेब्राह्मणामूर्खाहीनमानादिकैरपि॥३९॥ मूर्खस्यचविप्रस्ययस्यान्नमुदरे
गतं॥ पच्यंतेनरकेघोरेसर्वेवितस्यपूर्वजाः॥४०॥ आसनेपूजनेदानेयस्यभेदोनचाप्य
पि॥ मुर्खपंडितयोर्देशोसत्याज्योविबुधेनवा॥४१॥ मुर्खायत्रसुगर्विष्टादानमानपरिग्र
हैः॥ तस्मिन्देशेनवास्तव्यंपंडितेनकथंचन॥४२॥ असतामुपकारायदुर्जनानांवि
भूतयः पिचुमंदःफलाढ्योपिकाकैरेवोपभुज्यते॥४३॥ उक्त्वात्वंवेदविद्विप्रोवेदाभ्या
संकरोतिवै॥ पूर्वजास्तस्यक्रीडंतिस्वर्गेःप्रमुदिताकिल॥४४॥ गोभिलातःकिमुक्तं
वैत्वयावेदविदुत्तम॥ संसारेमूर्खपुत्रत्वंमरणादपिगर्हितं॥४५॥ कृपांकुरुमहाभा
गत्रणपस्यानुनुग्रहंप्रति॥ दीनोधरणशाक्नोस्मिपतामितवपादयोः॥४६॥ ॥लोम
शउवाच॥ ॥इत्युक्त्वाद्विजस्तुपतितस्तस्यपादयोः॥ सुबन्दीनमनासमर्थकृपणः

मा॰त॰ साश्रुलोचनः॥४७॥गोत्तिलस्यद्वयोस्तत्रादृष्ट्वातंदीनचेतसं॥सएणंकोपान्मझं
तोवैयापिष्टः कल्पकोपना॥४८॥जलंस्वन्नावतः शीतपावकातपयोगतः॥उष्णं
३१ नवतितद्वीर्यंविधुक्तं शिशिरंनवेत्॥४९॥ दयावान्गोत्तिलस्तत्राहदेवदत्तंसुदुः
खितः॥मूर्खोपितावसुतस्तेवैविद्वानपिभविष्यति॥५०॥इतिदत्तवरः सोथमुदितो
नृपतिर्न्नषत्तिः॥इष्टिंसमाप्यविप्रान्वैविससर्जयथाविधि ५१ कालेनकियता
तस्यभार्यारूपवतीसती॥गर्भंदधारकालेसारोहिणीरोहिणीसमा॥५२॥गर्भा
धानादिकंकर्मचकारविधिवद्द्विजः॥पुंसवनंविधानेनशुंगाकरकंतथा॥५३॥सी
मंतोन्नयनंचैवकृत्वावेदविधानतः॥दृष्टेशानानिमुदितामत्वेष्टिसफलंनरः ५४
शुभेह्निसुषुवेपुत्रंरोहिणीरोहिणीसुते॥दिनेक्षनेशुभेत्सर्थंजातकर्मचकारसः

५५॥चंद्रदर्शनिकंकृत्वात्कृत्वानामचकारसः॥उतथ्यइतिपुत्रस्यकृतंनामपुरा
विदा॥५६॥सचाष्टमेतथावर्षेशुभेनेशुभवासरे॥तस्योपनयनंकार्यंचकार
विधिवत्पिता॥५७॥वेदमध्यापयामासगुरुस्तंवैव्रतेस्थितं॥नोच्चचारतथोत
थ्यः संस्थितोमुग्धवत्तदा॥५८॥बहुधाप्यापितःपित्रानदधारमतिंशठः॥मू
ढवत्तिष्ठतेतस्यर्थंशुशोचचपितातदा॥५९॥एवंकुर्वन्सदातस्यासंजातोद्वाद
शवार्षिकः॥नविवेदद्विजः कर्तुंसंध्यावंदनकोविधिः॥६०॥मूर्खोमूर्खइतिलोके
शुगतावार्तातिविस्तरं॥ब्राह्मणेषुचसर्वेषुतापसेष्वितरेषुचा॥६१॥जडःसलो
केस्तत्रविप्रयत्रतत्रगतंवने॥पितामातानिनिंद्राथमूर्खेतिव्रतिनस्पयिन॥६२
निंदतोयजनैःकामपिभ्रस्यामथबांधवै॥वैराग्यमगमद्विप्रोजगामवेन

भा.तृ. मण्यसौ ॥६३॥ अंधोवरस्तथा पंगुर्न मूर्खस्तु बुधैः सुतः ॥ इत्युक्तोसौ पितृन्मां वै विवेश
३८ कातनजं प्रति ॥६४॥ गंगातीरेस्थितेस्थाने कृत्वा जसमनुत्तमं ॥ वन्यांवृत्तिंचसं
कल्प्यस्थितस्तत्र समाहितः ॥६५॥ नियमंच परं कृत्वा नासत्यं प्रब्रवीम्यहं ॥ स्थित
स्तत्राश्रमेरण्ये ब्रह्मचर्यव्रतो हि सः ॥६६॥ ॥इति श्रीभागवते महापुराणे तृती
यस्कंधे दशमोध्याय ॥१०॥ ॥जोमदाउ॥ ॥न वेदाध्ययनं किंचिज्जानाति निजप
स्तथा ॥ ध्यानं न देवतानां च न चैवाराधनं तथा ॥१॥ नासनं वेद विप्रोसौ प्राणा
यामं तथा पुनः ॥ प्रत्याहारं तु नो वेद भूतशुद्धिं च धारणं ॥२॥ न मंत्रकीलकं जाप्यं
गायत्रीं न विवेद सः ॥ शौचस्नानविधिं चैव तथा मनकं पुनः ॥३॥ प्राणाग्निहोत्रं नो
वेद बलिहरनं न चातिथि ॥ संध्यासमिधहोमश्च न विवेद तथा मुनिः ॥४॥ सोकरो

स्यातरुत्या पयत्किंचिद्दंतधावनं ॥ स्नानं च मूर्खवत्तत्र गंगायां मंत्रवर्जितं ॥५॥
फलमाहारयवन्यानि मध्याह्नेतियदृच्छया ॥ न ज्ञानं स्वपरिज्ञानं नग्नानातिरा
मस्तथा ॥६॥ सत्यं ब्रूते स्थितस्तत्र नानृतं वदते पुनः ॥७॥ जनैः सत्यतपानामकृतं
तस्यद्विजस्य वै ॥७॥ नाहितं कस्यचित्कुर्यान्न तथापि हितं कचित् ॥ सुखं स्वपति
तत्रैव नित्यं चिंतयन्निति ॥८॥ कदा मे मरणं भावि दुःखं जीवामि कानने ॥
जीवितं धिक्सुमुखस्य तरसा मरणं वरं ॥९॥ दैवेनाहं कृतो मूर्खो नान्योत्रका
रणमया ॥ प्राप्य चैवोत्तमं जन्म वृथा जातं ममाधुना ॥१०॥ यथा वंध्या सुरूपा
च यथा वा निष्फलो द्रुमः ॥ अदुग्धदोहा धेनुश्च तथाहं निःफलः कृतः ॥११॥ किं
विनिंद्यहं दैवं नूनं कर्म ममेदृशं ॥ नहत्तं पुस्तकं तत्वा ब्राह्मणाय महात्मने

१२॥ नवै विद्या मया दत्ता पूर्वजन्मनि निर्मला॥ तेनाहं कर्मयोगेन शागे स्थितवद्वि
जाधमः॥१३॥ नच तीर्थं तपस्तप्तं सेवितो नच माधवः॥ द्विजा नासत्कृता नाहं जा
तोस्मिन् जनने किल॥१४॥ वर्त्तंति मुनिपुत्राश्च वेदशास्त्रार्थपारगाः॥ अहं तु मू
र्खः संजातो दैवयोगेन केनचित्॥१५॥ नजानामि तपस्तप्तुं किं करोमि सुसाधनं
मिथ्यायं मंत्रसंकल्पो न मे भाग्यस्तु नं किंज॥१६॥ दैवमेव परं मन्ये धिक्पौरुषमन
र्थकं॥ कदर्थाश्रमकृतं कार्यं दैवाद्भवति सर्वथा॥१७॥ ब्रह्माविष्णुश्च रुद्रश्च शक्रा
द्याः किल देवताः॥ कालस्य वशगाः सर्वे कालो हि दुरतिक्रमः॥१८॥ एवं विचार्य वि
तर्कास्तु कवर्णोऽहर्निशं द्विजः॥ स्थितस्तत्राश्रमे तीरे जाह्नव्याः पावनेस्थले॥१९
विरक्तः संतु संजातः स्थितस्तत्राश्रमे द्विजः॥ कालातिवाहनं शांतश्चकार विजने

वने॥२०॥ एवं स्थितः स तु वने विमलोदके॥ वैवर्षाणि तत्र नवपंच गतानि काम॥
नाराधनं च जपनं च न वेद मंत्र कालातिवाहनमसौ कृतवान् वने वै॥२१॥ जाना
ति तस्य विततं व्रतमेव लोकः सत्यं वदत्ययमुनिः किल नाम जातं जातेति कीर्त्ति
सकलेषु जनेषु कामं सत्यव्रतोयमनिशं न मृषाभिलाषी २२ तत्रैकदाति
मृगयां रममाण एव प्राप्तो निषादनिरागे धृतचापबाणः॥ क्रीडन्वने ति
विपुले यमतुल्यदेहः क्रूरातिहननकर्मणि चातिदक्षः॥२३॥ तेनातिकष्टेन
शरेण विधः कोलः किरातेन धनुर्धरेण॥ पलायमानोऽन्ययौ तस्य मुनेः समी
पं विह्वलो जगाम॥२४॥ विकंपयमानो रुधिरार्द्रदेहो यदा जगामाश्रममंडलं
वै॥ कोलस्तदातीव दयार्द्रभावं प्राप्तो मुनिस्तं प्रसमीक्ष्य दीनं॥२५॥ अथ व्रजंतरु

ना.त.
४०

धिराद्दिदं दृष्ट्वा मुनिः शूकरमाशुविद्धं॥ दयाभिवेशाद्ध्रतिकंपमानः सारस्वतं वी
जमथोच्चचार॥२६॥ अज्ञातपूर्वं च तथाश्रुतं च स्वैवास्यसुखे वै समुपागतं च॥ न
ज्ञातवान्बीजमसौ विमूढो मम क्रोशो के समुनिर्महात्मा॥२७॥ कोलः प्रविश्याश्र
ममंडलं तत्स्थितो निकुंजे प्रविलीय गूढे॥ अथाततमार्गोहि वनिर्विवेपमानः शा
रपीडितत्वात्॥२८॥ ततः क्षणाद्व्याकरणां तकष्टं चापं दधानोतिकराजदेहः॥
प्राग्रस्तदंते परिमृग्यमाणो निषादराजः किल काल एव॥२९॥ दृष्ट्वा मुनिं तत्रस्थि
तं महांतं सत्यव्रतं नाम प्रसिद्धमेव प्रणम्य व्याधः प्रमुखे स्थितो सोपप्रच्छ कोलः
क गतो द्विजेश॥३०॥ जानामि ते हं सुव्रतं प्रसिद्धं तेनाद्य पृच्छे मम बाणविद्धः॥ क्षु
धार्दितं मे सकलं कुटुंबं बिभर्तुकामः किल चागतोस्मि॥३१॥ वृत्तिर्ममैषा विहि

ता विधात्रा नान्यास्ति विप्रेंद्र सत्यं ब्रवीमि॥ नित्यंममैवेह कुटुंबमंजसा केनाप्युपाये
नशुनास्मिन्नेन॥३२॥ सत्यं वदस्वाद्य सत्यव्रतोसि क्षुधातुरं वीक्ष्य मम पोष्यवर्गं॥ क्वासौ
गतः शूकरबाणविद्धः पृच्छाम्यहं वाडव ब्रूहि तूर्णं॥३३॥ तनेति पृष्टः स मुनिर्महात्मा
वितर्कमग्नः प्रबभूव कामं ब्रवीमि किं मेद्य व्रतं विनष्टं न दृष्टं सुचरितेन किं वै॥३४॥
गतोत्र कोलः शरविद्धदेहः कथं ब्रवीम्यद्य मृषामृषा वा॥ क्षुधार्दितोयं परिपृच्छते त्वद्
ह्याह निष्पलं शूकरं वै॥३५॥ सत्यं न सत्यं खलु यत्र हिंसा दयान्वितं चानृतमेव सत्यं
हितं नराणां भवतीह येन तदेव सत्यं हि तथान्यथैव॥३६॥ निहतं कथं चाद्य दयो
रपि स्यात्तदुत्तरं किं न यथामृषावचः॥ विचारयन्वाडवधर्मसंकटे न प्राप्य वक्तुं वच
नं यदा सौ॥३७॥ बाणाहतं वीक्ष्य दयान्वितेन कोलं तदंते समुपागतं च यत्॥ तेन

प्रसन्नातिबीजेनदेवीविद्यांकुरापांप्रददौचतस्मै ॥३८॥ बीजोच्चारणमात्रेणविद्याप्र
ना.त. स्फुरिताखिला ॥ वाल्मिकिश्चयथापूर्वंतथासोत्यन्नवत्कविः ॥३९॥ तमुवाचद्विजो
४९ व्याधंसन्मुखस्थंधनुर्द्धरं। सत्यकामस्तुधर्मात्माश्लोकमेकंदयापरः ॥४०॥ यापश्य
तिनसाब्रूतेयाब्रूतेसानपश्यति ॥ अहोव्याधस्वकार्यार्थी किंपृच्छसिपुनःपुनः ॥४१
॥ उक्तस्तुतदातेनगतोसौपश्चगृहापुनः ॥ निराशःस्वकरेतस्मिन्नत्याहृत्सनि
जालये ॥४२॥ आलस्यस्तुकविर्जातःप्राचेतसःश्वापरः ॥ प्रसिद्धःसर्वलोकेषु
नाम्नासत्यतपाद्विजः ॥४३॥ सारस्वतंततोबीजंजजापविधिपूर्वकं ॥ पंडितंश्चा
तिविख्यातोद्विजोसोधरणीतले ॥४४॥ प्रतिपर्वस्तुगायंतिब्राह्मणायद्यशःस
दा ॥ आख्यानंचातिविख्यातंएवंस्तुवंतिमुनयः किल ॥४५॥ तच्छुत्वासजनंत

स्यसमागम्यतदाश्रमे ॥ येनत्यक्तःपुरातेनगृहंनीतोतिमानतः ॥४६॥ तस्माद्य
जन्सदासेव्यापूजनीयाचभक्तितः ॥ आदिशक्तिःपरादेवीजगतांहितसाध
ना ॥४७॥ तस्यायज्ञंमहाराजकुरुवैदविधानतः ॥ सर्वकामप्रवदंनिसंस्तुनिमि
ःकथितंपुरा ॥४८॥ स्मृतासंपूजिताभक्त्याध्याताचोद्धरीतास्तुता ॥ ददाति
वांछितानर्थान्कामदातेनकाम्यते ॥४९॥ अनुमन्यभिदंराजन्कर्त्तव्यंस
र्वथाबुधैः ॥ दृष्ट्वारोगयुतान्दीनान्क्षुधितान्निर्धनान्नृणान् ॥५०॥ जना
नार्त्तांस्तथामूर्खान्पीडितान्वैरिभिःसदा ॥ दासानाज्ञाकरान्क्षुद्रान्विक
लाविकलानथ ॥५१॥ अक्षमान्भोजनेभोगेसदाचानिर्जितेंद्रियान् ॥ तृष्णा
धिकान्दराक्रांश्चसदाधिपरिपीडितान् ॥५२॥ तथाविनवसंपन्नान्पुत्रपो

त्रसमन्वितान्॥ पट्टदेहान्सदाभोगैःसंयुतान्वेदवादितान्॥५३॥ राजलक्ष्मीयुता
न्शूरान्वशीकृतजनानथ॥ स्वजनैरवियुक्तांश्च सर्वलक्षणलक्षितान्॥५४॥ व्य
तिरेकात्तथान्यांश्च चिंतितव्यं विचक्षणैः॥ एभिर्नपूजितादेवी सर्वार्थफलदा शिवा॥
५५॥ समाराधिता च तथा पुंभिरेभिः सदांबिका॥ यतो भीसुखिनः सर्वे संसारेस्मि
न्नसंशयं॥५६॥ ॥व्यास उवाच॥ ॥इति राजन्श्रुतं तत्र मया मुनिसमागमे॥
लोमशास्यमुखात्कामं देवीमाहात्म्यमुत्तमं॥ इति संचिंत्य राजेंद्र कर्त्तव्यं च सदार्च
नं॥ भक्त्या परमया देव्याः प्रीत्या च पुरुषर्षभ॥५७॥ ॥इति श्रीभागवते महापुराणे
तृतीयस्कंधे देवीमाहात्म्ये एकादशोध्यायः॥११॥ ॥जनमेजय उ०॥ ॥तद्यज्ञविधिं
सम्यक्देव्यास्तस्याः समंततः॥ कथाकरोम्यहं स्वामिन्यथाशक्तिरतंद्रितः॥१॥

पूजाविधिं च मंत्रांश्च होमश्च द्रव्यमसंशयं॥ ब्राह्मणाः कति संख्याश्च दक्षिणाश्च त
थापुनः॥२॥ व्यास उवाच॥ ॥शृणु राजन्प्रवक्ष्यामि देव्या यज्ञं विधानतः॥ त्रिवि
धं तु सदा ज्ञेयं विधिदृष्टेन कर्मणा॥३॥ सात्विकं राजसं चैव तामसं च तथापरं॥ मु
नीनं सात्विकं शाक्तं नृपाणां राजसं स्मृतं॥४॥ तामसं राक्षसानां वै ज्ञानीनां च गु
णोज्झितं॥ विमुक्तानां ज्ञानमयं विस्तरात्प्रब्रवीमि ते॥५॥ देशः कालस्तथा द्रव्यं मं
त्राश्च ब्राह्मणास्तथा॥ श्रद्धा च सात्वकी यत्र तं यज्ञं सात्विकं विदुः॥६॥ द्रव्यशुद्धिः क्रि
याशुद्धिर्मंत्रशुद्धिश्च भूमिप॥ न वेद्यातितदा पूर्णं नवति नान्यथा विदुः॥७॥ अ
न्यायोपार्जितेनैव द्रव्येण सुकृतं कृतं॥ न कीर्तिरिहलोके च परलोके च तत्फलं॥८॥
तस्मान्न्यायार्जितेनैव कर्त्तव्यं सुकृतं सदा॥ यशसे परलोकाय भवत्येव सुखाय च॥

ना.त. ९॥ तस्मात्प्रत्यक्षं तव राजेन्द्र पांडवैस्तु मखः कृतः॥ राजसूयः क्रतुवरः समाप्तवरदक्षि
णः॥१०॥ यत्र प्रेरयिता कृष्णो यादवेंद्रो महामनाः॥ ब्राह्मणाः पूर्णविद्याश्च नारदा
४३ दयस्तथा॥११॥ कृतो यज्ञस्तु संपूर्णं मासमात्रेण पांडवैः॥ प्राप्तं महत्तरं कष्टं वनवासश्च
दारुणः॥१२॥ पीडनं चैव पांचाल्यास्तथा द्यूते पराजयः॥ वनवासे महत्कष्टं क्वगतं म
खपंकजं॥१३॥ दासत्वं च विराटस्य कृतं सर्वैर्महात्मभिः॥ कीचकेन परिक्लिष्टा द्रौप
दी च प्रमद्वरा॥१४॥ आशीर्वादा द्विजातीनां क्वगताः शुद्धचेतसां॥ भक्तिर्वा वासुदे
वस्य क्वगता तत्र संकटे॥१५॥ न रक्षिता तदा बाला केनापि द्रुपदात्मजा॥ प्राप्ता
केशग्रहं काले साध्वी वरवर्णिनी॥१६॥ किमत्र चिंतनीयं वै धर्मवैगुण्यकारणं
केशा वसति देवेशो धर्मपुत्रे युधिष्ठिरे॥१७॥ भवितव्यमिति प्रोक्ते निःफलं स्यात्तदा

गमं॥ वेदमंत्राश्चस्तथा मेवेति तथा॥ सुरमांधतं॥१८॥ साधनं निःफलं सर्वमुपायश्च
निरर्थक॥ भवितव्यं नदत्येव वचनं प्रतिपादिते॥१९॥ आगमोप्यर्थवादः स्यात्क्रि
यासर्वा निरर्थकाः॥ स्वर्गार्थं च तपो व्यर्थं व्रणधर्मश्चैव तथा॥२०॥ शास्त्रप्रमाणं
व्यर्थं स्याद्भवितव्येद्दीरते॥ उभयं चापि मंतव्यं दैवं चोपायमेव च॥२१॥ भवेत्कर्म
णि चेत्क्वचिद्विपरीतायय दान्नवेत्॥ वैगुण्यं कल्पयं चैव तत्र प्राज्ञैर्विचिंत्य वै॥२२
तत्तु बहुविधं प्रोक्तं विद्वद्भिः कर्मकारिभिः॥ कर्तृभेदान्मंत्रभेदाद्द्रव्यभेदात्तथा
पुनः॥२३॥ यथा मघवता पूर्वं विश्वरूपहतो गुरुः॥ विपरीतं कृतं तेन कर्म मात
सुखाय वै॥२४॥ देवेभ्यो दानवेभ्यस्तु स्वस्त्युक्ता पुनःपुनः॥ असुरा मातृपक्षीया
भवंतेषां च रक्षणं॥२५॥ दैत्यान्दृष्ट्वाति संपुष्टान्चुकोप मघवा तदा॥ शिरांसि

 तस्यवज्रेणचिच्छेदतरसाहरिः॥२६॥क्रियावैगुण्यमत्रैवकर्तृनेशाद्संशयं॥नोदे
त्संचालराजावैवैरेणपित्रताक्रिया॥२७॥नारवाजविनाशायपुत्रस्योसादना
 यत्र॥धृष्टद्युम्नःसमुत्पन्नोवेदीमध्याच्चद्रौपदी॥२८॥पुराहत्रारथेनापित्रतापुत्रेष्टि
स्तुमुत्ता॥अमुत्रेणसुतातस्यचत्वारःसमपद्यत॥२९॥अतःक्रियाकृतायुक्ता
सिद्धिदासर्वथानवेत॥अयुक्ताविपरीतास्यासर्वथान्यपसत्तमः॥३०॥पांड
वानांयथायज्ञेकिंचिद्वैगुण्ययोगतः॥विपरीतंफलंप्राप्तंनिर्जितास्तेदुरोदरे
३१॥सत्यवादीसदाराजाधर्मपुत्रोयुधिष्ठिरः॥द्रौपदीचतथासाध्वीतथास्ते
प्यनुजाःशुभा॥३२॥कुद्रव्ययोगाद्वैगुण्यंसमुत्पन्नंमखेयवा॥सानिमा
तत्वताह्यापिदूषणांसमुपस्थितं॥३३॥सात्विकस्तुमहाराजदुर्जनोवैमखः

स्मृतः॥वैखानसानांमुनीनांविहितोसोमहामखः॥३४॥सात्विकंनोजनंचैव
नित्यंकुर्वंतितापसा॥न्यायार्जितंचवस्त्रंचतथाद्रव्यंसुसंस्कृतं॥३५॥पुरोडा
शपरानित्यंवियूपामंत्रपूर्वकाः॥श्रद्धाधिकामखाराजन्सात्विकाःपरमान्न
ताः॥३६॥राजसाद्रव्यबहुलाःसयूपाश्चसुसंस्कृताः॥क्षत्रियाणांविशांचैव
सानिमानाश्चैवमखाः॥३७॥तामसादानवानांवैसक्रोधामदवर्द्धिकाः॥साम
र्षःसस्पृहाःक्रूरामखाःप्रोक्तामहात्मभिः॥मुनीनांमोक्षकामानांविरक्तानां
महात्मनां॥मानसस्तुमतोयोगःसर्वसाधनसंयुतः॥३९॥अन्येषुसर्वयज्ञे
षुकिंचिन्न्यूनंभवेदपि॥द्रव्येणश्रद्धयावापिक्रिययाब्राह्मणैस्तथा॥४०॥दे
शकालपृथक्द्रव्यसाधनैःसकलैस्तथा॥नान्येनवंतिपूर्णावैयथानवतिमा

ना॰ तृ॰ नसः॥४१॥ प्रथमं तु मनः शोध्यं कर्त्तव्यं गुणवर्जितं॥ शुद्धे मनसि देहो वै शुद्ध एव न संश
यः॥४२॥ प्रथमं तु मनः शोध्यं कर्त्तव्यं गुरुणा च इंद्रियार्थपतिसक्तं यथा जातं मनः शु
चि॥ तदा तस्य मखस्यासौ अग्नवेदाधिकारवान्॥४३॥ तदासौ मंडपं कृत्वा वक्र
४५ योजनविस्तरं स्तंभैश्च विपुलैः स्नन्दोणैः यज्ञीयद्रुमसंभवैः॥४४॥ वेदीं च विशदां तत्र
मनसा परिकल्प्य च॥ अग्न्यधोपि तथा स्थाप्या विधिवन्मनसा किल॥४५॥ ब्राह्म
णानां च वरणं तथैव प्रतिपाद्य च॥ ब्रह्माध्वर्युस्तथा होता प्रस्तोता विधिपूर्वकः॥
४६॥ उद्गाता प्रतिहर्त्ता च मनसा स्थाप्ये यथाविधि॥ ऋत्विजो याः प्रयत्नेन मनसैव द्वि
जोत्तमाः॥४७॥ प्राणोपानस्तथा व्यानः समोदानौ न एव च॥ पावकाः पंच एवैते स्था
प्या वेद्यां विधानतः॥४८॥ गार्हपत्यस्तदा प्राणोपानो त्वाहवनीयकः॥ दक्षिणाग्नि

स्तथा व्यानः समानश्चावसथ्यकः॥४९॥ सभ्योदानः स्मृता ह्येते पावकाः परमो
त्कटाः॥ इष्टश्च मनसा त्मा च निर्गुणः परमः शुचिः॥५०॥ मन एव तदा होता यजमानस्त
थैव तु॥ यज्ञाधिदेवता ब्रह्म निर्गुणं यत्सनातनं॥५१॥ फलदा निर्गुणा शक्तिः सदा नि
र्वेददा शिवा। ब्रह्मविद्याखिलाधारा व्याप्य सर्वत्र संस्थिता॥५२॥ राजन्नेवं कृतो य
ज्ञो मोक्षदो नात्र संशयः॥ अन्ये यज्ञाः सकामास्तु भवन्ति त्वयोन्मुखाः॥५३॥ अग्नि
ष्टोमेन विधिवत्स्वर्गकामो यजेदिति॥ वेदानुशासनं चैतत्प्रवदंति मनीषिणः॥५४
क्षीणे पुण्ये मर्त्यलोके विशंति च यथामति॥ तस्मात्तु मानसः श्रेष्ठो यज्ञो पवर्गद एव
सः॥५५॥ न राज्ञा साधितुं योग्यो मखो सौ नृपसत्तम॥ तामसस्त्वततः पूर्वं सर्पयज्ञ
स्त्वया धुना॥५६॥ वैरं निर्वाहितं राजन्तक्षकस्य दुरात्मनः॥ तत्कृते निहताः सर्पास्त्व

ना॰त॰ याम्नोकोटिशः परे ॥५७॥ देवीयज्ञंकुरुष्वाद्य विततं विधिपूर्वकं ॥ विष्णुना यः कृतः
पूर्वंमृष्टाहोनृपसत्तमः ॥५८॥ तथानंकुरुराजेंद्र विधिं तेप्रब्रवीम्यहं ॥ ब्राह्मणाः
४६ संतिराजेंद्र विधिज्ञा वेदवित्तमाः ॥५९॥ देवीबीजविधानज्ञा मंत्रमार्गविचक्ष
णाः ॥ याजकास्तेत्र विष्यंतियजमानस्त्वमेव हि ॥६०॥ तेतायज्ञंविधानेनदत्वापु
ण्यं मखार्जितं ॥ समुद्धरमहाराज पितरं दुर्गतिंगतं ॥६१॥ विप्रावमानजं पापं द
घटंनकृतसाधनं ॥ तथैवशापजो दोषः प्राप्तः पित्रा तवा ॥६२॥ तथाउमरिएंप्राप्त
सर्पदृष्टेनतुनुजा ॥ अंतरालेतराले तथा मृत्युर्नभूमौकुशंस्तरे ॥६३॥ नसंग्रा
मेनगंगायास्नानदानादिवर्जितं ॥ मरणंतेपितुस्तत्रसोधेजातंकुरुद्वह ॥६४ ४६
करणानिचसर्वाणिनरकस्यनृपोत्तम ॥ तत्रैककारणं तस्यनजातंचोतिदु

र्लभं ॥६५॥ यत्रयत्रस्थितः प्राणीजातलाकालंसमागतं ॥ साधनामनावेपिह्यव
हश्चातिसंकटे ॥६६॥ यदानिर्वेदमायातिमनसानिर्मलेनवै ॥ पंचभूतात्मकोदे
होममकिंचात्रदुःखदं ॥ तपलब्धयथाकामंमुक्तोहंनिर्गुणोव्ययः ॥ नाशात्मका
नितत्वानितत्रकापरिवेदना ॥६८॥ ब्रह्मैवाहंनसंसारीमहामुक्तः सनातनः ॥ देहे
नममसंबंधः कर्मणाप्रतिघातिनः ॥६९॥ तानिसर्वाणितुक्तानिष्टुतानिचेत
राणिचे ॥ मनुष्यदेहयोगेनसुखदुःखानुसाधनात् ॥७०॥ विमुक्तोतिनयाघोर
दस्मात्संसारसंकटात् ॥ इत्येवंचिंसमानस्तुस्नानदानविवर्जितः ॥७१॥ मरणंचे
दवाप्नोतिसमुत्पेज्जन्मदुःखदः ॥ एषाकाष्ठापराश्रेष्ठाक्रायामिनामपिमोहिनी ॥७
पितातेनपराहल्लिस्कलाराणपंडिजरितः ॥ देहममत्वेतवान्ननिर्वेदमवा

भा·त·
६१

भवान्॥७३॥देहोयंममनिर्गुणोराज्यमिदंत्यक्तं॥एको कथंजीवाम्यहंकामंमंत्रज्ञा
नानयतुवै॥७४॥ऊर्षिध्यो मणयश्चैवयंत्रपरमंकतथा॥रोहणंतथासोधेत्तत
वान्नपतिस्तदा॥७५॥नस्नानंनतत्दानंविष्णोःस्मरणंकृतं॥नमूमोरायनंचैव
देवंमत्वापरंतथा॥७६॥मयामोहात्णंवैदेवंमत्वापरंतथा॥५घोरेमृतःसेधेहि
नाहतः॥त्यक्त्वापापंकलेर्येगात्रापमस्यावमानजं॥७७॥अवश्यमेवनरकमे
वेराच्चरणेनवित्॥तस्मात्त्वंपितरंपापात्समुद्धरन्पोत्तम॥७८॥सूतउवाच॥इति
श्रुत्वावचनंतस्यव्यासस्यामिततेजसः॥साश्रुकंठोतिदुःखार्तोबभूवजनमेज
यः॥७९॥ धिगिदंजीवितंमेद्यपिताहिनरकेस्थितः॥तत्करोमियथादेवस्वर्गंया
सुत्तरामुतः॥८०॥ ॥इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेद्वादशोध्यायः॥१२

श्री

राजोवाच॥ ॥का॥हरिणाचकथंयज्ञःकृतःपूर्वंपितामह॥भगत्कारणरूपेणविष्णुना
प्रभविष्णुना॥१॥केसहायास्तत्रासन्ब्राह्मणाःकेमहामते॥ऋत्विजोवेदतत्वज्ञा
स्तन्मेब्रूहिपरंतप॥२॥पश्चात्करोम्यहंयज्ञंविधिदृष्टेनकर्मणा॥श्रुत्वाविष्णुस्त
द्येयागःमत्रिकायाःसमाहितः॥३॥ ॥व्यासउ॥ ॥राजन्शृणुमहाभागविस्तरंप
रमाद्भुतं॥यथाभगवतायागःकृतश्चविधिपूर्वकः॥४॥विसर्जितास्ततोदे
व्यादत्वाशक्तीश्वतास्त्वयः॥काजवगाःपुरुषाजा ताविमानवरंसंस्थिताः॥५
प्राप्तामहार्णवंघोरंत्रयस्तेविबुधोत्तमा॥चक्रस्याभामिवासार्धंसमुत्ताघ
धरांस्थिरां॥६॥आधारशक्तिरचनामुक्तादेव्यास्वयंततः॥तदाधारास्थिरा
जाताधरामेदःसमन्विता॥७॥मधुकैटभयोर्मेदसंयोगात्मेदिनीस्मृता॥धार

ना॰नृ॰ णाच धराशोकाष्टधा विस्तारयोगतः॥८॥ महीचापि महीयत्वात् धृतासात्रोषय
मस्तके॥ गिरयश्च कृताः सर्वधारणार्थं त्रविस्तराः॥९॥ लोहकीला यथा काष्टे तथा
४८ ते गिरयः कृताः॥ महीधरा महाराज प्रोच्यते विबुधैर्जनैः॥१०॥ जातरूपमयो मेरु
र्बक्षयोजनविस्तरः॥ कृतो मणिमयैः शृंगैः शोभितः परमाद्भुतः॥११॥ मरीचि
र्नारदोत्रिश्च पुलस्त्यः पुलहः क्रतुः॥ दक्षो वसिष्ठ इत्येते ब्रह्मणः कथिताः सु
ताः॥१२॥ मरीचेः कश्यपो जातो दक्षकन्यास्त्रयोदश॥ ताभ्यो देवाश्च दैत्याश्च
समुत्पन्ना ह्यनेकशः॥१३॥ ततस्तु काश्यपी सृष्टिः प्रवृत्ता चातिविस्तरा मनु
ष्यपशुसर्पाद्दिजातिभेदैरनेकधा॥१४॥ ब्रह्मणश्चार्द्धदेहात्तु मनुः स्वायंभुवो
भवत्॥ शतरूपा तथा नारी संजाता वामभागतः॥१५॥ प्रियव्रतोत्तानपादौ

सुतौ तस्यां बभूवतुः॥ तिस्रः कन्या वरारोहा ह्यभवन्नतिसुंदरीः॥१६॥ एवं सृष्टिं
समुत्पाद्य भगवान् कमलोद्भवः॥ चकार ब्रह्मलोकं च मेरुशृंगे मनोहरं॥१७॥
वैकुंठं भगवान् विष्णू रमारमणमुत्तमं॥ क्रीडास्थानं सुरम्यं च सर्वलोकोपरिस्थि
तं॥१८॥ शिवोपि परमं स्थानं कैलाशं च चकार ह॥ समुत्पाद्य भूतगणं विजहार य
थारुचि॥१९॥ स्वर्गं त्रिविष्टपं मेरुशिखरे परिकल्पितं॥ तत्र स्थानं सुरेंद्रस्य नानार
त्नविराजितं॥२०॥ समुद्रमथनात् प्राप्तः पारिजातस्तरूत्तमः॥ चतुर्दंतस्तथा नागः काम
धेनुश्च दामहा॥२१॥ उच्चैःश्रवास्तथाश्वो वै रंभाद्याश्चाप्सरस्तथा॥ इंद्रेणोपात्तम
खिलं जातं वै स्वर्गभूषणं॥२२॥ धन्वंतरिश्च रमा श्च सागराच्च समुद्भवौ॥ स्वर्गेस्थि
तौ विराजंते देवौ देवगणैर्वृता॥२३॥ एवं सृष्टिः समुत्पन्ना त्रिविधा नृपसत्तम॥ देव

तिर्यग्मनुष्यादिभेदैर्विविधकल्पिता॥२४॥ अंडजाः स्वेदजाश्चैव चोद्भिजाश्च जरायुजाः
किलैः॥ चतुर्भेदैः समुत्पन्ना जीवाः कर्मयुताः किलः॥२५॥ एवं सृष्टिं समुत्पाद्य ब्रह्मवि
ष्णुमहेश्वराः॥ विहारं स्वेषु स्थानेषु चक्रुः सर्वे यथेप्सितं॥२६॥ एवं प्रवर्त्तिते सर्गे भ
गवान्नतुरच्युत॥ महालक्ष्म्या समं तत्र चक्रीडच्युतवने स्वके॥२७॥ एकस्मिन्समये
विष्णुर्वैकुंठे संस्थितः प्रभुः॥ सुधासिंधुस्थितं द्वीपं सस्मार रमणीमंडितं॥२८॥ य
त्र दृष्टा महामाया मंत्रश्वासादितः स्तुमनः॥ स्मृत्वा तां परमां शक्तिं स्वीभावं गमितो
यया॥२९॥ यज्ञं कर्त्तुं मनश्चक्रे अंबकाया रमापतिः उक्तौ यच्च वनात्तस्मात्समा
ह्वयमहेश्वरं॥३०॥ ब्रह्माणं वरुणं शक्रं कुबेरं पावकं यमं॥ वसिष्ठं कश्यपं दक्षं वाम
देवं बृहस्पतिं॥३१॥ संभारं कल्पयामास यज्ञार्थं चातिविस्तरं॥ मंडपं वितितं तत्र कार

यामास वेदीं चैव सुसंमतां॥३२॥ प्रजपन्ब्राह्मणान्देव्या बीजसमन्वितान्॥ जुहा
वाग्नौ हविः काम विधिवत्परिकल्पितं॥३४॥ ततोतिचितते होमे वायुर्वाचाशरी
रिणी॥ विष्णुं तदा समाभाष्य सुस्वरा मधुराक्षरा॥३५॥ विष्णोत्वमसि देवानां ह
रेश्वेष्ठतमः सदा॥ मान्यश्च पूजनीयश्च समर्थश्च सुरेष्वपि॥३६॥ सर्वत्वामर्चयिष्यं
ति ब्रह्माद्याश्च सवासवाः॥ न विष्यंति विना त्वां मानवा नु विभावत॥३७॥
वरदस्त्वं च सर्वेषां भविता मानवेषु वै॥ कामदः सर्वदेवानां परमः परमेश्वर॥३८
सर्वयज्ञेषु मुख्यस्त्वं पूर्वैश्वर्याग्निके॥ त्वां जनाः पूजयिष्यंति वरदस्त्वं भविष्यति
३९॥ आयिष्यंति देवा नादानवैरतिपीडिताः॥ शरणं त्वं च सर्वेषां भविता सुसत्त
म॥४०॥ पुराणेषु सर्वेषु वेदेषु विततेषु च॥ त्वमेव पूज्यतमः कामं कांतिश्च भविष्य

ति॥३९॥ अयिष्यंति देवा नाशानैवेरतिपीडिताः॥ शरणं त्वं च सर्वेषां भविता पुरुषोत्त
म॥४०॥ पुराणेषु सर्वेषु वेदेषु विततेषु च॥ त्वं वै सूक्ष्मतमः कामं कार्त्तितश्चैव विश्वसि
४१॥ यदायदा हि धर्मस्य ग्लानिर्भवति भूतले॥ तदांशेनावतीर्याशु कर्त्तव्यं धर्मरक्ष
णं॥४२॥ अवताराः सुविख्याताः पृथिव्यां तव मापते ये भविष्यंति धरावां यांवै॥ मा
ननीया महात्मनां॥४३॥ अवतारेषु सर्वेषु नानाम्ना निजु माधव॥ विख्यातः सर्वलो
केषु भविता मधुसूदन॥४४॥ अवतारेषु सर्वेषु शक्तिस्ते सहचारिणी॥ भविष्यति
मम्मांशेषु सर्वकार्यप्रसाधनी॥४५॥ वाराही नारसिंही च नामभेदैरनेकधा॥ ना
नायुधाः शुभाकाराः सर्वाभरणमंडिता॥४६॥ तान्नियुक्तः सदा विष्णो सुरकार्या
णि साधु च॥ साधयिष्यति सामर्थ्यान्मिस्तवरदानतः॥४७॥ तास्त्वयानावमंत

व्याः सर्वदा गर्वलेशतः॥ पूजनीयाः प्रयत्नेन मानीयाश्च सर्वथा॥४८॥ नूनं
ताभ्यारतेरवंडेशाक्रयः सर्वकामदाः॥ भविष्यंति मनुष्याणां पूजिताः प्रतिमा
सु च॥४९॥ तासां तव च देवेशाकीर्त्तिः स्याद्दखिलेष्वपि॥ समस्वपि चद्वीपेषु
विख्यातस्तु विमंडजे॥५०॥ तांश्च त्वां वै महानागमानवास्तु विमंडले॥ अर्च
यिष्यंति वांछार्थसकामः सततं हरे॥५१॥ अर्चास्तु चोपहारैश्च नानानावस
मन्वितान्॥ पूजयिष्यंति वेदोक्तैर्मंत्रैरागमजैस्तथा॥५२॥ महिमा तवन्न
जे कि स्वर्गे च मधुसूदन॥ पूजनाद्दर्शनाद्देव वृद्धिमेष्यति माधव॥५३॥ व्यास
उ॥ ॥इति हत्वा वरान्वाणी विरराम खसंभवा॥ भगवानपि प्रीतात्मा त्वब
वद्बुवणादिव॥५४॥ समाप्य विधिवद्यज्ञं भगवान्हरीश्वरः॥ विसर्जयि

भा·तृ· त्वादेवान्वैब्रह्मपुत्रान्मुनीनथ॥५५॥जगामानुचरैःसार्द्धंवैकुंठंगरुडध्वजः॥
स्वानिस्वानिचधिष्ण्यानिययुःसर्वेसुरास्ततः॥५६॥मुनयोविस्मिताःसर्वेकुर्वंतस्तांपरस्प
५१ रं॥ययुःप्रमुदिताःकामंस्वाश्रमान्पावनान्भुवि॥५७॥कृत्वावाणींपरमविज्ञातांव्योम
जांप्रोत्तमांसर्वेषांवैप्रवृत्तिविषयेनकिंचावश्यजातः॥चक्रुःसर्वेसुरस्तुनिगणाःपू
जनंनकियुक्तास्तस्याःकामंनिखिलफलदंचागमोक्तंमुनीशः॥ ॥इतिश्रीभागव
तेमहापुराणेतृतीयस्कंधेदेवीमाहात्म्येत्रयोदशोध्यायः॥ ॥जनमेजयउ०॥ ॥
श्रुतोवैहरिणाक्लिष्टोयज्ञोविस्तरतोद्विजः॥महिमानंतथावाण्यावदविस्तरत
स्तथा॥१॥श्रुत्वादेव्याश्चरित्रंवैकमरवमनुत्तमम्॥प्रसादात्तवविप्रेंद्रनवाम्मपि
चपावनः॥२॥व्यासउ०॥ ॥शृणुराजन्प्रवक्ष्यामिदेव्याश्चरितमुत्तमं॥इति

हासंपुराणंचकथयाम्यविस्तरं॥३॥कोशलेषुनृपश्रेष्ठःसूर्यवंशसमुद्भवः॥पुष्यपु
त्रोमहातेजाध्रुवसंधिरितिस्मृतः॥४॥ब्राह्मणाःक्षत्रियावैश्याःशूद्राश्चान्येतथाज
नाः॥स्वांस्वांवृत्तिंसमास्थायतस्मिन्वर्तयंतिवै॥धर्मात्मासर्वसंधिश्चवर्णाश्रमहि
तेरतः॥अयोध्यायांसमृद्धायांराज्यंचक्रेशुचिव्रतः॥६॥नचौराःपिशुनाधूर्त्तास्ति
स्यराज्येनकुत्रचित्॥दंभाःकृतघ्नामूर्खाश्चवसंतिमानवाःकिल॥७॥एवंवैवर्त्तमा
नस्यनृपस्यकुरुसत्तम॥द्वेपत्न्यौरूपसंपन्नेत्वासतुःकामभोगदे॥८॥मनोरमाध
र्मपत्नीसुरूपातिविचक्षणा॥लीलावतीद्वितीयाचसापिरूपगुणान्विता॥९॥वि
जहारसपत्नीभ्यांगृहेषुपवनेषुच॥क्रीडागिरौदीर्घिकासुसौधेषुविविधेषुच॥१०
विमनोरमासुतेकालेसुषुवेपुत्रमुत्तमं॥सुदर्शनाभिधंराजन्सर्वलक्षणसंयुतं॥

११॥लीलावत्यपिप्रथमंमासमेकेनश्रामनी॥सुषुवेसुंदरंपुत्रंशुभेनूक्षदिनेतथा॥१२॥
चकारनृपतिस्तत्रजातकर्मादिकद्वयोः॥ददौदानानिविप्रेभ्यापुत्रजन्मप्रमोदितः॥
१३॥प्रीतिस्तयोःसमाराजाचकारसुतयोर्नृपा॥एवपितृपतिश्चक्रेसोहार्दंधंतरंतदा
१४॥चूडाकर्मतयोःसम्यक्चकारनृपसत्तमः॥यथाविन्नवमेवासौप्रीतियुक्तःपरं
तपः॥१५॥ततचूडौसुतौकामंजक्रतुर्नृपतर्मनः॥क्रीडमानावुभौकांतौलोकाना
मनुरंजकौ॥१६॥तयोःसुदर्शनोज्येष्ठोलीलावत्याःसुतःशुभः॥शत्रुजित्संज्ञकःका
मंचातुवाक्योवभूवह॥१७॥नृपतिपतिःप्रीतिजनकोमंजुवाक्चारुदर्शनः॥प्र
जानांवक्षभःसोभूत्तथामंत्रिजनेवै॥१८॥तस्मिन्यथानृपःप्रीतिंचकारगुणगायो
गतः॥मदंज्ञावामंदनावेनतथावैसुदर्शने॥१९॥एवंगच्छतिकालेतुध्रुवसंधिर्नृ

पोत्तमः॥जगामवनमध्येसोमृगयाभिरतःसदा॥२०॥निघ्नमृगान्रुरून्पंक
न्सूकरान्गवयान्शशान्॥महिषान्शरभान्खड्गान्वक्रीडनृपसवने॥२१॥
क्रीडमानेनृपेतत्रवनेघोरेतिदारुणे॥उदतिष्ठन्निकुंजात्तुसिंहःपरमकोपनः॥२२
राज्ञाशिलीमुखेनादौविद्धःक्रोधवशंगतः॥दृष्ट्वाग्रेनृपतिंसिंहोननादमेघनिःस्व
नः॥२३॥ललाचोर्ध्वसलांगूलंप्रसारितवृहत्सटः॥हंतुंनृपतिमाकांक्षन्नुत्पपाता
तिकोपनः॥२४॥नृपतिस्तंसमालक्ष्यदधारासिंकरेतदा॥वामेचर्मसहामोयस्थि
तःसिंहइवापरः॥२५॥सैनिकास्तस्ययेसर्वतेपिबाणान्पृथक्॥अमुंचन्कुपि
ताःकामंसिंहोपरिरुषान्विताः॥२६॥हाहाकारोमहानासीत्संप्रहारस्सुदारुणः
उत्पपाततनःसिंहोनृपस्योपरिदारुणः॥२७॥तंपतंतंसमालोक्यखड्गेनाभिद्र

नत्रृप॥ सोपि क्रूरैर्नखाग्रैश्च जघान नृपतिं रुषा॥ सोपि क्रूरैर्नखाग्रैश्च जघानन्न
पतिं रुषा॥२८॥ स नखैर्गहतो राजा पपात च ममार वै॥ चक्रुशुः सैनिकास्तंतु निज
मुर्विद्रिखैस्तदा॥२९॥ मृतः सिंहोपि तत्रैव नृपतिश्च तथा मृतः॥ सैनिकैर्मंत्रि
मुख्येभ्यस्तत्रागत्य निवेदितः॥३०॥ परलोकक्रियां सर्वां वसिष्ठो विधिपूर्वकां॥ का
रयामास तस्यैवं परलोकसुखावहं॥३१॥ परलोकगतं नृपं कृत्वा ते मंत्रिसत्तमाः॥
संस्कारं लंघयामासुर्गत्वा तत्र वनांतिके॥३२॥ प्रजाध्यक्षास्तथा चैव वसिष्ठश्च महा
मुनिः॥ सुदर्शनं नृपं कर्तुं मंत्रं चक्रुः परस्परं॥ धर्मपत्नीसुतः ज्ञातः सुरूपश्च सुल
क्षणः॥ अयं नृपासनार्हश्च ब्रुवन्मंत्रिसत्तमाः॥३४॥ वसिष्ठोपि तथैवाह योग्यो
यं नृपते सुतः॥ बालोपि धर्मपत्नीजो नृपासनमिहार्हसि॥३५॥ स्तेतमंत्रे मंत्रि

दृधेर्युधाजिन्नाम पार्थिवः॥ तत्राजगाम तरसा श्रुत्वा तुज्जयनीपतिः॥३६॥ रोहित्र
प्रियकाम्यया॥३७॥ वीरसेनस्तथायात सुदर्शनहितेछया॥ कलिंगाधिपतिश्चैव म
नोरमापिता नृपः॥३८॥ उभौ तौ सैन्यसंयुक्तौ नृपौ साकेतसंस्थितौ॥ चक्रतुर्मंत्रि सुतंयोद्धये
मुख्यैस्तैर्मंत्रराज्यस्य कारणात्॥३९॥ युधाजित्तानथापृछत् ज्येष्ठः कः राजपुत्रो
तु ज्येष्ठो वै न कनीयान् कदाचन॥४०॥ वीरसेनोपि तत्राह धर्मपत्नीसुतः किल॥ ए
ज्यार्हः स यथा राजन् नृराज्ञस्त्वेष्यो मया श्रुतं॥४१॥ युधाजित्तु नरो हे ज्येष्ठोयं वय
या गुणैः॥ राजलक्षणसंयुक्तो न तथायं सुदर्शनिः॥४२॥ अस्मिन्नेव सुदर्शनं कर्तुं म
त्रिवरा नृपं॥ वसिष्ठश्च महातेजा वामदेवस्तथैव च॥४३॥ विवाहो तत्र संपन्नो नृपयो
स्तत्र युध्यतोः॥ कः संदेह मया कर्तुं क्षमः स्यादिति संकटे॥४४॥ युधाजिन्मंत्रिणः

प्राहयूयं स्वार्थपराः किल ॥ सुहृज्जनिं नृपंत्वत्तामंदनोक्तं स्वयं खलु ॥४५॥ युष्माकं
तु विचारोयं मया ज्ञातस्तथेंगितैः ॥ शत्रुजित्सबलस्तस्मात्त्वमतो देनृपासने ॥४६॥
मयि जीवति कः कुर्यात्कनीयां सन्नृपं किल ॥ सत्काज्येष्टं गुणाढ्यं च सेनाबलस
मन्वितं ॥४७॥ नूनं युद्धं करिष्यामि तेन नवद्यस्य मेहनि ॥ दानं यथा च विधाया नी
तिज्ञास्त्वेषु न्नाषितं ॥४८॥ वीरसेनस्तु तच्छुत्वा युधाजितमनागत ॥ वालौ द्वौ स
हजात्रशौ कोन्ये होत्र किंचसप्रणः ॥४९॥ एवं विवदमानौ तौ संजातौ नृपती सहा ॥
ध्वजाः प्रस्तलयश्चैव नृत्युर्व्यग्रमानसाः ॥५०॥ समाजग्मुश्च सामंताः ससैन्याः क्रो
धातलराः ॥ विग्रहं चान्तिकास्तंतः परस्परमतंद्रिताः ॥५१॥ निषादा राजयुस्तत्र शृंग
वेरपुराज्ञया ॥ राजद्रव्यमयाद्वेतुंमृतं श्रुत्वा महीपतिं ॥५२॥ पुत्रौ च बालकौ श्रु

त्वा विग्रहं च परस्परं ॥ चौराश्च समाजग्मुर्देशाद्देशांतरादपि ॥५३॥ संमर्दस्तत्र सं
जातः कलहे समुपस्थिते ॥ युधाजिद्वीरसेनश्च महायुद्धं बभूवतुः ॥५४॥ ॥इति श्री
भागवते महापुराणे तृतीयस्कंधे चतुर्दशोऽध्यायः ॥१४॥ ॥व्यास उ॰॥ ॥संजये
चसतितत्र नृपयो राहवाय समुपागतयोस्तयोः ॥ क्रोधलोभवसयोः समंततः
संबभूवतुमलस्तु विमर्दः ॥१॥ संस्थितस्तु सपरेद्युतः २ चास पार्थिवः ॥ पृथुलबा
क्रयुधाजित ॥ संयुतः स्वबलवाहनादिभिराहवाय त्वतनिश्चयो नृपः ॥२॥ वीर
सेनरपि सैन्यसंयुतः क्षात्रधर्ममनुसृत्य संयुगे ॥ पुत्रिकात्मजमचिंत्य पार्थिवः
संस्थितः सुपतेः समतेजाः ॥३॥ सबाणवृष्टिं विससर्ज पार्थिवो युधाजितं वीरस
रणे स्थितं च ॥ गिरिं तडित्वानिव तोयवृष्टिं क्रोधान्वितः सत्यपराक्रमोसौ ॥४॥ तं

वीरसेनो विशिखैः शिलाशितैः समरांगणे दास्तमुक्तिरनिशंगैः॥ चिछेदबाणै
श्शिलीमुखान सोतैनैव मुक्तान निवेगपातिनः॥५॥ गजरथतुरगाणां संबन्ध
वातिभुक्तं सुरनरमुनिसंघैर्वीक्षितं चातिघोरं॥ विततविहगवृंदैराहतं व्योममा
र्गे पिशितुकामैः काकगृध्रादिभिश्च॥६॥ तत्राद्भुतास्तत सिंधुरुवाहधारादेहे
भ्य एव जगवीरतुरंगमाणां॥ त्रासावहा नयनमार्गगता नराणां पापात्मनां
विजमार्गन्निवेव कामं॥७॥ कीर्णा तितत्र पुलिने नरमस्तका निकेशावृता निश्च
तिनां तितथैव सिंधौ॥ तुंबीफलानि विहितानि व तंतुकामैर्बालैर्यथा रविसुता
मनवेश्च नूनं॥८॥ वीरं मृतं तु विगतं पतितं रथाद्वै गृध्रपला इसुपरिभ्रमतीति
मन्ये॥ जीवोप्यसौ निजशरीरमवेक्ष्य कामं कांक्षत्यहो ति विवशोपि पुनः प्रवे
ष्टुं॥९॥ आनोइतोपित्तवं सुविमानरूढः॥ स्वांके स्थितां सुरवधूं प्रवदत्यनीष्टं॥
पश्याधुना मम शरीरमिदं पृथिव्यां बाणाहतं निपतितं करुणो रुकांतं॥१०॥ ए
को हतस्तु रिपुणागत एव व्योम्नि देवांगना समधिगम्य युता विमाने॥ तावन्न
प्रियाकृतवदिहमुमपश्य देहं जयात तं ब्रास रणे स्त्री द्वैस्तदा रुणे॥११॥ निहतः सपप
तोव्यान्तिमूर्छो महीपतिः॥ पलायंत बलं सर्वं निगतं च चतुर्दिशं॥१२॥ मनोर
मा हतं श्रुत्वा पितरं रणमूर्द्धनि॥ नयत्रस्ता प्यसंजाता पितुर्वैरं मनुस्मरन्॥
१८॥ हनिष्यति युधाजिद्वै पुत्रं मम दुराशयः॥ राज्यलोभेन पापात्मा सेति चिंता
परा भवत्॥१९॥ किं करोमि क्व गच्छामि पिता मे निहतो रणे॥ नतोचापि मृतो दै
वपुत्रोयं मम बालकः॥२०॥ लोभोनीतीव च पापीष्टस्तेन कातवशीकृतः॥ किं न कु

यान्नराविष्टःपापंपार्थिवसत्तम॥२१॥पितरंमातरंभ्रातॄन्गुरून्स्वसुरबांधवान्॥
हंतिलोभसमाविष्टोजातोनात्रविचारणा॥२२॥अभक्ष्यभक्षणंलोभादगम्या
गमनंतथा करोतिकिललुब्धात्माधर्मत्यागंतथापुनः॥२३॥नसहायोऽस्तिमेकु
श्चिन्नगरेऽत्रमहाबलः यशोधारस्थिताचाहंपालयामिसुतंशिशुं॥२४॥हते
पुत्रेनृपेणाद्यकिंकरिष्याम्यहंपुनः॥नमेत्रास्तिभुवनेयेनासंस्थितानिह॥२५॥
सहवैरस्युताकामंसत्वीसर्वदाभवेत्॥लीलावतीतमेपुत्रेभविष्यतिदयावती
२६॥युधाजितिसमायातेनमेनिःसारणंभवेत्॥ज्ञात्वाबालंसुतंसोद्यकारागृ
हंनयिष्यति॥२७॥श्रूयतेहिपुरेरेणभ्रातुर्गर्भगतंसुतं॥हतितंसतथापश्चात्ता
स्तसमसमधा॥२८॥प्रविश्यमउदरंमातुःकरेल्लालभकंपतिं॥एकोनपंचाशदपि

मरुतास्तेत्यभवन्दिवि॥२९॥सपत्नैर्गरलंदत्तंसपत्न्यानृपभार्यया॥गर्भनाशा
र्थमुद्दिश्यपुरैतद्वैश्रुतंमया॥३०॥जातस्तुबालकःपश्चाद्देहेविषयुतःशिशुः॥ते
नासौसगरोनामविख्यातोभुविमंडले॥३१॥जीवमानेथभर्त्तरिकैकेय्यानृपभा
र्यया॥रामःप्रव्राजितोज्येष्ठोमृतोदशरथोनृपः॥३२॥मंत्रिणस्त्ववशाःकामंयेमेपु
त्रंसुदर्शनं॥राजानंकर्त्तुकामावैयुधाजिद्वशगाश्चते॥३३॥नमेभ्रातातथाशू
रोयामेबंधात्त्वमुच्यते॥मद्दुःकष्टंचसंप्राप्तंमयाद्यदैवयोगतः॥३४॥उद्यमःसर्व
थांकार्यःसिद्धिर्दैवादजायत॥उपायंपुत्ररक्षार्थंकरोम्यद्यत्वरान्विताः॥३५॥इति
संचिंत्यसाबालाविदल्लंचातिमानिनं॥निपुणंसर्वकार्येषुचाप्तंमंत्रवरोत्तमं॥
॥३६॥समाकारयतमेकांतेप्रोवाचातीवदुःखिता॥गृहीत्वाबालकंहस्तेरुदंतीदी

ना·तं· नमानसा॥३७॥ पिता मे निहतः संख्ये पुत्रोयं बालकस्तथा॥ सुधाजिद्बलवान्रा
जा किं विधेयं वदस्व मे॥३८॥ तामुवाच वि[illegible]ता मात्र कस्त्या त्वमेव वै॥ गमि
५१ ष्यामो वने कामवारारण्यां पुनः किल॥३९॥ तत्र मे मातुलः श्रीमान्वर्त्तते बल
वत्तरः॥ सुबाकुरिति विख्यातो रक्षिता स न विष्यति॥४०॥ सुधाजिद्दर्शनोत्कं गतस्य
नानगराद्बहिः॥ निर्गत्य रथमारुह्य गंतव्यं नात्र संशयः॥४१॥ इत्युक्ता तेन सा राज्ञी
गत्वा लीलावती प्रती॥ उवाच पितरं द्रष्टुं गच्छाम्यद्य सुलोचने॥४२॥ इत्युक्त्वा रथ
मारुह्य सैरंध्री संयुता तदा॥ विदग्धेन च संयुक्ता निःसृता नगराद्बहिः॥४३॥ त्र
स्ता जीता निजपणा पितुः शोकसमाकुला॥ दृष्ट्वा सुधाजितं भूपं पितरं गतजीवितं
४४॥ त्यक्त्वा रथं त्वरायुक्ता वेपमाना भयाकुला॥ दिनद्वयेन संप्राप्ता राज्ञी ना

गीरथातटं॥४५॥ रुदंती सुतमादाय चारुवस्त्रा मनोरमा॥ निर्ययौ जाह्नवीती
रे सैरंध्रीकरलंबिना॥४६॥ निषादैर्लुंठिता तत्र गृहीतं वसु रत्नं बलं॥ रथाश्चापि गृ
हीतास्ते निर्गताद्दस्यवः शगः॥४७॥ आरुह्य च नयाशीघ्रमुडुपे तेनयाकुला॥
तीर्त्वा तु भागीरथीं पुण्यां ययुश्चित्रकूटपर्वतं॥४८॥ नारदाश्रमं प्राप्ता ज्वलायेव
ज्वरातुरा॥ संवीतस्ता तापसांस्तत्र सुंभा मुनिर्भयात्तदा॥४९॥ मुनिना सा ततः
दृष्टा कासि कास्य परिग्रहः॥ कष्टेनाथ त्र कथं प्राप्ता सत्यं ब्रूहि शुचिस्मिते॥५०॥
देवी वा मानुषी वासि बालपुत्रा वने कथं॥ राज्यभ्रष्टेव वा मोहं नासि त्वं कमलेक्ष
णे॥ एवं सा मुनिना दृष्टा तो वाच वरवर्णिनी॥ रुदंती दुःखसंतप्ता विदग्धं च समा
दिशत्॥५१॥ विदग्धस्तमुवाचेदं ध्रुवसंधिर्नृपोत्तमः॥ तस्य भार्या धर्मपत्नी नाम्ना

सुदर्शनोत्ययं॥५३॥सिंहेननिहतोराजासूर्यवंशीमहाबलः॥पुत्रोयंनृपतेस्तस्यनाम्नासुद
र्शनोत्ययं॥५४॥युधाजिद्वसुरस्तस्यतेनयुद्धंकृतंमहत्॥तत्रासौनिहतोराजावीरसे
नोमहाबलः॥५५॥अस्यापितातिधर्मात्मादौहित्रार्थंमृतोरणे॥युधाजिद्भयसंत्रस्ता
संप्राप्ताविजनेमुने॥५६॥त्वामिवशरणंप्राप्ताबालपुत्रानृप॥त्रातात्वमहाभागत
मस्यामुनिसत्तमः॥५७॥आर्त्तस्यरक्षणेपुण्यंयज्ञाधिकमुदाहृतं॥भयत्रस्तस्यदीन
स्यविशेषफलदंस्मृतं॥५८॥ऋषिरुवाच॥ ॥निर्भयावसकल्याणिपुत्रंपालय
सुव्रते॥नतेभयंविशालाक्षिकर्त्तव्यंशत्रुसंभवं॥५९॥पालयस्वसुतंकांतंराजाते
यंभविष्यति॥नात्रदुःखंतथाशोकंकदाचित्त्वंभविष्यसि॥६०॥व्यासउ॥इत्युक्तामु
निनाराज्ञीस्वस्थासासंबभूवह॥उटजेमुनिनादत्तेवीतशोकातदावसत्॥६१॥से

रंध्रीसहितातत्रविदल्लेनचसंयुता॥सुदर्शनंपालयानान्यवसच्चमनोरमा॥६२॥
इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेसुदर्शनोपाख्यानेपंचदशोध्यायः॥व्यासउ
वाच॥युधाजित्वथसंग्रामात्कृत्वायोध्यांमहाबलः॥मनोरमांचपप्रच्छसुदर्शनजिघां
सया॥१॥सेवकान्प्रेषयामासक्वगतेतिमुदान्वितः॥सुदिनेथदौहित्रंस्थापयामास
चासने॥२॥मंत्रिनिश्चवसिष्टेनमंत्रैराथर्वणैःशुभैः॥अभिषिक्तस्तुसोवर्णैःकलशै
र्जलपूरितैः॥३॥भेरीशंखनिनादैश्चतूर्याणांचाथनिःस्वनैः॥उत्सवस्तुनगर्यांवैसं
बभूवकुरुद्वह॥४॥नृत्यगीतैर्वेदपाठैर्वंदिनांस्तुतिनिस्वनैः॥अयोध्यायमुदितेवास
जयशब्दैःसुमंगलैः॥५॥हृष्टपुष्टजनाकीर्णास्तुतिवादित्रनिस्वना॥नवेतस्मिन्मही
पालेपू— बभौनूतनाइव॥६॥केचित्साधुजनायेवैचक्रुःशोकंगृहेस्थिताः॥सुदर्शने

विचिंत्यायकगतो सौ नृपात्मजः॥७॥ मनोरमा च साध्वी साक्कगता सुतसंयुता॥
पितास्या निहतः संख्ये राज्यलोभेन वैरिणा॥८॥ इत्येवं चिंतयामास साध्वसः सम वु
द्धयः॥ कुर्वन् दुःखं स्थितास्तत्र शत्रुजिद्दशवर्त्तितः॥९॥ युधाजिदपि दौहित्रं स्थाप
यित्वा विधानतः॥ राज्यं च मंत्रिसात्कृत्वा चलितः स्वां पुरीं प्रति॥१०॥ ज्ञात्वा सुदर्श
नं तत्र मुनीनामाश्रमे स्थितं॥ हंतुकामो जगामाशु शृंगवेरपुराधिपं॥११॥ श्रुत्वा
मनोरमा तत्र बभूवातिसुदुःखिता॥ आगछंतं बालपुत्रा नयात्ससैन्यसंयुतः॥१२
तमुवाचातिशोकार्त्ता मुनिं सा अश्रुविलोचना॥ किं करोमि क्व गच्छामि युधाजित्समु
पागतः॥१३॥ पिता मे निहतो नेन दौहित्रो नृपतिः कृतः॥ सुतं मे हंतुकामो त्र समा
याति बलान्वितः॥१४॥ पुरा श्रुतं मया स्वामिन् पांडवा वै वने स्थिताः॥ मुनीनामा

श्रमे पुण्ये पांचाल्या सहितास्तदा॥१५॥ गतास्ते मृगयां पार्थाः भ्रातरः पंच एव ते॥ मु
कर्तव्यंवित्तेसतिकदाचित ॥१५॥ विप्रैसंतोषितैःकार्यंसंपूर्णंसर्वथाभवेत् ॥ नव
पंचत्रयश्चैवद्व्यथवात्राद्विजास्मृताः ॥१६॥ वरयेद्ब्राह्मणंशांतंपारायणकृतेतदा
स्वस्तिवाचनकंकार्यंवेदमंत्रविधानतः ॥१७॥ वेद्यांसिंहासनंस्थाप्यंक्षौमवस्त्रसम
न्वितं ॥ तत्रस्थाप्यांबिकांदेवीचतुर्हस्तायुधान्विता ॥ रत्नभूषणसंयुक्तामुक्ताहारवि
राजिता ॥ दिव्यांबरधरासौम्यासर्वलक्षणसंयुता ॥१९॥ शंखचक्रगदापद्मधरासिं

हासनाशिवा॥ अष्टादशभुजा वापि तिष्ठाव्यासनातनी॥२०॥ अथवानिवेतथा यंत्रंन
र्णमंत्रसंयुतं॥ स्थापयेत्पीठपूजार्थं कलशं तत्र यास्यतिः॥ पंचपल्लवसंयुक्तं वेदमंत्रै
स्तु संस्कृतं॥ सुतीर्थजलसंपूर्णं हेमरत्नसमन्वितं॥२२॥ पार्श्वपूजासस्तारान्परि
कल्पसमंततः॥ गीतवादित्रनिर्घोषात्कारयेन्मंगलायवै॥२३॥ तिथौहस्तान्विता
यांचनंदायां पूजनं वरं॥ प्रथमे दिवसे राजन्विधिवत्कामदं नृणां॥२४॥ नियमं प्रथमं
कृत्वा पश्चात्पूजां समाचरेत् उपवासेन नक्तेन चैकभक्तेन वा पुनः॥२५॥ करिष्या
मि व्रतं मातर्नवरात्रिमनुत्तमं॥ संपूर्णं कुरु मे देवी जगदंबे ममाखिलं॥२६॥ यथाश
क्त्याप्रकर्तव्यं नियमं व्रतहेतवे॥ पश्चात्पूजा प्रकर्तव्या विधिवन्मंत्रपूर्वकं॥२७॥ चंदना
गुरुकर्पूरैः कुसुमैश्च समंततः॥ मंदारक्करमाशोकचंपकैः करवीरकैः॥२८॥ मा

लतीमल्लिकापुष्पैस्तथा बिल्वदलैः शुभैः॥ पूजयेज्जगतां धात्रीं धूपैर्दीपैर्विधान
तः॥२९॥ फलैर्नानाविधैरर्घः प्रदातव्यस्ततुर्ज्ञवैः॥ नालिकेरैर्मातुलिंगैर्दाडिमैः क
दलीफलैः॥३०॥ नारिंगैः पनसैश्चैव तथा पूगफलैः शुभैः॥ पूजयेज्जगतां धात्रीं धू
पैर्दीपैर्विधानतः॥ देवी दुर्गतिनाशिनी॥३१॥ अर्घदानं प्रकर्तव्यं भक्तिपूर्वं नरा
धिपः॥३१॥ नैवेद्यानि विचित्राणि सर्वान्नि संयुतानि च॥ ओदनं पायसं चैव पूपैश्च व
टकास्तथा॥३२॥ मांसान्नं तथैक कुर्वंति ते कार्यं पशुहिंसनं महिषाजवराहाणां च
लिदानं विशिष्यते॥३३॥ देव्याग्रे निहता यांति पशवः स्वर्गमव्ययं॥ न हिंसा पशुजा
तत्र निघ्नतां तत्कृतं ततः॥३४॥ अहिंसा याज्ञिकी प्रोक्ता सर्वशास्त्रविनिर्णयः॥ देवतार्थे
विशस्तानां पशूनां स्वर्गतिर्ध्रुवा॥३५॥ होमार्थं तत्र कर्तव्यं कुंडं चैव त्रिकोणकं॥ स्थंडि

ना.त. लंवाश्चकर्त्तव्यंत्रिकोणंमानतः॥३६॥त्रिकालंपूजनंनित्यंनानाद्रव्यैर्मनोहरैः॥गीत
९८ वादित्रनृत्यैश्चकर्त्तव्यश्चमहोत्सवः॥३७॥नित्यंभूमौचशयनंकुमारीणांचपूजनं॥व
स्त्रालंकरणैर्दिव्यैर्भोजनैश्चसुगंधकैः॥३८॥एकैकांपूजयेन्नित्यमेकवृद्ध्यातथापुनः॥
द्विगुणंत्रिगुणंवापिप्रत्येकंनवकंचवा॥३९॥वित्तस्यानुसारेणकर्त्तव्यंपूजनंकि
लं वित्तशाठ्यंनकर्त्तव्यंराजन्शक्तिमखेसदा॥४०॥एकवर्षानकर्त्तव्याकन्यापूजावि
धौनृप॥परमज्ञातुभोगानांगंधादीनांचबालिका॥४१॥कुमारिकाचसाप्रोक्ताद्विव
र्षायाभवेदिह॥त्रिमूर्त्तिनीत्रिवर्षाचकल्याणीचतुराब्दिका॥४२॥रोहिणीपंचवर्षाचका
लिकाषट्वार्षिकी॥चंडिकासप्तवर्षाचअष्टवर्षाचशांभवी॥४३॥नववर्षाभवेद्दुर्गा
सुभद्रादशवार्षिकी॥अतऊर्द्ध्वंनकर्त्तव्यासर्वकार्येविगर्हिता॥४४॥एभिश्चनामभि

पूजाकर्त्तव्याविधिसंयुता॥तासांफलानिवक्ष्यामिनवानांपूजनेसदा॥४५॥
कुमारीपूजिताकुर्याद्दुःखदारिद्र्यनाशनं शत्रुक्षयंधनायुष्यबलवृद्धिकरोतिवै॥
४६॥त्रिमूर्त्तिपूजनादायुस्त्रिवर्गस्यफलंभवेत्॥धनधान्यागमश्चैवपुत्रपौत्रादि
वृद्धिच॥४७॥विद्यार्थीविजयार्थीचराज्यार्थीयश्चैवपार्थिव सुखार्थीपूजयेन्नित्यंक
ल्याणींसर्वकामदं ४८ कालिकांशत्रुनाशार्थंपूजयेद्भक्तिपूर्वकं॥ऐश्वर्यधनका
मश्चचंडिकांपरिपूजयेत्॥४९॥पूजयेच्छांभवींनित्यंनृपसंमोहनायच॥दुःख
दारिद्र्यनाशायसंग्रामेविजयायच॥५०॥क्रूरशत्रुविनाशार्थंतथोग्रकर्मसाध
ने दुर्गांचपूजयेद्भक्त्यापरलोकसुखायच॥५१॥वांछितार्थस्यसिद्ध्यर्थंसुभद्रांपू
जयेत्सदा॥रोहिणीरोगनाशायपूजयेद्भक्तिपूर्विकां॥५२॥श्रीरस्त्वितिचमंत्रेणपूज

भा॰त॰ ये विधिवन्नरः॥ श्रीसूक्तमंत्रैरथवा बीजमंत्रैरथापि वा॥५३॥ कुमारस्य च तत्वानि या
९९ सृजत्यपि लीलया॥ कादीनपि च देवांस्तां कुमारीं पूजयाम्यहं॥५४॥ कल्याणका
रिणीं नित्यं भक्तानां पूजिता निशं॥ पूजयामि च तां भक्त्या कल्याणीं सर्वकामदां॥
५५॥ सत्वादिभिस्त्रिमूर्त्तिर्या तैर्हि नानास्वरूपिणी॥ त्रिकालव्यापिनी शक्तिस्त्रिमू
र्त्तिं पूजयाम्यहं॥५६॥ रोहयंती च बीजानि प्राग्जन्मसंचितानि वै या देवी सर्वभू
तानां रोहिणीं पूजयाम्यहं॥५७॥ कालि कालियते सर्वं ब्रह्मांडं सचराचरं॥ क
ल्पांतसमये या तां कालिकां पूजयाम्यहं॥५८॥ चंडिकां चंडरूपां च चंडमुंडविनाशि
नीं॥ चंडपापहरिणीं तां चंडिकां पूजयाम्यहं ५९ अकारणात्समुत्पत्तिर्यन्मूर्त्तैः
परिकीर्त्तिता यस्यास्तां सुखदां देवीं शांभवीं पूजयाम्यहं॥६०॥ दुर्गात्त्रायति भक्तं

या सदा दुर्गतिनाशिनी॥ दुर्ज्ञेया सर्वदेवानां तां दुर्गां पूजयाम्यहं॥६१॥ सुभद्राणि च
भक्तानां कुरुते पूजिता सदा॥ अभद्रनाशिनीं देवीं सुभद्रां पूजयाम्यहं॥६२॥ एभिर्मं
त्रैः पूजनीया भक्त्याहं कन्यकास्त्विमा॥ वस्त्रालंकरणैर्माल्यैर्गंधैरुच्चावचैरपि॥६३॥ ॥इ
ति श्रीभागवते महापुराणे तृतीयस्कंधे षड्विंशोऽध्यायः॥ व्यास उ॥ हीनांगीं वर्जयेत्क
न्यां कुष्टयुक्तां व्रणांकितां॥ गंधस्फुटितगात्रां च विशालकुलसंभवां॥१॥ जात्यंधां
केकरां काणीं कुरूपां तनुरोमशां॥ संत्यजेद्रोगिणीं कन्यां रक्तपुष्पव्रणांकितां॥२॥
क्षामां गर्भसमुद्भूतां गोलकां कन्यकोद्भवां॥ वर्जनीयाः सदा चैताः कन्याः पूजादिकर्मसु॥
अरोगिणीं सुरूपांगीं सुंदरीं व्रणवर्जितां॥ एकवंशसमुद्भूतां कन्यां सम्यक् प्रपूजये
त्॥४॥ ब्राह्मणी सर्वकार्येषु जयार्थे नृपवंशजा॥ लाभार्थे वैश्यवंशोत्था मता वा शूद्रवंशजा

भा·त·
१००

जां॥ नान्यैर्वैश्यैर्ब्राह्मणैर्ब्रह्मजाः पूजा राजन्यैर्भक्तिसत्तमाः॥ वैश्यैस्त्रिवर्णैर्जा पूजा
शूद्रैश्चतारणं वच॥६॥ काकारूपिणीं चैवं गोछायथायोग्यं प्रपूजयेत्॥ नवरात्रिवि
धानेन भक्तिपूर्वं सदैव हि॥७॥ अशक्तश्चेति नित्यपूजां कर्तुं च नवरात्रिके॥ अष्ट
म्यां तु विशेषेण कर्तव्यं पूजनं सदा॥८॥ तत्राष्टम्यां भद्रकाली दक्षयज्ञविनाशिनी
प्रादुर्भूता महाघोरा योगिनीकोटिभिः सह॥९॥ अतोऽष्टम्यां विशेषेण पूजनीया
प्रयत्नतः॥ नानाविधोपहारैश्च तोषयेज्जगदीश्वरी॥१०॥ पायसैरामिषैर्हो
मैर्ब्राह्मणानां च भोजनैः॥ फलपुष्पोपहारैश्च तोषयेज्जगदीश्वरीं॥११॥ उपवा
सेष्वशक्तानां नवरात्रिव्रते पुनः॥ उपोषणत्रयं प्रोक्तं यथोक्तफलदं नृप॥१२॥ स
प्तम्यां च तथाष्टम्यां भक्तिभावतः त्रिरात्रकरणात्सर्वफलं भवति पूजनाद्॥१३॥

पूजाभिश्चैव होमैश्च कुमारीपूजनैस्तथा॥ संपूर्णं तद्व्रतं प्रोक्तं विप्राणां चैव भोजनैः॥१४
व्रतानि यानि यादानानि तीर्थानि विधानि च॥ नवरात्रव्रतस्यास्य नैव तुल्यानि भूतले
१५॥ धनधान्यप्रदं नित्यं सुखसंतानवृद्धिदं॥ आयुरारोग्यदं चैव स्वर्गदं मोक्षदं तथा॥१६॥ वि
द्यार्थी वा धनार्थी वा पुत्रार्थी यो भवेन्नरः॥ तेनेदं विधिवत्कार्यं व्रतं सौभाग्यदं शिवं॥१७
विद्यार्थी सर्वविद्यां वै प्राप्नोति व्रतसाधनात्॥ राज्यभ्रष्टो नृपो राज्यं समवाप्नोति सर्वथा
१८॥ राजयक्ष्मादिकाः सर्वव्याधयः कर्मसंभवाः॥ व्रतेन नाशमायांति तमः सूर्योदये य
था॥१९॥ पूर्वजन्मनि यैर्नूनं न कृतं व्रतमुत्तमं॥ ते व्याधिनो दरिद्राश्च भवंति पुत्रवर्जि
ताः॥२०॥ वंध्या वा या भवेन्नारी विधवा धनवर्जिता॥ तयानुमितिकर्तव्या न कृतं त
व्रतं त्विति॥२१॥ नवरात्रिव्रतं लोके न कृतं येन भूतले॥ सकथं विभवं प्राप्य मोदते त्रत

या दिवि॥२२॥रक्तचंदनसंयुक्तैः कोमलैर्बिल्वपत्रकैः॥ भवानी पूजिता येन स भ
वेन्नृपतिः क्षितौ॥२३॥ नाराधिता येन शिवा सनातनी दुःखार्तिहा सिद्धिकरा जग
द्धरा॥ दुःखार्तिहा सिद्धिकरा जगद्धरा॥ दुःखान्वितः शत्रुयुतश्च भूतले॥ नूनं दरिद्री भ
वतीह मानवः॥२४॥ यां विष्णुरीशो हरपद्मजस्तथा वह्निः कुबेरो वरुणो दिवाकरः
ध्यायंति सर्वे विशदं तदंघ्रिं तां किं मनुष्या न भजंति चंडिकां॥२५॥ स्वाहा स्वधाना
मयुगानुभावतस्तृप्यंति देवाः पितरस्तथैव॥ यज्ञेषु सर्वेषु समुद्धरंति॥ यन्नाम
युग्मं क्षितिनिर्मुनीशाः॥२६॥ यस्याज्ञया सृजति विश्वमिदं प्रजेशो विष्णुः शरीरग्रह
णं नरति युगेषु॥ नूनं करोति शिवभस्मधरः सदैव तिष्ठत्यतस्तां न भजंते नु कथं म
नुष्याः॥२७॥ नैकोऽस्ति सर्वभुवनेषु तया विहीनो देवो नरोऽथ विहगो किल पन्नगो वा॥

गंधर्वराक्षसपिशाचनगाश्च नूनं यः स्पंदितुं भवति वात्तमयात्रकामं॥२८॥ तां न सेवे
त कस्मात् चंडीं सर्वकामार्थदां शिवां॥ व्रतं तस्या न कः कुर्याद्वांछन् संसारजं सुखं॥२९॥ म
हापातकसंयुक्तो नवरात्रव्रतं चरेत्॥ मुच्यते सर्वपापेभ्यो नात्र किंचिद्विचारणा॥३०
पुरा कश्चिद्वणिग्दीनो धनहीनः सुदुःखितः॥ कुटुंबी वासवत्कश्चित्कोशले नृपसत्त
म॥३१॥ अपत्यानि बहून्यस्य जातानि क्षुत्पीडितानि च॥ नक्तं किंचित्तु सायाह्ने प्राप्नुयुस्त
स्य च बालकाः॥३२॥ भुंक्ते न कार्यकर्तास्यो परस्याथ बुभुक्षितः॥ कुटुंबभरणं तत्र च
कारातिनिराकुलः॥३३॥ सदा धर्मरतः शांतः सदाचारश्च सत्यवाक्॥ अक्रोधनश्च
धृतिमानविवहस्यानुसूयकः॥३४॥ संपूजन्देवता नित्यं पितॄंश्चाप्यतिथींस्तथा॥ भु
जानो पोष्यवर्ग्येषु स तदा नो जनं वणिक्॥३५॥ एवं गच्छति काले वै सुशीलो नाम

भा·तृ· तोगुणैः॥दरिद्रेणोद्विग्नंतंपप्रछातिसुसंस्थितः॥३६॥ ॥सुशीलउवाच॥नोनृदेव
नृपात्तत्वावदस्वाद्य महामते कथंदरिद्रनाशःस्यादितिमेनिश्चयेनवै॥३७॥धनेष
१०२ णानमेचास्तिधनीस्यामितिमानद॥कुटुंबभरणार्थंवैपृछामित्वांद्विजोत्तम॥३८॥पुत्री
सुतस्तुमेबालोनजानार्थरुदतिभृशं॥तावन्मात्रंगृहेनान्नंमुष्टिमेकांददाम्यहं॥३९॥विस
र्जितःपितुर्गेहेरुदन्बालोमयालद॥मनोमेदह्यतेतस्यकिंकरोमिधनंविना॥४०॥वि
वाहोस्तिसुतायामेनास्तिवित्तंकरोमिकिं दशवर्षाधिकास्तुदानकालोपियात्कलं
॥४१॥ तेनशोचामिविप्रेंद्रसर्वज्ञोसिदयानिधे॥तपोदानंव्रतंकिंचिद्ब्रूहिमंत्रंजपंत
था॥४२॥येनाहंपोष्यवर्गस्यकरोमिभरणंद्विज॥तावन्मेस्याद्धनंशांतिनाधिकंचा
र्थयेकिल॥४३॥त्वत्प्रसादात्कुटुंबंमेसुखितंभवतुद्विज॥तत्कुरुष्वमहाभागज्ञा

नेनपरिचिंत्यच॥४४॥ ॥व्यासउ॥ ॥इतिपृष्टस्तदातेनब्राह्मणःसंशितव्रतः॥
उवाचपरमप्रीतस्तंवैश्यंनृपसत्तम॥४५॥वैश्यवर्यकुरुष्वाद्यनवरात्रिव्रतंशुभं
पूजनंभगवत्याश्चहवनंविप्रभोजनं॥४६॥यथाशक्त्योपवासांश्चत्रिकालपूजनं
तथा॥स्तुतिपाठांश्चविविधान्श्रीसूक्तादिकानपि॥४७॥वेदपारायणंशस्तंजप
होमादिकंतथा कुरुष्वाद्ययथाशक्तितवकार्यंनविष्यति॥४८॥एतस्मादपरंकिं
चिद्व्रतंनास्तिधरातले॥नवरात्र्यधिकंवैश्यपावनंसुखदंतथा॥४९॥ज्ञानदंमोक्षदं
चैवसुखसंतानदंतथा॥शत्रुनाशकरंकामंनवरात्रिव्रतंसदा॥५०॥राज्यभ्रष्टेनरा
मेणसीताविरहितेनच॥विधिवत्पूजितादेवीनवरात्रिव्रतेनच॥५१॥कृष्यमूके
गिरिशृंगेरामेननृपसत्तम॥किंष्किंधायांस्ततंचैतद्व्रतंदुःखातुरेणतु॥५२

सततेनातिरामेणसीताविरहवाह्निना॥ विधिवत्पूजितादेवीनवरात्रिव्रतेनवै॥५३
तेनप्राप्ताथवैदेहीकृत्वासेतुंमहार्णवे॥ हत्वामंदोदरीनाथंकुंभकर्णंमहाबलं॥
५४॥ मेघनादंसुतंहत्वाकृत्वान्नृपंविभीषणं॥ अयोध्यायांसमागत्यप्राप्तंरामेणा
मिततेजसा॥५६॥ ॥इतिश्रीभागवतेमहापुराणेतृतीयस्कंधेसप्तविंशोध्यायः॥
२७॥ ॥जनमेजयउ॥ ॥कथंरामेणतच्चीर्णंव्रतंदेव्याःसुखप्रदं॥ राज्यभ्रष्टःकथं
सोयंकथंसीताहृतापुनः॥१॥ ॥व्यासउवाच॥ ॥राजादशरथःश्रीमानयोध्या
धिपतिःपुरा॥ सूर्यवंशधरश्चासीद्देवब्राह्मणपूजकः॥२॥ वृद्धावस्थासुतस्या
न्नूचत्वारश्चसुताःकिल विष्णुतेजसमुद्भूताः पदार्थाइवपार्थिव॥ तेषांरामसु
ज्येष्ठोभूद्भरतस्तत्समोनुजः॥ लक्ष्मणश्चैवशत्रुघ्नःसदृशागुणरूपतः॥४॥ कौश

ल्यायाःसुतोरामःकैकेय्याभरतस्ततः॥ सुमित्रातनयौजातौयमलौद्वौमनोहरौ॥५॥ते
जातावैकिशोराश्चधनुर्बाणधराःकिल॥ सूनवःकृतसंस्काराराज्ञोनृपतेःसुखवर्द्धका
ः॥ कौशिकेनतदागत्यप्रार्थितोरघुनंदनः॥ राघवंमखरक्षार्थमूनषोडशवार्षिकं॥
७॥ तस्मैसोयंददौरामंकौशिकायसलक्ष्मणं॥ तौसमेत्यमुनिंमार्गेजग्मतुश्चारुद
र्शनौ॥८॥ ताडकानिहतामार्गेराक्षसीघोरदर्शना॥ रामेणैकेनबाणेनमुनीनां
दुःखदासदा॥९॥ यज्ञरक्षाकृतातत्रसुबाहुर्निःशरवः॥ मारीचोथमृतप्रायो
निक्षिप्तोबाणवेगतः॥१०॥ एवंकृतंमहत्कर्मयज्ञस्यपरिरक्षणं गतास्तेमिथि
लांसर्वेरामलक्ष्मणकौशिकाः॥११॥ अहिल्यामोचिताशापान्निःपापासाकृता
व्रजा जनकस्यनगरंतोजग्मतुर्मुनिनासह॥१२॥ बभंजशिवधनुर्यंसज

नकेनपणीकृतं॥उपयेमेततः सीतांजनकींचरमांशजां॥१३॥ लक्ष्मणायददौ
राजापुत्रींकन्यांतथोर्मिलां॥कुशध्वजसुतेकन्येभरतशत्रुघ्नयोःपतुः॥१४॥एवं
दारक्रियास्तेषांभ्रातृणांचाभवन्नृप॥चतुर्णांमिथिलायांतुयथाविधिविधानतः
१५॥राज्ययोग्येसुतेदृष्ट्वाराजादशरथस्तदा॥राघवाणुरंदातुंमनश्चक्रेगृहाय्वे॥
१६॥तन्नारंविहितदृष्ट्वाकैकेयीपूर्वकल्पितौ॥वरौसंप्रार्थयामासभरतेरिंवरोवति
नं॥१७॥राज्यंसुतायमेकेकेनभरतायमहात्मने रामायवनवासांश्चचतुर्दशस
मास्तथा॥१८॥रामस्तुवचनात्तस्याः सीतालक्ष्मणसंयुता॥जगामदंडकारण्यं
राक्षसैरुपसेवितं॥१९॥राजादशरथः पुत्रविरहेणप्रपीडितः॥जहौप्राणान
मेयात्मापूर्वशापादसत्यजात्॥२०॥भरतःपितरंदृष्ट्वामृतंमातृप्रकृतेभवे॥

नजग्राहमृधंराज्यंभ्रातुःप्रियचिकीर्षया॥२१॥पंचवट्यांवसन्रामोरावणावरजां
वने॥शूर्पणखांविरूपांवैचकारातिस्मरातुरां॥२२॥खरादयस्तुतांदृष्ट्वाछिन्ननासां
निशाचराः॥चक्रुःसंग्राममतुलंरामेणामिततेजसा॥२३॥खरादयस्तुतांदृष्ट्वाछिन्न
नासांनिशाचराः॥चक्रुःसंग्राममतुलंसजघानखरादींश्चदैत्यानपिबलान्वितान्
मुनीनांहितमन्विछन्रामः सत्यपराक्रमः॥२४॥गत्वाशूर्पणखालंकांखरदूषण
घातनं॥दुःखिताकथयामासरावणायचराघवात्॥२५॥सोपिश्रुत्वाविनाशंतंस्वा
नांक्रोधवशः खलः॥जगामरथमारुह्यमारीचस्याश्रमंतदा॥२६॥गत्वाहेममृगं
गंतुंप्रेषयामासरावणः॥सीताप्रलोभनार्थंवैमायाविमनसंभवं॥२७॥सोथ
हेममृगोभूत्वासीतादृष्टिपथंगतः॥मायावीचातिचित्रांगश्चरन्पवसमंतिके॥

रा॰त॰
१०५

२८॥ तंदृष्ट्वाजानकीप्राहराघवंदैवनोदिता॥ रमणीयामृगंकांतेतिस्वाधीनपतिका
यथा॥२९॥ अविचार्यापिरामोपितत्रसंस्थाप्यलक्ष्मणं॥ मत्वारंधनुरादाययया
वेगपदानुगः॥३०॥ मारीचोपिहरिंदृष्ट्वामायाकोटिविशारदः॥ दृश्यादृश्योबभू
वाथजगामचवनाद्वनं॥३१॥ गत्वादूरतरंरामःक्रोधाकृष्यशरासनः॥ जघानचा
तितीक्ष्णेनशरेणकृत्रिमंमृगं॥ सहतोबलवान्तत्रचुक्रोशात्स्वरादुःखितः॥
लक्ष्मणोहंहतोस्मीतिमायावीतस्करःखलः॥३३॥ सत्राक्ष्यस्तुमलस्तावज्जानकी
संस्कृतस्वरा॥ राघवस्येतिसामत्वादीनादेवरमब्रवीत्॥३४॥ गच्छलक्ष्मणतूर्णंत्वं
हतोसौरघुनंदनः॥ त्वामाकयतिसौमित्रेसाहाय्यंकुरुसत्वरः॥३५॥ तत्राह
लक्ष्मणःसीतांसीतांरामवधाहृति॥ नाहंगच्छेयमुक्त्वात्वामेकाकिनींहिहाश्रमे

३६॥ आज्ञामेराघवस्यात्रतिष्ठेत्वजनकात्मजे॥ तदतिक्रमभीतोहंनत्यजामितवां
तिकं॥३७॥ अन्तवेरावयंदुष्टैर्वसेमायाविनिःकलं॥ त्यक्त्वांत्वांनाधिगच्छामिपदमे
कंशुचिस्मिते॥३८॥ कुरुधैर्यंनमेश्रेष्ठहंतुकोपिक्षमःक्षितौ॥ नाहंत्यक्त्वागमिष्या
मिविलंघ्यरामभाषितं॥३९॥ व्यासउ॰॥ रुदतीसुदतीप्राहतंतदाविधिनोदिता
अक्रूरावचनंक्रूरंलक्ष्मणंशुभलक्ष्मणं॥४०॥ अहंजानामिसौमित्रेसानुरा
गंत्वमांप्रति॥ प्रेरितंभरतेनैवमदर्थेसहसंगतं॥४१॥ नाहंतथाविधानारी
स्वैरिणीकुडकायतु॥ मृतेरामेपतिंत्वांवैकर्तुमिच्छामिकाम॥४२॥ नागमिष्य
तिचेद्रामोजीवितंसत्यजाम्यहं॥ विनातेननजीवामिविधुरादुःखितान्वहं॥ गच्छ
तातिष्ठसौमित्रेनजानेहंतवेप्सितं॥ कृगतंतेघसौडाद्येजेष्ठेथमरतेखिलं॥४४

ना·नृ· व्यासउवाच॥ तच्छ्रुत्वावचनंतस्याः लक्ष्मणोदीनमानसः॥ रुद्धकंठोगिराप्रोवाचतां
तदाजनकात्मजां॥४५॥ किमीदृक्षितिजेवाक्यमयिक्रूरतरंकिल॥ किंचिदनिष्टं
१०६ तेन्याविचिंतयामिधियाप्यहं॥४६॥ विधिनाप्रेरितान्नूनमयित्वंदारुणंवचः॥ अ
कल्याणमहंमन्येजातुममचेतनघ॥४७॥ वाग्बाणैस्तुहितोयामित्यक्त्वात्वांरघु
नंदनं॥ अग्रजस्यपदंपश्यन्नरोशाकात्तःपृथिवीपते॥४८॥ गतेथलक्ष्मणेतत्रराव
णःकपटाकृतिः॥ भिक्षुवेषंततःकृत्वाप्रविवेशतदाश्रमं॥४९॥ जानकीतंय
तिंमत्वार्थमितमादरात्॥ जैवंसमर्पयामासरावणायदुरात्मने॥५०॥ तांप
प्रच्छसदुष्टात्मानर्मपूर्वंमृदुःस्वरः॥ कासित्वंपद्मपत्राक्षीवनेचैकाकिनीप्रिये॥५१
५१॥ पिताकस्तेथवाभ्रातारुक्वराकःकपतिःस्तव॥ मृदेनैकाकिनीचात्रमुक्तासिवर

वर्णिनी॥५२॥ निर्जनेत्रवनेकित्वंसौधाइववससिप्रिये॥ उटजेमुनिपत्नीवक
न्यासमप्रभा॥५३॥ व्यासउवाच॥ ॥इतितस्यवचःश्रुत्वाप्रत्युवाचविदेहजा॥ द्वि
जदेहंयतिंज्ञात्वामदोदर्याःपतिंतदा॥५४॥ राजादशरथःश्रीमांश्चत्वारस्तस्यवै
सुताः॥ तेषांज्येष्ठःपतिर्मेत्रवनेवसतिराघवः॥५५॥ विवासितोस्तिकैकेय्याःते
नृपतिनावने चतुर्दशसमारामवसतेत्रसलक्ष्मणः॥५६॥ जनकस्यसुताचाहं
सीतानाम्नातिविश्रुता॥ त्र्यंबकंवैधनुःकामंरामेणहिहृतानया॥५७॥ रामबाहु
बलेनात्रवसामोनिर्जनेवने॥ कांचनंमृगमालोक्यहंतुमेपतिनिर्गतिः॥५८॥
लक्ष्मणोपिपुनःश्रुत्वाशब्दंवात्तुगतोधुना॥ तयोवाक्यबलाद्दत्रनिर्भयाहंव
सामिवै॥५९॥ यथेदंकथितंसर्ववृत्तांतंवनवासजं॥ कथयत्वंमहानागतंवा

गमनकारणं ॥६०॥ युवासि त्वं सुरूपासि कस्मात्त्वं वर्जितं त्वया ॥ नवागत्यसहृणां
तं करिष्यति यथाविधि ॥६१॥ आश्रमोत्र वने घोरे शून्ये त्वं राक्षसे कुले ॥ सत्यं ब्रू
हि पतिर्मेद्य मृगं हत्वा गमिष्यति ~~तवागत्यस्य हर्म्यं तं करिष्यति यथाविधि~~
रावण उ॥ ॥लंकेशोहं महाराजा श्रीमान्मंदोदरीपतिः ॥ त्वत्कृतेत्रागतमेतन्मे रूपं
चाद्यैव छद्मना ॥६३॥ आगतोहं वरारोहे नगवत्साश्रितोत्र वै ॥ जनस्थाने हतौ
भ्रातरौ मे खरदूषणौ ॥६४॥ अंगीकुरु नृपं मां त्वं त्यक्त्वा तं तापसं पतिं ॥ हृत
राज्यं गतश्रीकं निर्बलं वनवासिनं ॥६५॥ पट्टराज्ञी भव त्वं वै मंदोदर्योपरि स्फुटं ॥ दा
सोस्मि तव तन्वंगि स्वामिनी भव भामिनि ॥६६॥ जेताहं सर्वलोकानां पतामि
पादयोस्तव ॥ करं गृहाण मद्यत्तं सनाथं कुरु जानकि ॥६७॥ पिता तेयाचितः पूर्वं

मया वै त्वत्कृते खलु ॥ न दत्ता जनकेन त्वं पणबंधमिषेण ह ॥६८॥ रुद्रचापभया
नाहं संप्राप्तस्तु स्वयंवरे मनो मे संस्थितं तावच्छ्रुत्वा त्वां विरहातुरं ॥६९॥ वनेत्र
संस्थितां श्रुत्वा पूर्वानुरागमोहितः ॥ आगतोस्म्यसितापांगि सफलं कुरु मे श्रमं
॥७०॥ ॥इति श्रीभागवते महापुराणे तृतीयस्कंधे अष्टाविंशतितमोध्यायः ॥ व्यास
उ॥ तदाकर्ण्य वचो निर्लज्जं जानकी भयविह्वला ॥ विषमा नास्थिरं कृत्वा मनो वाच दशा
ननं ॥१॥ पौलस्त्य किमसद्वाक्यं त्वमात्थ स्मरमोहितः नाहं स्वैरिण्यनार्या वै जनन
कस्य कुलोद्भवा ॥२॥ गच्छ कामं दशग्रीव रामस्त्वां निहनिष्यति ॥ मत्कृते मरणं ते
त्र भविष्यति न संशयः ॥३॥ इत्युक्त्वा पर्णशालायां गता सा वह्निसंनिधौ ॥ गच्छ ग
च्छेति वदती रावणं लोकरावणं ॥४॥ सोथ त्यक्त्वा निजगामोटजमंतिके ॥ बलात्

भा·त· ग्राहतां बालां रुदतीं नयविकलां ॥५॥ रामरामेति क्रंदंतिलक्ष्मणेति मुहुर्मुहुः ॥ गृही
१०८ त्वा निर्गतः पापो रथमारोप्य सत्वरः ॥६॥ गच्छता रुणा पुत्रेण मार्गे रुद्धो जटायुषा ॥
संग्रामो नूनं महानासीद्स्तयोस्तत्र वनांतरे ॥७॥ हत्वा तं जानकीं गृह्य गतो सौ राक्ष
साधिप ॥ लंकायां क्रंदती सीता कुररीवदुरात्मना ॥८॥ अशोकवनिकायां सा
स्थापिता राक्षसीवृता ॥ स्वव्रतान्न विचलिता सामदानादिभिः किल ॥९॥ रामो
न पि तं मृगं हत्वा मांसमादाय विनिर्वृतः ॥ आयांतं लक्ष्मणं वीक्ष्य किल तं तेनुज्ञासमं ॥१०
एकाकिनीं प्रियां हित्वा किमर्थं त्वमिहागतः ॥ श्रुत्वा स्वनं तु पापस्य राघवस्त्वब्र
वीदिदं ॥११॥ सौमित्रिस्त्वब्रवीद्वाक्यं बाणाहत भ्रमो ॥ जानक्या इमिहायातः का
लयोगान्न संशयः ॥१२॥ तदा तौ पर्णशालायां गत्वा वीक्ष्य ति दुःखितौ ॥ जानकात्वे

षणे यत्नकं तु समुद्यतावुभौ ॥१३॥ मार्गमाणौ तु संप्राप्तौ यत्र सो पतितः खगः जटा
युर्हतशेषस्तु पतितः पृथिवीतले ॥१४॥ तेनोक्तं रावणेनाद्य हृता सा जनकात्म
जा ॥ मयावरुद्धः पापात्मा पातितोहं मृधे पुनः ॥१५॥ इत्युक्त्वासौ गतप्राणः संस्तु
तो राघवेण वै ॥ तस्योर्ध्वदैहिकं कर्म राघवो निर्गतो ततः ॥१६॥ कबंधं घातयित्वा सौ प्रा
प्य पंपां सो चयन्मनुः वचनात्तस्य हरिणा सख्यं चक्रेथ राघव ॥१७॥ हत्वा च वालि
नं वीरं किष्किंध्या राज्यमुत्तमं ॥ सुग्रीवाय ददौ रामः कृतसख्यो मयार्थितः १८ त
त्रैव वार्षिकान्मासांस्तस्थौ लक्ष्मणसंयुतः ॥ चिंतयन्जानकीं चित्ते हृतां दशशि
रेण वै ॥१९॥ लक्ष्मणं प्राह रामस्तु सीताविरहपीडितः सौमित्रे कैकयसुता
जाता पूर्णमनोरथा ॥२०॥ नष्टा हा जानकी नूनं नाहं जीवामि तां विना ॥ न गमि

ष्याम्ययोध्यायां मृते जनकनंदनी ॥२१॥ गतं राज्यं वने वासो मृतस्तातो हृता प्रिया
रा. च. पीडयन्मां सदुष्टात्मा दैवोऽयं किं करिष्यति ॥२२॥ दुर्ज्ञेयं नवितव्यं हि प्राणिनां नर
१०९ तानुज आवयोः का गतिः का मन्नविष्यति सुखदुःखदा ॥२३॥ प्राप्य जन्मम
नोर्वंशे राजपुत्रावुभौ किल ॥ वनेति दुःखनो कारो जातो पूर्वेत्र तेन वै ॥२४
त्यक्त्वात्वमपि नो गात्वमेकया सह विनिर्गतः देवयोगाच्च सौमित्रे मग्नोस्मि
दुःखसागरे ॥२५॥ सुदुष्टदुःखतरत्ययं ॥ कोप्यस्मत्कुले पूर्वं मत्समो दुःखनाम्बर
:अकिंचनो हमः का मन्तमृतो नन्नविष्यति ॥२५॥ किं करोम्यद्य सौमित्रे मग्नो
स्मि दुःखसागरे ॥ न चास्ति तरणोपायो त्यस्त हायस्य मे किल ॥२७॥ न वन्न
न बलं वीरत्वमेकः सहचारकः ॥ कोपं कस्मिन्करग मध्यनोगेस्मिन्स्वत्ततेतुज

२८॥ गतं इस्त्वगतं राज्यं कृपणादिंशमनोपमं ॥ वनेसम्तु संप्राप्तः को वेद विधि
निर्मितं ॥२९॥ बालजाबानुवैदेही चलिता चावयोसह नीता दैवेन दुष्टेन श्रा
माडुःखतरां दिशां ॥३०॥ लंकेशस्य गृहे रामा कथं दुःखान्नविष्यति ॥ पतिव्र
तासुशीला च मयि प्रीतियुता त्वरां ॥३१॥ न सा लक्ष्मणवैदेही या तस्य वशगा
भवेत् ॥ स्वैरिणी ववरा रोहा कथं वा जनकात्मजा ॥३२॥ लमेत्वा एणनियं नूनं मै
थिली भरतानुज ॥ न रावणस्य वशगा भवेदिति सुनिश्चितं ॥३३॥ मृता चेज्जा न
कीवीरप्राणान्त्यार्दं विमर्मिह ॥ लतेता मसितापांगी किमेवद्देन लक्ष्मणः ॥३४॥
एवं विलपमानं तं रामं कमललोचनं ॥ लक्ष्मणः प्राह धर्मात्मा सौवलतया गिरा ॥३५
धैर्यं कुरु महाबाहो त्यक्त्वा तरतामिह ॥ आनयिष्यामि वैदेहीं हत्वाहं राक्षसाधमं ॥३६

भा.तृ. आपदिसंपदितुल्याधीराभवंतितेधीरा॥ अल्पधियस्तुविपत्काष्टेतिष्ठाविभ
वे॥३७॥ संयोगाविप्रयोगश्चदैवाधीनाश्चदेवता॥ शोकस्तुकीदृशस्तत्रदेहीनाल
११० वशोकचित्॥३८॥ राज्यद्यथावनेवासोवैदेह्याहरणंयथा॥ तथाकालेनसमीची
नंसंयोगोपिभविष्यति॥३९॥ प्रारब्धंसुखदुःखानांभोगान्निवर्तनंध्रुवं॥ नान्यथा
जानकीजानेतस्माच्छोकंत्यजाधुना॥४०॥ वानराःसंततिंभूयांसोगमिष्यंतिचतु
र्दिशं॥ सिधिंजनकनंदिन्याः आनयिष्यंतितेकिल॥४१॥ ज्ञात्वामार्गंस्थितिंतत्र
गत्वालत्वापराक्रमं॥ हत्वातंपापकर्माणमानयिष्यामिमैथिलीं॥४२॥ ससैन्यंनर
त्वापिसमाक्रयमहानुजं॥ हनिष्यामोवयंशत्रुंकिंशोचसिनृपात्मज॥४३॥ रघु
नैकेनरथेनेवजितासर्वादिशःपुरा॥ तद्वंशजःकथंशोकंकर्तुमर्हसिराघव॥४४

एकोहंसकलाञ्जेतुंसमर्थोस्मिसुरानसुरान्॥ किंपुनस्त्वत्सहायोवैरावणंक्षुद्रकं
टकं॥४५॥ जनकवासमानीयंसाह्याय्येरघुनंदन॥ हनिष्यामिदुराचारंरावणं
सुरकंटकं॥४६॥ सुखस्यानंतरंदुःखंदुःखस्यानंतरंसुखं चक्रनेमिरिवैकांतंनभ
वेद्रघुनंदन॥४७॥ मतोतिक्रांतरंयस्यसुखादुःखसमुद्भवे॥ सशोकसागरेमग्नोन
सुखीस्यात्कदाचन॥४८॥ इंद्रेणव्यसनंप्राप्तंपुरावैरघुनंदन॥ नघुषःस्थापितोदे
वःसर्वैर्मघवतःपदे॥४९॥ स्थितःपंकजमध्येसोवज्रभृगिणानपि। अज्ञातवासम
घवान्नीतस्तस्कानिजंपदं॥५०॥ पुनःप्राप्तंनिजंस्थानंकालेविपरिवर्त्तति। नघु
षःपतितोभूमौशापादजगराकृतिः॥५१॥ इंद्राणीकामयानस्तुब्राह्मणानवमन्य
च अगस्तिकोपात्संजातःसर्पदेहापमहीपति॥५२॥ तस्माच्छोकोनकर्तव्यो

सनेसतिराघव॥ उद्यमे चित्तमास्थाय स्थातव्यं वै विपश्यता॥५३॥ सर्वज्ञोसि
महाभाग समर्थोसि जगत्पते॥ किं शास्तस्त्वात्यर्थं करुषे शोकमात्मनि॥५४॥
व्यासउ॥ ॥इति लक्ष्मणवाक्येन बोधितो रघुनंदनः॥ समाधाय मनः कामं बभूव
विगतज्वरः॥५५॥ ॥इति श्रीभागवते महापुराणे तृतीयस्कंधे एकोनत्रिंशोध्याय
ः॥ व्यासउ॥ ॥एवं तौ संविदं कृत्वा यावत्तूष्णीं बभूवतुः॥ आजगाम तदाकाशादक
स्मान्नारदो मुनिः॥१॥ रणयन्महतीं वीणां स्वरसंग्रामसुतं प्रियां॥ गायन्बृहद्रथंत
रैसामनीस्वरितः स्वरैः॥२॥ दृष्ट्वा तं राघवोत्थाय ददावथहर्षोत्तमं॥ आसनं चार्घ्य
पाद्यं च कृतवान्नमितद्युति॥३॥ पूजां परमिकां कृत्वा कृतांजलिरुपस्थितः॥ उपवि
ष्टः समीपे तु स्तत्रज्ञो मुनिना हरिः॥४॥ उपविष्टं तदा रामं सानुजं खिन्नमानसं॥ प

प्रच्छ नारदः प्रीत्या कुशलं मुनिसत्तमः॥५॥ कथं राघवशोकाय यथा वै प्राकृतो नरः॥ दृ
तां सीतां च जानामि रावणेन दुरात्मना॥६॥ सुरसंभ्रमतश्चाहं कृतवान्जनकात्मजा
पौलस्त्येन हृतां मोहान्मरणं स्वमजानता॥७॥ तव जन्म च काकुत्स्थ पौलस्त्यनिध
नाय वै मैथिली हरणं नूनं मतद्देयं नराधिप॥८॥ पूर्वजन्मनि वैदेही मुनिपुत्री त
पस्विनी॥ रावणेन वने दृष्टा तपस्यंती शुचिस्मिता॥९॥ प्रार्थिता रावणेनासौ भ
वभार्येतिमानकि॥ तिरस्कृतस्तया पापः प्राक्तां जग्राह करबलात्॥१०॥ सत्याप्तंत हा
रामरावणं तापसीन्तद्वा॥ कुपितात्मस्कुमिक्ष्वंति देहं स्वं सम्यगृक्षिपितं॥११॥ दुरात्मन
वनार्थं नविष्यामि धरातले॥ अयोनिजा वरा नारी त्यक्त्वा देहं महावपि॥१२॥ सेयं र
मांसमंभूता महीतातेन स्वसा॥ विनाशार्थं कुलस्यैव व्याजीव संगसत्तमात्॥१३॥ त

ना॰तं॰ वजन्म च काकुत्स्थ तस्य नाशाय चामरैः॥ प्रार्थितस्य हरेरंशात् जनं वंशोप्यजन्म च॥१४
कुरुष्वैर्यं महाबाहो तत्र सा वर्तते वशा॥ सती धर्मरता सीता त्वां ध्यायंती दिवानिशं॥
११२ १५॥ कामधेनोपयः पात्रे न त्वा मघवता स्वयं॥ पानार्थं प्रेषितं तस्यास्तस्मितं चामृतं त
या॥१६॥ सुरभीपयपानास्या क्षुत्तृट्दुःखवर्जिता॥ जाता कमलपत्राक्षी वर्तते वी
क्षिता मया॥१७॥ उपायं कथयाम्यद्य तस्य नाशाय राघव॥ व्रतं कुरुष्व श्रीमन्नश्वि
नेमासि सांप्रतं॥१८॥ नवरात्रोपवासं च भगवत्याः प्रपूजनं॥ सर्वसिद्धिकरं राम
जपहोमविधानतः॥२०॥ मेध्यैश्च पशुभिर्देव्या बलिर्दत्तो विशंसितैः॥ तन्मांसह
वनं कृत्वा सुशक्तस्त्वं भविष्यसि॥२१॥ सुखिना राम कर्तव्यं नवरात्रिव्रतं शुभं॥ वि
शेषेण च कर्तव्यं पुंसा कष्टगते नवै॥२२॥ विश्वामित्रेण काकुत्स्थ कृतमेतन्न संश

यः॥ भृगुणाथ वसिष्ठेन कश्यपेन तथानघ॥२३॥ गुरुणा कृतदारेण कृतमेत
न्महाव्रतं तस्मात्त्वं कुरु राजेंद्र रावणस्य वधाय च॥२४॥ इंद्रेण वृत्रनाशाय कृतं व्र
तमनुत्तमं॥ त्रिपुरस्य विनाशाय त्रिनेत्रेनापि पुरा कृतं॥२५॥ हरिणा मधुनाशाय कृतं त
मेरौ महामते॥ विधिवत्कुरु काकुत्स्थ व्रतमेतदतंद्रितः॥२६॥ ॥ राम उवाच॥ का देवी
किं प्रभावा सा कुतो जाता किमाह्वया॥ व्रतं किं विधिवद्ब्रूहि सर्वज्ञोसि दयानिधे॥
२७॥ ॥ नारद उ॥ ॥ शृणु राम सदा नित्या शक्तिराद्या सनातनी॥ सर्वकामप्रदा
देवी पूजिता दुःखनाशिनी॥२८॥ कारणं सर्वजंतूनां ब्रह्मादीनां कुरूद्वह॥ तया वि
ना न कोप्यस्ति स्पंदितुं हि क्षमो भवेत्॥२९॥ विष्णोः पालनशक्तिः सा कर्तृशक्तिः
पितुर्मम॥ रुद्रस्य नाशशक्तिः सा मान्या शक्तिर्यास्ति वै॥३०॥ यच्च किंचित्क्वचि

भो॰ तं॰
११३

दृष्टस्सदसद्भुवनत्रये ॥ तस्य सर्वस्य सा शक्तिस्त्वस्योत्पत्तिः कुतो भवेत् ॥ ३१ ॥ न ब्रह्मा
न च हरिर्विष्णुर्न रुद्रो न दिवाकरः ॥ न चेंद्राद्याः सुराः सर्वे न धराधराः ॥ ३२ ॥ तदा सा प्रकृ
तिः पूर्णा पूरुषेण परेण वै ॥ संयुता विरहस्येव युगादौ निर्गुणा शिवा ॥ ३३ ॥ सा च भूत्वा स
गुणा पश्चात्करोति भुवनत्रयं ॥ पूर्वं ससर्ज ब्रह्मादीन् हत्वा शक्तीः सर्वशः ॥ ३४ ॥ तां ज्ञा
त्वा मुच्यते जंतुर्जन्मसंसारबंधनात् ॥ सा विद्या परमा ज्ञेया वेदाद्या वेदकारिणी ॥ ३५
असंख्यातानि नामानि तस्या ब्रह्मादिभिः किल ॥ गुणकर्मविधानैस्तु कल्पितानि किं
ब्रुवे ॥ ३६ ॥ अकारादिक्षकारांतैः स्वरैर्वर्णैस्तु योजितैः ॥ असंख्यातानि नामानि भवति
रघुनंदन ॥ ३७ ॥ ॥ श्रीराम उ॰ ॥ ॥ विधिं मे ब्रूहि विप्रर्षे व्रतस्यास्य समासतः करोम्यद्यैव
श्रद्धावान्देव्याः पूजनकं तथा ॥ ३८ ॥ नारद उ॰ ॥ ॥ पीठ्वतला समे स्थाने संस्थाप्य जग

द्देविकां उपवासान्नवैव त्वं कुरु राम विधानतः ॥ ३९ ॥ आचार्योहं भविष्यामि कर्म
ण्यस्मिन् महीपते ॥ देवकार्यविधानार्थं उद्यतोहं करोम्यहं ॥ ४० ॥ व्यास उ॰ ॥ तच्छ्रु
त्वा वचनं सत्यं मत्वा रामः प्रतापवान् ॥ कारयित्वाथ भवनं पीठं स्थापयित्वांबिकां शि
वां ॥ ४१ ॥ विधिवत्पूजनं तस्याश्चकार व्रतवान्हरिः ॥ संप्राप्ते चाश्विने मासि सितस्मिन्ना
रिवेरेलदा ॥ ४२ ॥ उपवासपरो रामः कृतवान्व्रतमुत्तमं ॥ होमं च विधिवच्चक्रे बलि
दानं च पूजनं ॥ भ्रातरौ चक्रतुः प्रेम्णा व्रतं नारदप्रेरितौ ॥ ४३ ॥ अष्टम्यां मध्यरात्रे
तु देवी भगवती शिवा ॥ सिंहारूढा ददौ तत्र दर्शनं प्रतिपूजिता ॥ ४४ ॥ गिरिशृंगे स्थि
ता वाच राघवं सानुजं गिरा ॥ मेघगंभीरया चेदं भक्तिभावेन तोषिता ४५ देव्युवा
च ॥ ॥ राम राम महाबाहो तुष्टास्म्यद्य व्रतेन ते ॥ प्रार्थयस्व वरं कामं यत्ते मनसि वर्त्त

ते॥४६॥नारायणांशसंभूतस्त्वंवंशेमानवेनघे॥रावणस्यवधायैवप्रार्थितस्त्वम
रैरसि॥४७॥पुरामासीतनुंकृत्वाहत्वाघोरंचराक्षसं॥त्वयावैरक्षितावेदासुराणांहि
तमिछता॥४८॥भूत्वापौत्रीसुतःपूर्वंधृतवान्मंदरंगिरिं॥अकूपारप्रमंथानंकृ
त्वादेवानपोषयत्॥४९॥कोलरूपंपुराकृत्वादशनाग्रेणमेदिनीः॥धृतवानसित्वं
रामहिरण्याक्षंजघानह॥५०॥नारसिंहींतनुंकृत्वाहिरण्यकशपुंपुरा॥शक्रार्दं
समरेजित्वाहतवानसिराघव॥५१॥वामनंवपुरास्थायपुराछलितवान्बलिं॥भूत्वेंद्र
स्यानुजःकामदेवकार्यप्रसाधकः॥५२॥जमदग्निसुतस्त्वंवैविष्णोरंशेनसंगतः कृतांतं
क्षत्रियाणांतुदानंभूमिमदादजः॥५३॥तथेदानींचकाकुस्थजातोदशरथात्मजः प्रार्थि
तस्तुसुरैःसर्वैरावणेनातिपीडितैः॥५४॥कपयस्तेसहायावैदेवांशाबलवत्तराः॥त्त

विष्यतिनसंदेहःकर्तव्योत्रत्वयानघ॥५६॥वसंतेमेव्रतंकार्यंत्वयानवातिश्रद्धया॥हत्वा
तंरावणंपापंकुरुराज्यंयथासुखं॥५७॥एकादशसहस्राणिवर्षाणिपृथिवीतले॥कृत्वा
राज्यंरघुश्रेष्ठगंतासित्रिदिवंपुनः॥५८॥ ॥व्यासउ॥ ॥इत्युक्त्वांतर्दधेदेवीरामस्तुप्रीतमा
नसः॥समाप्यतद्व्रतंचक्रेप्रयाणंदशमीदिने॥५९॥विजयापूजनंकृत्वादत्वादानान्यने
कशः॥नारदस्तुव्रतस्यैसोसमुद्रान्निमुखोहरिः॥६०॥कपिपतिबलयुक्तःसानुजःश्री
पतिश्चप्रकटपरमशक्त्याप्रेरितःपूर्णकामः॥उदधितटगतोसौसेतुबंधंविधायप्रइनर
मरशत्रुंरावणंगीतकीर्त्तिं॥६१॥यःशृणोतिनरोनित्यमाख्यानंचरितमुत्तमं॥सभुक्त्वावि
पुलान्भोगान्प्राप्नोतिपरमंपदं॥६२॥संत्यन्यानिपुराणानिविस्तराणिजन्मेजय॥
श्रीमद्भागवतस्यास्यनतुल्यानीतिमेमतिः॥६३॥ ॥इतिश्रीभागवतेमहापुराणेकृती

यस्कंधेऽष्टादशसाहस्र्यांसंहितायांश्रीरामचरित्रेनवरात्रिव्रतकथनंनामत्रिंशोध्या
यः॥३०॥ ॥समाप्तोयंतृतीयस्कंधः॥ ॥श्रीरामायनमः॥ ॥शुभंभवतु॥ ॥

भा० कु श्रीगणेशायनमः॥ ॥ॐनमःश्रीचंडिकायै॥ ॥ब्रह्मानैवयदाहरिश्चगिरिजा॥
जानिन्नसूर्यःशशीनासिद्धिश्चमिदंतदादिसदसद्रूपंचतुर्दशीकिति॥यात्वेकाविह
१ रतेनसहितामुक्तात्मनात्विच्छयावंदेतांपरमात्मनःपरकलांमायांशिवांसुंदरीं॥१
॥जनमेजयउवाच॥ ॥वासवेयमुनिश्रेष्ठसर्वज्ञाननिधेनघ॥पृछामित्वामहं
स्वामिन्नस्मत्कुलविद्दकिः॥२॥शूरसेनसुतःश्रीमान्वसुदेवःप्रतापवान्॥कृतं
मयाहरिर्यस्यपुत्रत्वमवाप्तवान्॥३॥देवानामपिपूज्योसौद्योनाम्नानकदुंदु
भिः॥४॥कारागारेकथंसंबंधःकंसस्यधमतिस्तराः॥देवक्यानार्ययासार्थंकिमा राम
गःकृतवानसौ॥५॥देवक्याषट्बालानांविनाशःश्चकृतपुनः॥तेनकंसेनकेत्याहि १
ययातिकुलजेनच॥६॥कारागारेकथंजन्मंवासुदेवस्यवैहरेः॥गोकुलेचकथं

नीतोभगवान्सात्वतांपतिः॥७॥तौजन्मानंतरंकस्मात्पितरौनिगडेस्थितौ॥दे
वकीवसुदेवस्यकृष्णस्यामिततेजसः॥८॥कथंनामोचितौबंधात्पितरौहरिणा
मुने॥जगत्कर्तुंसमर्थेनस्थितोयत्रोहरेविभुः॥९॥प्राक्तनंकिंतयोःकर्मदुर्वि
ज्ञेयंमहात्मनोः॥जन्मतोवासुदेवस्ययन्नाशंनागमत्किल॥१०॥नंदपुत्रीच
काबालाकंसेनयाविपोथिता॥शिलायांनिर्गताव्योम्निजातात्वष्टभुजामता
॥११॥गार्हस्थ्यंचहरेर्ब्रूहिबहुभार्यस्यचानघ॥कार्याणितत्कृतान्येवदेहत्यागंचत
स्यवै॥१२॥किंचिदंत्याश्रुतंयत्तु मनोदयतीवमे॥चरितंवासुदेवस्यत्वमाख्या
हियथातथं॥१३॥नरनारायणौदेवौधर्मपुत्रौमहात्मनौ॥तपश्चेरतुरुत्तमौ॥ये
मुनिबहुवर्षाणिपुण्येचबदरिकाश्रमे॥१४॥निराहारौजितात्मानौनिस्पृहौजि

गा·च· तपश्चरणे॥ विष्णोरंशौ समाख्यातौ भवता मुनिसत्तम॥१५॥ तयोरंशावतारौ हि जिष्णु
कृष्णौ महाबलौ॥ प्रसिद्धौ मुनिभिः प्रोक्तौ सर्वज्ञैर्नारदादिभिः॥१६॥ विद्यमानशरीरौ
२ तौ कथं देहांतरं गतौ॥ नरनारायणौ देवौ पुनः कृष्णार्जुनौ कथं॥१७॥ यौ चक्रतुस्त
पश्चोग्रं मुक्त्यर्थं मुनिसत्तमौ॥ तौ कथं प्रापतुर्देहौ क्षात्रयोनौ महातपौ॥१८॥ शूद्रः
स्वधर्मनिष्ठस्तु मृतो वैश्यत्वमाप्नुयात्॥ वैश्यः स्वधर्मनिष्ठस्तु देहांते क्षत्रियो भवेत्
१९॥ क्षत्रियस्तु शुभाचारो मृतो वै ब्राह्मणो भवेत्॥ ब्राह्मणो निस्पृहः शांतवीतरा
गो विमुच्यते॥२०॥ विपरीतमिदं भाति नरनारायणौ भवतु॥ तपसा शोषितात्मानौ राम०
क्षत्रियौ तौ बभूवतु॥२१॥ केन तौ कर्मणा शांतौ जातौ शापेन वा पुनः॥ ब्राह्मणात्क्ष २
त्रयोनौ कारणं वद तन्मुने॥२२॥ यादवानां विनाशं च ब्रह्मशापादिति श्रुतं॥ ब्रह्मण्या

पि हि गांधार्याः शापेनैव कलक्षयं॥२३॥ प्रद्युम्नहरणं चैव शंबरेण कथंन्नतं॥ वर्त्त
माने वासुदेवे देवदेवे जनार्द्दने॥२४॥ पुत्रस्य सूतिकागेहाद्धरणं चातिदुर्घटं॥ द्वार
कादुर्गमध्याद्धि हरिवेश्माद्दुरत्ययात्॥२५॥ न ज्ञातं वासुदेवेन तत्कथं दिव्यचक्षुषा
संदेहोयं महान्मह्यं निःसंदेहं कुरु प्रभो॥२६॥ पत्न्यश्च वासुदेवस्य दस्युभिर्लुंठिताः कृ
ताः॥ स्वर्गं गते देवदेवे तत्कथं मुनिसत्तम॥२७॥ संशयोन्योस्ति मे ब्रह्मन् चित्तं दोल
नकारकः॥ विष्णोरंशसमुत्पन्नः शौरिर्भूभारहारकृत्॥२८॥ स कथं मथुराराज्यं जया
त्त्यक्त्वा जनार्द्दनः॥ द्वारवत्यां गतः साधो ससैन्यः ससुहृज्जनः॥२९॥ अवतारो
हरेः प्रोक्तो भूभारहरणाय वै॥ पापात्मानं विनाशाय धर्मसंरक्षणाय च॥३०॥ तत्क
थं वासुदेवेन चौरास्ते न निपातिताः॥ ये हृता वासुदेवस्य पत्न्यः संलुंठितास्तथा॥३१

मा॰च॰ त्तेनास्तेकिंनविज्ञातासर्वज्ञेनसतापुनः॥भीष्मद्रोणवधःकामंनृपारहरणेमतः॥
३३॥पितामहात्मानःयेचपांडवाधर्मतत्पराः॥कृष्णभक्ताःसदाचारायुधिष्ठिरपुरंग
३ मः॥३४॥तेगत्वाराजसूयंचयज्ञराजंविधानतः॥दक्षिणाविविधादत्वाब्राह्मणेभ्यो
तिभावतः॥३४॥पुण्यपुंजादिदेवांशाःवासुदेवाश्रितामुने॥घोरदुःखंकथंप्रोक्ताः
कगतंमुक्तंचयत्॥३५॥किंतत्पापंमहारौद्रंयेनतेपीडितात्वरं॥द्रौपदीचमहा
भागवेदीमध्यात्समुत्थिता॥३६॥रमांशाजाचसाध्वीचपतिभक्तिपरातथा॥साक
थंदुःखमतुलंप्राप्ताघोरंपुनःपुनः॥३७॥दुःशासनेनसाकेशेगृहीत्वापीडितात्वरं॥ राम॰
रजस्वलासभायांतुनीतानीतैकवाससा॥३८॥विराटनगरेदासीजातामत्स्यस्यसापु
नः॥धर्षिताकीचकेनाथरुदंतीकुररीयथा॥३९॥हृताजयद्रथेनाथक्रंदमानातिदुःखि ३

ता॥मोचितांपांडवैःपश्चात्बलवद्भिर्महात्मभिः॥४०॥पूर्वजन्मकृतंकिंतत्पातकंयेन
साध्वी॥दुःखान्यनेकविधान्याप्ताकथयाद्यमहामते॥४१॥राजसूयंक्रतुवरंकृत्वाते
ममपूर्वजाः॥दुःखंमहत्तरंप्राप्ताःसद्यैवहरिमानसाः॥४२॥पूर्वजन्मकृतंतैयैतत्तेनग
तंदानयाजनैः॥देवांशानांकथंतेषांमत्रायोयमभूदिह॥४३॥सदाचारैस्तुकौंते
यैःभीष्मद्रोणादयोहताः॥कुलेनधनलोभार्थंजानताक्ष्वरंजगत्॥४४॥प्रेरितावासु
देवेनपापेघोरेमहात्मना॥कुटंबक्षयजेनस्मिन्हरिणापरमात्मना॥४५॥वरंभि
क्षाटनंसाधोनीवारैर्जीवनंवरं॥पोष्यान्हत्वातिभोगाढ्यैर्विराज्येनजीवनंवरं॥४६॥उ
च्छिन्नस्तुत्वयावंशोरक्षितामुनिसत्तमः॥समुत्पाद्यसुतान्नासुगोलकान्मातरास
नात्॥४७॥सोल्पेनैवचकालेनक्षयंनीतःस्वकैःकिल॥पितामेकुलतंतुस्तुहरि

भा॰च॰ णारक्षितःपुनः॥४८॥ सोपुत्रमेकुलेजातोविराटतनयासुतः॥ तापसस्यगलेसर्पंन्य
स्तवान्कथमद्भुतं॥४९॥ नैकोपिब्राह्मणंद्वेष्टिक्षत्रियःसत्कुलोद्भवः॥ तापसंमौनसं
४ युक्तंपित्राकिंतत्कृतंमुने॥५०॥ एतैरन्यैश्चसंदेहैर्विकलंमेमनोधुना॥ स्थिरंकुरु
पितःसाधोसर्वज्ञोसिदयानिधे॥५१॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेज
न्मेजयप्रश्नोनामप्रथमोध्यायः॥ ॥१॥ सूतउवाच॥ ॥एवंपृष्टःपुराणज्ञोव्यासः
सत्यवतीसुतः॥ परिक्षितसुतंशांतंततोवैजनमेजयं॥ राजन्किंकथयाम्येतत्कर्म
णांगहनागतिः॥ दुर्ज्ञेयोकिलजःदेवानांमानवानांचकाकथा॥२॥ यदासमुत्थितंचै राम॰
तद्ब्रह्मांडंत्रिगुणात्मकं॥ कर्मणैवसमुत्पत्तिःसर्वेषांनात्रसंशयः॥३॥ अनादिनिधना ४
ःजीवाकर्मबीजसमुद्भवाः॥ नानायोनिषुजायंतेम्रियंतेचपुनःपुनः॥४॥ नकर्म

णाविनादेहसंयोगोवैकदाचनः॥ शुभाशुभैस्तथामिश्रैःकर्मभिर्वेष्टितंत्विदं॥५॥ त्रि
विधानिहितान्यबुधास्तत्वविदश्चये॥ संचितानिविचित्राणिप्रारब्धानितथापुनः
॥६॥ वर्त्तमानानिदेहेस्मिंस्त्रैविध्यंकर्मणाकिल॥ ब्रह्मादीनांचसर्वेषांतद्वशत्वंनराधि
प॥७॥ सुखंदुःखंजरामृत्युर्हर्षशोकादयस्तथा॥ कामक्रोधश्चलोभश्चसर्वेदेहगता
गुणाः॥८॥ दैवाधीनाश्चसर्वेषांप्रभवंतिनराधिप॥ रागद्वेषादयोभावाःस्वर्गेपिप्र
भवंतिहि॥९॥ देवानांमानवानांचतिर्यंचानांतथापुनः॥ विकाराःसर्वएवैतेदेहे
नसहसंगताः॥१०॥ पूर्ववैरानुयोगेनस्नेहयोगेनवापुनः॥ उत्पत्तिःसर्वजंतूनां
विनाकर्मनविद्यते॥११॥ कर्मणाभ्रमतेसूर्यःशशांकःक्षयरोगवान्॥ कपालीचत
थारुद्रःकर्मणैवनसंशयः॥१२॥ अनादिनिधनंचैतत्कारणंनृपसत्तम॥ तेनेदंशाश्व

ना॰ च॰ तं सर्वं गच्छ स्थावरजंगमं ॥१३॥ नित्यानित्यविचारेत्र विमग्ना मुनयः सदा ॥ न जानंति किमेत
द्धि नित्यं वानित्यमेव च ॥१४॥ मायायां विद्यमानायां जगन्नित्यं प्रतीयते ॥ कार्यनाशः
५ कथं वा च अकारणे सति सर्वथा ॥१५॥ माया नित्या कारणं च सर्वेषां सर्वदा किल ॥ क
र्मबीजमतो नित्यं चिंतनीयं सदा बुधैः ॥१६॥ अत्र मत्यैव जगत्सर्वं कर्मतंतुनियंत्रितं
नानायोनिषु राजेंद्र चोत्तमाधममासु च ॥१७॥ इच्छया चेद्भवेज्जन्म विष्णोरमिततेज
सः ॥ युगे युगे घनेकासु योनिषु जगदात्मनः ॥१८॥ त्यक्त्वा वैकुंठसंवासं सुखभोगान
नेकशः ॥ विण्मूत्रमंदिरे वासं स्वतंत्रः कोपि वांछति ॥१९॥ पुष्पावचयलीलां च जलके
लिं सुखासनं ॥ त्यक्त्वा गर्भगृहे वासं को पि वांछति पंडितः ॥२०॥ तूलीतूलपटीं दिव्यां रा ५
य्यां पुष्पावनिर्मितां ॥ त्यक्त्वाधो मुखवासं वै को निवांछति पंडितः ॥२१॥ गीतनृत्यं च वा

द्यं च नानाभावसमन्वितं ॥ मुक्त्वा को नरके वासं मनसापि विचिंतयेत् ॥२२॥ सिंधुजात
तडागवानां रसं त्यक्त्वा सुदुस्तजं ॥ विण्मूत्ररसपानं च क इच्छेत्सक्तिमान्नरः ॥२३॥ गर्भवासा
त्परं नास्ति नरकं भुवनत्रये ॥ तद्भीत्याश्च प्रकुर्वंति मुनयस्तपउग्रकं ॥२४॥ हित्वा भोगं
श्च राज्यं च वने यांति मनस्विनः ॥ यद्भीतास्तु विमूढात्मा कः सेवितुमिहेच्छसि ॥२५॥ ग
र्भे तु दंतिल्लमयो जागराग्निस्तपस्तथा ॥ वपासंवेष्टनं क्रूरं किं सुखं तत्र भूपते ॥२६॥ व
रं कारागृहे वासो बंधनं निगडैर्दृढैः ॥ क्षणमात्रं न तु क्षणं गर्भवासः कदाचन ॥२७॥
गर्भवासे महद्दुःखं दशमाससनिवासतः ॥ तथा निःसरणे दुःखं योनियंत्रेति दारुणे ॥
२८॥ बालभावे तथा दुःखं मूकाज्ञभावसंयुते ॥ क्षुत्तृड्पीडावेदनाशक्ते परतंत्रेति कातरे
२९॥ क्षुधितो रुदतो बाला माता चिंतातुरा तदा ॥ भेषजं पातुमिच्छति ज्ञात्वा व्याधिव्य

भा॰च॰ यांहृतां॥३०॥नानाविधानिदुःखानिबाल—— भवंतिवै॥किंसुखंविविधाहृष्ट्वाजन्म
वांछंतिचेछया॥३१॥संग्राममभरैःसार्द्धंसुखंत्यक्त्वानिरंतरं॥कर्तुमिछेच्चकोमूढःश्रम
६ दंसुखनाशनं॥३२॥सर्वथैवनृपश्रेष्ठसर्वेब्रह्मादयःसुराः॥भुक्तंकर्मविपाकेनशश्व
वंतिसुखासुखं॥३३॥अवश्यमेवभोक्तव्यंभुक्तंकर्मशुभाशुभं॥देहवद्भिर्नृभिर्देवैस्ति
र्यग्भिश्चनृपोत्तम॥३४॥देवंहिपरमंविद्धिनृपालिंघ्यंसुरासुरैः॥अवश्यमेवभोक्तव्यं
सर्वथाशाकृतंकिल॥३५॥तपसादानयज्ञैश्चमानवइंद्रतांव्रजेत्॥क्षीणपुण्य
श्चशक्रोपितत्यैवनसंशयः॥३६॥रामावतारयोगेवैदेवावानरतांगताः॥तेवैतस्य राम॰
सहायार्थंगोपयादवतांगताः॥३७॥एवंयुगेयुगेविष्णुरवतारानेकशः॥करोतिध ६
र्मरक्षार्थंब्राह्मणाप्रेरितोऽनृश॥३८॥पुनःपुनःहरेरेवंनानायोनिषुपार्थिव॥अवतारा

भवंत्यन्येरथचक्रवदद्भुता॥३९॥दैत्यानांहननंकर्मकर्त्तव्यंहरिणास्वयं॥अंशांशेन
पृथिव्यांवैलब्ध्वाजन्ममहात्मना॥४०॥तदहंसंप्रवक्ष्यामिलक्ष्मजन्मकथांशुभां॥
यथासभगवान्विष्णुरवतीर्णोयदोःकुले ४१॥कश्यपस्यमुनेरंशोवसुदेवःप्रताप
वान्॥गोवृत्तिरभवद्राजन्पूर्वशापप्रभावतः॥४२॥कश्यपस्यचद्वेपत्न्यौशापादत्र
महीतले॥अदितिःसुरभिश्चैवमानुषत्वंगतेत्पुरे॥४३॥देवकीरोहिणीत्वेतुसमुत्प
न्नेशातस्तथा॥वरुणेनचसाशप्तोवैदत्तःकोपादितेःकृतं॥४४॥ ॥राजोवाच॥ ॥
किंकृतंकश्यपेनागयेनशप्तोमहानृषिः॥सभार्यःसकथंजातस्तद्वदस्वमहामतो॥४५
कथंवैभगवान्विष्णुस्तत्रजातोयदोःकुले॥योसौवैकुंठनिलयोरमापतिःस्वयं
स्थितः॥४६॥निदेशात्कस्यभगवान्वर्त्ततेमनुरव्ययः॥नारायणःसुरश्रेष्ठोयु

गादिः सर्वधारकः ॥४७॥ स कथं सदनं त्यक्त्वा परवानिव मानुषे ॥ करोति जननं क
स्मात्तत्र मे संशयो महान् ॥४८॥ प्राप्य मानुषदेहं तु करोति च विडंबनं ॥ नानावि
धा तत्र मानुषे जन्मनीति वै ॥४९॥ कामक्रोधौ हर्षशोकौ वैरं प्रीतिश्च कर्हिचित् ॥
सुखं दुःखं भयं नृणां दैन्यमार्जवमेव च ॥५०॥ दुःकृतं सुकृतं चैव वंचनं हननं तथा ॥
शोचनं ज्वलनं तापो विमर्शश्च विकत्थनं ॥५१॥ लोभो दंभस्तथा मर्षः कपटं शोचनं
तथा ॥ एते चान्ये तथा भावा मानुष्ये किं न जायते ॥५२॥ स कथं भगवान्विष्णुः
त्यक्त्वा सुखमनुष्यरं ॥ करोति मानुषं जन्म भावैरेतैरभिद्रुतं ॥५३॥ किं सुखं मानु
षं प्राप्य भुवि जन्मतया स्वयं ॥ यत्नेन हरिः साक्षाज्जन्म वा संकरोति वै ॥५४॥ ग
र्भे दुःखं जन्म दुःखं बाल्ये च तथा पुनः ॥ यौवने कामजं दुःखं गार्हस्थ्येपि महत्तरं ॥५५

एतान्दुःखात्समन्नाय मानुषे द्विजसत्तमः ॥ कथं सल्लतवान्विष्णुरवतारान्पुनः पुनः
५६॥ श्रीमद्रामावतारे हि हरिणा ब्रह्मयोनिना ॥ दुःखं महत्तरं प्राप्य वनवासे बहु
समाः ॥५७॥ सीताविरहजं चैव संग्रामे च तथा पुनः ॥ कांतापातालगमनात्सुनू
तं महात्मना ॥५८॥ तथा कृष्णावतारे वै जन्म रक्षागृहे पुनः ॥ गोकुले गमनं चैव ग
वां चारणमित्यत ॥५९॥ कंसस्य हननं कष्टात्तद्द्वारकागमनं पुनः ॥ नानासंसार
दुःखानि भुक्तवाञ्जगवान्किल ॥६०॥ स्वेच्छया कः परिस्मरन्योक्तुं दुःखानि ज्ञानवान् ॥
संदेहं छिंदि सर्वज्ञ मम चित्तप्रसन्नये ॥६१॥ ॥ इति श्रीभागवते महापुराणे चतुर्थस्कं
धे द्वितीयोध्यायः ॥२॥ ॥ व्यास उवाच ॥ ॥ कारणानि बहून्यत्र राजन्नवतरणे किल ॥
सर्वेषां चैव देवानां मंत्रीरेव हि कारणात् ॥ वसुदेवावतारस्य कारणं शृणु तत्त्वतः ॥ देवका

श्चैवरोहिण्याःत्वापात्तुवरुणस्यवै॥२॥एकदाकश्यपःश्रीमान्यज्ञार्थंवरुणस्यह॥ज

हारयज्ञियागावःपयोदाःसुरभीसमाः॥३॥अदितिःसुरभिश्चैवभार्येद्वेतस्यसुप्रिये
तस्याःप्रियार्थंतेनाद्यरक्षितागाःपयोयुताः॥४॥वरुणस्तुततोगत्वाब्रह्माणंजगत
प्रभुं॥प्रणम्योवाचदीनात्मास्वदुःखंविनयान्वितः॥५॥स्वामिन्मेकश्यपेनाहृ
तागावोबलेनवै॥यज्ञार्थंरक्षिताकामंनददातिबलान्वितः॥६॥किंकरोमिमहाभा
गमत्तोसौनददातिह॥शापोमयाविसृष्टोस्मैगोपालोभवमानुषे॥७॥भार्येद्वेसह
तेनैवभवतांचातिदुःखिते॥यथावत्साःरुदंत्यत्रमातृहीनातिदुःखिताः॥८॥तेनादि
तिर्मृतवत्साभविष्यतिधरातले॥कारागारनिवासाचतेनापिसहदुःखिता॥९॥
व्यासउवाच॥ ॥तच्छ्रुत्वावचनंतस्ययादोनाथस्यपद्मभूः॥समाहूयमुनिंस्थानेतमु

वाचप्रजापतिः॥१०॥कस्मात्त्वयामहाभागलोकपालस्यधेनवः॥हृतापुनर्नदत्ताश्चकि
मन्यायंकरोषिवै॥११॥जानन्नयंमहाभागपरवित्तापहारणे॥कृतवान्कथमन्यायंसर्व
ज्ञोसिमहामते॥१२॥अहोलोभस्यमहिमामहतोपिनमुंचति॥लोभंनरकद्वारंनूनंपाप
करमसंमतं॥१३॥कश्यपोपिनतंत्यक्तुंसमर्थःकिंकरोम्यहं॥सर्वदैवाधिकस्तस्माल्लो
भोवैकल्पितोमया॥१४॥धन्यास्तेमुनयःकामंजितोयैर्लोभएवच॥वैखानसैःसमपा
रैःप्रतिग्रहपराङ्मुखैः॥१५॥संसारेबलवान्शत्रुर्लोभोमध्यचरःसदा॥कश्यपोपिदुरा
चारःकृतस्तेनदुरात्मना॥१६॥ब्रह्मापितंशशापाथकश्यपंमुनिसत्तमं॥मयहिरक्ष
णार्थंहिपौत्रंपरमवल्लभं॥१७॥अंशेनत्वंपृथिव्यांवैप्राप्यजन्मयदोःकुले॥भार्याभ्यां
संयुतस्तत्रगोपालत्वंकरिष्यसि॥१८॥व्यासउवाच॥एवंशप्तःकश्यपोसौकरुणेनाथ

भा॰च॰ ब्रह्मणा॥ अंशांवतरणार्थायभूभारहरणायच॥१९॥ तथादित्यादितिःशप्ताशोकसंतप्तया
९ भृशं॥ जाताजाताविनश्येरन्तवपुत्रास्तुसप्तवै॥२०॥ जनमेजयउ॰॥ ॥कस्माद्दित्याचभ
गनीशप्तेयंजननीमुने॥ कारणंवदशापेतुशोकेतुमुनिसत्तम॥२१॥ ॥सूतउवाच॥ पा
रिक्षितेनपृष्टस्तुव्यासःसत्यवतीसुतः॥ राजानंप्रत्युवाचेदंकारणंसुसमाहितः॥२२॥
व्यासउवाच॥ ॥राजन्दक्षसुतेद्वेतुदितिश्चादितिरुत्तमा॥ कश्यपस्यप्रियेभार्येबभूवतु
सुसंमते॥२३॥ अदित्यामघवापुत्रोयदाभूदतिवीर्यवान्॥ तदातेसदृशंपुत्रंचकमेदि
तिश्चेतसा॥२४॥ पतिमाहसिताऽपांगीपुत्रंमेदेहिमानद॥ इंद्रतुल्यबलंवीरंधर्मिष्टंवीर्य राम॰
वत्तरं॥२५॥ तामुवाचमुनिःकांतेस्वस्थापयोव्रतंकुरु॥ व्रतांतेतेभविताताशतक्रतुःस
मःसुतः॥२६॥ सातथेतिप्रतिश्रुत्यचकारव्रतमुत्तमं॥ निषक्तंमुनिनागर्भंबिभ्राणासु ९

मनोहरं॥२७॥ भूमौनकारशयनंपयोव्रतपरायणा॥ पवित्राधारणायुक्ताबभूववरव
र्णिनी॥२८॥ एवंजातःसुसंपूर्णोयदागर्भोतितेजवान्॥ शुभ्रभेसातिदीप्तांगीदृष्टादित्या
तिशोभना॥२९॥ वीक्ष्यतामसीतापांगीसपत्नीभावमास्थिता॥ अदितिश्चिंतयामा
सकिंकरोमितिदुःखिता॥३०॥ मघवासदृशःपुत्रोभविष्यतिनसंशयः॥ दित्यास्तदामम
सुतोतेजहीनोभवेत्किल॥३१॥ इतिचिंतापरापुत्रमिंद्रंप्रोवाचमानिनी॥ शत्रुस्तेद्य
समुत्पन्नोदितिगर्भेतितेजवान्॥३२॥ उपायंकुरुनाशायशत्रोरद्यविचिंत्यच॥ उत्पि
त्सुरेवहंतव्योशत्रुःशत्रुनिबर्हणा॥३५॥ राजयक्ष्मेवसंवृद्धोपरःपरमदुर्जयः॥ तस्मा
दंकुरितंजत्याबुद्धिमानदितंकिल॥३६॥ लोहशंकुरिवात्तिशोहृदयेममगर्भवै॥ येनके
नाप्युपायेनघातयाद्यशतक्रतो॥३७॥ सामदानविभेदेनबलेनापिहिंसतय॥ दित्या

गर्भमिहानागममचेदिच्छसिप्रियं॥३८॥व्यासउवाच॥ ॥श्रुत्वामातुर्वचःशक्रोविविं
क्तमनसाततः॥जगामापरमातुःससमीपममराधिपः॥३९॥ववंदेविनयात्पादौदित्या
:पापमतिर्नृप॥प्रोवाचविनयेनासौमधुरंविषगर्भितं॥४०॥ ॥इंद्रउवाच॥ ॥मा
तस्त्वंव्रतयुक्तासिक्षीणदेहातिदुर्बला॥सेवार्थमिहसंप्राप्तःकिंकरोमिवदस्वमे॥४१
चरणसंवाहनंतेहंकरिष्यामिपतिव्रते॥गुरुशुश्रूषणात्पुण्यंलभेक्रुननिचाक्षयं॥४२
तमेएवमपिभिन्नेदोस्तितवादित्याःशपेकिल॥इत्युक्त्वाचरणौस्पृष्ट्वासंवाहनपरोभव
त्॥४३॥संवाहनसुखंप्राप्यनिशमापसुलोचना॥श्रांताव्रतकृशासुप्ताविश्रब्धापर
मासती॥४४॥तांनिशावशमापन्नांविलोक्यसशतक्रतुः॥रूपंकृत्वातिसूक्ष्मंचवज्र
पाणिःसमाहितः॥४५॥उदरंप्रविवेशाशुतस्यायोगबलेनवै॥गर्भंचकर्तवज्रेणस

प्तधापविनातदा॥४६॥रुरोदचतदाबालोवज्रेणनिहतस्तथा॥मारुदेतिशनैर्वा
क्यमुवाचमघवाशुक्रः॥४७॥शकलानिपुनःसप्तसप्तधाकर्तितानिच॥जाताश्चैकोन
पंचाशन्मरुतश्चाभवन्नृप॥४८॥तदाप्रबुद्धासुदतिज्ञात्वागर्भंतथाकृतं॥इंद्रेणछ
लरूपेणचुकोपभृशदुःखिता॥४९॥भगनीत्वंतुसाबुध्वाशशापाथदितिस्तदा॥
अदितिंमघवंतंचसत्यव्रतपरायणा॥५०॥यथामेकृंतितोगर्भस्तवपुत्रेणछद्म
ना॥तथास्यन्नृंशमायातुराज्यंत्रुवनस्यतु॥५१॥यथागुप्तेनपापेनगर्भोस्तुशा
तितोमम॥तथायंत्रष्टराज्यस्तुगुप्तवासंकरोतुवै॥५२॥अदितिःपापचारिणीय
थामेघातितःशिशुः॥तस्याःपुत्रास्तुनष्टंतुजाताजाताःपुनः॥५३॥कारागारेवस
त्वेषापुत्रशोकातुराभृशं॥इहजन्मनिवान्यवामृतापत्याभविष्यति॥५४॥व्यासउ

भा·च· वाच॥ ॥इत्युक्तस्तु तदा भक्त्या शापं मरीचिनंदनः॥ उवाच प्रश्रयोपेतं वचनं भ्रामय
११ न्निव॥५५॥ मा कोपं कुरु कल्याणि पुत्रास्ते बलवत्तराः॥ भविष्यंति सुराः कामं मरु
तो मघवा सखा॥५६॥ शापोयं तव वामोरु चाष्टाविंशे द्वापरे॥ अंशेन मानुषं ज
न्म प्राप्य भुंजति भामिनी॥५७॥ वरुणेनापि दत्तोस्ति शापः संतापितेन च॥ उभयोः
शापयोगेन मानुषीयं भविष्यति॥५८॥ ॥व्यास उवाच॥ ॥पतिनाश्वासिता देवी
संतुष्टा सा भवत्तदा॥ नोवाच विप्रियं किंचित्ततः सा वरवर्णिनी॥५९॥ इति ते कथि
तं राजन्पूर्वशापस्य कारणं॥ अदितिर्देवकी जाता स्वांशेन नृपसत्तम॥६०॥ ॥इति
श्रीभागवते महापुराणे चतुर्थस्कंधे तृतीयोध्यायः॥ ॥राजोवाच॥ ॥विस्मितोस्मि राम०
महाभाग श्रुत्वाख्यातं महाद्भुतं॥ संसारोयं पापरूपः कथं मुच्येहि बंधनात्॥१॥ क ११

श्यपस्यापि दायादस्त्रिलोकीविभवे सति॥ भगवानीदृशं कर्म कथमेवं जुगुप्सितं॥२
गर्भे प्रविश्य बालस्य हननं दारुणं किल॥ सेवामिषेण मातुश्च वंचनं परमाद्भुतं॥३॥
शास्ता धर्मस्य गोप्ता च त्रिलोक्याः परिरप्सुत॥ भगवानीदृशं कर्म कोन कुर्यादसांप्रतं॥
४॥ पितामहा मे संग्रामे कुरुक्षेत्रेतिदारुणं॥ भगवंतः किमाश्चर्यं दृष्टा तेत्र जगद्गुरोः
५॥ भीष्मद्रोणकृपः कर्णो धर्मांशो यो युधिष्ठिरः॥ सर्वे विरोधमनसो वासुदेव प्रणो
दितः॥६॥ असारतां विजानंतः संसारस्य सुमेधसः॥ देवांशाश्च कथं चक्रुर्निंदितं
धर्मतत्पराः॥७॥ क्वास्ता धर्मस्य विप्रेंद्र प्रमाणं किं विनिश्चितं॥ चलचित्तोस्मि संजातः
श्रुत्वा चैतत्कथानकं॥८॥ आप्तवाक्यं प्रमाणं चेदाप्तः कः पुरुषः परः॥ देहवान्विषया
सक्तो रागी भवति सर्वथा॥९॥ रागाद्द्वेषो भवेन्नूनं नमर्थनाशाह संशयं॥ द्वेषादसत्य

वचनंवक्तव्यंस्वार्थसिध्दये॥२०॥जरासंधविनाशार्थंहरिणासत्यमूर्त्तिना॥छलेनर
चितंरूपंब्राह्मणस्यविजानता॥२१॥कीदृशोयंक्रतोयज्ञःकिमर्थःशमवर्जितःप
रलोकफलार्थंवायशसेवान्यथाकिमु॥२२॥निशम्यानृपतिंइत्याकर्त्तव्यंसुनृतंपरि
धर्मस्यप्रथमःपादःसत्यंतत्किंमृषावचः॥२४॥द्वितीयस्तुतथाशौचंदयापादस्तृती
यकं॥दानंपादश्चतुर्थश्चपुराणज्ञावदंतिवै॥२५॥तैर्विहीनःकथंधर्मस्तिष्ठेदिहसु
संमतः॥धर्महीनंकृतंकर्मकिंथंतत्फलदंभवेत्॥२६॥धर्मेस्थिरामतिःकापिक
स्यापिनप्रतीयते॥छलाचार्योयदाविष्णुःशास्तासर्वजगत्प्रभुः॥२७॥येनवामन
रूपेणवंचितोसौबलिर्नृपः॥विद्वत्तरोदातयज्ञस्यवेदाज्ञाप्रतिपालकः २८ धर्मिष्टो
दानशीलश्चसत्यवादीजितेंद्रियः॥स्थानात्भ्रंसितःकस्माद्विष्णुनाप्रभविष्णुना॥२९

जितंकेनद्वयोःसत्यमबलिनावामनेनवापि॥छलकर्त्तुर्विदाताबावासंदेहोत्रमहान्मम॥३०
वंचितावंचिंचिंतेनसत्यंवदद्विजोत्तम॥पुराणकर्त्तासिधर्मज्ञश्चमहामतिः॥३१॥
व्यासउवाच॥ ॥जितंवैबलिनाराजन्दत्तायेनत्रिमेदनी॥त्रिविक्रमापिनाप्राप्तायःप्र
र्थितोवामनोभवत्॥३२॥छलस्येदफलंराजन्वामनत्वंनराधिप॥प्राप्तंचहरिणा
भूयोद्वारपालत्वमेववै॥३३॥सत्यादन्यतरंनास्तिमूलंधर्मस्यपार्थिव॥दुःसाध्यंदे
हिनांराजन्सत्यंसर्वात्मना किल॥३४॥मायाबलवतीभूपत्रिगुणाबहुरूपिणी॥
ययेदंनिर्मितंविश्वंगुणैःशाबलितंत्रिभिः॥३५॥वैषानसाश्चमुनयोनिःसंगानिः
परिग्रहाः॥सत्ययुक्ताभवंत्यत्रवीतरागागताक्रमाः॥३७॥दृष्टांतदत्तनिाययनि
र्मितास्तेचतादृशाः॥अन्यथावंशाबलितंगुणैरेभिस्त्रिभिर्नृप॥३८॥नेकवाक्यंपुरा

मा॰च॰ णेषुनृपसत्तम॥धर्मशास्त्रेषुचांगेषुसगुणैरचितेष्विह॥२९॥सगुणःसगुणंकुर्या
१२ न्निर्गुणोनकरोतिवै॥गुणास्तेमिश्रितासर्वेनष्टश्चावसंगताः॥३०॥निर्विलीके
स्थिरेधर्मेमतिःकस्यापिनस्थिरा॥भवेद्भवेमहाराजमाययामोहितस्यवै॥३१॥इं
द्रियाणिप्रमाथीनितदासक्तंमनस्तदा॥करोतिविविधान्भावान्गुणैस्तैःप्रेरितं
त्रं॥३२॥ब्रह्मादिस्तंबपर्यंताःप्राणिनःस्थिरजंगमाः॥सर्वेमायावशाराजन्स्मा
तुक्रीडतितैरिह॥३३॥सर्वान्वैमोहयत्येषाविकुर्वत्यनिशंजनान्॥नसिध्रोतान्ब
लिवद्दन्त्कायवान्कथुकोयथा॥३४॥इंद्रियाणिचितयानोनप्राप्नोतियथानरः॥ १२
तदर्थंतुलमादत्तेलालापिप्रवर्त्तते॥३५॥कामक्रोधश्चलोभश्चवैरिणोबलवत्तराः
तत्यात्तत्सनजानंतिप्राणिनस्तद्वशंगताः॥३६॥विनवसत्यहंकारःप्रबलःप्रभवत्य

पि॥अहंकाराद्भवेन्मोहोमोहान्मरणमेवच॥३७॥संकल्पाबहवस्तत्रविकल्पाःभवं
तिच॥ईर्ष्यासूयातथाद्वेषःप्रादुर्भवतिचेतसि॥३८॥आशातृष्णातथादैन्यंदंभोधर्म
मतिस्तथा॥प्राणिनांप्रभवंत्येतेसर्वामोहसमुद्भवाः॥३९॥यज्ञदानानितीर्थानि
व्रतानिनियमस्तथा॥अहंकारान्निभूतस्तुकरोतिपुरुषोन्वहं॥४१॥अहंभावकृतंत
सर्वंभवेद्राजञ्छोचवत्॥रागाद्यैर्नोकृतंकर्मसर्वांगशुद्धिवर्जितं॥४१॥प्रथमंद
व्यशुद्धिश्चदृष्टाविबुधैःकिल॥अशेद्रेणार्जितंद्रव्यंप्रशस्तंधर्मकर्मणि॥४२॥द्रो
हार्जितेनद्रव्येणयत्करोतिशुभंनरः॥विपरीतंभवेत्तत्तुफलकालेनृपोत्तम॥४३॥
मनोनितिनिर्मलंयस्यसम्यक्फलंतदाभवेत्॥तस्मिन्विकारयुक्तेतुतथापिफलंनभ
वेत्॥४४॥कर्त्तारिःकर्मणांसर्वेआचार्यऋत्विजादयः॥स्फस्तोविशुद्धमनसस्तदापूर्णंन

भा॰च॰ वैफल्यं॥४६॥देशकालक्रियाद्रव्यकर्तॄणांशुद्धतायदि।मंत्राणांचतदापूर्णंकर्मणांफ
२४ लमश्नुते॥४७॥ स्वार्थासक्तःपुमांस्तातनविंदतिशुभाशुभं॥ देवाधीनःसदाकुर्यात्स
पमेवनसुन्नतं॥४८॥प्राजापत्याःसुराःसर्वेत्यसुराश्चतदुद्भवाः॥ सदैवस्वार्थनिर
ताःपरस्परविरोधिनः॥४९॥सत्वोद्भवानांवैरंचेत्परस्परविरोधिनः॥तिर्यंचानांचकि
चित्रंजातिवैरसमुद्भवे॥५०॥सत्वोद्भवासुराःपूर्वमुक्तावेदेषुमानुषाः॥ रजोद्भवा
तिर्यंचाश्चतामसाःपरिकीर्तिताः॥५१॥अहंकारसमुद्भूतःसंसारोयंयतोनृप॥राग
द्वेषविहीनस्तुसकथंभवतितीवै॥५२॥सदाद्रोहपरादेवाःतपविघ्नकराःस्तथा॥अ राम॰
संतुष्टाद्वेषपराः परस्परविरोधिनः॥५३॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधे २४
चतुर्थोध्यायः॥४॥ ॥व्यासउवाच॥ ॥अथकिंबहुनोक्तेनसंसारेस्मिन्नृपोत्तम॥

धर्मात्माद्रोहबुद्धिस्तुकश्चिद्भवतिकर्हिचित्॥रागद्वेषावृतंविश्वंसर्वंस्थावरजंगमं॥आ
द्येयुगेपिराजेंद्रकिमद्यकलिदूषिते॥२॥देवाःसेर्ष्याः—— द्रोहाच्छलकर्मरताःसदा
मानुष्याणांचतिर्यंचाकावार्तानृपगण्यते॥३॥द्रोहपरद्रोहपरोभवेदितिसमानता
अद्रोहिणितथाशांतेविद्वेषःखलतास्मृता॥४॥यःकश्चित्तापसःशांतोजपध्यान
परायणः॥भवेत्तस्यतपोविघ्नंमघवाप्रकरोत्यलं॥५॥ सतांसत्ययुगःसाक्षात्सर्व
देवासतांकलिः मध्यमोमध्यमानांतुक्रियायोगाद्युगोस्मृतो॥६॥कश्चित्कदापि
भवतिसत्यधर्मानुवर्तकाः अन्यथान्ययुगानांवैसर्वेधर्मरतानराः॥७॥वासना
कारणंराजन्सर्वत्रधर्मसंस्थितौ॥तस्यांवैमलिनायांतुधर्मोपिमलिनोभवेत्
८॥तत्राहंकथयिष्यामिवासनाकारणंनृप॥मलिनावासनाकार्यंविनाशयतिसर्वथा

णा॥ ब्रह्मणाहृदयाज्जातःपुत्रोधर्मइतिस्मृतः॥ ब्राह्मणसत्यसंपन्नःवेदव्रतरतःसदा॥१०॥
 दक्षस्यदुहितारस्तेनव्रतादशमहाव्रत॥ विवाहविधिनासम्यक्मुनिनागृहधर्मिणा॥११॥
तास्वजनयत्पुत्रान्धर्मःसत्यवतांवरः॥ हरिंकृष्णंनरंचैवतथानारायणंनृप॥१२॥ यो
गाभ्यासरतौनित्यंहरिकृष्णौबभूवतुः॥ नरनारायणौचैवचेरतुस्तपउत्तमौ॥१३॥ प्राले
याद्रिंसमागम्यतीर्थेवदरिकाश्रमे॥ अतप्यतांतपःसौम्यौपुराणावृषिसत्तमौ॥१४॥
गृणंतौतत्परंब्रह्मगंगायाविपुलेतटे॥ हरेरंशौस्थितौतत्रनरनारायणावृषी॥१५॥ पू
र्णंवर्षसहस्रंतुचक्रातेतपउत्तमं॥ तापितंचजगत्सर्वंतपसासचराचरं॥१६॥ नरना
रायणाभ्यांचशक्रःक्षोभंतदाययौ॥ चिंताविष्टःसहस्राक्षोमनसासमकल्पयत्॥१७
विघ्नंकथंकरोम्यद्यमुनयोस्तपसिद्धुतं॥ उत्पाद्यकामक्रोधंवालोभंवाप्यतिदारुणं॥१८

इत्युद्दिश्यसहस्राक्षःसमारुह्यगजोत्तमं॥ विघ्नकामस्तुतरसाजगामगंधमादनं॥२०॥
गत्वातत्राश्रमेपुण्येपतावपश्यच्छतक्रतुः॥ तपसादीप्तदेहौतुभास्कराविवचोदितौ॥२१
ब्रह्माविष्णुकिमेतौवैप्रगटौवाविभावसु॥ धर्मपुत्रावृषीवेतौतपसाकिंकरिष्यतः॥२२
इतिसंचिंत्यतौदृष्ट्वातदोवाचशचीपतिः॥ किंवांकार्यंमहाभागौब्रूतांधर्मसुतौकिल॥२३
ददामिवांछितंवांयद्वरंवरयतामृषी॥ अदेयमपिसर्वगोस्मितुष्टोस्मितपसाकिल २४
॥व्यासउवाच॥ ॥एवंपुनःपुनःशक्रस्तावुवाचपुरःस्थितः नोचतुस्तावृषीध्यानंसं
स्थितौएकचेतसौ॥२५॥ ततोसमोहनीमायांचकारनयदांहषः॥ वृकान्व्याघ्रांश्च
सर्पान्वैसमुत्पाद्यविभीषयन्॥२६॥ वर्षंवातंतथावह्निंसमुत्पाद्यपुनःपुनःभीष
यामासतौशक्रोमायांकृत्वाविमोहिनीं॥२७॥ नचलौनवशंनीतौनतौधर्मसुतौमुनी

भा॰ च॰ नरनारायणौदृष्ट्वाशक्रःस्वर्भुवनंगतः॥२८॥वरदानात्वबुद्धौनन्ज्ञातौवशितायुतः
व्याघ्रसिंहादिभिःक्रांतौचलितौनासनात्कात्॥२९॥नतयोर्ध्याननंगंवैकर्तुं
१६ कोपिक्षमोभवत्॥इंद्रोपिसदनंगत्वाचिंतयामासदुःखितः॥३०॥चालितौनय
लोभात्त्यांनेमौमुनिवरोत्तमौ चिंतयानौमहाविद्यामादिशक्तिंसनातनीं॥३१॥ई
श्वरींसर्वलोकानांपरांप्रकृतिमद्भुतां॥ध्यायंतंकःक्षमोलोकेबद्धमायादिरष्टु
ता॥३२॥यन्मूलाःसकलामायादेवासुरकृताःकिल॥ताःकथंबाधितुंशक्तास्तां
ध्यायंतमकल्मषं॥३३॥वाग्बीजंकामराजंचमायाबीजंतृतीयकं॥चित्तेयस्य १६
भवेत्तंतुनकोपिबाधितुंक्षमः॥३४॥मामयामोहितःशक्रोभूयःकामंप्रतिक्रियां॥
कर्तुंकामवसंतौतुसमाहूयाब्रवीद्वचः॥३५॥तौदेवींहृदयेन्यस्त्वास्थितौस्याएषुसमोह

नौ॥विश्वस्यजननीचास्यकस्तौचालयितुंक्षमः॥३६॥मनोभववसंतेनरत्यायुक्तो
व्रजाधुना॥अप्सरोभिःसमायुक्तोनरगंधमादनं॥३७॥नरनारायणौतत्रपुराऋषी
चसत्तमौ कुरुतस्तपएकांतौस्थितौबदरिकाश्रमे॥३८॥गत्वातत्रसमीपेतुत
योर्मन्मथगणैः चित्तंकामातुरंकामंकुरुकार्यंममाधुना॥३९॥मोहयोच्चाटयैतौ
त्वंविशिखैस्ताडयाशुच॥वशीकुरुमहाभागमुनीधर्मसुतावपि४०कोस्मिन्
जगवकुक्षोदेवोदैत्योप्यमानवः॥यस्तेबाणवशंकामनोपैतिन्नराताडितः॥४१॥
ब्रह्मोहंगिरिजानाथश्चंद्रोवह्निर्विमोहिताः॥गणनाकानयोःकामत्वद्बाणानां
पराक्रमे॥४२॥अप्सरांगणोयंतेसहायार्थंमयेरितः॥आगमिष्यंतितत्रै
वरंभादीनांमनोरमः॥४३॥एकाकिनोत्तमारंभाहरामितववांछितं॥कार्यं

भा॰ च॰ साधयितुंक्षमा॥त्वमेकःक्षमःसोकामिमिलितैःकिंकरिष्यति॥४४॥नयंमेतपसःकाम
१७ सहायस्त्वंसदैव॥कुरुकार्यमिहानागइहामितववांछितं॥४५॥प्रलोभितोमयात्यर्थ
वरदानेस्तपस्विनौ॥स्थानान्नचलितौशांतौव्रथायांमेगतःश्रमः॥४६॥तथावैमाय
त्वानीचिनौतपसोन्तरं॥तथापिनोच्छितास्थानाद्वैरक्षापरौनतौ॥४७॥व्यास
उवाच॥इतितस्यवचश्रुत्वाशक्रंप्राहमनोरमाः॥वासवाद्यकरिष्यामिकार्यंतवम
नेप्सितं॥४॥यदिविष्णुंमहेशंवाशक्रंप्राहमनोरमाः॥वासवाद्यकरिष्यामिकार्यंतवम
नेप्सितं॥४८॥यदिविष्णुंमहेशंवाब्रह्माणंवादिवाकरं॥ध्यायतस्तौतदास्माकंम १७
विताबशगोमुनि॥४९॥देवीचेन्महाशक्तिसंश्रितौभक्तिपूर्वकं॥नतदाममबाणा
नां—बरंतापसोकिल॥५०॥देवीभक्तेवशीकर्तुंनाहंशक्तःकदाचन॥कामरागेमहा

बीजंचिंतयानंमनस्यलं॥५१॥ ॥इंद्रउवाच॥ ॥गच्छंत्वद्यमहानागाःसर्वेतत्रसमुद्यताः
कार्यंममेतिदुःसाध्यंकर्तुंहीनमनुत्तमं॥५२॥व्यासउ॰॥ ॥इतितेनसमादिष्टाययुःस
र्वेसमुद्यताः॥यत्रतौधर्मपुत्रौद्वौतपातेदुस्करंतपः॥५३॥ ॥इतिश्रीभागवतेमहा
पुराणेचतुर्थस्कंधेपंचमोध्यायः॥५॥ ॥व्यासउवाच॥ ॥प्रथमंतत्रसंप्राप्तोवसं
तोपर्वतोत्तमे॥पुताःपादपासर्वेद्विरेफालिविराजिताः॥१॥चूताश्चबकुलारम्यास्ति
लकाःकिंसुकाःसुमाः॥शालास्तालास्तमालाश्चमधुकाःपुष्पितावभुः॥२॥बभू
वुःकोकिलालापाःवृक्षाग्रेषुमनोहराः॥वल्योपिपुष्पिताःसर्वाशालालिंगुर्नगोत्त
मान्॥३॥प्राणिनःस्वासुजायासुप्रेमयुक्ताःस्मरातुराः॥बभूवुश्चातिमत्ताश्चक्री
डासक्ताःपरस्परं॥ववुर्मंदाःसुगंधाश्चसुस्पर्शादक्षिणानिलाः॥इंद्रियाणिप्रमाथी

भा॰च॰ निमुनीनामपिचासवान्॥५॥ रतियुक्तस्ततःकामःपूरयन्पंचमार्गणान्॥ चकारत्वरित
१८ स्तत्रवासंबदरिकाश्रमे॥६॥ रंभातिलोत्तमाद्याश्चगत्वातत्रवराश्रमे॥ गेयंचक्रुस्सुगी
तज्ञाःस्वरतानसमन्वितं॥७॥ तच्छ्रुत्वामधुरंगीतंकोकिलानांचकूजितं॥ भ्रमरा
लिविरावंचप्रबुद्धौतौमुनीश्वरौ॥८॥ ऋतुराजमकालेतुदृष्ट्वातिपुष्पितंवनं॥ जा
तौचिंतापरौतत्रनरनारायणावृषी॥९॥ किमद्यशिशिरापायःसंवृत्तःसमयंविना॥
प्राणिनोविकलाःसर्वेलक्ष्यंतेतिस्मरातुराः॥१०॥ कालधर्मविपर्यासःकथमद्यदुरा
सदः॥ नरनारायणःप्राहविस्मयोत्फुल्ललोचनः॥११॥ ॥श्रीनारायणउवाच॥ पश्य
भ्रातरिमेवृक्षाःपुष्पिताःप्रतिभातिमे॥ कोकिलालापसंघुष्टाभ्रमराराजिराजिताः॥ यम०
१२॥ शिशिरंनाममातंगंनिवार्यनखरैःखरैः॥ वसंतकेसरीप्राप्तःपलाशकुसुमैर्मुने॥१३ १८

रक्ताशोकतरातन्वीदेवर्षेकिंशुकांघ्रिका॥ नीलाशोककचाश्यामाविकाशिकमला
नना॥१४॥ नीलेंदीवरनेत्राचब्रलसन्बिल्वफलस्तनी॥ प्रोत्फुल्लकुंददशनामंजरीक
र्णशोभिता॥१५॥ बंधुजीवाधराशुभ्रासिंधुवारनखाद्भुता पुंस्कोकिलस्वनापुण्या
त्यकध्वजवसनाशुभा॥१६॥ बर्हिवृंदकलापाचसारसस्वननूपुरा॥ प्राग्वंशरसनाबल
न्मत्तहंसगतिस्तथा १७॥ पुत्रजीवांशुकान्यस्तरोमराजीविराजिता॥ वसंतलक्ष्मीःसं
प्राप्ताब्रह्मन्बदरिकाश्रमे॥१८॥ अकालेकिमियंप्राप्ताविस्मयोयंममाधुना॥ तपवि
घ्नकरान्नूनंदेवर्षेपरिचिंतयं॥१९॥ श्रूयतेसुरनारीणांगानंध्यानविनाशनं॥ श्राव
योत्तपन्नंगाथंत्ततमघवतःकिलः॥२०॥ ऋतुराज्ञान्यथाकालेगीतंचात्रमनोहरं॥ वि
घ्नोविहितोजातिनीतेनासुरशत्रुणा॥२१॥ वाताःसुगंधाःशीताश्चसमुपेतिमनोहराः॥ ना

न्यंकारणमस्तीहत्वातक्रतुल्लतंविना॥२२॥इतिब्रवतिविप्राग्र्येदेवेनारायणेविभौ॥सर्व
दृष्टिपथंप्राप्ताःमन्मथप्रमुखास्तदा॥२३॥ददर्शभगवान्सर्वान्नरोनारायणस्तथा॥विस्म
याविष्टमनसौबभूवतुर्मुनीश्वरौ॥२४॥मन्मथंमेनिकांचैवरंभांतिलोत्तमांतथा॥पुष्प
गंधांसुकेशींचमहाश्वेतामनोरमां॥२५॥प्रमद्वरांघृताचींचगीतज्ञांस्वरसंभुतां॥चंद्रांन
नीरसोमींचकोकिलापममंडितां॥२६॥विद्युन्मालांबुजाक्षींचतथाकांचनमालिनीं
एताश्चान्यावरारोहाहष्टातान्मांतदांतिके॥२७॥ताश्चाष्टौसहस्राणिपंचाशदधिका
निच॥वीक्ष्यतौविस्मितौस्यातांकामसैन्यसुविस्तरं॥२८॥प्रणम्याग्रेस्थिताःसर्वाःकामि
न्याःकामसंयुता॥दिव्याभरणभूषाढ्यादिव्यमाल्योपशोभिताः॥२९॥जगुःकाश्चिक
गानंताःप्रथिव्यामतिदुर्लभं॥तानस्थानयुतंदिव्यंमन्मथादिविवर्द्धनं॥३०॥शुश्रूवभ

गवान्विष्णुःनरोनारायणस्तथा॥श्रुत्वाप्योवाचतास्तत्रप्रीत्यानारायणोमुनि॥३१॥आ
स्यतांसुखमत्रैवकरोम्यातिथ्यमद्भुतं॥भवंतोतिथिधर्मेणप्राप्ताःस्वर्गात्सुमध्यमाः॥३२
व्यासउवाच॥ ॥साभिमानस्तुसंजातस्तदानारायणोमुनिः॥इंद्रेणप्रेषितानूनंतप
विघ्नचिकीर्षया॥३३॥वराकाःकाइमाःसर्वाःसृजाम्यद्यनवाकिल॥एतास्तोदिव्यरू
पाश्चदर्शयामासकेवलं॥३४॥इतिसंचिंत्यमनसाकरेणोरुंप्रताड्यवै॥तरसोत्पाद
यामासनारीसर्वाधिकांश्रिया॥३५॥नारायणोरुसंभूताउर्वशीनामतःस्मृता॥
ददृशुस्ताःस्थितास्तत्रविस्मयंययुः॥३६॥तासांचपरिचर्यार्थंतावत्यश्चातिसुंद
री॥प्रादुश्चकारतरसातपसामुनिसत्तमाः॥३७॥गायंत्यश्चहसंत्यश्चनानोपायनपा
णयः॥प्रणेमुस्तंमुनिंसर्वाःस्थिताःप्रांजलीपुरः॥३८॥तांवीक्ष्यविभ्रमकरांतपसां

भा॰च॰ विभूतिं देवांगनाः स्मरहनाः सुसुकर्महीनाः ॥ ऊचतुस्तौ प्रमुदिताननपद्मशोभौ रो—
२० कमोद्गसितचारुतरोरुवेषाः ॥३९॥ किं कर्म वां स्तुतितपःसामहात्म्यं धैर्यं तथाविध
मपीह निरीक्ष्य चास्मान् ॥ ज्ञातौ युवां नरहरेः किल चांशजातौ देवौ मुनी सुतपसां नि
धिरात्ममूर्ती ॥४०॥ सेवानिमित्तमिह नो गमनं निकामं कामं हरेस्तु प्रतिसाधितु
मेव नूनं ॥ नाग्यनकेन युवयोः किल दर्शनं वा संपादितं ह्यविदितैः खलु संचितं तत् ॥४१॥
देवौ स्वमानिजजनैर्विहितौ युवाभ्यां मस्मद्विधे किल लतागसि रागयुक्ते ॥ कुर्वंति ने
व विबुधास्तपसो व्ययं वै शापेन तुच्छफलदेन महानुभावाः ॥४२॥ ॥व्यास उवाच॥ ॥ एम॰
इत्थं निशम्य वचनं सुरकामिनीनां तावूचतुर्मुनिवरौ विनयाननानां । प्रीतौ प्रसन्नवद २०
नौ जितकामक्रोधौ धर्मात्मजौ स्मयनिवेदवतानिरोधौ ॥४३॥ नरनारायण उवाच ॥

कुर्वं तु वांछितान् कामान् दद्वः प्रीणितौ हि वां ॥ यांतु स्वर्गगृहीतेमा मुर्वशी चारुलो
चनां ॥४४॥ उपायनमियं बाला यच्छं त्वद्य मनोहरा ॥ दत्तावाभ्यां मघवतः प्रीणनायोरु
संभवा ॥४५॥ स्वस्त्यस्तु सर्वदेवेभ्यो यथेष्टं व्रजं तु वै ॥ न कस्यापि तपोविघ्नकर्तव्यः म
तः परं ॥४६॥ देव्युवाच ॥ ॥क्व गच्छामो महाभाग प्राप्तास्ते पादपंकजं ॥ नारायण सुर
श्रेष्ठ भक्त्या परमया मुदा ॥४७॥ वांछितं चेद्वरं नाथ ददासि मधुसूदन ॥ तुष्टः कमलप
त्राक्ष ब्रवीमो ह्यमनेस्थितं ॥४८॥ पतित्वां नवदेवेश वयं पन्नः परंतप ॥ त्वं वामः प्रीति
युक्तास्त्वां सेवितुं जगदीश्वरं ॥४९॥ त्वया होमादिता नार्यः संत्येताश्चारुलोचनाः
तास्त्वां तिपतिमहाराज वांछंति प्रेमसंस्थिताः ॥५०॥ उर्वशी यत्तथा यातु स्वर्गं वै च
वदाज्ञया ॥ स्त्रीणां षोडशसाहस्रं तिष्ठत्वत्र शताधिकं ॥५१॥ सेवां ते वा करिष्यामः

दयोर्वतापसोन्नमो॥ वांछितंदेहिदेवेशसत्यवामवमाधव॥५२॥ आशान्नंगोहिना
रीणांहिंसनंपरीकीर्त्तितं॥ कामार्त्तांश्चैवमुनिभिर्हमन्तिस्तत्वदर्शिभिः॥५३॥ नान्ययो
ग्यादिदृशाताः स्वर्गात्प्रेमपरिप्लुता॥ त्वक्कुनाईसिदेवेशसमर्थोसिजगत्पते॥५४॥
नारायणउ॥ ॥पूर्णंवर्षसहस्रंतुतपस्तप्तंमयात्रवै॥ जितेंद्रियेणचार्वंग्यःकथंसंग
करोम्यहं॥५५॥ नेछाकामसुखेकश्चित्स्वधर्मविनाशके॥ पशूनामपिसाधर्म्मेरमतेम
तिमान्कथं॥५६॥ ॥अप्सराउ॥ ॥शब्दादीनांचपंचानांमध्येस्पर्शसुखंपरं आनंदरस
तुल्यंवैनान्यमस्तिसुखंकिल॥५७॥ अतोस्माकंमहाभागवचनंकुरुसर्वथा॥ निर्जरंस
वसासाद्यरसस्वर्गंधमादने॥५८॥ यदिवांछसिस्वर्गंत्वंनाधिकंगंधमादनात्॥ रमस्वात्र
शुभेस्थानेप्राप्यसर्वाःसुरांगना॥५९॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधे २१

षष्ठोध्यायः॥६॥ ॥व्यासउवाच॥ ॥इत्याकर्ण्यवचस्तासांधर्मपुत्रःप्रतापवान्॥ वि
मर्शमकरोच्चित्तेकिंकर्तव्यमितिस्तदा॥१॥ संगःसर्वात्मनात्याज्योनारीणांचविशेष
तः॥ गतंजितेंद्रियत्वंमेस्पर्शयदिकरोमिवै॥२॥ हास्याहंमुनिवृंदेषुभविष्याम्यह्य
संगमात्॥ अहंकारादिदंप्राप्तंदुःखंनात्रविचारणा॥३॥ मूलंधर्मविनाशस्यप्रथ
मंयत्तदहंकृतिः॥ मूलंसंसारवृक्षस्ययतःप्रोक्तंमहात्मभिः॥४॥ त्यक्त्वामौनंसमाधाय
नष्टितोहंसमागतं॥ अस्मरणंगणंकामंतेनासंदुःखभाजनं॥५॥ उत्पादिताचूता
वंत्योनार्यस्तपोव्ययेनवै॥ तास्तुमांबाधितुंदक्षाःप्रमदोत्तमाः॥६॥ ऊर्णनाभिरि
वात्मीयजालेनस्वकृतेनवै॥ बद्धोस्मिसुदृढेनात्रकिंकर्तव्यमतःपरं॥७॥ रागपंथोरसं
मुत्सृज्यदंडयामिकिलाधुना॥ ममानृष्टावृजिष्यंतिसर्वांस्नमनोरथा॥८॥ मुक्तोहं

ना·च· स्वशिष्यामिविज्ञेनेपरमंतप॥ क्रोधमुत्पादयित्वाद्यनृत्यामिसुंदरीगणं॥९॥ व्यास
२२ उवाच॥ ॥इतिसंचिंत्यमनसामुनिर्नारायणस्तदा॥ विमृश्यमिकरोच्चित्तेसुखोपाद
नसाधनं॥१०॥ द्वितीयोयंमहाशत्रुःक्रोधःसंतापकारकः॥ कामादप्यधिकोलोभो
लोभादपिचदारुणः॥११॥ क्रोधाभिभूतःकुरुतेहिंसांप्राणिविघातिनीं॥ दुःख
दांसर्वभूतानांनरका — दधिकां॥१२॥ यथाग्निर्घर्षणाज्जातःपादपंप्रदहेत्तथा
देहोत्पन्नस्तुक्रोधोवैदेहंदहतिदारुणः॥१३॥ व्यासउ॥ ॥इतिसंचिंत्यमानंतंज्ञात
रंहीनमानसं॥ उवाचवचनंतथ्यंनरोधर्मसुतोनुजः॥१४॥ नरउ॥ नारायणमहा २२
भागकोपंयच्छमहामते॥ शांतभावंसमाश्रित्यत्यजाहंकारमद्भुतं॥१५॥ पुराहंका
रदोषेणतपोनष्टंकिलावयोः॥ संग्रामंचकृतंघोरमावाभ्यांमसुरेणच॥१६॥ दिव्यं

वर्षसहस्रंतुप्रह्लादेनमहाद्भुतं॥ दुःखदंकुतरंजातंतत्रावाभ्यांसुरोत्तम॥१७॥ तस्मात्क्रो
धंपरित्यज्यशांतोभवमुनीश्वर॥ शांतत्वंतपसोमूलंमुनिभिःपरिकीर्तितं॥१८॥ जन
मेजयउ॥ संशयोयंमुनिश्रेष्ठप्रह्लादेनमहात्मना॥ विष्णुभक्तेनचांतेनकथंयुद्धंकृ
तंपुरा॥१९॥ कृतंतुसोकथंयुद्धंनरनारायणर्षी॥ तापसौधर्मपुत्रौद्वौसुशांतमन
सावुभौ॥२०॥ समागमःकथंजातस्तयोस्तस्यचकुरुच॥ संग्रामस्तुकथंताभ्यांकृतंस्ते
नमहात्मना॥२१॥ प्रह्लादोप्यतिधर्मात्माज्ञानवान्विष्णुतत्परः॥ नरनारायणौचापिताप
सौसत्वसंस्थितौ॥२२॥ तेनताभ्यांसमुद्भूतंवैरंपदिपरस्परं॥ तदातपसिधर्मेचस्रमए
वहिकेवलः॥२३॥ कपतेःकश्रमःस्वामिन्पुरासत्ययुगेपिचेत्॥ ताहशोनर्जितंचित्तं
क्रोधाहंकारसंवृतं॥२४॥ नक्केशोनचमात्सर्यमहंकारांकुरंविना॥ अहंकारात्समुत्

भा॰च॰ न्ताः कामक्रोधादयः किल ॥२५॥ वर्षकोटिसहस्रं तु तपस्तप्त्वातिदारुणं ॥ अहंकारां
कुरे जाते व्यर्थं भवति सर्वथा ॥२६॥ अहंकारांकुरस्याग्रे तथा पुण्यं न तिष्ठति ॥२६॥ य
२३ था सूर्योदये स्याग्रे तमोघो नैव तिष्ठति ॥२७॥ ब्रह्मादेपि महाभाग हरिणा समयुद्धत
तदा व्यर्थं भूतं सर्वं मुक्तं किल भूतले ॥२८॥ नरनारायणौ शांतौ विहाय परमं तपः
कृतवंतौ यदा युद्धं क्रमः मुक्तं पुनः ॥२९॥ इद्वौ सकलसंपन्नौ रजेयो यदि मानवैः
मादृशानां च का वार्ता मुने हंकारसंजये ॥३०॥ अहंकारं परित्यक्तः कोप्यस्मिन्नुव
नत्रये ॥ भूतो न विता नैव भविता नापि सर्वथा ॥३१॥ मुच्यते लोहनिगडैर्बद्धः काष्ठमयै २३
स्तथा ॥ अहंकारनिबद्धस्तु न कदाचित्प्रमुच्यते ॥३२॥ अहंकाराद्धृतं सर्वं जगत्स्थाव
रजंगमं ॥ भ्रमत्येव हि संसारे जन्ममृत्युजरामये ॥३३॥ ब्रह्मज्ञानं कुतस्तात संसारे

स्मिन हंद्वते ॥ मतंगमिमांसकामां वैसंततं त्वातिसुद्दृत ॥३४॥ महांतोपि मदाह्यत्ता सर्वज्ञा
तत्ववेदिनः ॥ मादृशानां कला विप्र का कथा मुनिसत्तम ॥३५॥ व्यास उवाच ॥ कार्यं
वैकारणाद्भिन्नं कथं भवति नारत ॥ कटकं कुंडलं चैव सुवर्णसदृशं भवेत् ॥३६॥ अ
हंकारोद्भवं सर्वं ब्रह्मांडं सचराचरं ॥ पटतंतुवत्संप्रोतं तद्वियुक्तं कथं भवेत् ॥३७॥ माया
गुणैस्त्रिभिः सर्वं रचितं स्थिरजंगमं ॥ तद्गुणं तत्समं नूनं का तत्र परिकल्पना ॥३८॥ ब्र
ह्मा विष्णुस्तथा रुद्रस्तेप्यहंकारमोहिताः ॥ नमं त्वस्मिन्महाभाग संसारे नृपसत्तम ॥३९
वशिष्टनारदाद्याश्च मुनयो ज्ञानिनः परं ॥ तेपि मोहाभिभूताश्च संसरंति पुनः पुनः ॥४०
नकोप्यतिनृपश्रेष्ठ त्रिषु लोकेषु देहभृत् ॥ एभिर्मायागुणैर्मुक्तिः शांतश्चासुखे स्थि
तः ॥ कामक्रोधस्तथा लोभो मोहाहंकारसंभवः ॥ न मुंचति नरं सर्वे देहवंतं नृपोत्तम ॥

भा॰च॰ ४२॥ अधिवेदशास्त्राणि पुराणानि विचिंत्य च॥ त्ततातीर्थदिनं दानं ध्यानं चैव सुरार्चनं
२४ ४३॥ करोति विषयासक्तः सर्वं कुंजरशौचवत्॥ तेन विचार्यते पूर्वं त्वत्त्वं मोहमदाश्रि
तः॥४४॥ कृतयुगेऽप्यत्रेतायां द्वापरे कुरुनंदन॥ अनादि— न धर्मोऽस्ति का कथाद्यक
लौ पुनः॥४५॥ स देवस्य ईर्ष्यासदा द्वेषो लोभामर्षौ च सर्वदा॥ एवं विधोऽस्ति संसारे ना
त्रकार्यविचारणा॥४६॥ साधवो विरजाः कोऽपि भवति गतमत्सरा जितक्रोधा जिता
मर्षा दृष्टांतं दर्शनायते॥४७॥ ॥राजोवाच॥ ॥ते धन्यास्तु तत्पुण्यास्ते पि मोहमदवर्जि
ता॥ जितेंद्रिया सदाचारा जितं तैर्भुवनत्रयं॥४८॥ दुनोति पातकं स्मृत्वा पितुर्मे ह्यात्म राम॰
नः॥ कृतं तत्तपस्विनः कंठे मृतः सर्पोऽप्यगं विना॥४९॥ अतस्त्वप्येमुनिश्रेष्ठ जनिता किं
ममायतः॥ न जाने बुद्धिसंमोहात् किं वा कार्यं न विष्यति॥५०॥ मधुपश्यति मूढात्मा प्रपा २४

तं नैव पश्यति॥ करोति निंदितं कर्म नरकान्न बिभेति च॥५१॥ कथं युद्धं पुरा वृत्तं वि
स्तराद्वद सत्तम॥ शक्रादेन यथा चोग्रं नरनारायणेन वै॥५२॥ शक्रादस्तु कथं शांतो
पातालादैत्यसत्तमः॥ सारस्वते महातीर्थे पुण्ये वदरिकाश्रमे॥५३॥ नरनारायणौ शां
तौ तापसौ मुनिसत्तमौ॥ तत्र तौ तथा युद्धं इंतु कामौ परस्परौ॥५४॥ वैरं न भवति वि
त्तार्थदारार्थं वा परस्परं॥ इषणार्हिलोकस्मात् चक्रतुः युद्धनं महत्॥५५॥ शक्रादे
पि च धर्मात्मा ज्ञात्वा देवो सनातनौ॥ कथं चक्रतवान् युद्धं नरनारायणौ मुनि॥५६
एतद्विस्तरतो ब्रह्मन् श्रोतुमिच्छामि कारणं॥ दिव्यं वर्षसहस्रं च यत् जातं युद्धं परस्परं
॥५७॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे सप्तमोध्यायः॥७॥ ॥सूत उ॥
इति पृष्टस्तदा विप्रा राज्ञा पारिक्षितेन वै॥ उवाच विस्तरात्सर्वं व्यासः सत्यवतीसुतः॥१॥

ना॰च॰ जन्मेजयोपिधर्मात्मानिर्वेदंपरमंगतः॥ पितुर्दुश्चरितंश्रुत्वावैराटीतनयस्यवै॥३॥ पुन्ना
२५ मानरकाद्यस्मात्त्रायतेपितरंस्वकं॥ पुत्रेतिनामस्यार्थस्यात्तेनतस्यमुनीश्वराः॥४॥
तस्यैवोद्धरणार्थंसश्चकारसुतंनृप॥ विशावमानपापेनयमलोकंगतस्यवै॥४॥ स
र्पदष्टंनृपंश्रुत्वाहर्म्योपरिमृतंतथा॥ विप्रशापादुत्तरेयंस्नानदानविवर्जितं॥५॥ पि
तुर्गतिंनिशम्यासौनिर्वेदंगतवान्नृप॥ पारिक्षितोमहात्मागसंतप्तोजयविकलः॥६
पप्रच्छाप्यमुनिंव्यासंगृहाणतममनिंदितं॥ नरनारायणस्येमांकथांपरमविस्तरां॥७
॥व्यासउ॥ एकदानिहतेरौद्रेहिरण्यकशिपौनृप॥ अभिषिक्तस्तथाराज्येप्रल्हादोना २५
मतत्सुतः॥८॥ तस्मिन्शासतिदैत्येंद्रेदेवब्राह्मणपूजके॥ मखान्भूम्यांनृपतयोयजंते
विधिवत्तदा॥९॥ ब्राह्मणाश्चतपोधर्मंतीर्थयात्राश्चकुर्वते॥ वैश्यश्चस्वात्मवृत्तिस्थाः शू

द्राश्चशुश्रूषणेरताः॥१०॥ नृसिंहेनचपातालेस्थापितःसोथदैत्यराट्॥ राज्यंचकारतत्रै
वपालयन्दानवानपि॥११॥ कदाचिद्भृगुपुत्रोथंच्यवनोनामहायशाः॥ जगामनर्मदां
स्नातुंतीर्थंवैव्याहतीश्वरं॥१२॥ रेवांमहानदींदृष्ट्वातत्रस्नातुमवातरत्॥ उत्तरंतंचजग्रा
हनागःकेकरलोहितः॥१३॥ गृहीत्वानीयमानस्तुपातालेमुनिसत्तम॥ सस्मारमनसा
विष्णुंदेवदेवंजनार्दनं॥१४॥ संस्मृत्येपुंडरीकाक्षेनिर्विषोभून्महोरगः॥ नश्राप्यच्यव
नोदुःखंनीयमानोरसातलं॥१५॥ द्विजिह्वेनमुनिस्त्यक्तोनिर्विषेणातिशंकिना॥ ना
गोपथंमुनिःक्रुद्धःशापसोयंमहानिति॥१६॥ चचारनागकन्याभिःपूजितोमुंनि
सत्तम विचरन्सविवेशाथदानवानांपुरंमहत्॥ कदाचिद्भृगुपुत्रंतंविचरंतंपुरोत्तमे॥
ददर्शदैत्यराजासौप्रल्हादोधर्मवत्सल॥१८॥ दृष्ट्वातंपूजयामाससमुनिंमतिमत्तया॥

भा.७. पप्रच्छ कारणं किं ते पातालागमने वद ॥१९॥ प्रेषितोऽसि किमिंद्रेण सत्यं ब्रूहि द्विजो
२६ त्तम ॥ सदैव वैरयुक्तेन ममराज्यादिहेतया ॥२०॥ च्यवन उवाच ॥ किं मे मघवता रा
जन्यदहं तेन प्रेषितः ॥ दूतः कार्यं प्रकुर्वाणः आगमं च पुरे तव ॥२१॥ विद्धि मां त्व
गुपुत्र त्वं स्वतंत्रं धर्मतत्परं ॥ मा शंकां कुरु दैत्येंद्र वासव प्रेषितस्य वै ॥२२॥ स्नानार्थं न
र्मदां प्राप्तः पुण्यतीर्थं नृपोत्तम ॥ नद्यामेवावतीर्णोऽहं गृहीतश्च महाहिना ॥२३॥ जा
तो सोनिर्विषः सर्पो विष्णो संस्मरणाद्दिव ॥ मुक्तोऽहं तेन नागेन प्रभावात्स्मरणस्य वै ॥
२४॥ अत्रागतेन राजेंद्र प्राप्तं मे तव दर्शनं ॥ विष्णुभक्तोऽसि दैत्येंद्र तद्भक्तं मां विजानय ॥
२५॥ व्यास उवाच ॥ तन्निशम्य वचस्तस्य हिरण्यकशिपोः सुतः पप्रच्छ परया प्री राम॰
त्या तीर्थानि विविधानि च ॥२६॥ प्रह्लाद उ० ॥ पृथिव्यां कानि तीर्थानि पुण्यानि मु २६

निसत्तम ॥ पाताले च तथाकाशे तानि नो वद विस्तरात् ॥२७॥ च्यवन उ० ॥ मनोवाका
यशुद्धानां राजन्तीर्थं पदे पदे ॥ तथा मलिनचित्तानां गंगापि कीकटाधिका ॥२८॥
प्रथमं चेन्मनः शुद्धं जातं पापविवर्जितं ॥ ततस्तीर्थानि सर्वाणि पावनानि भवंति वै ॥
गंगातीरे हि सर्वत्र वसंति नगराणि च ॥ व्रजाश्चैवाकराग्रामाः खर्वाः खेटास्तथापरे ॥३०
निषादानां निवासाश्च कैवर्तानां तथा परे ॥ हूणानां च खसानां च म्लेच्छानां दैत्यसत्त
म ॥३१॥ पिबंती सर्वदा गांगं जलं ब्रह्मोपसंपदा ॥ स्नानं कुर्वंति दैतेंद्र त्रिकालं स्वेच्छया
जनाः ॥३२॥ तत्रैकापि विशुद्धात्मा न भवत्येव मारिष ॥ किं बलं तर्हि तीर्थस्य विषयो
पहतात्मसु ३३ कारणं मन एवात्र नान्यं राजन्विचिंतय ॥ मनसः शुद्धिकर्तव्या सततं
शुद्धिमिच्छता ॥३४॥ तीर्थवासी जनस्तापी भवेत्तत्र विचेष्टनात् ॥ तत्रैवाचरितं पापं

भा·च· तोनंतायकल्पते॥३५॥यथेंद्रवारणंपङ्कंमिष्टंनैवोपजायते॥भावदुष्टास्तथातीर्थको
२७ टिस्नातोनशुध्यति॥३६॥प्रथमंमनसःशुद्धिःकर्त्तव्याशुभमिच्छता॥शुद्धेमनसिद्रव्यस्य
शुद्धिर्भवतिनान्यथा॥३७॥तथैवाचारशुद्धिःस्यात्ततस्तीर्थंप्रसिध्यति॥अन्यथातु
कृतंसर्वंव्यर्थंभवतितत्क्षणात्॥३८॥असत्यंनैववक्तव्यंपरद्रव्यंचवर्जयेत्॥हीनव
र्णस्यसंसर्गंतीर्थदानसहात्यजेत्॥भूतानुकंपनंचैवकर्त्तव्यंकर्मणाधिया॥४०
यदिपृच्छसिराजेंद्रतीर्थंवक्ष्याम्यनुत्तमं॥प्रथमंनैमिषंपुण्यंचक्रतीर्थंचपुष्करं॥४१
अन्येषांचैवतीर्थानांसंख्यानास्तिमहीतले॥पावनानिचस्थानानिबहूनिनृपस
त्तम॥४२॥व्यासउ॥ ॥तच्छ्रुत्वावचनंराजानैमिषंगंतुमुद्यतः॥नोदयामासदैत्या २७
न्वैहर्षनिर्भरमानसः॥४३॥प्रह्लादउ॥ ॥उत्तिष्ठन्तुमहानागागमिष्यामोवयंनैमिषं

द्रष्टामःपुंडरीकाक्षंपीतवाससमच्युतं॥४४॥व्यासउ॥इत्युक्ताविष्णुभक्तेनसर्वैर्दै
श्वरैस्तथा॥तेनैवसहपातालान्निर्ययुःपरयामुदा॥४५॥तेसमेत्यचदैतेयादानवा
श्चमहाबलाः॥नैमिषारण्यमासाद्यस्नानंचक्रुर्मुदान्विताः॥४६॥प्रह्लादस्तत्रती
र्थेषुचरन्दैत्यैःसमन्वितः॥सरस्वतींमहापुण्यांददर्शविमलोदकां॥४७॥तीर्थेत
त्रनृपश्रेष्ठप्रह्लादस्यमहात्मनः॥प्रसन्नसंजातंस्नात्वासारस्वतेजले॥४८॥विधि
वत्तत्रदैत्येंद्रःस्नानदानादिकंशुभं॥चकाराविप्रसन्नात्मातीर्थेपरमपावने॥
४९॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेअष्टमोध्यायः॥८॥ ॥व्यास
उवाच॥ ॥कृत्वातीर्थविधिंतत्रहिरण्यकशिपोःसुतः॥निग्रोधंसुमहच्छायमपश्य
त्सुरतस्तदा॥१॥ददर्शबाणानपरान्सुखेनग्रात्यरस्परं॥गृध्रपक्षयुतांस्तीक्ष्णान्

भा॰च॰ शिलाधौतान्महोज्ज्वलान्॥२॥ चिंतयामास मनसा कस्येमौ विशिषास्त्विह॥ ऋषी
णामाश्रमेपुण्येतीर्थेपरमपावने॥३॥ एवंचिंतयतातेनदृष्टाजिनधरौमुनी॥ स
२८ मुन्नतजटाभारौहृष्टौधर्मसुतौतदा॥४॥ तस्मिंश्चहेमश्रृंगेधनुषीलक्षणान्विते॥ शा
र्ङ्गमाजगवंचैवतथाक्षय्यौमहेषुधी॥५॥ ध्यानस्थौतौमहाभागौनरनारायणावृषी
दृष्ट्वाक्रोधवशंयातस्तदैत्यानामधिपस्तदा॥६॥ कोधारकेक्षणस्तौतुशैवावाचापुरुषा
लकाः॥ किंत्ववस्थांरनारथ्वोदंभोधर्मविनाशकः॥७॥ नश्रुतंनैवदृष्टंचसंसारेस्मिन्क
दाचन॥ तपसश्चरणंतीर्थंचतथाचापस्यधारणं॥८॥ विरोधोयंयुगेचाद्येकथंमु राम॰
क्तःकलिप्रियः॥ ब्राह्मणस्यंतपोयुक्तंतत्रकिंचापधारणं॥९॥ क्वजटाधरणंदेहे २८
क्वेषुधीचविडंबनं॥ कथमाचरणंयुक्तंयुवयोर्दंभवेषयोः॥१०॥ व्यासउवाच॥ इ

तितस्यवचःश्रुत्वानरप्रोवाचभारत॥ कातेत्रचिंतादैत्येंद्रआवयोस्तपसिदृया
११॥ युद्धेतपसिसामर्थ्यंकिंकरिष्यसित्वंपुनः॥ गच्छमार्गेयथाकामंकस्मात्त्वंविक
त्थसे॥१२॥ ब्राह्मंतेजदुराराध्यंनत्वंवेदविमोहितः॥ विप्रवचनिकत्वंथाप्राणिभिः
सुखमिच्छुभिः॥१३॥ ॥प्रल्हादउ॥ ॥ तापसौमंदबुद्धीहमृषावांगर्वमोहितौ॥ म
यितिष्ठतिदैत्येंद्रेधर्मसेतुप्रवर्तके॥१४॥ नयुक्तमेततीर्थेस्मिन्धर्माचरणंपुनः॥ का
त्राक्तिस्तवयुद्धेस्तिदर्शयाद्यप्रपंचक॥१५॥ ॥व्यासउवाच॥ ॥ तदाकर्ण्यवचस्तस्य
नरस्तंप्रत्युवाचह॥ कुरुयुद्धंमयासार्धंयदितेमतिरीदृशी॥१६॥ अद्यतेस्फोटयिष्या
मिमानंरक्षःकुलाधम॥ युद्धश्रद्धनतेपश्चाद्भविष्यतिकदाचन॥१७॥ व्यासउ॥ तन्निशा
म्यवचस्तस्यदैत्येयःकुपितस्तदा॥ प्रक्रातोबलवानत्रप्रतिज्ञामारुरोहसः॥१८॥ येन

भा॰च॰ केनाप्युपायेनजेष्यामितावुभावपि॥ नरनारायणौदांतौमृषातापसमानिनौ॥१९॥
व्यासउ॥ ॥इत्युक्त्वावचनंदैत्योप्रतिगृह्यशरासनं॥ आकृष्यतरसाचापंज्याशब्दंचच
२९ कारह॥२०॥ नरोपिधनुरादायबाणान्तीव्रान्शिलाशितान्॥ मुमोचबहुशःक्रोधा
त्वकादेपरिपार्थिव॥२१॥ तान्दैत्यराजस्तपनीयपुंखैश्छिच्छेदबाणैस्तरसामनीषी॥ स
मीक्ष्यछिन्नांश्चनरःपृषत्कानन्यान्मुमोचाशुरुषान्वितोवै॥२२॥ दैत्याधिपस्तानपि
तीव्रवेगैःछित्वाजघानोरसितंमुनींद्रं॥ नरोपितंपंचभिराशुगैश्चक्रुद्धोहनद्दैत्य
पतिंबाहुदेशे॥२३॥ सेंशःसुरास्तत्रतयोर्हियुद्धंद्रष्टुंविमानेगगनेस्थिताश्च॥ न
रस्यवीर्यंयुधिसंस्थितस्यतेतुष्टुवुर्दैत्यपतेश्चभूयः॥२४॥ ववर्षदैत्याधिपश्चात्तचा २९
पःशलीमुखानंबुधरोयथापः॥ गिरौनरश्चातिरुषान्वितोसौनरस्तदास्त्राणिमवा

पराजन्॥२५॥ अस्त्राणिनिर्गतंवीक्ष्यनरंतदासौनारायणःक्रोधयुतोबभूव॥ आदा
यशार्ङ्गंधनुरप्रमेयंमुमोचबाणान्किलहेमपुंखान्॥२६॥ बभूवयुद्धंतुमुल
तयोस्तुजयैषिणोःपार्थिवदेवदैत्ययोः॥ ववर्षुराकाशस्थिताःसुरास्तेपुष्पा
णिदिव्यानिप्रहृष्टचित्ताः॥२७॥ चुकोपदैत्याधिपतिर्हरौसमुमोचबाणानति
तीव्रवेगात्॥ चिच्छेदतान्धर्मसुतःसुतीक्ष्णैर्धनुर्विमुक्तैर्विशिखैस्तदाशु॥२८॥ त
तोनारायणंबाणैःप्रह्लादश्चातिकर्षितैः॥ ववर्षसुस्थितंधीरंधर्मपुत्रंसनातनं॥
२९॥ नारायणोपितंवेगान्मुक्तैर्बाणैःशिलाशितैः॥ ततोदतातीवप्रह्लादंदैत्या
नामधिपस्थितं॥३०॥ सन्निपातोबरेतत्रदिदृक्षूणांबभूवह॥ देवानांदानवानांचकु
र्वतांजयघोषणं॥३१॥ उभयोःशरवर्षेणच्छादितेगगनेतदा॥ दिवापिरात्रिसदृ

भा॰च॰ तांबभूवतिमिरंमहत् ॥३१॥ ऊचुःपरस्परंदेवादैत्यास्त्वावैतौविस्मिता ॥ अदृष्टपूर्वयु
द्धंवैवर्ततेसुदारुणं ॥३३॥ देवर्षयोऽप्यगंधर्वायक्षकिंनरपन्नगाः ॥ विद्याधराश्चारणाश्च
३० विस्मयंपरमंययुः ॥३४॥ नारदःपर्वतश्चैवप्रेक्षणार्थंस्थितौमुनिः ॥ नारदःपर्वतंप्रा
हनेदृष्टंचाद्यवृत्सुरा ॥३५॥ तारकासुरयुद्धंचतथाहत्वासुरस्यच ॥ मधुकैटभयोर्यु
द्धेहरिणाचदृष्टंस्मृतं ॥३६॥ प्रह्लादःप्रबलःशूरोयस्मान्नारायणेनच ॥ करोतिस
दृशंयुद्धंसिद्धेनाद्भुतकर्मणा ॥३७॥ ॥व्यासउ॥ ॥ दिनेदिनेतथारात्रौत्वत्वापुनःपुनः
चक्रतुःपरमंयुद्धंतौतदादैत्यतापसौ ॥३८॥ नारायणस्तुचिच्छेदप्रह्लादस्यशरास ३०
नं ॥ तस्यैकेनबाणेनसचान्यमाददेधनुः ॥३९॥ नारायणस्तुतरसामुक्त्वाचाम्नंशि
लीमुखं ॥ तदेवमध्यतस्याधंपंचिच्छेदलघुहस्तकः ॥४०॥ छिन्नंछिन्नंपुनःदैत्यस्तरसान्य

समादधे ॥ नारायणस्तुचिच्छेदविच्छिगैरास्तुकोपितः ॥४१॥ छिन्नेधनुषिदैत्येंद्रःपरि
घंसुसमादधे ॥ चिच्छेदपरिघंघोरंदृष्ट्वानिस्त्रांमंतांउयत् ॥४३॥ गदामादायदैत्येंद्र
सर्वयिसमयींदृढां ॥ जंतुदेत्योजघानाशुदेवंनारायणंरुषा ॥४४॥ गदयाश्चापि
---गिरिवत्संस्थितःस्थिरः ॥ धर्मपुत्रोतिबलवान्मुखोचाशुशिलीमुखान् ॥४५
गदांचिच्छेदभगवान्तदादैत्यपतेर्दृढां ॥ विस्मयंपरमंजग्मुःप्रेक्षकागगनेस्थिताः ॥४६
ततःशक्तिसमादायप्रह्लादःपरवीरहा ॥ चिक्षेपतरसाक्रुद्धोबलान्नारायणोरसि ॥४७
तामापतंतीसंवीक्ष्यबाणेनैकेनधर्मजः ॥ सप्तधातुल्लतवानाशुसप्तभिस्तंजघानह ॥४८
हिर्यंवर्षसहस्रंतुतद्युद्धंपरमंतयोःजातंविस्मयदंराजन्सर्वेषांतत्रचाश्रमे ॥४९॥ तदाज
गामतरसापीतवासाचतुर्भुजः ॥ गदाधरोरमाकांतःशंखचक्रमहायुजः ॥५०॥ दृष्टातमा

गतंतत्रहिरण्यकशिपोःसुतः॥प्रणम्यपरयाभक्त्याप्रांजलिश्चेदमुवाचह॥५१॥प्रह्लादउ॥
देवदेवजगन्नाथभक्तवत्सलभूधर॥नकथंजिनवासानाबद्धमतौकथंजितौ॥५२॥संग्रा
मस्तुमयादेवःकृतःपूर्णशतंसमाः॥सुराणांनजितंकस्मादितिमेविस्मयोमहान्॥५३॥
विष्णुरुवाच॥ ॥सिद्धाविमौमहंशौचविस्मयःकोत्रमारिष॥तापसौचजितात्मानौन
रनारायणौजितौ॥५४॥गच्छत्वंवितलंराजन्गुरुभक्तिंसमाचर॥मास्मांकुरुविरोध
त्वंतापसाभ्यांमहामते॥५५॥ ॥व्यासउवाच॥ ॥इत्याज्ञप्तःसुरारातिर्निर्ययौवसुरैःस
ह॥ नरनारायणौभूयस्तपस्युक्तौबभूवतुः॥५६॥इतितेकथितंराजन्प्रह्लादेनयथापु
राःकृतंचहरिणायुद्धंदेवविस्मयकारकं॥५७॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थ
स्कंधेनवमोध्यायः॥९॥ ॥जनमेजयउवाच॥ ॥संदेहोयंमहान्मेत्रपाराशर्यकथानके

नरनारायणौशांतौवैष्णवांशौतपोधनौ॥१॥तीर्थाश्रयौसत्वयुक्तौवन्याशनपरौसदा
धर्मपुत्रौमहात्मानौतापसौसत्यवक्तारौ॥२॥तौकथंरागसंयुक्तौजातौवीरास्पदंमु
नी॥ संग्रामंचक्रतुःकस्मात्त्यक्त्वातपउत्तमं॥३॥प्रह्लादेनसमंपूर्णदेववर्षशतंकि
लं॥ हित्वाशांतिसुखंयुद्धंकृतवंतौकथंमुनी॥४॥ईदृशौचेन्मनोजेतुंनशक्तौमुनिस
त्तमौ॥ साधारणानांकावार्ताशमोगुणसमुद्भवे॥५॥नराज्यार्थेनद्रव्यार्थेननारी
णांसमागमे॥ कथंतौचक्रतुर्युद्धंप्रह्लादेनसमंमुनी॥६॥कामनीकनकंकामंका
रणंविग्रहस्यवै॥ युद्धबुद्धिःकथंजातातयोश्चितविरक्तयोः॥७॥तथाविधंतपस्त
प्तंताभ्यांचकेनहेतुना॥ धनार्थंसुखभोगार्थंस्वर्गार्थंवापरंतप॥८॥कृतमत्कलकटंवा॥
तामांतपसर्वफलप्रदं॥मुनीभ्यांशांतचित्ताभ्यांप्राप्तंकिंफलमद्भुतं॥९॥ तपसापी

ना॰ च॰ द्वितीये हः संग्रामेण पुनस्तथा॥ दिव्यं वर्षशतं पूर्णं श्रमेणातिप्रपीडितः॥१०॥ नरा
न्नार्थे धनेवापि न दारा सुगृहेतुच॥ किमर्थं तु कृतं युद्धं ताभ्यां तेन महात्मना॥११॥ नि
३२ रीहः पुरुषः कस्माद्करोति कदनमीहवा॥ दुःखदं सर्वथा देहे जानन्धर्मं सनातनं॥१२॥
१२॥ स बुद्धिः सुखदानीह कर्माणि कुरुते सदा॥ न दुःखदानि धर्मज्ञा स्थितिरेषा स
नातनी॥१३॥ धर्मपुत्रौ हरेरंशौ सर्वज्ञौ सर्वपूजितौ॥ कृतवंतौ कथं युद्धं दुःखदं धर्म
नाशनं १४ त्यक्त्वा तपः समाधिं ता सुखरामां महत्फलं॥ संयुगं दारुणं ब्रह्मन्
मूर्खोपि नैव वांछति॥१५॥ स्वर्गान्महीपति॥ अहंकारेन वासा
पात्पातितः पृथ्वीतले॥१६॥ यज्ञोक्रशनकतुर्विधार्मिकः पृथिवीपतिः॥ राष्ट्रेण ब्रा ३२
रणमात्रेण पातितो वज्रपाणिना॥१७॥ अहंकारमृते युद्धं न भवत्येव निश्चयः॥ किं

फलं तेन कृतं तस्य मुनेः पुण्यविनाशनं॥१८॥ ॥व्यास उवाच॥ ॥राजन्संसारमूलं
हि त्रिविधः परिकीर्तितः अहंकारस्तु सर्वज्ञ मुनिनिधर्मनिश्चये॥१९॥ स कथं तु
निनात्यक्तुं योगेपादेहवता किल॥ कारणेन विना कार्यं न भवत्येव निश्चय॥२०॥ त
पो दानं तथा यज्ञा सात्विका स्त्वभवंत्पति॥ राजसाह्यामहाराजो गत्तामसा कलहप्र
या॥२१॥ क्रियास्तस्मापि राजेंद्र नाहंकार विका क चित्॥
श्चय॥२२॥ अहंकारस्ततो बद्धो नान्यास्ति जगतीतले॥ तेनेदं रचितं वि
श्वं कथं तद्रहितं भवेत्॥२३॥ ब्रह्मविष्णुस्तथा रुद्र अहंकारयुताः सभी॥ अन्येषां चैव
का वार्ता मुनीनां वसुधाधिपः॥२४॥ अहंकाराहृतं विश्वं भ्रमत्येदं चराचरं॥ पुनर्जन्म
पुनर्मृत्यु सर्वं कर्मवशानुगं॥२५॥ देवतिर्यग्मनुष्याणां संसारेस्मिन्महीपते॥ रथांग

वदसर्वार्थिन्निमग्णं सर्वदास्मृतं ॥२६॥ विष्णोरप्यवताराणां संख्यां जानाति कः पु
मान् ॥ वितते स्मिन्संसारे तु उत्तमाधमयोनिषु ॥२७॥ नारायणो हरिः साक्षान्मात्स्यं
वपुरुपाश्रितः ॥ कामठं शौकरं चैव नारसिंहं वामनं ॥२८॥ युगेयुगे जगन्नाथ वा
सुदेवो जनार्दनः ॥ अवतारानसंख्यातान्करोति विधितंत्रितः ॥२९॥ वैवस्वते महा
राज सप्तमे भगवान्हरिः ॥ मन्वंतरेवतारान्वै चक्रे तान्शृणु तत्वतः ॥३०॥ भृगोश्शा
पान्महाभाग विष्णुर्देववरः प्रभुः ॥ अवतारानने कांस्तु ज्ञातवानखिलेश्वर ॥३१॥ ॥
राजोवाच ॥ ॥ संदेहो यं महाभाग हृदये मम जायते ॥ भृगुणा भगवान्विष्णुः कथं
शप्तः पितामह ॥ अथाप्यत्र मुनेस्तस्य विप्रियं कृतं मुने ॥ यशोषा भृगुणा शप्तो वि
ष्णुर्देवनमस्कृतः ॥३३॥ ॥ व्यास उवाच ॥ शृणु राजन्प्रवक्ष्यामि कारणं प्रप

जं किल ॥ पुरा कश्यपदायादो हिरण्यकशिपुर्नृपः ॥३४॥ यदा तदासुरैः सार्द्धं ततं स
र्वं परस्परं ॥ भ्रतेस्मिन्जगत्सर्वं मव्याकुलम जायत ॥३५॥ हते तस्मिन्नृपे राजा प्रह्ला
दः समजायत ॥ पितुर्वैरं स्मरं स्तेनैव रोषेण परिपीडितः ॥३६॥ संग्राममकरोद्घोरं श
क्रेण सह भारत ॥ देवान्संपीडयामास प्रह्लादश्शत्रुकर्शनः ॥३७॥ संग्रामस्तु महा
घोरः शक्रप्रह्लादयोर्मिथः ॥ पूर्णं वर्षशतं राजन्लोकविस्मयकारकं ॥३८॥ दैवे
युद्धं ततं चोग्रं प्रह्लादस्तु पराजितः ॥ निर्वेदं परमं प्राप्तो ज्ञात्वा धर्मं सनातनं ॥३९॥
विरोचनसुतं राज्ये प्रतिष्ठाप्य बलिं नृपं ॥ जगाम स तपस्तप्तुं पर्वते गंधमादने ॥४०
प्राप्य राज्यं बलिः श्रीमान्देवैर्वैरं चकार ह ॥ ततः परस्परं युद्धं जातं परमदारुणं ॥४१
ततो सुरैर्जिता दैत्या इंद्रेणामिततेजसा ॥ विष्णोः सहाययुक्तेन राज्यभ्रष्टाः कृता

भा॰ च॰ नृप ॥ ४२ ॥ ततः पराजिता दैत्याः काव्यस्य शरणं गताः ॥ किं त्वं न कुरुषे ब्रह्मन्सहा
३५ यं नः प्रता ॥ ४३ ॥ स्थातुं न शक्नमो ह्यत्र प्रविशामो रसातलं ॥ यदि त्वं न सहायोसि त्रा
तुं मंत्रविदुत्तमः ॥ ४४ ॥ ॥ व्यासउ॰ ॥ ॥ इत्युक्तः सोब्रवीद्दैत्यान्काव्यः कारुणिको मु
निः ॥ माभैष्ट धारयिष्यामि तेजसा स्वेन नो सुराः ॥ ४५ ॥ मंत्रैस्तथौषधीभिश्च स
हायं वः सदैव हि ॥ करिष्यामि ततो साहा भवंतु विगतज्वरा ॥ ४६ ॥ व्यासउ॰ ॥ ॥ त
तस्ते निर्भया जाता दैत्याः काव्यस्य संश्रयात् ॥ देवैः श्रुतं तु वृत्तांतं सर्वं चारमुखात्कि
ल ॥ ४७ ॥ ततः संमंत्र्य ते देवाः शक्राद्याश्च परस्परं ॥ मंत्रं चक्रुः सुसंविग्नाः काव्यमं
त्रप्रभावतः ॥ ४८ ॥ साधु गच्छामहे तूर्णं यावन्नाध्यापये न वै ॥ प्रसह्य हत्वा शिष्टां
स्तु पातालं प्रापयामहे ॥ ४९ ॥ दैत्याञ्जग्मुस्ततो देवाः सरब्धाः शस्त्रपाणयः ॥ जघ्नु

स्तान्विष्णुसहिता दानवान्हरिनोदिताः ॥ ५० ॥ वध्यमानास्तु ते दैत्याः संत्रस्ता भयपी
डिताः काव्यं शरणार्थिनो जग्मुः रक्ष रक्षेति चाब्रुवन् ॥ ५१ ॥ तान्तथा पीडितान्दृष्ट्वा दे
वैर्दैत्यान्महाबलान् ॥ माभैष्टेति वचः प्राह मंत्रौषधबलाद्विभुः ॥ ५२ ॥ दृष्ट्वा काव्यं
सुराः सर्वे त्यक्त्वा तान्प्रययुः किल ॥ स्वधाममतिमाधाय मुनेस्तत्त्वा महाबलं ॥ ५३ ॥ ॥
इति श्रीभागवते महापुराणे चतुर्थस्कंधे दशमोध्यायः ॥ १० ॥ ॥ व्यासउ॰ ॥ ॥ तथा
गतेषु देवेषु काव्यस्तान्प्रत्युवाच ह ॥ ब्रह्मणा पूर्ववृत्तं कं यत् शृणुध्वं दानवोत्तमाः ॥ १
विष्णुर्दैत्यवधोद्युक्तो निहनिष्यति जनार्दनः ॥ वाराहं रूपमास्थाय हतः ॥ २ ॥ य
थान्नसिंहरूपेण हिरण्यकशिपुर्हतः ॥ तथा सर्वान्ततोत्साहो हनिष्यति न चान्य
था ॥ ३ ॥ नेमे मंत्रबलं सम्यक्प्रतिभाति यथा हरिं ॥ जेतुं यूयं समर्थास्मि मया त्रा

तासुरानथ॥४॥ तस्मात्कालं प्रतीक्षध्वं कियंतं दानवोत्तमाः॥ यावदहं महादेवं मंत्रार्थमु
पजामिवै॥५॥ प्राप्य मंत्रान्महादेवादागमिष्यामि संप्रतं॥ युष्मत्सतान्प्रदास्यामि
यथार्थं दानवोत्तमाः॥६॥ प्राप्य मंत्रान्महादेवात्समा दैत्या ऊचुः॥ पराजिताः कथं
स्थातुं पृथिव्यां मुनिसत्तम॥ त्वाकान्नवामहे नूतावत्कालं प्रतीक्षितुं॥७॥ ॥काव्य उ॥
निहताः बलिनः सर्वे किंचिच्छिष्टास्म दानवाः॥ नाद्य युक्तस्तु संग्रामो शममेव सुखा
वहं॥८॥ यावदहं मंत्रविद्यां गृहीत्वा समुपागमं॥ तावद्भवद्भिः स्थातव्यं तपोयुक्तै
:श्रमाचितैः॥९॥ सामदानादयः प्रोक्ता विबुद्धिः समयेसदा॥ देशकालबलं वीस
तथाशक्तित्रयं बुधैः॥१०॥ सेवाथ समयकायान्नांतु एणां श्रुतमिच्छत॥ स्वशक्त्युपचये
कालेहंतथा स्तेमानिभिनिः॥११॥ तदद्य विनयं मत्वा सामपूर्वं छलेन वै॥ तत्रध्वंस

निकेतेषु मदागमनकांक्षया॥१२॥ प्राप्य मंत्रान्महादेवादागमिष्यामि दानवाः युष्मा
महे पुनर्देवान्नव प्राप्स्यथैव जयं॥१३॥ इत्युक्त्वा दानवान्काव्यो जगाम तत्र तन्निश्चयः॥ म
हादेवं महाराज मंत्रार्थं मुनिसत्तम॥१४॥ दानवाः प्रेषयामासुः प्रह्लादं सुरसंनिधौ॥ स
त्यवादिनमव्यग्रं सुराणां प्रत्ययप्रदं॥१५॥ प्रह्लादस्तुरान्वाह न्यस्तशस्त्रा यावनतो नृप॥ अ
सुरैरावृतः तत्त्वचनेनमपूर्वकं॥१६॥ न त्वत्रासादयस वै निःसंनाहा रार्थे विना
देवाश्च तपश्चरिष्यामः संवृता वल्कलैर्वने॥१७॥ प्रह्लादस्य वचः श्रुत्वा सत्याभि
व्याहृतं तु तत्॥ ततो देवा न्यवर्तंत विज्वरा मुदितास्तते॥१८॥ न्यस्तशस्त्रेषु दैत्येषु विनि
वृत्तास्तदासुराः॥ विस्रब्धाः स्वगृहान्गत्वा क्रीडासक्ताः सुसंस्थिताः॥१९॥ दैत्यास्ते
दंभमालंब्य तापसात्त्संयुताः॥ कश्यपस्याश्रमे वासं चक्रुः काममनेत्तु या॥२०

ना०च० काव्योगत्वाथकैलासंमहादेवंप्रणम्यच॥उवाचविभुनापृष्टःकिंतेकार्यमितिनृ
प॥२१॥मंत्रानिच्छाम्यहंदेवयेनसंतिबृहस्पतौ॥पराभवायदेवानांमसुराणांज
३६ यायच॥२२॥व्यासउ॥ ॥तत्श्रुत्वावचनंतस्यसर्वज्ञःशंकरःशिवः॥चिंतयामा
समनसाकिंकर्त्तव्यमितःपरं॥२३॥सुरेषुद्रोहबुध्यासौमंत्रार्थमिहसांप्रतं॥प्राप्तः
काव्योगुरुस्तेषांदैत्यानांविजयायच॥२४॥रक्षणीयामयादेवाइतिसंचिंत्यशंक
रः॥दुष्करंव्रतमत्यर्थंतमुवाचमहेश्वरः॥२५॥पूर्णंवर्षसहस्रंतुकणधूममवाक्
शिराः॥यदिपास्यसिभद्रंतेततोमंत्रानवाप्स्यसि॥२६॥इत्युक्तोसौप्रणम्येशंबा ३६
ढमित्यब्रवीद्वचः॥व्रतंचराम्यहंदेवत्वयाज्ञप्तःसुरेश्वर॥२७॥व्यासउ॥इत्युक्त्वाशं
करंकाव्यश्चकारव्रतमुत्तमं॥धूम्रपानरतःशांतोमंत्रार्थंकृतनिश्चयः॥२८॥ततो

देवाःपरिज्ञातान्नृत्वाकाव्यंव्रतेरतं॥दैत्यान्दंभयुतांश्चैवबभूवुर्मंत्रत
त्पराः॥२९॥विचार्यमनसःसर्वेसंग्रामायोद्यतान्नृप॥यद्युधनायुधास्तत्र
तेदानवोत्तमाः॥३०॥तानागतान्समीक्ष्याथसायुधान्दंशितांस्तथा॥श्चासंस्तेन
यसंविग्नादैत्यान्देवाकृतोद्यमान्॥३१॥उत्पेतुःसहसातेवैसंत्रस्ताभयकर्शिताः॥
चक्रवन्तंवचनंतथ्यंतेदेवान्बलदर्पितान्॥३२॥न्यस्तशस्त्रास्त्वनयेदत्तेश्चाचार्येव्रतमा
स्थिते॥दत्वाभयंतोत्यजतयसंग्रामात्तोजिघांसया॥३३॥सत्यंवःकृतंदेवाधर्मश्चश्रु
तिनोदितः॥न्यस्तशस्त्रास्त्वानहंतव्याभीतास्तशरणागताः॥देवाऊचुः॥नवद्भिःप्रोषितः
काव्योमंत्रार्थंकुहकेनवै॥तपोज्ञातंहियुष्माकंतेनयुद्धामहेद्भुतं॥३५॥सज्जाभवंतु
युद्धायसन्नद्धाःशस्त्रपाणयः॥शत्रुच्छिद्रेणहंतव्याएषधर्मःसनातनः॥३६॥व्यासउ॥

तच्छ्रुत्वावचनंदैत्याविचार्यचपरस्परं॥पलायनःपरास्तेवैनिर्गताभयविकलाः॥३७॥
तारणार्थंदानवाजग्मुस्तांस्तेकाव्यमातरं॥दृष्ट्वानीतान्सुसंत्रस्तानभयंचददावथ॥
३८॥ ॥काव्यमातोवाच॥ ॥नभेतव्यंनभेतव्यंभयंत्यजतदानवाः॥मत्संनिधौवर्ततांवो
नभीर्जीवितुमर्हति॥३९॥तच्छ्रुत्वावचनंदैत्याःस्थितातत्रगतव्यथाः॥निरायुधा
न्त्यसंत्रस्तांस्तत्राश्रममवेत्यसुराः॥४०॥देवास्तान्विद्रुतान्वीक्ष्यदानवांस्तेपदानुगाः॥अ
भिजग्मुःप्रसह्यतानविचार्यबलाबलं॥४१॥तत्रागत्यसुराःसर्वेहंतुंदैत्यान्समुद्य
ताः॥वारिताकाव्यमात्रापिजघ्नुस्तानाश्रमस्थितान्॥४२॥हन्यमानान्सुरैर्दृष्ट्वाका
व्यमाताऽतिकोपिता॥उवाचसर्वान्निर्निद्रान्तपसाप्रकरोम्यहं॥४३॥इत्युक्त्वाद्वेरि
तान्निद्रितानागत्यपपातह॥सेंद्रानिद्रावशंप्राप्तादेवामूकवत्स्थिताः॥४४॥इंद्रं

निद्राजितंदृष्ट्वादीनंविष्णुरभाषत॥मांत्वंप्रविशशक्रत्वंतेनयेत्वांचसरोत्तमः॥४५॥ए
वमुक्तस्ततोविष्णुंप्रविवेशपुरंदरः॥निर्भयोगतनिद्रश्चबभूवहरिरक्षिता॥४६॥र
क्षितंहरिणादृष्ट्वाशक्रंतत्रगतव्यथं॥काव्यमाताततःक्रुद्धाकेशवंवचनमब्रवीत्॥
४७॥मघवंस्त्वंदहाम्यद्यसविष्णुंवैतपोबलात्॥पश्यतांसर्वदेवानामीक्षस्वमेतपोब
लं॥४८॥व्यासउ॥ ॥इत्युक्त्वातुतयादेवौविद्धौविशेयोगविद्यया॥अभिभूतौमहात्मा
नौसंस्तब्धौतौबभूवतो॥४९॥विस्मितास्तुतदादेवादृष्ट्वातावतिबाधितौ॥चकम्पेक
लकलारावंचक्रुःसुदीनमानसाः॥५०॥क्रोशमानान्सुरान्दृष्ट्वाविष्णुःप्राहशचीपतिं॥
विशेषेणाभिभूतोस्मितवतेऽहंमधुसूदनः॥५१॥दहैनांतरसाविप्रायावन्नौनदहेत्स्वमो
तपसादर्पितांदुष्टांमाविचारयमाधव॥५२॥इत्युक्तोभगवान्विष्णुःशक्रेणव्यथितेन

भा·च· च॥ चक्रंसस्मारतरसाघृणांत्यक्त्वास्त्रीवधे॥५३॥ स्मृतमात्रंतुसंप्राप्तंचक्रंविष्णुव
शानुगं॥ दधारचक्रंकरेकेवधार्थंशक्रनोदितः॥५४॥ गृहीत्वातत्करेचक्रंशिरश्चि
३८ छेदरंहसा॥ हतांदृष्ट्वाचतांशक्रोमुदितश्चाभवत्तदा॥५५॥ देवाश्चातीवसंतुष्टाह
रिंजयेतिच॥ तुष्टुवुर्मुदिताःसर्वेसंजाताविगतज्वराः॥५६॥ इंद्रविष्णुतुसंजातौ
तत्क्षणाद्विगतव्यथौ॥ स्त्रीहत्यांशंकमानौतौभृगोःशापंदुरत्ययं॥५७॥ ॥इतिश्री
भागवतेमहापुराणेचतुर्थस्कंधेएकादशोध्यायः॥११॥ ॥व्यासउ॥ ॥तंदृष्ट्वास्त्री
वधंघोरंचुक्रोधभगवान्भृगुः॥ वेपमानोतिदुःखार्त्तःप्रोवाचमधुसूदनं॥१॥ ३८
भृगुरु॥ तंविष्णोजानतापंमहामते॥ स्त्रीवधंविप्रजायायाःकिंकरोमिजनार्द
न॥२॥ आख्यातस्त्वंसत्वगुणःब्रह्माचराजसःस्मृतः॥ तथासौतामसःशंभुविप

रीतंकथंकृतं॥३॥ तामसस्त्वंकथंजातःकृतंकर्मातिनिंदितं॥ अवध्यास्त्रीतापसी
चहताकस्माद्विरागसा॥४॥ शपामित्वांदुराचारंकिमन्यत्करोमिते॥ विधुरोहंकृ
तःपापदुरात्मन्शक्रकारणात्॥५॥ नशपेहंतथाशक्रंशपेत्वांमधुसूदन॥सदा
छलपरोसित्वंकूटयोनिदुराशयः॥ येचत्वांसात्विकंप्राहुस्तेमूर्खामुनयःकिल॥
तामसोसिदुराचारप्रत्यक्षंमेजनार्दन॥७॥ अवतारान्मृत्युलोकेत्वंचाप्स्यसिपाप
संभवान्॥ प्रायोगर्भभवंदुःखंभुंक्ष्वपापंजनार्दन॥८॥ व्यासउ॥ ततस्तेनाभि
शापेनतष्टेधर्मेपुनःपुनः॥ लोकस्यचहितार्थायजायतेमानुषेष्विह॥९॥ ॥रा
जोवाच॥ ॥भृगुणायहितातत्रचक्रेणामिततेजसा॥ गार्हस्थ्यंचपुनस्तस्यक
थंजातंमहात्मनः॥१०॥ व्यासउ॥ ॥इतिशप्त्वाहरिंरोषात्तदादध्यौशिरस्तरन्॥

ना॰ च॰
३९

कार्ये संयोज्मतस्तस्माद्भृगुश्चोवाच कार्यवित् ॥ ११ ॥ अद्य त्वां विष्णुना देवी हतां संजी
वयाम्यहं ॥ यदि त्वस्तो मया धर्मो ज्ञायते चरितोपि वा ॥ १२ ॥ तेन सत्येन जीव त्वं य
दि सत्यं ब्रवीम्यहं ॥ पश्यंतु देवताः सर्वमिमं तेजो बलं महत् ॥ १३ ॥ अद्भिस्तां प्रोक्ष्य संजी
तां जिजप्त्वेत सौ ब्रवीद्वच ॥ सत्यं शौचं तथा वेदा यदि मे तपसो बलं ॥ १४ ॥ मासउ
॥ अद्भिः सोप्रोक्षिता देवी सद्य संजीविता ॥ तदा उत्थिता परमप्रीता भृगोर्भार्या
शुचिस्मिता ॥ १५ ॥ ततस्तं सर्वभूतानि दृष्ट्वा सुप्तोत्थितामिव ॥ साधु साध्वीति तं
तावत्तु दुष्टुवुः सर्वतो दिशं ॥ १६ ॥ एवं संजीविता तेन भृगुणा वरवर्णिनी ॥ विस्मयं
परमं जग्मुर्देवाः सेंद्रा विलोकयत् ॥ १७ ॥ इंद्रस्तु रानथोवाच मुनिना जीविता सती
काव्यस्तत्स्वात तपो घोरं किं करिष्यति मंत्रवित् ॥ १८ ॥ मासउ ॥ ॥ गतानिंद्रसुरेर

स्यदेहात्तमगतं नृप ॥ स्मृत्वा काव्यस्य च व्रतं मंत्रार्थमति दारुणं ॥ १९ ॥ विमृस्यम
नसा वाक्ये जयंती स्वसुतां तदा ॥ उवाच कन्यां चार्वंगी स्मितपूर्वमिदं वचः ॥ २० ॥ क
ष्टपुत्रि मया दत्ता काव्यायत्वं तपस्विने ॥ समाराधय तन्वंगी मत्कृते तं व्रतांकुल ॥ २१
उपचारैर्मुनिं तैस्तैः समाराध्यमनःप्रिये ॥ नयं मे इरतरस्मागत्वा तत्राश्रमे ॥ २२ ॥ सा
पितुर्वचनं श्रुत्वा तत्रागच्छन्मनोरमा ॥ तमपश्यद्विशालाक्षी पिबंतं धूममाश्रमे ॥
२३ ॥ तमदेहसमालोक स्मृत्वा वाक्यं पितुस्तदा ॥ कदलीमादाय वीजयोमास तं मु
निं ॥ २४ ॥ निर्मलं शीतलं वारि समानीय सुवासितं ॥ पानाय कल्पयामास भक्त्या
परमया लघु ॥ २५ ॥ छायां वस्त्रेण यंत्रैर्वा नाकरस्य समागते ॥ रचयामास तत्वं
गी स्वयं धर्मे स्थिता सती ॥ २६ ॥ फलान्याहाय दिव्यानि पक्वानि मधुराणि च ॥

ना०च० मुमोचाग्रेमुनेस्तस्यनक्षत्रार्थविहितानिच॥२७॥कृत्वाप्रादेशमात्रंचहरितास्तु
४० कसंनिभा॥दर्भाग्राग्रेथपुष्पाणिनिन्यमन्दृदये॥२८॥निश्चयंकल्पयामासमंत्रपञ्च स
वाचितं॥सुभ्रूर्मुनेश्चहस्ताच्चकारवीजनंदलैः॥२९॥हावभावादिकंकिंचिद्विकार
जननंचयत्॥नचकारजयंतीसाशापमुक्तानामुनेस्तदा॥३०॥स्तुतिंचकारतत्वज्ञो
गीर्भिस्तस्यमहात्मनः॥सुनाविरप्यनुकूलाभिःशीतिस्तुत्वाह्यनघा॥३१॥प्रबुद्धे
जलमाहृत्यदर्भाराचमनायच॥मनोनुकूलंसततंकुर्वतीसाप्यतिष्ठत॥३२॥ई
शोपिसेवकानत्रप्रेषयामासचातुरः॥प्रहर्त्तृत्वात्तुकामोवैमुनेस्तस्याजितात्मनः॥३३ राम०
एवंबहूनिवर्षाणिपरिचर्यपरायणा॥वसन्तिवत्॥निर्विकाराजितक्रोधाब्रह्म ४०
चर्यपरायणा॥३४॥पूर्णवर्षसहस्रेतुपरितुष्टोमहेश्वरः॥वरेणछंदयामासकार्यंत्र

तीतमनोहरः॥३५॥ ॥ईश्वरउवाच॥ ॥यत्तुकिंचिदपिब्रह्मन्विद्यतेऽनघनंदन॥प्रति
पश्यामितत्सर्वंतन्त्रवाच्यंचकस्यचित्॥३६॥सर्वाभिन्नाविनेनत्वंनविष्यातिनसंशयः
अवध्यःसर्वभूतानांप्रजेशश्चद्विजोत्तम॥३७॥ ॥व्यासउ०॥ ॥एवंदत्वावरांस्त्वंभूस्तत्रै
वांतरधीयत॥कामंत्रामथसंवीक्ष्यजयंतीवाक्यमब्रवीत्॥३८॥कासित्वंब्रूहिसुश्रोणि
कस्यकिंत्वंचिकीर्षितं॥किमर्थमिहसंप्राप्ताकार्यंवदवरोरुमे॥३९॥कावांछातेक
रोम्यद्यचकोरचंचलोचने॥प्रीतोस्मित्वत्कृतेनाद्यब्रूहिसत्यंशुचिस्मिते॥४०॥तपसा
तवभक्त्याचमनोमेप्रवणीकृतं॥वरंवरयसुश्रोणितुष्टोस्मिप्रददामिते॥४१॥व्यास
उ०॥एवमुक्त्वामुनिंप्राहजयंतीमुदितानना॥चिकीर्षितंमेभगवंस्तपसाज्ञातुमर्ह
सि॥४२॥काव्यउ०॥ ॥ज्ञानेनमयातथापित्वंब्रूहिकार्यंमनोस्थितं॥करोमिसर्वथाचे

भा·च· वद्धीतोस्मिपरिचर्यया॥४३॥ ॥जयंतीउ॥ ॥शक्रस्याहंसुताब्रह्मन्पित्रातुभ्यं
समर्पिता॥ जयंतीनामतस्माहंजयंतावरजामुने॥४४॥ सकामास्मित्वयिविभो
४१ वांछितंकुरुतेद्युना॥ रम्येत्वयामहाभागधर्मतःप्रीतिपूर्वकं॥४५॥शुक्रउ॥ ॥
मयासहत्वंसुश्रोणिदशवर्षाणिभामिनि॥ सर्वैर्भूतैरदृश्याचरमस्वेहयदृच्छ
या॥४६॥ ॥व्यासउवाच॥ ॥एवमुक्त्वागृहंगत्वाजयंत्याःपाणिमुद्वहन् तया
सहावसद्देव्याहदशवर्षाणिभार्गवः॥४७॥ अदृश्यःसर्वभूतानांमाययासंवृतः
प्रभुः॥ दैत्यास्तमागतंश्रुत्वाकृतार्थंमंत्रसंयुतं॥४८॥ अभिजग्मुर्गृहंतस्यमुदि ७१
तास्तद्दिदृक्षवः॥ नापश्यन्रममानंतंजयंत्यासहसंवृतं॥४९॥ तदाविमनसःसर्वे
जातानष्टोद्यमाश्चते॥ चितापरातिदीनाश्चवीक्ष्यमाणाःपुनःपुनः॥५०॥ अदृष्ट्वा

तेमुसंवृत्तंप्रतिजग्मुर्यथागतं॥ स्वगृहान्दैत्यवर्यास्तेचिंताविष्टाभयातुराः॥५१॥ रम
माणंतथाज्ञात्वाशक्रःप्रोवाचतंगुरुं॥ बृहस्पतिंमहाभागंकिंकर्तव्यमितिस्मह॥५२
गच्छाद्यदानवान्ब्रह्मन्प्रलोभनसमायया॥ अस्माकंकुरुकार्यंत्वंबुद्ध्यासंचिंत्यमानदः
५३॥ तानुवाचगुरुःकामरूपःप्रच्छन्नमायया॥ तच्छ्रुत्वावचनंकाव्यंरममाणंसुसंवृ
तं॥ तच्छ्रुत्वावचनंकाव्यंरममाणंसुसंवृतं॥५४॥ ज्ञात्वातद्रूपमास्थाययदैत्यान्प्रति
ययौगुरुः॥ गत्वातत्रातिप्रीत्यासोत्यसुरान्समुपाकयत्॥५५॥ आगतास्तेसुराःस
र्वेदृष्टुःकाव्यमयतः॥५६॥ प्रणम्यसंस्थितासर्वेकाव्यंमत्वाश्रमोहिताः॥ नविदुस्ते
गुरोर्मायांकाव्यरूपविभाविनीं॥५७॥ तानुवाचगुरुःकामरूपःप्रच्छन्नमायया॥
स्वागतंममयाज्यानांश्रामोहंवोहितायवै॥५८॥ अहंचाध्यापयिष्यामिविद्याश्च

सातुयामया॥ तपसा तोषितो शंभो मंत्रया मपुरःसरा॥५९॥ तच्छ्रुत्वा भीतमनसो
जातास्ते दानवोत्तमाः॥ काव्यमत्वा छलं कार्यं जहर्षस्ते विमोहिताः॥६०॥ क्षणेमुक्त
मुदायुक्ता निरातंका गतव्यथा॥ देवेभ्यश्च भयं त्यक्त्वा तस्थुः सर्वे निरामया॥६१॥
इतिश्रीभागवते महापुराणे चतुर्थस्कंधे द्वादशोध्यायः॥ ॥राजोवाच॥ ॥किंकृ
तं गुरूणा पश्चाद् भृगुरूपेण वर्त्तता॥ छलेनैव हि दैत्यानां पौरोहित्ये न धीमता॥१
गुरूणा मनिशं सर्वविद्यानिधिस्तथा॥ सुतांगिरस एवासौ सकथं छलकृन्मुनिः
॥२॥ धर्मशास्त्रेषु सर्वेषु सत्यधर्मस्य कारणं॥ कथितं मुनिभिः कामं किं वा सा नोद
ना कृताः॥३॥ वाचस्पतिस्तथा मिथ्यावक्ता चेद्दानवान् प्रति॥ कः सत्यवक्ता संसा
रेस्मिन् विप्रा तिगृहाश्रमी॥४॥ आहाराद्धिकं भोज्यं ब्रह्मा उविनवेपिन॥ तदर्थं मु

नयो मिथ्या प्रवर्त्तंति कथं मुने॥५॥ शास्त्रप्रमाणं मुच्छेदं शिष्टाचार गतं न किं॥ छल
कर्मप्रवृत्तेवै विगीतत्वं प्रसेन चेत्॥६॥ देवाः सत्वसमुद्भूता राजसा मानवाः स्मृता॥
तिर्यंचस्तामसाः प्रोक्ता उत्पत्तौ मुनिभिः किल॥७॥ अमराणां गुरुः साक्षान्मिथ्यावा
दी स्वयं यदि॥ तदा कः सत्यवक्ता स्याद्राजसस्तामसः पुनः॥८॥ क्वास्थितिस्तत्र धर्मस्य
संदेहोयं महान्मम॥ का गतिः सर्वजंतूनां मिथ्यावादी जगत्त्रये॥९॥ हरिर्ब्रह्मा श
चीकांतस्तथान्ये सुरसत्तमाः॥ सर्वे छलविधौ दक्षा मनुष्याणां च का कथा॥१०॥
कामक्रोधाभिसंतप्ता लोभोपहतचेतसः॥ छलेरता सुराः सर्वे मुनयश्च तपोधना
॥११॥ वशिष्ठो वामदेवश्च विश्वामित्रो गुरुस्तथा॥ एते मायारताः कात्र गतिर्धर्मस्य
मानद॥ ॥१२॥ इंद्राग्निश्चंद्रमा वेधा परदाराभिलंपटाः॥ आमत्वं भुवने येषु स्थितं क

क्रमुनेवद॥१३॥ वचनंकस्यमंतव्यमुपदेशाधियानघ॥ सर्वेलोकानिवृत्ताश्चदेवा
श्चमुनयस्तथा॥१४॥ ॥व्यासउवाच॥ ॥किंविष्णुःकिंशिवोब्रह्मामघवाकिंबृहस्प
ति॥ देहवान्वनवर्त्तेवविकारैःसंयुतःसदा॥१५॥ रागीविष्णुःशिवोरागीब्रह्मापिरा
गसंयुतः॥ रागवान्किमकृत्यंवैनकरोतिनराधिप॥१६॥ देहीदेहगुणैर्युक्तःकिं
चित्रंनृपतेत्रवै॥ निर्गुणःपरमात्मासौविदेहःपरमःपरः॥१७॥ देहवान्कोपि
चातुर्याद्धिदेहवान्लक्ष्यते॥ संशासेसंकटेसोपिगुणैःसंबाध्यतेकिल॥१८॥ कार
णाद्धितंकार्यंकथंनवक्तुमर्हसि॥ ब्रह्मादीनांचसर्वेषांगुणाएवहिकारणं॥१९
पंचविंशसमुद्भूतादेहास्तेषांनचान्यथा॥ कोलेमरणधर्मास्तिसदेहःकोत्रतेनृप
२०॥ परोपदेशवेलायांशिष्टाःसर्वेभवंतिवै॥ विस्मरंतिहिशिष्टत्वंस्वकार्येसमुप

स्थिते॥२१॥ कामःक्रोधस्तथालोभोमदोहंकारमत्सरः॥ देहवान्कःपरित्यक्तुमी
शोभवितीतातुन॥२२॥ संशोयंमहाराजसंदेहेवंविधःस्मृतः॥ नान्यथाप्रभव
त्येवस्तुनान्यजनमयःकिल॥२३॥ कदाचिद्भगवान्विष्णुस्तपश्चरतिदारुणं॥ क
दाचिद्विविधान्यज्ञान्वितनोतिसुराधिपः॥२४॥ कदाचित्तुरमारंगरंजितःपरमे
श्वरः॥ रमतेकिलवैकुंठेतद्वशस्तन्मयोविभुः॥२५॥ कदाचिद्दानवैःसार्द्धंयुद्धंप
रमदारुणं॥२६॥ करोतिकरुणासिंधुस्तद्बाणपीडितोभृशं॥२६॥ कदाचिज्जय
माप्नोतिदैवात्सोपिपराजयं॥ सुखदुःखाभिभूतोसौभवत्येवनसंशय॥२७॥ शे
षेशोतेकदाचिद्वैयोगनिद्रासमाहृतः॥ कालेजागर्तिविश्वात्मास्वभावशतिबो
धितः॥२८॥ एवंब्रह्माहरश्चैवमिंद्राद्याःयेसुरास्तथा॥ मुनयःस्वैःस्वैःनिर्माणैरामु

षोपिचरंतिहि ॥२९॥ आज्ञयानियतेसर्वंजगत्स्थावरजंगमं ॥ वर्त्ततेनात्रसंदेह
नृपकिंचित्कदापिच ॥३०॥ स्नात्तुषोंतेथब्रह्माद्याः स्वयंगच्छंतिपार्थिव ॥३॥ प्रभ
वंतिपुनर्विष्णुइरशक्राद्योध्यमी ॥३१॥ तस्मात्कामादिकान्जित्वा देहवान्प्रतिप
द्यते ॥ नात्रतेविस्मयःकार्यःकदाचिदपिपार्थिव ॥३२॥ संसारोयंसुसंदिग्धःकामः
क्रोधादिभिर्नृप ॥ दुर्लभस्तद्विनिर्मुक्तिः पुरुषः परमार्थवित् ॥३३॥ योविजेतिचसं
सारेसदात्मकरोत्यपि ॥ विमुक्तःसर्वसंगेभ्योविचरत्यविशंकितः ॥३४॥ तस्मादृइस्म
तेन्नायद्विाश्रिनागृहीतापुरा ॥ गुरुणात्वंजितानापतिथाम्रातुर्यवीयसः ॥ एवंसंसा
रचक्रेस्मिन्रागलोनादस्निर्वृतः ॥ गृहस्थाश्रममास्थायकथंमुक्तोभवेन्नरः ॥३६॥ ॥
राजोवाच ॥ ॥ किंकृतंगुरुणातत्रकाव्यरूपाहतेनच ॥ कदाप्तुकाःसमायातत्सन्मेब्रूहिपि

तामह ॥३७॥ ॥व्यासउवाच॥ ॥ श्रृणुराजन्प्रवक्ष्यामियत्कृतंगुरुणातदा ॥ कृत्वा
कायस्वरूपंतुप्रच्छन्नेनमहात्मना ॥३८॥ गुरुणाबोधितादैत्यामत्वाकाव्यंस्वकंगु
रुं ॥ विश्वासंपरमंकृत्वाबभूवुःतन्मयास्तदा ॥३९॥ विद्यार्थंशरणंप्राप्तान्गुरुमत्वाति
मोहिताः ॥ गुरुणाविप्रलब्धास्तेलोभात्कोवानमुंचति ॥४०॥ दशवर्षात्मिकेकालेसं
पूर्णेसमयेतदा ॥ जयंत्यासहक्रीडन्वैकाव्योयाज्ञानचिंतयत् ॥४१॥ आरायाम
मार्यंतेपर्यंतःसंस्थिताःकिल ॥ गत्वातातात्वेप्रपश्येहंयाज्ञानतिजयातुरान् ॥४२
मादेवेभ्योजयंतेषामञ्जकानांनवेदिति ॥ संचिंत्यबुद्धिमान्स्याद्यजयंतीप्रत्युवा
चह ॥४३॥ देवयानीकिमायातीपुत्रीमेचारुलोचना ॥ समयस्त्वेदसंपूर्णोजातो
यंदशवार्षिकः ॥४४॥ तस्माद्गच्छाम्यहंदेवीद्रष्टुयाज्ञान्स्वमध्यमे ॥ पुनरेवागमि

भा०च० ब्यामतवांतिकमनुव्रतः॥४५॥ व्यासउ॥ तथेतितमुवाचाथजयंतीधर्मवित्तमः॥ य
९५ येष्टंगच्छधर्मज्ञन तेधर्मंविलोपयेत्॥४६॥ तच्छ्रुत्वावचनंकाव्योजगामत्वरितस्ततः॥
अपश्यन्महादानवानांसपार्श्वेवाचस्पतिंतदा॥४७॥ छद्मरूपधरंसौम्यंबोधयंतंछलेनत
नात्॥ जैन्यंधर्मंकृतंतचयज्ञदानपरंतथा॥४८॥ नोदैवरिपवःसत्यंब्रवीमिवतं
हितं॥ अहिंसापरमोधर्मोहंतव्याह्याततायिनः॥४९॥ द्विजैर्भोगरतैर्वेदेदर्शितंहिं
सनंपशोः॥ जिह्वास्वादपरैःकाममहिंसैवपरामता॥५०॥ एवंविधानिवाक्यानिवेद
निंदापराणिच॥ श्रुत्वाणंगुरुमाकर्ण्यविस्मितोसौभृगोःसुतः॥५१॥ चिंतयामास राम०
मनसामद्द्वेषीयंगुरुःकिल॥ वंचिताःकिलधूर्तेनयाम्यामिनात्रसंशयः॥५२॥ धिगे ९५
तंपापबीजंवैनरकाब्धितिमिंगिलं॥ गुरुरप्यनृतंब्रूतेप्रेरितोयेनपापना॥५३॥

प्रमाणंवचनंयस्यसोपिपाषंडप्रेरकः॥ गुरुःसुराणांसर्वेषांधर्मशास्त्रप्रवर्त्तकः
५४॥ किंकीनकुरुतेलोकेनतिलयोकृतमानसः॥ अन्योपिगुरुरप्येषजातःपाषंडपं
डितः॥५५॥ त्रैलूषचेष्टितंसर्वंपरिगृह्यद्विजोत्तमः॥ वंचयत्सनिशंमूढान्दैत्यामामा
त्मनाप्यसौ॥५६॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेत्रयोदशोध्यायः॥१३॥
व्यासउ॥ ॥इतिसंचिंत्यमनसातमुवाचहसन्निव॥ वंचितामस्वरूपेणदैत्याणांकिं
गुणाकिल॥१॥ अहंकाव्योगुरुस्त्वाहंदेवकार्यप्रसाधकः॥ अनेनवंचितायूयंमत्स्व
रूपेणताम्यानात्रसंशयः॥ मामप्यहंध्वंवचोस्यायदिंजोयंवैमदाकृतिः॥ अनुगच्छ
तमायात्यास्मननेनंहहस्यतिं॥ इत्याकर्ण्यविचस्तस्यदृष्ट्वातौसदृशौपुनः॥ विस्मयं
परंजग्मुःकोसौकोयमितिस्फुटं॥४॥ सतान्वीक्ष्यसुसंभ्रांतानगुरुर्वाक्यमुवा

भा·च· चह॥ गुरुर्वो हि सदैवाद्यो मद्रूपोयं बृहस्पतिः॥५॥ भ्रामितो वंचयितुं युष्मान्देवकार्यार्थ
४६ सिद्धये॥ मा विश्वासं वचस्यास्य कुरुध्वं दैत्यसत्तमाः॥६॥ शास्त्रा विद्या मया दत्ता युष्मा
नध्यापयामि तां॥ दैवेभ्यो विजयं नूनं करिष्यामि न संशयः॥७॥ इति श्रुत्वा गुरोर्वा
क्यं काव्यरूपधरस्य ते॥ विश्वासं परमं जग्मुः काव्योयमिति निश्चयात्॥८॥ कामेन
बहुधा तं तु बोधिता किंचदानवाः॥ बुबुधुर्न गुरोर्मायामोहिताः कालपर्ययात्॥
९॥ एवं ते निश्चयं ज्ञात्वा ततो भार्गवमब्रुवन्॥ अयं नो गुरुर्धर्मात्मा बुद्धिदः स्वहि
तेरतः॥१०॥ दशवर्षाणि सततं मयं नत्याविना भार्गविः॥ गच्छ त्वं कुरु कोनासि नो
स्माकं गुरुरस्तु तः॥११॥ इत्युक्त्वा भार्गवं मूढा निर्भर्त्स्य च पुनः पुनः॥ जग्राहंगिर
सं प्रीत्या प्रणिपत्याभिवाद्य च॥१२॥ काव्यस्तु तन्मयान्दृष्ट्वा चुकोपाथ शशाप

च॥ दैत्यान्बोधितान्मत्वा गुरुणा चातिवंचितान्॥१३॥ यस्मान्मया बोधिता हि न
मां त्यजत मामकाः॥ तस्मात्त्वनष्टसंज्ञा वै पराभवं मवाप्स्यथ॥१४॥ मदुपेक्षाफलं का
मं स्वल्पे काले त्ववाप्स्यथ॥ तदास्य कपटं सर्वं परिज्ञातं भविष्यति॥१५॥ भ्यासत्त्वा इ
त्युक्त्वा सोऽजगामाशु भार्गवः क्रोधसंयुतः॥ बृहस्पतिर्मुदं प्राप्य तस्थौ तत्र समाहितः॥
१६॥ ततः शप्तान्नुरुष्टात्वा दैत्यान्भार्गवेण हि॥ जगाम तरसा त्यक्त्वा स्वरूपं संविधा
य च॥१७॥ गत्वोवाच तदा शक्रं कृतं कार्यं मया ध्रुवं॥ शप्ताश्शुक्रेण ते दैत्या मया त्य
क्ता पुनः पुनः॥१८॥ निराधाराः कृता नूनं यतध्वं सुरसत्तमाः॥ संग्रामार्थं महाभागा
शापदग्धास्तु तेऽधुना॥१९॥ इति श्रुत्वा गुरोर्वाक्यं मघवा मुदमापवान्॥ जहृषुश्च सु
राः सर्वे प्रतिपूज्य बृहस्पतिं॥२०॥ संग्रामाय मतिं चक्रुः प्रविचार्य मिथः पुनः॥ निर्य

ना॰च॰ पुर्मिलिताः सर्वेदानवाश्रिमुखाः सुराः॥२१॥ सुरान्समुद्यतान्ज्ञात्वा ततोद्योगान्महाब
४१ लान्॥ अंतर्हितं गुरुं चैव बभूवुश्चिंतयान्विताः॥२२॥ परस्परमथोचुस्ते वंचिता गुरुणा कि
ल॥ गतोसौ स्वगुरुपुत्रेण ज्ञानाद्दृष्ट्वा बृहस्पतिः॥२३॥ व्यामोहिता वयं नूनं काव्यरूपेण
तेन वै॥ नागवस्तुन्न शक्नुमो नांगीकारं — — व्यति॥२४॥ काव्योपमानितोस्माभिर्मोहि
तैस्तस्य मायया॥ शापद्योगमहात्मा च गतोसौ रुष्टमानसः॥२५॥ वंचयित्वा गतः पापो
गुरुः कपटपंडितः॥ न्नाटस्त्रीलंपटः पापी मलिनांतर्बहिः शुचिः॥२६॥ किं कुर्मः क
च गच्छामः कथं काव्यः प्रकोपितः॥ कुर्वामिहे सहायार्थं प्रसन्नं रुष्टमानसं॥२७॥ इति संचि
त्य ते सर्वे मिलिता नयकंपिताः॥ प्रह्लादं पुरतः कृत्वा जग्मुस्ते भार्गवं पुनः॥२८॥ प्रणेमु राम॰
श्च रेण तस्य मुनेर्मनिःस्पृतस्तदा॥ भार्गवस्तानुवाचाथ रोषसंकुललोचनः॥२९॥ मया ४७

प्रबोधिता यूयं मोहिता गुरुमायया॥ न गृहीतं वचो मत्यं तदायास्माद्धितं शुचि॥
३०॥ तत्र गच्छंतु संरुष्टा यत्रासौ कपटान्वितः॥ नं चकः सुरकार्यार्थी नाहं वो गुरुरव्ययः॥
३२॥ ॥व्यास उ०॥ ॥एवं कुर्वंतं शुक्रं तु वाष्पसंदिग्धया गिरा॥ प्रह्लादस्तं तदोवाच गृ
हीत्वा चरणौ नतः॥३३॥ ॥प्रह्लाद उ०॥ ॥भार्गवाद्य समायाता मामात्र कालस्तथातुरा
न्॥ त्यक्तुमर्हसि सर्वज्ञत्वं वंचितांस्तेन पाप्मना॥३४॥ गते त्वयि तु मंत्रार्थं शैघ्र्येन तु रात्म
ना॥ त्वद्वेषमधुरालापैर्वयं तेन प्रवंचिताः॥३५॥ अज्ञानजनितदोषेण नैव कुप्यति ज्ञात
वान्॥ सर्वज्ञस्त्वं विजानासि चित्तेन तः प्रणवणं त्वयि॥३६॥ ज्ञात्वा नस्तपसान्नावं स्वज
कोपं महामते॥ कुर्वंति मुनयः सर्वे क्षणकोपाहि ज्ञानिनः॥३७॥ जलं स्वभावतः शीतं
वह्नीतपसमागमात्॥ नवत्तुष्णं वियोगाच्च स्वभावमनुगच्छति॥३८॥ क्रोधस्त्वांडा

वरूपोवैत्यकव्यः सर्वथा बुधैः ॥ तस्माद्दोषं परित्यज्य प्रसादं कुरु सुव्रत ॥ ३९ ॥ यदि
न त्यजसे रोषं त्यजसे स्मान्सुदुःखितान् ॥ त्वया त्यक्ता महाप्राज्ञ गमिष्यामो रसातलं
४० ॥ ॥ व्यास उवाच ॥ ॥ प्रह्लादस्य वचः श्रुत्वा भार्गवो ज्ञानचक्षुषा ॥ विलोक्य प्रम
ना तूला तातमुवाच हसन्निव ॥ ४१ ॥ न भेतव्यं न गंतव्यं वामवा वा रसातलं ॥ रक्षयिष्या
मि वो याम्यान्मंत्रैरवैतथैः किल ॥ ४२ ॥ हितं सत्यं ब्रवीम्यद्य शृणुध्वं तन्निश्चयं ॥ वच
नं मम धर्मज्ञाः श्रुतं यच्छ्रलणः पुरा ॥ ४३ ॥ अवश्यं भाविनो भावाः भवंतीति श्रुता
श्रुताः ॥ दैवं न चान्यथा कर्तुं त्वतः को पि रसातले ॥ ४४ ॥ अद्य मंदबला यूयं कालयो
गाद्रसंशयः ॥ दैवैर्जिताः सत्वं चापि पातालं प्रति यास्यथ ॥ ४५ ॥ प्राप्तः पेययि कालो
व इति ब्रह्मा भ्यभाषत ॥ भुक्तं राज्यं न वर्षाणां पूर्णं सर्वसमृद्धिमतः ॥ ४६ ॥ युगाख्या

दशसंपूर्णा दिवानाक्रम्य मूर्द्धनि ॥ दैवयोगाश्च युष्माभिर्भुक्तं त्रैलोक्यपूजितं ॥ ४७ ॥
सावर्णिके मनु राज्य पुनस्तुभ्यं भविष्यति ॥ पौत्रस्ते किल त्रैलोक्यं पुनर्भोक्ष्यति वै बलि
४८ ॥ यन्नु वामनरूपेण हृतं देवेन विष्णुना ॥ तद्दैवतेन ते पौत्रः श्रीको देवेन विष्णुना ॥
४९ ॥ हृतं तेमे बलं राज्यं देवानां तार्थसिद्धये ॥ त्वमिंशेभविता चायं स्थिते सावर्णिकेम
नौ ॥ ५० ॥ ॥ भार्गव उवाच ॥ ॥ इत्युक्तो हरिणा पौत्रस्तव प्रह्लाद सांप्रतं ॥ अदृश्यः
सर्वभूतानां गुप्तश्चरति भीतवत् ॥ ५१ ॥ एकदा वासवेनासौ दृष्टो गर्दभरूपधृक्
शून्यगृहे स्थितः कामं भयभीतः शतक्रतोः ॥ ५२ ॥ दृष्ट्वा च वज्रधातेन वासवेन ब
लिस्तदा ॥ किमद्य गार्दभं रूपं कृत्वा द्य संस्थितो सि वै ॥ ५३ ॥ भोक्ता त्वं सर्वलोकस्य क
त्वमिरवशातस्य च ॥ न लज्जा खररूपेण तव राक्षससत्तम ॥ ५४ ॥ बलिरुवाच ॥ लज्जा

भा॰च॰ केंद्रतद्देवं हि परं शोकं महात्मन्निः॥ देवाधीनं जगत्सर्वं कोऽत्र शोकः शतक्रतो॥५५॥ य
४९ था विष्णुर्महातेजाः कश्यपस्य सुतां गतः॥ तथाहं खररूपेण संस्थितः कालयोगतः॥५६
यथा त्वं कमले लीनः संस्थितो ब्रह्महत्यया॥ पीडितश्च तथाप्यस्थितोहं खररूपधृक्
५७॥ दैवाधीनस्य किं दुःखं सुखं दुःखसमुद्भवे॥ कालः करोति वै नूनं यद्दिष्टं तिथ्यथा त
था॥५८॥ नागव॰उ॰॥ ॥इति तौ बलिदेवेन्द्रौ कृत्वा संविदमद्भुतं॥ प्रबोधं प्रापतुः का
मं यथास्थानं वजग्मतुः॥५९॥ इति ते सर्वमाख्यातं मया दैवबलं किल॥ दैवाधी
नं जगत्सर्वं सदेवासुरमानुषं॥६०॥ ॥इति श्री नागव्रतमहापुराणे चतुर्थस्कंधे ४९
चतुर्दशोऽध्यायः॥१४॥ ॥व्यास उवाच॥ ॥इति तस्य वचः श्रुत्वा नागविस्य महात्म
नः॥ प्रह्लादस्तु सं हृष्टो बभूव नृपनंदन॥१॥ ज्ञात्वा दैवं बलिष्ठं तु प्रह्लादस्तानुवा

च ह॥ कृतेपि युद्धे न जयो न विप्र तिकदाचन॥२॥ तदा ते तं पुनः प्रोचुर्दानवा मदद
र्पिताः॥ संग्रामस्तु न कर्तव्यो दैवं किं न विदामहे॥३॥ निरुद्यमानां दैवं हि प्रधानमसुराधि
प॥ केन दृष्टं क्व वा चास्ति कीदृशं केन निर्मितं॥ तस्माद्युद्धं करिष्यामो बलमास्थाय सांप्रतं
त्वं वाग्रे दैत्यवर्यत्वं सर्वज्ञोसि महामते॥५॥ इत्युक्तस्तैस्तदा राजन्प्रह्लादः प्रबलारिहा से
नानीश्च तदा कृत्वा देवान्थ समाक्रमत्॥६॥ तेपि तत्रागतान्दृष्ट्वा संग्रामे समुपस्थिता
न्॥ सर्वे संनद्धसंनाहा देवास्तान्समयोधयत्॥७॥ संग्रामस्तु तदा घोरः शक्रप्रह्लाद
योरभवत्॥ पूर्णं वर्षशतं तत्र मन्वयो विस्मयावह॥८॥ वर्त्तमाने महायुद्धे शक्रेण शत
पालिताः॥ जयमापुस्तदा दैत्याः प्रह्लादप्रमुखा नृप॥९॥ तं देवेशो गुरोर्वाक्यात्सर्वदुःख
विनाशनीं॥ संस्मार मनसा मायां प्रकृतिं परमां शिवां॥१०॥ इंद्र उवाच॥ जयदेवी महादे

ना·च· वीशूलधारिणिचांबिके ॥ शंखचक्रगदापद्मशार्ङ्गहस्तेजयप्रदे ॥११॥ मातःप्रसादसु
५० मुखीजवहीनसत्वात्त्रायस्वनोजननिदैत्यपराजितान्वै ॥ त्वंदेविनःशरणमाजिहतप्रमा
णंशक्रासिदुःखशमनेखिलवीर्ययुक्ता ॥१२॥ ध्यायंतियेपिसुखिनोनितरान्भवंतिदुःखा
न्विताविगतशोकभयास्तथान्ये ॥ मोक्षार्थिनःप्रशममाप्यविमुक्तसंगाःसंसारवारिधि
जलेप्रतरंतिसंतः ॥१३॥ त्वंदेविविश्वजननप्रथितप्रभावासंरक्षणार्थमुदितात्रिहरप्रता
त्रिसंहर्तुसर्वमखिलंकिलकालरूपाकोवेत्तितेत्रचरितंननुमंदबुधिः ॥१४॥ ब्रह्माहरश्च
हरिरप्यलकापतिश्चनाहमथोथवरुणोग्निसमीरणश्च ॥ ज्ञातुंक्षमस्तवचरित्रमहोमुनी ५०
नामत्यंतवेदितुमगोचरमागमेश्च ॥१५॥ धन्यास्तएवभक्तिपराश्चयेवैसंसारदुःखरहि
ताःसुखसिंधुमग्नाः ॥ येभक्तिभावरहिताःकिलदुःखपात्रंजातादरिद्रगहदुःखमहा

किलन्न ॥१६॥ येवीज्यमानासितचामरैश्चक्रीडंतिधन्याशिबिकाधिरूढाः ॥ तैःपूजिता
स्त्वंकिलपूर्वदेहेनानोपहारैरितिचिंतयामि ॥१७॥ येपूज्यमानावरणस्थाविलासिनीवृंद
परिहृताश्च ॥ समंतकेश्वोपनतेव्रजंतिमन्येहितैस्त्वंकिलपूजितासि ॥१८॥ व्यासउ० ॥ ए
वंस्तुतामथवृतादेवीविश्वेश्वरीतदा ॥ प्रादुर्बभूवतरसासिंहारूढाचतुर्भुजा ॥१९॥ शंखच
क्रगदापद्मबिभ्रतीचारुलोचना ॥ रक्तांबरधरादेवीदिव्यकुंडलभूषणा ॥२०॥ तानुवा
चसुरान्देवीप्रसन्नवदनागिरा ॥ जयंत्यजंतुमोदेवाःशंविधास्येकिलाधुना ॥२१॥ इ
त्युक्त्वासातदादेवीसिंहारूढासुविस्मिता ॥ जगामतरसातत्रयत्रदैत्यायदान्विताः ॥
२२॥ ब्रह्मादयमुखाःसर्वेदृष्ट्वादेवींपुरःस्थितां ॥ ऊचुःपरस्परंजाताकिंकर्तव्यमितिस्म
दा ॥२३॥ देवानांत्राणमिच्छतिसंप्राप्तचंडिकाकिल ॥ महिषांतकरीनूनंचंडमुंडवि

ना·च. नाशिनी॥२४॥निहनिष्यामितेसर्वान्निविका नात्रसंशयः॥ चक्रदृष्ट्वायथापूर्वंनिहतौ
५२ मधुकैटभौ॥२५॥ एवंचिंताराब्धौस्मब्रह्मास्तानुवाचह॥ योद्धव्यंवाथमंतव्यंपलाय्य
दानवोत्तमा॥२६॥ नमुचिस्तमुवाचायपलायनपरान्निह॥ हनिष्यतिजगन्माता रु
षिताकिलदेहिनि॥२७॥ तथाकुरुमहाराजयथादुःखंनजायते॥ ब्रह्मामोध्येवपाता
लंत्यक्त्वासुखमतिहृदं॥२८॥ ॥ब्रह्मोवाच॥ ॥स्तौमिदेवींमहामायांसृष्टिस्थित्यंतका
रिणीं॥ सर्वेषांजननींशक्तिंभक्तानामभयंकरीं॥२९॥ व्यासउवाच॥ ॥इत्युक्त्वावि
ष्णुनक्रस्तुब्रह्माहःपरमा‾ वित्॥ तुष्टावजगतांधात्रींस्तंतांजजिष्णुरस्तदा॥३०॥न
मोदेवीमाहामायेसर्वेषांत्वंजननीत्वसि॥ कान्नेदत्तंबदेवेषुदैत्येषुस्वल्पतेयुक्त॥३१
त्वतःसर्वमिदंविश्वंस्थावरंजंगमंतथा॥ त्वमेनिमित्तमात्रात्तिकत्वरित्तवनि

र्मिताः॥३२॥मातुपुत्रेषुकोभेदःस्यान्देवेषुसुतेष्वपि॥ तथैवदेवेषुस्मसुनकर्त्तव्यस्त्वया
धुना॥३३॥याहृशामातःसुतास्तेदानवाःकिल॥यतस्त्वंविश्वजननीपुराणेषुप्रकी
र्त्तिता॥३४॥तेपिस्वार्थपरानूनंतथैववयमप्युत॥ नांतरंवैप्रपश्यामियेनभेदसमुद्भ
वः॥३५॥ धनदारासुतत्नोगेषुतेपिसक्ताद्दिवानिशं॥ वयंतथैवदेवेशिकोभेदोसुरदे
वयोः॥३६॥ तेपिकश्यपदायादावयंतत्संभवाःकिल॥ स्वाथीहिरोधसंभूतिर्जाता
मातास्तथावयोः॥३७॥ नतथाविहितंमातस्त्वयासर्वसमुद्भवोः॥ यथाविरोधरहिताः
भवामःसुरावयं॥३८॥ गुणव्यतिकरास्सर्वेसमुत्पन्नाःसुरासुराः॥ एकचित्ताभवे
युस्तेकथंमातगुणोद्भवाः॥३९॥ कामक्रोधश्चलोभश्चसर्वदेहेषुसंस्थिताः॥ वर्त्ततेस
र्वदातस्मात्कोविरोधीनवेक्षकः॥४०॥ विरोधोयंमियस्त्वयाकल्पितःकिलकौतुका

त॥ मन्यामहे विनोदं नन्नूनं युद्धदिदृक्षया॥४१॥ अन्यथा रवसुत्राणां विरोधः कीदृ
शोनघे॥ त्वं चेन्नेत्रसिंचा मुडे विक्षितं कलहं मिथः॥४२॥ जानामि धर्मं धर्मज्ञ वेत्ति चा
हं तत्क्रतुः॥ तथापि कलहोस्माकं नोगार्थं देवि सर्वथा॥४३॥ एकः कोपि न शास्त्रा
स्ति संसारे स्मिन् नानस्पृहः॥ स्पृहावतस्तु कः कर्तुं न म्पलेन वचनं बुधः॥४४॥ देवा
सुरैरयं सिंधुर्मथितः समयेन वै॥ विष्णुना विहितो नेदृक् सुधां हृत्वा छलेन वै॥४५
त्वया सोकल्पितः शौरिः पालकत्वे जगद्गुरुः॥ तेन लक्ष्मीः स्वयं नो नाद्य हिता वरसुं
दरी॥४६॥ ऐरावतस्तथेंद्रेण पारिजातोथ कामधुक्॥ उच्चैःश्रवा सुधा सर्वं गृहीतं वैष्णवे
च्छया॥४७॥ अनयं तादृशं त्वत्र ता ना तादृशास्तु साधवः॥ अन्यायिनोसुरा नूनं पश्य त्वं धर्म
लक्षणं॥४८॥ क्व धर्मः कीदृशो धर्मः कार्यत्वं क्व च साधुना॥ कथयामि च कस्याग्रे सिद्धं मे

मांसिकं मतं॥४९॥ तार्किका युक्तिवादज्ञा विवदंति धियाधिकाः॥ ब्रुवन्स कर्तृकं विश्वं वि
तंडाजल्पतत्पराः॥५०॥ कर्त्रा न वर्तते चेदस्मिन् संसारे विततेकिल॥ विरोधः कीदृशः स्तत्र
चेत्कर्मणि वै मिथः॥५१॥ वेदे तेन पथः कस्मात् छास्त्रा एष पितथा पुनः॥ नैकवाक्यं वचः
केषामपि वेदविदां पुनः॥५२॥ यतः स्वार्थपरं सर्वं जगत्स्थावरजंगमं॥ निस्पृहः कोपि
संसारे नास्ति वक्तुं न विश्यति॥५३॥ शिवा थगुरोर्जाया कृता जानन् बलादपि॥ गौतमस्य
तथेंद्रेण जानता धर्मनिश्चयं॥५४॥ गुरुणानुज जायां च तत्कामर्गर्भवती बलात्॥ राक्षोग
तो बालः कृतस्त्वंधस्तथा पुनः॥५५॥ विष्णुनाथ शिरश्छिन्नं राहोश्चक्रेण वै बलात्॥ अप
राधं विना कामं तद्दासत्ववतां विके॥५६॥ पौत्रे मे धर्मवान् तत्र शूरः सत्यव्रतपरायणः॥ यज्वा
दानपतिः शांतः सर्वज्ञः सर्वपूजकः॥५७॥ कृत्वा यवामनं रूपं हरिणा बलिर्वेदिना॥ बंधि

भा·तृ· तोसौबलिःसर्वंहृतंराज्यंभुवःकिल॥५८॥तथापिदेवाधर्मस्थाःप्रवदंतिमनीषिणः॥जयं
५२ तीचाडुवादांश्चधर्मवादाःक्षयंगताः॥५९॥एवंज्ञात्वाजगन्मातर्यथेच्छसितथाकुरु॥तच्छर
णंदानवाःसर्वेजहिवारक्षवापुनः॥६०॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेपंच
दशोध्यायः॥१५॥श्रीदेव्युवाच॥ ॥सर्वेगच्छंतुपातालंतत्रवासंयथेप्सितं॥कुरुध्वंदान
वाःसर्वेनिर्भयागतमन्यवः॥१॥कालःप्रतीक्ष्यतांभूयंकारणंसशुभाशुभे॥सुनिर्वे
दपराणांवैसुखंसर्वत्रसर्वदा॥२॥त्रैलोक्यस्ययशस्येपिनसुखंलोभचेतसां॥उद
जेपिसुखंपूर्णंनिःस्पृहाणांफलैरपि॥३॥तस्मात्यक्त्वामहीमेतांविग्रहंसद्यरसातलं
ममाज्ञापुरतःकृत्वासर्वेविगतकल्मषाः॥४॥ ॥व्यासउवाच॥ ॥तच्छ्रुत्वावचनंदेव्या
स्तथेत्युक्त्वारसातलं॥प्रणम्यदानवाःसर्वेगताशम्भानिरक्षिताः॥५॥अंतर्द्धितेततोदे
वीदेवाःस्वंभुवनंगताः॥त्यक्त्वावैरंस्थिताःसर्वेतितदादेवदानवाः॥६॥एतदाख्यानमखि
लंयःशृणोतिधृतव्रतः॥ससर्वदुःखनिर्मुक्तःप्रयातिपरमव्ययं॥७॥ ॥इतिश्रीभागव
तेमहापुराणेचतुर्थस्कंधेपंचदशोध्यायः॥१५॥ ॥जनमेजयउवाच॥ ॥भृगुशापा
न्मुनिश्रेष्ठःहरेरद्भुतकर्मणः॥अवताराःकथंजाताःकस्मिन्मन्वंतरेविभो॥१॥विस्तारा
द्वदधर्मज्ञअवतारकथाहरेः॥पापनाशकरीब्रह्मन्शृण्वतांसर्वसुखावहाः॥२॥व्यास
उवाच॥ ॥शृणुराजन्प्रवक्ष्यामिअवतारान्हरेर्यथा॥यस्मिन्मन्वंतरेजातायुगेयस्मि
न्नराधिप॥३॥येनरूपेणयत्कार्यंकृतंनारायणेनवै॥तत्सर्वंनृपवक्ष्यामिसंक्षेपेण
तवाधुना॥४॥धर्मस्यैवावतारोभूत्चाक्षुषेमनुसंभवे॥नरनारायणौपुत्रौयस्यख्या
तौमहीतले॥५॥अथवैवस्वतेस्मिन्प्रथमेहितीयेयुगे॥दत्तात्रेयावतारोत्रेः

मा·च०
५४ पुत्रत्वमगमद्धरिः॥६॥ब्रह्मविष्णुस्तथारुद्रस्त्रयोमीदेवसत्तमाः॥पुत्रत्वमद्भुतस्यात्रे
र्भार्यायाहृताः॥७॥अनुसूयात्रिपत्नी च सुत्रमासती॥यया संप्रार्थितादेवाःपुत्रत्वमग
मन्नयः॥८॥ब्रह्मा नृसोमरूपस्तु दत्तात्रेयो हरिःस्वयं॥दुर्वासा रुद्ररूपो सो पुत्रत्वं तेन
पेदिरे॥९॥नृसिंहावतरणं तु देवकार्यार्थसिद्धये॥चतुर्थेथयुगे जातं द्विधारूपमनो
हरं॥१०॥हिरण्यकशिपोः सम्यक्वधाय भगवान्हरिः॥चक्रे रूपं नारसिंहे देवानां वि
स्मयप्रदं॥११॥बलेर्नियमनार्थाय त्रेतायुगेथ सत्तमे॥चकार रूपं भगवान्वामनं क
श्यपान्मुने॥१२॥छलयित्वा मखे नृपं राज्यं जहार हः॥पातालेस्थापयामास बलिं वामन ५४
रूपधृक्॥१३॥युगे चैकोनविंशेथ त्रेताख्ये भगवान्हरिः॥जमदग्निसुतो जातो रामनामा
महाबलः॥१४॥क्षत्रियांतकरःस्वामि सत्यवादीजितेंद्रियः॥दत्तवान्मेदिनीं कृत्स्नां

कश्यपाय महात्मने॥१५॥यो वै परशुरामाख्यो हरेरद्भुतकर्मणः॥अवतारस्तु राजेंद्र
कथितः पापनाशनः॥१६॥त्रेतायुगे चतुर्विंशे रामो दशरथात्मजः॥हरिर्लीलाजयाना
थ रावणं लोकरावणं॥१७॥नरनारायणांशौ द्वौ जातौ भुवि महाबलौ॥अष्टाविंशेख्या
तौ द्वापरे मुनिशेखरिणौ॥१८॥धरानावतारार्थं जातौ कृष्णार्जुनौ भुवि॥चतवंतं महायुद्धं कु
रुक्षेत्रे दारुणं॥१९॥एवं युगे युगे राजन्नवतारा हरेः किल॥भवंति बहवः कामं कृत्वा
: प्रेरिताः नृपः॥२०॥अनंतरं रविलं सर्वं विश्वमेतच्चराचरं॥यये छति बलात्साहात्त्वामय
मनिचां नृपः॥२१॥पुरुषस्य प्रियार्थं सारवमत्यखिलं जगत्॥इष्टा सएव भगवानहस
मेतच्चराचरं॥२२॥सर्वादिः सर्वगश्चासौ हुर्मेयः परमव्ययः॥निरालंबो निराकारो
निस्पृहश्च परात्परः॥२४॥उपाधियोगाद्यथाछायाद्दत्वादन्याविभातिच॥उभिस्तु

गा॰च॰ कालयोगात्सानिद्राख्यातिविवासदा॥२४॥ साविष्णुंकुरुतेकामंसापाजतं॥ कल्पांतेसं
हरत्येवत्रिरूपाविष्णुमोहनी॥२५॥ तयायुक्तोःसृजद्ब्रह्माविष्णुपातितयान्वितः॥ रुद्रः
५५ संहरतेकामंतयासमिलितःशिवः॥२६॥ सावृष्णातिजगत्कृत्स्नंमायाशेनमोहितं॥
अहममेतिपाशेनसुदृढेननराधिप॥२७॥ योगिनमुक्तसंगाश्चमुक्तिकामामुमु
क्षवः॥ तामेवसमुपासंते देवींविश्वेश्वरींशिवां॥२८॥ विद्याविद्येतितस्यावैद्वेरूपेवि
द्धिपार्थिवः॥ विद्यायामुच्यतेजंतुर्बध्यतेचान्ययापुनः॥२९॥ ब्रह्माविष्णुश्चरुद्रश्चस
र्वेतस्यावशानुगाः॥ अवतारान्प्रकुर्वंतियंत्रिताइवदामभिः॥३०॥ कदाचिच्चसुखं
भुंक्तेवैकुंठेक्षीरसागरे॥ कदाचिच्चतपस्तीव्रंतीर्थेचरतिसुव्रतः॥३१॥ कदाचिच्छेतेशे
षेसौयोगनिद्रामुपाश्रितः नस्वतंत्रःकदाचिच्चभगवान्मधुसूदनः॥३२॥ तथाब्रह्मा

तथारुद्रस्तथेंद्रोवरुणोयमः॥ कुबेरोग्निःसमीरश्चतथान्येसत्तमाः॥३४॥ मुनयःस
नकाद्याश्चवसिष्ठाद्यास्तथापरे सर्वेवावशगानित्यंपंचाजीवनदस्यच॥३५॥ नसिद्धो
तायथागावोप्रचरंतिवशानुगाः॥ तथेमेदेवताःसर्वेकालपाशनियंत्रिता॥३६॥ ईर्ष
शोकादयोभावानिद्रातंद्रालसादयः॥ सर्वेषांसर्वराजन्देहिनांदेहसंयुताः॥३७॥
अमरानिर्जराश्चोक्तादेवाश्चार्थकाकारकैः॥ अभिधानतश्चार्थतोनतेमूलात्मृशाःक
चित्॥३८॥ उत्पत्तिःस्थितिवाख्याताचायेषांनिरंतरं॥ अमरातेकथंवाच्यानिर्जरा
श्चपुनःकथं॥३९॥ दुःखाभिभूतोमायंतेकालेयेविबुधोत्तम॥ कथंदेवाश्चवक्तव्या
:व्यसनेक्रीडनंकथं॥४०॥ संशयात्तुत्पत्तिनाशाश्चहृदयेमेस्मिन्संशयः॥ जलजा
नांचकीटानांमत्वाकांतातथापुनः॥४१॥ तद्रूपमानकथनेमासायुषोमराःस्मृता

भा॰च॰ ततोवर्षायुषश्चापि द्विशतवर्षायुषस्तथा॥मनुष्यादमरादेवास्तस्माद्ब्रह्मापरःस्मृतः॥
रुद्रस्ततोतथाविष्णुःक्रमशश्चोत्तरोत्तरं॥४३॥नूनंदेहवतोनाशोमृतस्योत्पत्तिरेवच॥
५८ चक्रवद्भ्रमणंराजन्सर्वेषांनात्रसंशयः॥४४॥मोहजालाहतोजंतुर्मुच्यतेनकदाच
न॥मायायांविद्यमानायांमोहजालंननश्यति॥४५॥उत्पत्तिस्तुकालतःसर्वे
षांनृपजायते॥तथैवनाशःकल्पांतेब्रह्मादीनांयथाक्रमं॥४६॥निमित्तंयत्तुय
न्नाशेसंघातेपतितंनृप॥नान्यथातद्भवेन्नूनंविधिनानिर्मितंतुयत्॥४७॥जन्म
मृत्युसुखंदुःखंनिर्मितंजन्मसंभवे॥तत्तथैवभवेत्कामंनान्यथेतिनिर्णयः॥४८॥ ५६
सर्वेषांसुखदौदेवौप्रत्यक्षौशशिभास्करौ॥ननश्यतितयोःपीडाविशरूसंभवाः॥४९
भास्करस्यसतोमंदःसुतश्चंद्रःकलंकवान्॥पश्यराजन्विधेस्तत्त्वदुर्वारमहतामपि॥

॥५०॥वेदकर्त्ताजगद्धाताबुद्धिदस्तुचतुर्मुखः॥सोपिविक्लवतांप्राप्तोदृष्ट्वापुत्रींसरस्वतीं
५१॥शिवस्यापिमृताभार्यासतीदग्धाकलेवरं॥सोऽभवद्दुःखसंतप्तःकामार्त्तश्चजनार्द्दि
त॥५२॥कामार्त्तेदग्धदेहस्तुकालिंद्यांपतितःशिवः॥सापिदग्धामजलातातत्रिदा
घवशान्नृप॥५३॥कामार्त्तोभ्रममाणस्त्ववनेसोपिभृगोर्वनं॥गतःशप्तोथभृगुणादृ
ष्ट्वाकामातुरंभृशं॥५४॥पतत्वद्यैवतेलिंगंनिर्लज्जाधर्मकामुक॥तरसापतितंतच्च
शिवस्यवचनान्मुने॥५५॥दुःखितोसौतपस्तप्त्वाशंकरोलोकशंकरः॥उपयेमे
गिरेःपुत्रींपार्वतींचातिसुंदरीं॥५६॥विष्णुःप्राप्यदेवकार्यंसंजातोदशधाःकिल॥
पपाचामृतवापींचदानवैर्निर्मितांमुदा॥५७॥इंद्रोपिवृत्रघाताद्भूताकस्मिंश्चसंसारे
सुखदुःखान्विताःकिल॥भवंतिप्राणिनःसर्वविधितंत्रनिःसर्वेविधितंत्रनियंत्रिता

भा॰च॰ ५९॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेषोडशोध्यायः॥१६॥ ॥जनमेजय
उ॰॥ ॥अप्सरास्तास्तथाख्यातानरनारायणाश्रमे॥ प्रतिनारायणंत्वांतंकामयानाःस्म
५७ रातुराः॥१॥शप्तुकामस्तराजातोमुनिनरायणश्रुता॥ निवारितोनरेणाथभ्रात्राध
र्मविदापुनः॥२॥किंकृतंमुनिनातेनप्रसन्नेनसमुपस्थिते तान्निःसंकलितेनाथका
मार्त्तानिर्ज्जितंमुने॥३॥शक्रेणप्रहितानिश्चसत्कृतानिश्चमानद॥ याचितेनविवा
हार्थंकिंकृतंतेनजिष्णुना॥४॥ तच्छ्रोतुमभिकांक्षामिचरितंतस्यपावनंनारायण
स्यमेब्रूहिविस्तरेणपितामह॥५॥ ॥व्यासउ॥ ॥शृणुराजन्प्रवक्ष्यामिकथांतस्य
महात्मनः॥धर्मपुत्रस्यधर्मज्ञविस्तरेणवदामिते॥६॥शप्तुकामस्तुसंदृष्टोनरेणा
थयथाहरिः॥ वारितोसौसमाश्वास्यमुनिनारायणस्तदा॥७॥ शांतकोपस्तदोवा
चत्तास्तपस्वीमहामतिः॥स्मितपूर्वमिदंवाक्यमधुरंधर्मनंदन॥८॥अस्मिन्जन्मनि
चार्वंग्यःकृतसंकल्पश्चाप्यहं नकर्त्तव्योनकर्त्तव्यःसर्वथादारसंग्रहः॥९॥तस्माद्ग
च्छंतुत्रिदिवंकृपांकृत्वाममोपरि॥धर्मज्ञानप्रकुर्वंतिव्रतभंगंपरस्परं॥१०॥शृंगारेस्मि
न्नसेनूनंस्थायीभावोरतिःस्मृतः॥कथंकरोमिसंबंधनतदनावेसुलोचनाः॥११॥का
रणेनविनाकार्यंनभवपिनिश्चय॥कविभिःकथितंशास्त्रेस्थायीभावोरसःकिल
१२॥धर्मोहंचारुसर्वांग्यःसनाग्पोहंधरातले॥ प्रीतिपात्रेयतोपातोभवतीनाम
कृत्रिमं॥१३॥ भवतीभिःकृपांकृत्वारक्षणीयंव्रतंमम।विष्यामिमहाभागाःपतिरप्य
न्यजन्मनि॥१४॥अष्टाविंशोप्यरालात्तसेवापरस्मिन्धरातले॥देवानांकार्यसिध्यर्थं
संभविष्यामिसर्वथा॥१५॥तदाभवत्योमभार्याप्राप्यजन्मपृथक्॥ नृपतीनांसु

ना· च· ताः॥ न्नूत्वा पत्नीभावं गमिष्यथ॥२६॥ इत्याश्वास्य हरिस्तास्तु प्रतिकृत्य परिग्रहं॥ विस
र्जयन्स भगवान् जग्मुस्ता विस्मिताः॥ २७॥ एवं विसर्जितास्तेन गताः स्वर्गं तदाप्सराः॥
५८ शक्राय कथयामासुः कारणं सकलं तु नः॥२८॥ श्रुत्वाथ मघवा तासां मोहवृत्तांतं तस्य
विस्तरात्॥ तुष्टाव तं महात्मानं नारी दृष्ट्वा तथोर्वशीं॥२९॥ इंद्र उ॥ अहो धैर्यं मुनेः का
मं तथैव च तपोबलं॥ येनोर्वशी कृता बाला तथा न्याः परिकल्पिताः॥२०॥ इति स्तुत्वा
प्रसन्नात्मा बभूव सुरराट् तदा॥ नारायणोऽपि धर्मात्मा तपस्यभिरतोऽभवत्॥२१
इत्येतत्सर्वमाख्यातं मुने हेतोर्नमुक्तं नारायणस्य सकलं नरस्य च महाकृते॥
२२॥ तौ हि कृष्णार्जुनौ जातौ भूभारहरणाय च॥ अंशेन नरशार्दूल भृगोः शापवशा
दिह॥२३॥ ॥राजोवाच॥ ॥कृष्णावतारचरितं विस्तरेण वदस्व मे॥ संदेहो मम चि

त्तेत्ति तन्निवारय मानद॥२४॥ ययोः पुत्रत्वमापन्नो विष्ण्वंशे तौ महाबलौ देवकीव
सुदेवौ तौ दुःखभाजौ कथं मुने॥२५॥ कंसेन निगडैर्बद्धौ पीडितौ बहुवत्सरैः॥ ययोः
पुत्रो हरिः साक्षात्तपसा तौ भवत्॥२६॥ जातोऽसौ मथुरायां तु गोकुले स कथं गतः॥
कंसं हत्वा द्वारवत्यां निवासं कृतवान् कथं २७ कुलं च द्विजशापेन केशवस्य धरा
रुणं कथं नाशितवान् कृष्णस्तनौ स्यात् भगवानपि॥२८॥ भारावतरणं कृत्वा वासुदेव
सनातनः॥ देहं मुमोच तरसा जगाम च दिवं हरिः॥२९॥ पितृपर्यागतं देशं समृ
द्धं पावनं तथा॥ त्यक्त्वा नार्यंतरे देशे गतवान्स कथं हरे॥३०॥ पापिष्ठानां च जारे
ण व्याकुलानां भूचमेहनी॥ तेन ता वासुदेवेन पार्थेनामितकर्मणा॥२१॥ लुंठि
ता ये हरेः पत्न्यस्ते कथं च निवापिता॥ चौरा घोराः पिशाचाश्च दुष्टघुन्ताश्च

च. पार्थिवः॥३३॥सोमदत्तादयःसर्वेनिहतासंयुगेनृपाः॥तेषामुत्तारिलोनारस्त्रीराणांन
५९ हृतःकथं॥३४॥लक्ष्मपत्न्यःकथंदुःखंप्राप्ताःशांतेपतिव्रता॥संदेहोयंमुनिश्रेष्ठचित्ते
मेपरिकल्पितः॥३५॥वसुदेवस्तुधर्मात्मापुत्रदुःखेनपापिनः॥त्यक्तवान्सकथंप्राणान्त्र
पमृत्युंजगामह॥३६॥पांडवाधर्मसंयुक्ताःब्रह्मेचनिरताःसदा॥तेकथंदुःखनोकाशे
द्युत्रवन्मुनिसत्तम॥३७॥द्रौपदीचमहाभागासाकथंदुःखभागिनी॥वेदीमध्यात्त्वस
जातालक्ष्म्यंशासत्ववासती॥३८॥द्रौपदीच॥सनाथासमानीतारजोदोषसमन्वि
ता॥बलाद्दुःशासनेनाथकेशग्रहणकर्षिता॥३९॥पीडितारात्राथवनमध्यगतासती ५९
तथैवकीचकेनापितारुदतीन्त्रत्रं॥४०॥पुत्राःपंचैवतस्यास्तुनिहताशोणितागृहे॥सु
भद्रायासुतोयुद्धेवाएवनिपातितः॥४१॥तथाचदेवकीपुत्राःषट्कंसेननिषूदिता॥स

मर्थेनापिहरिणांदैवंद्विनान्यथाकथं॥४२॥यादवानांतथाशापेव्रनासेनिधनंपुनः॥
कलत्रयेतथातीव्रेतसत्रीमांचलुंगने॥४३॥विष्णुणाचेश्वरेणापिसाक्षान्नारायणेनव
उग्रसेनस्यसेवाविहासवस्मततंत्रता॥४४॥संदेहोयंमहान्मेद्यनरनारायणेमुने॥सर्व
जंतुसमानत्वंव्यवहारेनिरंतरं॥४५॥हर्षशोकादयोभावाःसर्वेषांसदृशाःकथं॥इश्व
रस्यहरेर्ममिनारावमप्यन्यथागतिः॥४६॥एतद्विस्तरतोब्रूहिब्रह्मस्यचरितंमहत्॥श्व
लोकिकंकिंहरिणात्ततंकार्यंमहीतले॥४७॥हताश्चायुद्धयेदैत्याःक्लेशेनमहतापुनः
कैश्वर्यशक्तिःप्रथिताहरिणामुनिसत्तम॥४८॥रुक्मिणीहरणेनूनंगृहीत्वाप्यपलाय
नं॥ततंह्विवासुदेवेनचौरवच्चरितंतदा॥४९॥मथुरामंडलंत्यक्त्वासमृद्धंकुलसंगतं
जरासंधभयात्तेनद्वारकागमनंततं॥५०॥तदर्केनापिनज्ञातोभगवान्हरिरीश्वरः॥

किंचतद्ब्रूहिमेब्रह्मन्कारणंतेनगोपने॥५१॥ एतेचान्येचबहवःसंदेहावासवीसुत॥
नारायाद्यमहाभागसर्वज्ञोसिद्विजोत्तमः॥५२॥गोप्यस्तथैकःसंदेहोहृदयान्नानिव
र्तते॥पंचाल्याःपंचभर्तृत्वंलोकेजुगुप्सितंनकिं॥५३॥सदाचारप्रमाणंहिप्रवदंति
मनीषिणः॥पशुधर्मःकथंतैस्तुसमर्थैरपिसंश्रितः॥५४॥भीष्मेणपितृतंकिंवादे
वरूपेणभूतले॥गोलकौतौसमुत्पाद्यकुलस्यरक्षणंमुने॥५५॥धिग्धर्मनिर्ण
यःकामंमुनिभिःपरिदर्शितः॥येनकेनाप्युपायेनपुत्रोत्पादनलक्षणः॥५६॥ ॥इ
तिश्रीभागवतेमहापुराणेचतुर्थस्कंधेसप्तदशोध्यायः॥१७॥ व्यासउवाच॥ ॥शृणुरा
जन्नवक्ष्यामिकृष्णस्यचरितंमहत्॥अवतारकारणंचदेव्याश्चरितमद्भुतं १ धरैकदा
भराक्रांतारुदंतीचातिकर्शिता॥गोरूपधारिणीदीनाभीतात्रिविष्टपंगता॥२॥पृष्टा

शक्रेणकिंतेद्यवर्ततेदुःखमेदिनि॥पीडितासिचकेनत्वंब्रूहिदुःखंवसुंधरे॥३॥त
च्छ्रुत्वासातदोवाचशृणुदेवेशमेखिलं॥भराक्रांतास्मिमानद॥४॥जरासंधोमहा
पापोमागधेषुगतिर्मम शिशुपालस्तथाचैद्यःकाशिराजःप्रतापवान्॥५॥रु
क्मीचबलवान्कंसोनरकश्चमहाबलः॥शाल्वसौभपतिःक्रूरःकेशीधेनुकवत्सका
६॥सर्वेधर्मविहीनाश्चपरस्परविरोधिनः॥पापाचारामदोन्मत्ताकालरूपाश्चपार्थिवाः
७॥तैरहंपीडिताशक्रभाराक्रांतास्मिविभो किंकरोमिक्वगच्छामिकचिंतामेमहती
स्थिता॥८॥पीडिताहंवराहेणविष्णुनाप्रभविष्णुना॥शक्रजानीहिहरिणादुःखाद्दुःखत
रान्वता॥९॥यतोहंदुष्टदैत्येनकश्यपस्यात्मजेनवै॥हृताहंहिरण्याक्षेणमग्नातस्मिन्म
हार्णवे १० नतदासूकररूपेणविष्णुनानिहतोप्यसौ॥उद्धृताहंवराहेणस्थापितास्म

ता॥११॥ नोचेद्रसातले स्वस्थाने वेहं तत्र हा किल॥ न शक्नोम्यहं देवेश दुष्टानां भार
मद्भुतं॥१२॥ अथैतद्दुःखसमाविष्टा विश्रान्ति मे कलि॥ तदाहं पीडिता शक्र गतास्म्यत्र
रसातलं॥१३॥ तस्मात्त्वं देवदेवेश दुःखरूपाण्यस्य च॥ पारदेऽनवनारं मेऽहर पादेन
मामिते॥१४॥ ॥इंद्र उवाच॥ ॥देवि किं ते करोम्यद्य ब्रह्माणं व्रज॥ अहं त्वत्रागमि
ष्यते दुःखं हरिष्यति॥१५॥ तच्छ्रुत्वा त्वरिता पृथ्वी ब्रह्मलोकं जगाम ह॥ शक्रोपि पृष्ठ
तः प्राप्तः सर्वदेवपुरःसरः॥१६॥ सुरं नीरुदमानां च दृष्ट्वोवाच प्रजापतिः॥ मही त्वा
त्वा महाराज ध्यानेन सस्मितं वच॥१७॥ कस्माद्रुदसि कल्याणि किं ते दुःखं वराधुना
पीडितासि च केन त्वं पापाचारेण भूभुज॥१८॥ धरोवाच॥ ॥कलिराया तिदुष्टोयं वि
नमितद्भयादहं॥ पापाचाराः स्वतंत्रं विष्यंति जगत्पते॥१९॥ राजानस्तु दुराचारा

परस्परविरोधिनः॥ चोरकर्मरताः सर्वे राक्षसाः पूर्ववैरिणः॥२०॥ तान्हत्वा नृपतीन्
नीरं हरमेकरुं शकः॥ पीडितास्मि महाराज सैन्यभारेण भूभुजां॥२१॥ ब्रह्मोवाच
॥नाहं शक्तस्तथा देवी नारायणचरणे तव॥ गच्छावः शरणं विष्णोर्देवदेवस्य चक्रिणः॥२२
स ते भारापनोदं वै करिष्यति जनार्दनः॥ पूर्वं मयार्पिते कार्यं चिंतितं सुविचार्य च॥२३
मास उ॥ ॥इत्युक्त्वा वेदकर्त्तासौ पुरस्कृत्य सुरांश्च गां॥ जगाम विष्णुसदनं हंसारू
ढश्चतुर्मुखः॥ तत्र गत्वा सुरश्रेष्ठ देवदेवं जनार्दनं॥ तुष्टाव वेदवाक्यैश्च भक्तिप्रवणमा
नसः॥२५॥ सहस्रशीर्षा त्वमसि सहस्राक्षः सहस्रपात्॥ त्वं वेदपुरुषः सर्वदेव स
नातनः॥२६॥ भूतं पूर्वं भविष्यं च वर्त्तमानं च यद्विभो॥ अमरत्वं त्वया दत्तमस्माकं च
रमापते॥२७॥ एतावान्महिमा तेस्ति न कोपि वेत्ति जगत्त्रये॥ त्वं कर्त्ता च विहर्त्ता च त्वं सा

स्रीगतिरीश्वरः॥२८॥ ॥व्यासउ॥ ॥इतिउितःप्रभुर्विष्णुःप्रसन्नोगरुडध्वजः॥स्वस्थानं
चदृष्ट्वादेवान्ब्रह्मादीन्दीनमानसान्॥२९॥पप्रच्छस्वागतंदेवान्प्रसन्नवदनोहरिः
ततस्वागमनंतेषांकारणंचविस्तरं॥३०॥तमुवाचाब्जजोनत्वाधराडःखंसविस्तरं॥
भारावतरणंविष्णोकर्तव्यंतेजनार्दन॥३१॥भुविजन्त्वावतारंत्वंह्यपरांशसतांगते॥
हत्वादुष्टनृपान्भूमेहिंरभारदयानिधे॥३२॥विष्णुरु॥ ॥नाहंस्वतंत्रएवात्रनब्रह्मा
नशिवस्तथा॥नेंद्राग्निर्नयमस्त्वष्टावरुणःपवनस्तथा॥३३॥योगमायावशोस
र्वमिदंस्थावरजंगमं॥ब्रह्मादिस्तंबपर्यंतंगुणसूत्रेणग्रंथितं॥३४॥यथारसाप्र
कृतिःकर्तुमिच्छतिपद्मज॥तथाकरोतिसततंवयंसर्वेचतद्वशाः॥३५॥यद्यहंस्यात्स्व
तंत्रोनचिंतयंतुधियाकिल॥कथंभवामिमत्स्योहंकश्यपोवामहार्णवे॥३६॥ति

र्यग्योनिषुकोभोगःकाकीर्त्तिःकिंसुखंपुनः॥किंगुणंकिंफलंतत्रसुरयोनिगत
स्यमे॥३७॥कोलोवायन्नृसिंहोवावामनोवाभवामिकिं॥जमदग्निसुतःकस्माद्भु
वेहंनृपांतत्क्षत्॥३८॥नृशिंसंवाकथंकर्मकृतवानस्मिभूतले॥ततनेत्रंकुंडहास्यम
पूरयेयंकथंपुनः॥३९॥तत्कथंजमदग्नेश्चपुत्रोभूत्वातुयियान्॥ब्राह्मणींतनुमाश्रि
त्यनिहन्मिनिर्दयःकिल॥४०॥रामोभूत्वापदैवेंद्रःप्रविशेदंडकंवनं॥पदातिश्चीर
वासाचजटावल्कलवान्मुनः॥४१॥असहायोह्यपाथेयोनिपादस्वनिर्जने॥कुर्व
न्नाखेटकंतत्रविचरामिगतत्रपः॥४२॥नवेदाहंमृगंहैमंमाययामोहितस्तदा॥
उटजेजानकींत्यक्त्वानिर्गतस्तत्सदानुगः॥४३॥लक्ष्मणोपिचतांत्यक्त्वानिर्गतोमम
हानुगः॥वारितोपिमयात्यर्थंमोहितःप्रकृतिगुणैः॥४४॥भिक्षुरूपंततःकृत्वाराव

णः कपटाश्रितिः ॥ जहरोगत्यतरसा जानकीं शोककर्शितां ॥ ४५ ॥ शोकदुःखान्वितेनेम
यारुदितं वदने वने ॥ सुग्रीवेण च मित्रत्वं तत्कार्यं वशान्मया ॥ ४६ ॥ अन्यायेन हतो
वाली पापं च न विचारितं ॥ सह यान्वानरान्कृत्वा लंकां प्रयांचलितः पुनः ॥ ४७ ॥ श्र
मेण बद्धो नासिंधौ सेतुबंधः कृतस्तथा ॥ युद्धं च दारुणं तत्र कृतं मे राक्षसैः सह ॥ ४८
बद्धोहं नागपाशेन्तु लक्ष्मणश्च ममानुजः ॥ विसंज्ञौ पतितौ दृष्ट्वा वानरा विस्मयंगताः
४९ ॥ गरुडेन तदागत्य मोचितौ भ्रातरौ किल ॥ चिंता मे महती जाता दैवः किं वा क
रिष्यति ॥ ५० ॥ कृतं राज्यं वने वासो मृतः स्तातः प्रिया हृताः युद्धे कष्टं दृढात्येव मय्येकिं ६३
वा करिष्यति ॥ ५१ ॥ प्रथमं तु महद्दुःखं राज्यं त्यक्त्वा वनाश्रयः ॥ राजपुत्रासमं नूनं
धनहीनस्य मे सुराः ॥ ५२ ॥ वराटका पि भिन्नामे न दत्ता वननिर्गमे ॥ पतति रसहायो

हं धनहीनश्च निर्गतिः ॥ ५३ ॥ चतुर्दशैव वर्षाणि नीतानि च तदा मया ॥ त्वावंधमपि रि
लज्ज्याधहृत्वा महावने ॥ ५४ ॥ दैवाद्युद्धे जयः प्राप्तो निहतोसौ दशाननः ॥ ब्रनी
ताच पुनः सीता प्राप्ता योध्या मया तथा ॥ ५५ ॥ वर्षाणि कतिचित्तत्र सुखं संसारसं
भवं ॥ प्राप्तं राज्यं च संपूर्णं कोशलानां निरामयं ॥ ५६ ॥ सुखं वै वर्त्तमानेन प्राप्तराज्ये न
वै तदा ॥ लोकापवादभीतेन नत्यक्ता सीता वने मया ॥ ५७ ॥ कांताविरहजं दुःखं पुनः प्रा
प्तं दुरासदं ॥ पातालं सा गता पश्चात्धरा जीता धरात्मजा ॥ ५८ ॥ एवं रामावतारे मे दुःखं
प्राप्तं निरंतरं ॥ परतंत्रेण तन्नूनं स्वतंत्रः को भवेत्तथा ॥ ५९ ॥ पश्चात्कालवशाद्रामः
स्वर्गं प्राप्त समन्वितः ॥ परतंत्रस्य का वार्त्ता विज्ञ्या विबुधेन वै ॥ ६० ॥ परतंत्रोस्म्यहं नू
नं पद्मयोनेन निशामय ॥ तयात्वमसि रुद्रश्च सर्वे चान्ये सुरोत्तमाः ॥ ६१ ॥ ॥ इति श्रीमा

गवतेमहापुराणेचतुर्थस्कंधेअष्टादशोध्यायः॥ ॥व्यासउ॥ ॥इत्युक्त्वाभगवान्वि
ष्णुःपुनराहप्रजापतिं॥यद्ब्रवीषिवयंसर्वेतत्त्वंजानासिपद्मज॥१॥वयंमायावृताःका
मंनस्मरामिजगद्गुरुं॥परमंपुरुषंशांतंसच्चिदानंदमव्ययं॥२॥वयंमायावृताः
कामं॥अहंविष्णुरहंब्रह्माशिवोहमितिमोहिताः॥नजानीमोवयंधातर्यत्परंब्रह्म
सनातनं॥३॥यन्मायामोहितश्चाहंसदावर्तेमहात्मनः॥परवान्दारुपांचाली
मायिकस्ययथावशा॥४॥भवतापितथादृष्टाविभूतिस्तस्यचाद्भुता॥कल्पांतेर्णव
युक्तेनमयापिचसुधार्णवे॥५॥मणिद्वीपेचमंदारविटपाश्रममंडले॥समाजेतं
चदेवींतांश्रुतानिवचनानिच॥६॥तस्मात्तांपरमांशक्तिंस्मरंतुप्रसुराःशिवां॥
सर्वकामप्रदांमायांप्रकृतिंपरमात्मनः॥७॥व्यासउ॥इत्युक्त्वाहरिणादेवाब्रह्मा

द्याभुवनेश्वरीं॥सस्मरुर्मनसादेवींयोगमायांसनातनीं॥८॥स्मृतमात्रातदादेवी
प्रत्यक्षंदर्शनंददौ॥दृष्ट्वाप्रमुदितादेवास्तुष्टुवुस्तांसुदर्शनां॥९॥देवाऊचुः॥मातस्त्वमस्म
द्भुवनार्तिहरेप्रसीदशान्तोविधेहिकरुकार्यमिदंदयाद्रे॥भारंहरस्वविनिहत्यसुरा
रिवर्गंमह्यामहेश्वरिसतांकुरुशंभवानि॥१०॥कंसोजगोथयवनेंद्रसुतश्चकेशी
वाहीश्चथोबकबकीखरशाल्वमुख्या॥रुक्मीविदूरथद्विषःशिशुपालमुख्यान्हत्वाद्य
रस्वजगतीभरमाशुमातः॥११॥येविष्णुनावीनिहताःकिलशंकरेणयेवासवेन
समवेनसमरेवलवीयमिता॥तेषांबिकेतवकरांकुरदीमतेजैलक्ष्मीशशांकरशा
चीपतीनिर्भवानि॥१२॥यंत्वंभुजाक्षिदयसेनसुरान्कदाचिन्किंतेसमारणमुखे
पितारेःप्रहर्तुःशक्तिंविनाहरिहराजमुखाःसुराश्चतेनेश्वराविचलितुंतवतेजहीनाः

मा॰ च॰ १३॥ किंधारणविरहितःप्रभुरप्यनंतोधर्तुंधरांचरजनीशकलाविहीनः॥ प्रद्योतितुं
६५ रविरयीहकिलाग्रजश्चस्वाहोजितस्तुऊतमग्निरलंकिमत्र॥१४॥ इंद्रउ॥ ॥ वाचावि
नाविधिरलंनकर्तुमिहविश्वंकर्तुंहरिःकिमुरमारहितोथपातुं॥ संहर्तुमीशरुमया
जितरीश्वरःकिंतेताभिरेवसहिताःप्रभवःप्रजेशाः॥१५॥ धर्तुंपविनहिनवामिक
राचनाहमंबीश्वरोतवकलारहितस्त्रिलोक्याः॥ कर्तुंचनुत्वमनघेत्रतथाविह
र्तुंत्वंवैसमस्तविजनेश्वरिचासिनूनं॥१६॥ व्यासउ॥ ॥ एवंस्तुतातदादेवीतानाह
विबुधोत्तमान्॥ किंवःकार्यंकृवंत्तचकरोमिविगतज्वरा॥१७॥ असाध्यमपिलो ६५
केस्मिन्तत्करोमिसुरेप्सितं॥ शंसंतुभवतांत्वस्यधरायाचासुरोत्तमाः॥१८॥ देवा
ऊचुः॥ ॥ वसुधेयंनराक्रांतासंगोप्ताविबुधान्प्रति॥ रुदंतीवेपमानाचपीडिता

दुष्टनृभुजैः॥१९॥ भारापहरणंचास्याःकर्तव्यंभुवनेश्वरि॥ देवानामीप्सितंकार्य
मेतदेवाधुनाशिवे॥२०॥ घातितस्तुपुरामातस्त्वयामहिषरूपधृक्॥ दानवोति
बलाक्रांतस्तस्सहायाश्चकोटिशः॥२१॥ तथाशुंभोनिशुंभश्चरक्तबीजस्तथाप
रः॥ चंडमुंडौमहावीर्यौतथैवधूम्रलोचनः॥२२॥ दुर्मुखोदःसहश्चैवकरालश्चाति
वीर्यवान्॥ अन्येचबहवःक्रूरास्त्वयैवविनिपातिताः॥२३॥ तथैवाद्यसुरारीतंज
हिसर्वान्महीभुजः॥ भारंहरधरायाश्चउद्धरंभुभुजां॥२४॥ इत्युक्तासातदादेवीदे
वानहाविकाशिवा॥ संप्रहस्यासितापांगीमेघगंभीरयागिरा॥२५॥ श्रीदेव्युवा
च॥ ॥ मयेदंचिंतितंपूर्वमंशावतरणंसुराः भारावतरणंचैवयथावदुष्टभुभु
जां॥२६॥ व्यासउ॥ इत्युक्त्वासातदादेवी॥ ॥ सर्वेमयानिहंतव्याहेतांत्रायेमही

भुजा॥ मागधा मद्रा नागाः स्वराक्ता मंदतेजसा॥२७॥ भवद्भिरपि स्वरंशैरवतीर्य
धरातले॥ मत्सक्तियुक्तैः कर्तव्यम्भारावतरणं सुराः॥२८॥ कश्यपो दितिसंयुक्तः
शापाद्वै यादवशांपते॥ यादवानां कुले पूर्णे भविता नकदुंदुभिः॥३०॥ तथैव च
गुरुशापाद्भगवान्विष्णुरव्ययः॥ अंशेन भविता तत्र वसुदेवसुतो हरिः॥३१॥ तदा
हं भविष्यामि यशोदायां च गोकुले॥ कार्यं सर्वं करिष्यामि सुराणां सुरसत्तमाः
३२॥ कारागारे हरिं जातं प्रापयिष्यामि गोकुलं॥ शेषांशं देवकीगर्भात् संनयि
ष्यामि रोहिणी॥३३॥ मत्सकोपचिते स्वयं विष्णुः कर्त्ताय संक्षयं॥ दुष्टानां भूभु
जां कामं द्वापरांते सुनिश्चितं॥३४॥ इंद्रोप्यर्जुनिः साक्षात्करिष्यामि बलक्षयं॥ धर्मा
शोपि तथा राजा भविष्यति युधिष्ठिर॥३५॥ वायुरंशो भीमसेनस्त्वश्विनांशौ

यमावपि॥ वंशो रंसो ध्वगांगेयो करिष्यति बलक्षयं॥३६॥ व्रजंतु भुवनान्यथ ध
रां भवतु सुस्थिता॥ भारावतरणं नूनं करिष्यामि सुरोत्तमाः॥३७॥ क्षत्तानिमि
त्तमात्रात् तान् स्वराक्ताहतं संशयः॥ कुरुक्षेत्रे करिष्यामि क्षत्रियाणां च संह
यं॥३८॥ असूयेष्यामि तिस्तृष्णा ममता मुदितास्पृहा॥ जिगीषोन्मादिनी मोहा
श्चक्रयः संमता मम॥३९॥ ताभिः संयुताः सर्वे करिष्यंति जनक्षयं॥ परस्परं
मृधं कृत्वा क्षयं यास्यंति यादवाः॥४०॥ ब्राह्मणस्य च शापेन वंशच्छेदो भविष्यति
भगवानपि शापेन त्यक्ता नैजकलेवरं॥४१॥ भवंतोपि निजांशैश्च शाहायाः शार्ङ्ग
धन्वनाः॥ भवंतु सनारीका मथुरायां च गोकुले॥४२॥ व्यास उ॥ ॥इत्युक्त्वा
तद्दधे देवी योगमाया परात्मनः॥ सधरा देवताः सर्वे जग्मुस्ताभ्यालयानिव

॥४३॥धरापिसुस्थिताजातास्यावाक्येनतोषिता॥औषधीवीरुधोपेताःबभूवज
नमेजय॥४४॥प्रजाश्चसुखिताजातातान्हिज्ञायमहीस्थः॥संतुष्टामुनयःसर्वेबभूवु
र्ध्मितिसराः॥४५॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेएकोनविंशोऽध्यायः॥
१९॥ ॥व्यासउ॥ ॥शृणुभारतवक्ष्यामिश्रीरामावतरणंयथा॥कृतस्तेनघनश्यामेचनंतं
योगमायया॥१॥यदुवंशेसमुत्पन्नोविष्णोरमिततेजसः॥भृगुशापबलेनच॥क्षिति
भारसमुत्तारनिमित्तमितिमेमतिः॥माययाविहितोयोगोवियोगोविष्णोजन्मधरात
ले॥३॥किंचित्रंनृपदेवीसाब्रह्माविष्णुहरामपि॥नर्तयित्यनिशंमायात्रिगुणाह्यपराक्रि ६७
मु॥४॥गर्भवाससमुत्थंयदुःखंविण्मूत्रवासजं॥विष्णोरापादितंसम्यक्यथाविग
तलिलया॥५॥पुरारामावतारेपिनिर्जरावानरान्नता॥विहितंतेयथाविष्णुदुःखपात्रं

न्नतः॥स्थितो॥६॥आरोग्यभंगतंदुःखंराज्यापहरणंतथा॥सीताविरहसंतप्तोरुरो
दश्रमातुरः॥१०॥योपृच्छत्पादपान्वृक्षगतानानकात्मना॥नदृष्टावाकृताकेन
कर्वत्यचतरायनः॥११॥लक्ष्मणाहंमरिष्यामिकांताविरहदुःखितः॥त्वंचापिम
द्दुःखेनमरिष्यतिवनेनुजः॥१२॥आवयोमरणंज्ञात्वामाताममनमरिष्यति॥शत्रु
घ्नोप्यतिदुःखार्तःकथंजीवितुमर्हति॥१३॥सुमित्राजीवितंत्यक्ष्यत्सुतव्यसनकर्शि
ता॥पूर्णकामाथकैकेयीजाता पुत्रसमन्विता॥१४॥किंकरोमिक्वगच्छामितदृशी
नंचजीवितं॥समाश्वासयमांदीनंप्रियंजनकनंदिनि॥एवंविलप्यमानेनरामेणामि
ततेजसा॥वनेवनेभ्रमताचबीक्षिताजनकात्मजा॥१७॥शरण्यःसर्वलोकानांरामः
कमललोचनः॥शरणंवानराणांसगतोमायाविमोहितः॥१८॥सहायातानराञ्क्र

त्वा बबंध वरुणालयं ॥ जघान रावणं वीरं कुंभकर्णं सहोदरं ॥ १९ ॥ आनीय च ततः सी
तां रामो दिव्यमकारयत् ॥ सर्वज्ञोपि धृतां मत्वा रावणेन दुरात्मना ॥ २० ॥ किं ब्रवीमि महा
राज योगमायाबलं तव ॥ यया विश्वमिदं सर्वं भ्रामितं भ्रमते किल ॥ २१ ॥ एवं नानाव
तारेत्र विष्णुः शापवशं गतः ॥ करोति विविधाश्चेष्टा दैवाधीनः सदैव हि ॥ २२ ॥ तथैव क
थयिष्यामि तस्यापि विचेष्टितं ॥ अत्रैवं मानुषे लोके देवकार्यार्थसिद्धये ॥ २३ ॥ कालिं
दीपुलिने रम्ये ह्यासीत्मधुवनं पुरा ॥ लवणो मधुपुत्रो भूद्दानवो बली ॥ २४ ॥ द्वि
जानां दुःखदः पापो वरदानेन गर्वितः ॥ निहतो सौ महाभाग लक्ष्मणस्यानुजेन वै ॥ २५
शत्रुघ्नेनाथ संग्रामे तं निहत्य मदोत्कटं ॥ वासिता मथुरा नाम पुरी परमशोभना ॥ २६
स तत्र पुष्कलाक्षौ द्वौ पुत्रौ शत्रुनिषूदनः ॥ निवेश्य राज्ये मतिमान्काले प्राप्ते दिवं

गतः ॥ २७ ॥ सूर्यवंशक्षये तां तु यादवाः प्रतिपेदिरे ॥ मथुरां मुक्तिदां साक्षात्ययया
तितनयाः नृपा ॥ २८ ॥ शूरसेनाभिधः शूरस्तत्राभून्मेदिनीपतिः ॥ मथुरां शूरसेनांश्च
बुभुजे विषयान्नृप ॥ २९ ॥ तत्रोत्पन्नः कश्यपांशः शापाद्वरुणस्य वै ॥ वसुदेव इति ख्यात
ः शूरसेनसुतस्तदा ॥ ३० ॥ वैश्यवृत्तिपरः सोभून्मृते पितरि माधव ॥ उग्रसेनो राजा सोभवं
कंसस्तस्यात्मजोभवत् ॥ ३१ ॥ अदितिर्देवकी जाता देवकस्य सुता तदा ॥ शापाद्वरुणस्या
थ कश्यपानुगता किल ॥ ३२ ॥ दत्ता सा वसुदेवाय देवकेन महात्मना ॥ विवाहे विततेत त्र
वाग्भूद्गगने तदा ॥ ३३ ॥ कंस कंस महाभाग देवकीगर्भसंभवः ॥ अष्टमस्तु सुतः श्रीमान्
तवाहंता भविष्यति ॥ ३३ ॥ तच्छ्रुत्वा वचनं कंसो विस्मितो भून्महाबलः ॥ देववाचं च तां
मत्वा सत्यं चिंतामवापह ॥ ३४ ॥ किं करोमीति संचिंत्य विमर्शमकरोत्तदा ॥ निहन्मे

नं मममे मृत्युर्न्न वेदद्वेवसत्वरः ॥३५॥ उपायो नान्यथास्मिन्कार्ये मृत्यत्नयावहे ॥ इयं पितृ
ष्वसा पूज्या कार्थं हन्मीत्यचिंतयत् ॥३६॥ पुनर्मिमांसयामास मरणं मे पितृष्वसात् ॥ पा
पेनापि प्रकर्त्तव्या देहरक्षा विपश्चिता ॥ ३७॥ प्रायश्चित्तेन पापस्य शुद्धिर्भवति सर्वथा ॥ प्रा
णरक्षात्र कर्त्तव्या बुधैरप्येनसा सह ॥३८॥ विचिंत्य मनसा कंसः खड्गमादाय सत्वरः ज्या
इतां वरारोहां केशेष्वाकृष्य पापकृत् ॥३९॥ विकोशं खड्गमुद्यम्य हंतुकामा उराद्रावः ॥ पश्य
तां सर्वलोकानां नवोढानां चकर्ष ह ॥४०॥ हन्यमानां च तां दृष्ट्वा हाहाकारो महानभूत् ॥
वसुदेवानुगा वीरा युद्धायोद्यतकार्मुकाः ॥४१॥ मुंच मुंचेति प्रोवाच तं तदाद्भुतसाहसं ॥
कश्यमोचयत्वं च देवकी देवमातरं ॥४२॥ तच्छ्रुत्वमन्न्यवद्धोरं वीराणां च परस्परं ॥ वसुदे
वसहायानां वै कंसेन च महात्मना ॥४३॥ वर्त्तमाने तथा युद्धे दारुणे लोमहर्षणे ॥ कंसं नि

वारयामासुर्वृद्धा ये यदुसत्तमाः ॥४४॥ पितृष्वसेयं च तेवीर पूजनीया च बालिका ॥ नेदं
तव्या त्वया वीर विवाहोत्सवसंगमे ॥४५॥ स्त्रीहत्या दुःसहा वीर ——— ॥ नूत
नाषितमात्रेण न कर्त्तव्या विजानता ॥४६॥ अंतर्हितेन केनापि शत्रुणा तव चास्यता
भाषितं नन्विदं किं वा नूनं मायाबलं किल ॥४७॥ यशोत्सवे विघ्नाताय व गृहस्य च ॥ श
त्रिणा रचिता णो गुप्ता माया विदा नृप ॥४८॥ विशेषाद्वीरमुख्यापि नूतभाषितभाषितः
पराभूत वियातार्थमुद्यमो यं त्वया नय ॥४९॥ पितृष्वसा न हंतव्या विवाहसमये पुनः
न वितथं महाराजन्नैवैतत्कथमन्यथा ॥५०॥ एवं निवार्यमाणोपि यदा सो न निवर्त्त
ते ॥ तदा तं वसुदेवोपि नीतिज्ञः प्रतिभाषत ॥५१॥ कंस्य सत्यं प्रवीम्यद्य सत्याधारं ज
गत्त्रयं ॥ दास्यामि देवकी पुत्रान् उत्पन्नान् तव सर्वशः ॥५२॥ जातं जातं सुतं तु स्म न

भा॰च॰ दहामिनृपोत्तम॥कुंभीपाकेमहाघोरेपतंतुपूर्वजाममम॥५३॥तच्छ्रुत्वावचनंशौरेर्यदिवा
येपुरास्थिता॥ऊचुस्तेत्वरिताःकंससाधुसाधुपुनःपुनः॥५४॥नमिथ्याभाषतेक्वापि
७० वसुदेवोमहामनाः॥कं[illegible]रांमुंचमहाभागस्त्रीहत्यापातकंतथा॥५५॥व्यासउ॰॥
एवंप्रबोधितोकंसोयदुवृद्धैर्महात्मभिः॥कोपंत्यक्त्वास्थितस्तत्रसत्यवाक्यानुमोदिता
:॥५६॥ततोदुंदुभयोनेदुर्वादित्राणिचसर्वशः॥जयशब्दस्तुसर्वेषामुत्पन्नस्तत्रसंसदि॥
५७॥विवाहकार्याणिततःपराणिसमाप्यसर्वाणिचशूरसूनुः॥जगामगेहंस्वजनानु
वृत्तोनवोढयावीनयस्तरस्वी॥५८॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेदेवकी
विवाहोनामविंशोध्यायः॥२०॥ ॥व्यासउ॰॥ ॥अथकालेसुसंजातेदेवकीदेवरूपिणी
गर्भंदधारविधिवद्वसुदेवेनसंगता॥१॥पूर्णेथदशमेमासिसुषुवेसुतमुत्तमं॥रूपाव

यवसंपन्नंदेवकीप्रथमंयदा॥२॥तदाहवसुदेवस्तांसत्यवाक्यानुनोदितः॥भाविता
त्वमहाभागदेवकीदेवमातरं॥३॥वरोरुसमयोमेत्वंजानासिस्वसुतार्पणे॥मोचितात्वं
महाभागेशपथेनमयातदा॥४॥पुत्रोयंतेसुकेशांतेदास्यामिभ्रातृजेतव॥खलेकं
सेविनाशार्थंदेवैःकिंवाकरिष्यति॥५॥विचित्रकर्मणांपाकोदुर्ज्ञेयोप्राकृतात्मभिः
सर्वेषांकिलजीवानांकालपाशानुवर्तिनां॥६॥भोक्तव्यंस्वकृतंकर्मशुभंवायदिव
शुभं॥प्रारब्धंसर्वथैवात्रजीवेनविधिनिर्मितं॥७॥देवक्युवाच॥ ॥स्वामिन्पूर्वकृतं
कर्मभोक्तव्यंसर्वथानृभिः॥तीर्थैस्तपोभिर्दानैर्वाकिंनयातिक्षयंहितत्॥८॥लिपि
तंधर्मशास्त्रेषुप्रायश्चित्तंविधिंनृप॥पूर्वार्जितानांपापानांविनाशायमहात्मभिः
९॥ब्रह्महाहेमहारीचसुरापोगुरुतल्पगः॥द्वादशाब्दव्रतेचीर्णेशुद्धियांतिकृतागसः
१०॥मन्वादिभिर्यथोद्दिष्टंप्रायश्चित्तंविधानतः॥तथाकृत्वानरःपापान्मुच्यतेवानघ

ना·च· ११॥ विगीतवचनास्ते किं मुनयस्तत्वदर्शिनः॥ याज्ञवल्क्यादयः सर्वे धर्मशास्त्रप्रवर्तकाः
१२॥ नवितथ्यं नवक्तेव यद्युक्तं निश्चयः कृतो॥ आयुर्वेदस्तु मिथ्यैव मंत्रवादास्तथाखिलाः
७१ १३॥ उद्यमस्तु तथा सर्व एवं चैव देवनिर्मिता॥ नवितथ्यं नवैस्वप्रवृत्तिस्तु निरर्थका॥१४॥
अग्निष्टोमादिकं व्यर्थं नियतं स्वर्गसाधनं॥ यदा तथा प्रमाणं हि दृष्टे वा सत्सु नापितं॥
१५॥ वितथे तत्प्रमाणे तु धर्मेच्छिदः प्रवर्तते॥ उद्यमे च स्तते सिद्धेः प्रत्यक्षेणैव साध्यते॥१६
तस्मात्प्रकर्तव्य प्रपंचश्चित्तकल्पितः॥ यथायं बालकः स्वे मं प्राप्नोति मम पुत्रकः
१७॥ मिथ्या यदि प्रकर्तव्यं वचनं च श्चित्तकल्पितः॥ यतत्र्ह्षएणं किं चित्र वदंति मनी
षिणः॥१८॥ वसुदेव उ॥ निरामय महाभाग सत्यमेतद्ब्रवीमि ते॥ उद्यमः खलु कर्तव्य
फलं दैववशानुगं॥१९॥ त्रिविधानीह कर्माणि संसारे त्वपुराविदः॥ प्रवदंति हि जी
वानां पुराणे घागमेषु च॥२०॥ संचितानि च जीर्णानि प्रारब्धानि सुमध्यमे॥ वर्तमा

नानि वामोरु त्रैविध्यमिह कर्मणां॥२१॥ श्रुतानि कर्माणि बीजभूतानि यानि च॥ बहु
जन्मसमुद्भानि काले तिष्ठंति सर्वथा॥२२॥ पूर्वदेहं परित्यज्य जीवः कर्मवशानुगः॥ स्व
र्गं वा नरकं वापि प्राप्नोति स्वकृतेन वै॥२३॥ दिव्यं देहं च संप्राप्य यातनादेहमप्यथा॥ भुन
क्ति विविधान्भोगान्स्वर्गे वा॥२४॥ भोगांते च यदोत्पत्तिः समयस्तस्य जायते॥ लिंगदेहे
न सहितं जीव लिंगं च योजयेत्॥२५॥ तदैव संचितेभ्यश्च कर्मभ्यः कति चित्सुनः॥ यो
जयत्येव तं कालः कर्माणि प्राकृतनानि च॥२६॥ देहेनानेन भावेन स्वस्थानानि वा सुना
नि च॥ प्रारब्धानि च जीवेन भोक्तव्यानि सुलोचने॥२७॥ प्रायश्चित्तेन नश्यंति व
ना र्तमानानि भामिनि॥ संचितं थेवा स्तु यथार्थविहितेन च॥२८॥ प्रारब्धकर्मणां भो
गात्संक्षयो नान्यथा भवेत्॥ तेनायं ते कुमारो वै द्वेषः कंसाय सर्वथा॥२९॥ नमि
थ्यावाग्भविष्यामि लोकनं शामिहर्षितः॥ आनि सेचास्मिन्संसारे धर्मसारे महा

भा·च· त्मनां॥३०॥ देवाधीना हि सर्वेषां मरणं जननं तथा॥ तस्माच्छोको न कर्तव्यो देहनाशान्निर
र्थकः॥३१॥ सत्यं यस्य गतं कांते तथा तस्यैव जीवितं॥ इहलोको गतो यस्मात्परलोकः कुत
७२ स्ततः॥३२॥ अतो देहि सुतं सुभ्रु कंसाय प्रददाम्यहं॥ सत्यसंरक्षणाद्देवि श्रेयो नंचाभविष्य
ति॥३३॥ कर्तव्यं सुकृतं पुंभिः सुखेष्वसति प्रिये॥ ज्ञात्वा साधारणं नूनं कारणं विभव
कारणं स्य हि॥३४॥ दुःखसाधारणं पापं कथितं बुधैः॥ तथा पुण्यं सुखस्याद्धे वैरविञ्चिम
हात्मभिः॥३५॥ ॥व्यास उवाच॥ इत्युक्ते वनिता सा देवकी शोकसंयुता॥ ददौ पुत्र
प्रसूतं च वेपमाना मनस्विनी॥३६॥ वसुदेवोपि धर्मात्मा गृहीत्वा च शिशुं॥ जगा
म कंससदनं मार्गे लोकैरभिष्टुतः॥३७॥ लोका ऊचुः॥ ॥पश्यंतु वसुदेवं वै बा
लमादाय यात्यसौ॥ मृत्यवे दातुकामो यं सत्यवाग्नसूयकः॥ सफलं जीवितं चा
स्य धैर्यं पश्यंतु चाद्भुतं॥ यः पुत्रं याति कंसाय दातुं कालात्मने रिह॥३९॥ व्यास

उ॥ ॥इति संस्तूयमानस्तु शूरसूः कंसालयं नृप॥ ददावास्मै कुमारं तं जातमात्रममातु
षं॥४०॥ कंसोपि विस्मयं प्राप्तो दृष्ट्वा धैर्यं महात्मनः॥ गृहीत्वा बालकं प्राह स्मितपूर्वम
लाशयः॥४१॥ धन्यस्त्वं शूरपुत्राद्य ज्ञातः पुत्रसमर्पणात्॥ मम मृत्युर्न चायं वै गिरा
प्रोक्तस्तु चाष्टमः॥४२॥ नहंतव्यो मया कामं बालोयं यातु ते गृहं॥ अष्टमस्तु प्रदातव्यस्त्व
या पुत्रो महात्मने॥४३॥ इत्युक्त्वा वसुदेवाय ददावाप्सुखजः शिशुं॥ गच्छत्वयं गृहं ते
ममितिकारु सपार्थिव॥४४॥ तमादाय तदा शौरिर्जगाम स्वगृहं मुदा॥ कंसोपि सचि
वानाह वृथा किं घातये शिशुं॥४५॥ अष्टमाद्देवकीपुत्रान्मम मृत्युरुदाहृतः॥ अतः किं
प्रथमं बालं हत्वा पापं करोम्यहं॥४६॥ साधु साध्विति ते प्रोक्त्वा संस्थितामंत्रिसत्तमा
ः॥ विसर्जितास्तु कंसेन जग्मुस्ते स्वगृहान्प्रति॥४७॥ गते षु तेषु संप्राप्तो नारदो मुनिसत्त

म॥ अस्मत्स्थानाधर्षणाद्या हि विकारो गर्भसुतस्य वा॥४८॥ पप्रच्छ कंसराजं राजा तत्रागमन
कारणं॥ नारदस्तं तदोवाच स्मितपूर्वमिदं वचः॥४९॥ कंस कंस महाभाग गतोहं हेम
पर्वतं॥ तत्र ब्रह्मादयो देवा मंत्रं चक्रुः समाहिताः॥५०॥ देवकी वसुदेवस्य भार्यायां सुरस
त्तम॥ वधार्थं तव विष्णुश्च जन्म चात्र करिष्यति॥५१॥ कंस उ॥ मया ह्यदेवकीपुत्रो व
सुदेवाय चार्पितः अष्टमं वै हनिष्येहं मृत्युर्मे देवभाषितं॥५२॥ नारद उ॥ न जानासि
नृपश्रेष्ठ राजनीतिमनुत्तमां॥ माया बलं च देवानां त्वं वेत्सि किं वदाम्यहं॥५२॥ रिपुर
ल्पोपि शूरेण नोपेक्ष्यः शुभमिच्छता॥ संख्यानक्रियायां तु सर्वे ते ह्यष्टमाः स्मृताः॥५३॥
मूर्खत्वमरिसंत्यागः सतोद्य ज्ञानता त्वया॥ इत्युक्त्वाशु गतः श्रीमान्नारदो देवदर्श
न॥५४॥ गतेथ नारदे कंसः समाकार्यामास शिशुं॥ पाषाणे पोथयामास सम्सुखं च

पञ्चमं रथीः॥५५॥ ॥इति श्री भागवते महापुराणे चतुर्थस्कंधे एकविंशोध्यायः॥२१॥
जनमेजय उ॥ ॥किं कृतं पातकं तेन बालकेन पितामह॥ जातमात्रोपि निहतस्तथा तेन
दुरात्मना॥१॥ नारदोपि मुनिश्रेष्ठ ज्ञानवान्धर्मतत्परः॥ कथमेवंविधं पापं कृतवान्
ब्रह्मवित्तमः॥२॥ संशयोयं महान्मेत्र ब्रूहि सर्वं सविस्तरं॥ येन कर्मविपाकेन बालको
निधनं गतः॥३॥ कर्ता प्रेरयिता पैतुल्यपापौ स्मृतौ बुधैः स कथं प्रेरयामास स मुनिः कंसं
खलं तदा॥४॥ व्यास उ॥ ॥नारदः कौतुकप्रेक्षी सर्वदा कलहप्रियः॥ देवकार्यविधाता
च सर्वत्र भ्रमतत्सो॥५॥ न मिथ्याभाषणे बुद्धिर्मुनेस्तस्य कदाचन॥ सत्यवक्ता सुरा
णां स कर्तव्ये निरतः शुचिः॥६॥ एवं षड्बालकास्तेन जाता जन्म निपातिताः॥ षड्गर्भाः शा
पयोगेन संभूय मरणं गताः॥७॥ शृणु राजन्प्रवक्ष्यामि तेषां च कारणं पुरा॥ स्वायंभु

वैंतरेपुत्राःमरीचेःषष्टमहाबलाः॥८॥वर्ण्ययांवेसन्नायर्यांमासनंथमविचक्षणाः।
ब्रह्माणंजहसुर्वीक्ष्यसुतांजनितुमुद्यतं॥ञ्शापतांस्तदाब्रह्मादैत्ययोनिंविशंतुभोः
कालनेमिसुताजातास्तेषडग्रजविश्रावर॥१०॥अवतारांतरेतुहिरण्यकश्यपासु
ता॥जातातेज्ञानसंयुक्ताःपूर्वशापभयान्नृप॥११॥तस्मिन्जन्मनिशांतास्तेतपश्चक्रुःसु
दारुणं॥तेषांप्रीतोभवद्ब्रह्मषड्जनाणांवरंददौ॥१२॥ब्रह्मोवाच॥शापाद्यूयंमयापूर्वं
क्रोधयुक्तेनपुत्रकाः॥तुष्टोस्म्यद्यमहाभागाब्रूतवोवांछितोवरः॥१३॥ ॥व्यासउ॥ ॥
तेतुश्रुत्वावचस्तस्यब्रह्मणःप्रीतमानसःब्रह्माणमब्रुवन्कामंसर्वेवैकार्यतत्पराः॥१४॥ ॥
गर्भजाऊचुः॥ ॥पितामहाद्यतुष्टोसिदेहिनोवांछितंवरं॥अवध्यादेवतैःसर्वैर्मानवैश्चमहोरगे
१५॥शापप्रहरणैश्चापिसिद्धिनोस्तुमहर्षिभिः॥गंधर्वसिद्धपतिभिर्वधोमाभूत्पितामहः

१६॥व्यासउ॥तानुवाचततोब्रह्मासर्वमेतद्भविष्यति॥वांछितंवोमहाभागसत्यमेव
नसंशयः॥१७॥दत्त्वावरंगतोब्रह्मामुदितास्तेतदाभवन्॥हिरण्यकशिपुःक्रुद्धोतानु
वाचकुरूद्वह॥१८॥यस्मान्मांविहायाद्यतोषितोवैपितामहः॥वरोयंप्रार्थितोस्मर्थेव
लवंतोभवामयत्॥१९॥मयिवस्त्याजितस्नेहःशत्रुभूतास्त्वजाम्यहं॥यूयंव्रजंतुपा
तालेषड्जाविख्यातान्भुवि॥२०॥पातालेनिद्रयाविष्टास्तिष्ठंतुबहुवत्सरान्॥तत
स्तुदेवकीगर्भेवर्षेपुनःपुनः॥२१॥पितावःकालनेमिस्तुतत्रकंसोभविष्यति॥स
एवजातमात्रान्वोभविष्यतिसुदारुणं॥२२॥व्यासउ॥एवंशशापतान्दैत्यस्तेनगर्भेजा
तापुनःपुनः॥जघानदेवकीपुत्रान्षड्जन्निद्रापनोदितः॥२३॥शेषांशःसप्तमेत
त्रदेवकीगर्भसंस्थितः॥विस्रंसितस्तुगर्भस्तौयोगेनयोगमायया॥२४॥तीतोचरे

हिण्यागर्भे स्थितासंकर्षणंबलात् ॥ पतितो पंचमे मासि लोके ख्यातिं गतस्तदा ॥२५॥ कं
सोपि ज्ञातवानत्र देवकीगर्भपातनं ॥ मुदं प्राप स दुष्टात्मा श्रुत्वा वार्तां सुखावहां ॥२६
अष्टमे देवकीगर्भे भगवान्सात्वतां पतिः ॥ उवास देवकार्यार्थं भारावतरणाय च ॥२७॥
राजोवाच ॥ ॥ कश्यपांशो वसुदेवः शेषांशश्च ततोऽभवत् ॥ हरेरंशस्तथा प्रोक्तो भवता मु
निसत्तम ॥२८॥ अन्येत च सुराणां वै जातांशाः केव संभवे ॥ भारावतरणार्थं वै कथिताः
प्रार्थनयानघ ॥२९॥ व्यास उवाच ॥ ॥ सुराणामसुराणां च वर्तमानेषु तेषु च ॥३०
योऽसौ धर्मसुतः श्रीमान्नारायण इति श्रुतः ॥ तस्यांशो वासुदेवस्तु विद्यमाने मुनौ
तदा ॥३१॥ नरस्तस्यानुजो यस्तु तस्यांशोऽर्जुन एव च ॥ युधिष्ठिरस्तु धर्मांशो वाय्वंशो भीम
स्सुत ॥३२॥ अश्विनांशौ तथा प्रोक्तौ माद्रीपुत्रौ महाबलौ सूर्यांशः कर्णविख्यातध

र्मांशो विदुरः स्मृतः ॥३३॥ द्रोणो बृहस्पतेरंशस्तत्सुतस्तु शिवांशजः ॥ समुद्रः शंतनुः प्रोक्त
गंगा भार्यामिता बुधैः ॥३४॥ देवकस्तु समाख्यातो गंधर्वपतिरागमे ॥ वसुर्भीष्मः विरा
टस्तु मरुद्गण इति स्मृतः ॥३५॥ अरिष्टायाः सुतो हंसो धृतराष्ट्रः प्रकीर्तितः ॥ मरुद्गणांश
प्रोक्तो कृतवर्मा तथा परः ॥३६॥ दुर्योधनः कलेरंशः शकुनिर्द्वापरः स्मृतः ॥ सोम
पुत्रः सुवर्चाख्यः सोभिमन्युरुदाहृतः ॥३७॥ पावकांशो धृष्टद्युम्नः शिखंडी राक्षस
स्तथा ॥ सनत्कुमारस्यांशस्तु प्रद्युम्नः परिकीर्तितः ॥३८॥ द्रुपदो ——— ——— द्रौप
दी च रमांशजा ॥ द्रौपदीतनयाः पंच विश्वेदेवांशजाः स्मृताः ॥३९॥ कुंती सिद्धिर्धृतिर्मा
द्री मतिर्गांधारराजजा ॥ कृष्णपत्न्यस्तथा सर्वा विश्वाप्सरसां गणोदिता ॥४०॥ हिर
ण्यकशिपोरंशः शिशुपाल उदाहृतः ॥ विप्रचित्तिर्जरासंधः शल्यः संह्लाद इत्यपि

भा॰च॰ ४१॥ कालनेमिस्तथा कंसः केशी हयशिरास्तथा॥ अरिष्टो बलिपुत्रस्तु ककुद्मी गोकु
७६ ले हतः॥४२॥ अनुह्लादो धृष्टकेतुर्भगदत्तोथ बाष्कलं॥ लंबः प्रलंबः संजातः खरो
सौ धेनुकोभवत्॥ ४३॥ वाराहश्च किशोरश्च दैत्यौ परमदारुणौ॥ मल्लौ तावेव सं
जातौ ख्यातौ चाणूरमुष्टिकौ॥ ४४॥ दितिपुत्रस्तथारिष्टो गजः कुवलयाभिधः बली
पुत्री बकी ख्याता बकस्तस्यानुजः स्मृतः॥ ४५॥ यमो रुद्रस्तथा कामः क्रोधश्चैव
चतुर्थकः॥ तेषामंशैः सुसंजातः शौणपुत्रो महाबलः॥४६॥ अंशावतरणे पूर्वं मा
गधा ब्रह्मणः प्रभो॥ जाताः सर्वे सुरांशास्ते क्षितिभारावतारणे॥४७॥ एतत्ते कथि
तं राजन्नंशावतरणं किल॥ सुराणामसुराणां च पुराणेषु प्रकीर्तितः॥ ४८॥ यदा ७६
ब्रह्मादेवाः प्रार्थनार्थं हरिं गताः॥ हरिणा च तदा दत्तौ केशौ श्यामसितौ यतः॥ हरि

श्यामवर्णस्ततः कृष्णः श्वेतः संकर्षणस्तथा॥ भारावतरणार्थं तौ जातौ देवांशसंभ
वौ॥५०॥ अंशावतरणं चैतच्छृणोति भक्तिभावितः॥ सर्वपापविनिर्मुक्तो मोदते स्व
जनैर्वृतः॥५१॥ ॥इति श्रीभागवते महापुराणे चतुर्थस्कंधे द्वाविंशोध्यायः॥ व्यास उ
॥ हतेषु षट्सु पुत्रेषु देवक्या उग्रसेनजः॥ सप्तमे पतिते गर्भे वचनान्नारदस्य च॥१॥
अष्टमस्य च गर्भस्य रक्षणार्थमतन्द्रितः॥ प्रयत्नमकरोद्राजा मरणं स्वं विचिंतयन्
२॥ समये देवकीगर्भे प्रवेशमकरोद्धरिः॥ अंशेन वसुदेवेषु समागत्य यथाक्रमं
३॥ तदैव योगमाया च यशोदायां यथेच्छया॥ प्रवेशमकरोद्देवकार्यार्थसिद्धये
रोहिण्याः स्तनयो रामः गोकुले समजायत॥ यतः कंसभयात्तत्र संस्थिता सा च का
मिनी॥५॥ कारागारे ततः कंसो देवकीं देवसंयुतां॥ स्थापयामास रक्षार्थं से

वकासमकल्पयत्॥६॥ वसुदेवस्तु कामिन्याः प्रेमतंतुनियंत्रितः॥ पुत्रोत्पत्तिं च संचित्य
प्रविष्टः सह भार्यया॥७॥ देवकी गर्भगो विष्णुः देवकार्यार्थसिद्धये॥ संस्तुतोमरसंघैश्च व
र्द्धत यथाक्रमं॥८॥ संजाते दशमे तत्र मासे च श्रावणे शुभे॥ प्राजापत्यर्क्षयुक्ते च क
ष्णपक्षेष्टमीदिने॥९॥ कंसस्तु दानवान् सर्वान् उवाच भयविक्लवः॥ रक्षणीया यत्नवद्भि
श्च देवकीगर्भमंदिरे॥१०॥ अष्टमो देवकीगर्भः शत्रुर्मे प्रभविष्यति॥ रक्षणीयः प्रयत्ने
न मृत्युरूपः स बालकः॥११॥ हत्वैनं बालकं दैत्याः सुखं स्वप्स्यामि मंदिरे॥ निर्वृत्तिर्नि वि
ति नूनं नाशिते चाष्टमे सुते॥१२॥ खड्गप्रासधराः सर्वे तिष्ठंतु धृतकार्मुकाः॥ निशांतं श
विहीनाश्च सर्वे च निहितेक्षणाः॥१३॥ ॥व्यास उ०॥ ॥इत्यादिश्यासुरगणान् कंसोति
भयविक्लवः॥ मंदिरं स्वं जगामाशु न लेभे दानवः सुखं॥१४॥ निशीथे देवकी तत्र वसु

देवमुवाच ह॥ किं करोमि महाराज प्रसवावसरो मम॥१५॥ बहवो रक्षपालाश्च ति
ष्ठंत्यत्र भयानकाः॥ नंदपत्न्या मया सार्द्धं कृतोस्ति समयः पुरा॥१६॥ प्रेक्षणीयस्त्वया पु
त्रो मंदिरे मम मानिनि॥ पालयिष्याम्यहं तेत्र तवेति मनसा प्रिय॥१७॥ अपत्यं ते प्र
दास्यामि कंसस्य प्रत्ययाय वै॥ शोचमानां च मां वीक्ष्य नंदपत्नी सनाथता॥१८॥ किं क
र्त्तव्यं प्रभो वाद्य विषमे समुपस्थिते॥ व्रतयः संतते शौरे कथं कर्तुं क्षमो भवान्॥१९॥
दूरे तिष्ठस्व कांताद्य जन्मकाले ह्युरस्यया॥ पराहमसमुखं स्वामिन् शंका कष्टं किं करोम्यहं
२०॥ इत्युक्त्वा तं महाभागा देवकी देवसंमतं॥ बालकं सुषुवे तत्र निशीथे परमाद्भुतं॥
२१॥ तं दृष्ट्वा विस्मयं प्राप देवकी बालकं शुभं॥ पतिं प्राह महाभागा हर्षेणाश्रुकले
वरा॥२२॥ पश्य पुत्रमुखं कांत उन्नगाहं हृष्टमना॥ अद्य ते कांजरूपे सौभाग्यं भविष्यति

ना॰ च॰ ञ्चानृजः॥२३॥ वसुदेवस्तुतछ्रुत्वातमादायकरेसुतं॥ अपत्यप्रदाननंतस्यसुतस्याद्भुत
१८ कर्मणा॥२४॥ वीक्ष्यपुत्रमुखंशौरिश्चिंताविष्टोबभूवह॥ किंकरोमिकथंतस्याद्ः
खमस्यशरीरके॥२५॥ एवंचिंतातुरेतस्मिन्वागुवाचाशरीरिणी॥ वसुदेवंसमाभा
ष्यगगनेविशदाक्षरा॥२६॥ वसुदेवगृहीत्वैनंगोकुलंनयसत्वरः॥ रक्षपालाःकृता
ःसर्वेमयानिद्राविमोहिताः॥२७॥ विवृतानिकृतान्यद्यकपाटानिचशृंखलाःसुखे
नंनंदगेहेत्वंगोकुलंनयसत्वरः॥२८॥ तच्छ्रुत्वावसुदेवस्तुतस्मिन्कर्मणिसोद्यमःवि
हृतंद्वारमालोक्यबभूवतरसान्वपः॥२९॥ तमादाययथावाशुद्वारपालैकरक्षितः॥
कालिंदीतटमासाद्यपूरंदृष्ट्वासुविस्मितः॥३०॥ तदैवकटिदघ्नासाबभूवाशुसरिद्वरा॥
योगमायाप्रभावेनततारानकदुंदुभिः॥३१॥ गत्वाथगोकुलंशौरिर्निशीथेनिर्जनेपथि

नंदद्वारिस्थितःपश्यन्किंनुतिंपश्मुसंज्ञितां॥३२॥ तदैवतत्रसंजातायशोदागर्भसंभवा
योगमायांशजादेवीत्रिगुणादिव्यरूपिणी॥३३॥ नमस्त्वाबालिकांदिव्यांगृहीत्वाकं
रपंकजे॥ तत्रागत्यतदांदेवीसैरंध्रीरूपधारिणी॥३४॥ वसुदेवसुतंदत्वासैरंध्रीकरपं
कजे तामादाययौशीघ्रंबालिकांमुदितात्मयः॥३५॥ कारागारेततोगत्वादेवक्याःश
यनेसुतां॥ निक्षिप्यसंस्थितःपार्श्वेचिंताविष्टोभयातुरः॥३६॥ रुरोदसुस्वरंकन्यांत
दैवागतसंज्ञकाः॥ उत्तस्थुःसेवकायत्तःश्रुत्वातद्रुदितंनिशि॥३७॥ तमुचुर्नृपतिंगत्वा
त्वरितास्तेतिविह्वलाः॥ देवक्याःसुतोजातःशीघ्रमेहिमहामते॥३८॥ तदाकर्ण्यवच
स्तेषांशीघ्रंभोजपतिर्ययौ॥ प्राहत्वंद्वारमालोक्यवसुदेवमयाकंपत्॥३९॥ कंसउ
वाच॥ ॥ सुतमानयदेवक्याःवसुदेवमहामते॥ मृत्युमेंवाष्टमोगर्भस्तंनिहन्मरिपुं

हरिं॥४०॥ व्यास उवाच॥ श्रुत्वा कंसवचः शौरिर्निघिन्नल्लविलोचनः॥ तामादाय
सुतां पाणौ ददावश्रुरुदन्निव॥४१॥ दृष्ट्वाथ दारिकां राजा विस्मयं परमं गतः॥ देववा
णी वृथा जाता नारदस्य च भाषितं॥४२॥ वसुदेवः कथं कुर्याद्धित्वयं संकटे स्थितः॥ र
त्नपालास्तु मे सर्वे सावधानास्त्वशंघसः॥४३॥ कुतोत्र कंन्यका कामं क्व गतः ससुतः
ससुतः किल॥ संदेहोत्र न कर्तव्यः कालस्य विषमा गतिः॥४४॥ इति संचिंत्य तां बा
लां गृहीत्वा पादयोः खलः॥ पुपोथ च शिलापृष्टे निःत्रपः कुलपांसनः॥४५॥ साकरा
त्निसृता बाला ययावाकाशमंडलं॥ दिव्यरूपा तदा भूत्वा तमुवाच मृदुस्वरा॥४६॥
किं मया हतया पाप जातस्ते बलवान्रिपुः॥ हनिष्यति दुराराध्यः सर्वथा त्वां नरा
धमं॥४७॥ इत्युक्त्वा सा गता कंन्या गगनं कामगा शिवा   कंसस्तु विस्मयाविष्टो

गतो निजगृहं तदा॥४८॥ आनाय्य दानवान्सर्वानिदं वचनमब्रवीत्॥ बकधेनु
कवत्सादीन्क्रोधाविष्टो भयातुरः॥४९॥ गच्छंतु दानवाः सर्वे मम कार्यार्थसिद्धये॥
जातमात्राश्च हंतव्या बालका यत्र कुत्र च॥५०॥ पूतनैषा व्रजत्वाशु बालघ्नी नंदगो
कुलं॥ जातमात्रान्विनिघ्नंतु शिशूंस्तत्र ममाज्ञया॥५१॥ धेनुको वत्सकः केशी प्र
लंबो बक एव च॥ सर्वे तिष्टंतु तत्रैव मम कार्यचिकीर्षया॥५२॥ इत्याज्ञाप्यासुरा
न्कंसो ययौ निजगृहं खलः॥ चिंताविष्टो निदीनात्मा चिंतयन्वैरगं पुनः॥५३॥ ॥
इति श्रीभागवते महापुराणे चतुर्थस्कंधे त्रयोविंशोध्यायः॥२३॥ व्यास उ॥ ॥ प्रा
तर्नंदगृहे जातपुत्रजन्म महोत्सवः॥ किंवदंत्यायकंसेन श्रुतावान्नास्ति विस्तरात्॥१॥
जानाति वसुदेवस्य दारास्तत्र वसंति हि॥ पशवो हासवगस्य सर्वेति नंदगोकुले॥२॥

ना·च· तेनसंकाशमाविश्यगोकुलंप्रतिभारत॥नारदेनापितस्यैवकारणंकथितंपुरा॥३
८० गोकुलेयेचनंदाद्यास्तत्तत्रस्थसुरांशजाः॥देवकीवसुदेवाद्याःसर्वेतेयादवाःकिल
४॥इतिनारदवाक्येनबोधितोसौकुलाधमः॥जातःकोपान्वितोराजन्कंसःपरम
पापकृत्॥पूतनानिहतातत्रकृष्णेनामितकर्मणा॥बकोवत्सासुरश्चैवधेनुकश्चम
हाबलः॥६॥प्रलंबोनिहतस्तेनतथागोवर्द्धनोधृतः॥श्रुत्वातत्कंसस्तुमेनेम
रणमात्मनः॥७॥तथाविनिहतःकेशीज्ञात्वाकंसोतिदुर्मनाः॥धनुर्यागमिषेणाशुता
वानेतुंप्रचक्रमे॥८॥अक्रूरंप्रेषयामाससक्रूरंपापमतिस्तदा॥आनेतुंरामकृष्णौतुव
धायामितविक्रमौ॥९॥रथमारोप्यतौबालौगोकुलान्नंदिनीसुतः॥आगतोमथु
रायांतुकंसादेशकरःखलः॥१०॥तावागत्यतदातत्रधनुर्भंगंचकारह॥हत्वाथरजकं

कंकामंगजंचाणूरमुष्टिकं॥११॥सलंचतोसलंचैवहत्वारंगगतोहरिः॥जघानकंसं
देवेशःकेशेष्वाकृष्यलीलया॥१२॥पितरौमोचयित्वाथगतदुःखौचकारह॥उग्रसेना
यराज्यंतद्दत्त्वावैरिनिषूदनः॥१३॥वसुदेवस्तयोस्तत्रमौंजीबंधनपूर्वकं कारयामास
विधिवद्व्रतबंधमहात्मना॥१४॥उपनीतौतदातौतुगतौसांदीपनालयं॥विद्याःसर्व
समाप्यस्वमथुरामागतौपुनः॥१५॥जातौद्वादशवर्षीयौकृतविद्यौमहाबलौ॥मथु
रायांस्थितौवीरौसुतावानकदुंदुभेः॥१६॥मागधस्तुजरासंधोजामातृवधदुःखितः
कृत्वासैन्यसमायोगंमथुरामागमत्पुरीं॥१७॥सप्तदशवारांस्तुकृष्णेनाकृतबुद्धि
नाः॥जितःसंग्राममासाद्यमधुपुर्य्यांवसन्बली॥१८॥पश्चाच्चप्रेरितस्तेनसकाल
यवनाधिपः॥सर्वम्लेच्छाधिपःशूरोयादवानांभयंकरः॥१९॥कृत्वायवनस्मा

ना॰च॰ यांतंन्नक्षः सर्वान्नियंदुत्तमान्॥ आनाय्य वचनं तथ्यमुवाच मधुसूदनः॥२०॥ नयंबोत्रस
८२ मुत्पन्नं जरासंधान्महाबलात्॥ किं कर्तव्यं महाभागा यवनः समुपैति वै॥२१॥ स्वन्नूमि
रिति मन्वानो न न्हाति न्नयेन्नागः॥ शारण्यत्राणं प्रकर्तव्यं लक्ष्मो गेहं धनं बलं॥२२॥ सुखे
नस्थीयते यत्र स देशः खलु पेतकः॥ सदोद्वेगकरः कामं किं कर्तव्यः कुलोचितः॥
२३॥ नौलसागरसान्निध्ये स्थातव्यं सुखमिच्छता॥ यत्र वैस्तयनान्नूद्वियदे संश्र
योन्नवेत्॥२४॥ शेषशय्यां समाश्रित्य हरिः स्वपति सागरे॥ मन्ये शात्रुनयान्नी
तः केलाशो त्रिपुरार्द्दनः॥२५॥ तस्मात्तात्रैव स्थातव्यमस्माभिः शात्रुतापितैः॥
द्वारवत्यां गमिष्यामः सहिताः सर्व एव वै॥२६॥ कथिता गरुडेनाद्य द्वारवती पुरी॥ रै रमा
वताचलसान्निध्ये सिंधुकूले मनोहरा॥२७॥ आसन्नु॥ ॥तच्छ्रुत्वा वचनं पथ्यं सर्वे

यादवपुंगवाः॥ गमनाय मतिं चक्रुः सकुटुंबाः समंततः॥२८॥ सकटानि तथाष्ट्राणि वीथि
श्चमदीपास्तथा॥ धनपूर्णानि तत्त्वाते निर्ययुर्नगराद्बहिः॥२९॥ रामकृष्णो पुरस्कृत्य स
र्वे ते सपरिच्छदाः॥ अयेल्लत्वा प्रजाः सर्वाश्चेलुः सर्वे यदूत्तमाः॥३०॥ कतिचिद्दिवसैः प्राप्ता
पुरी द्वारवती किल॥ शाल्पिभिः कारयामास जीर्णोद्धारं हि माधवः॥३१॥ संस्थाप्य याद
वांस्तत्र तावुभौ बलकेशवौ॥ तरसा मधुरामेत्य संस्थितौ निर्जनां पुरीं॥३२॥ तदा तत्रैव
संप्राप्तो बलवान्यवनाधिपः ज्ञात्वा तमागतं तस्य निर्ययौ नगराद्बहिः॥३३॥ तं दृष्ट्वा पुरतो
यांतं नसंकमलोचनं॥ यवनोपि पदातिः सन्दृष्टो तो नुगतः खलः॥३४॥ पदानि
रमयद्दयेयवनस्य जनार्द्दनः॥ पीतांबरधरः श्रीमान्प्रहसन्मधुसूदनः॥३५॥ प्रसु
प्तो यत्र राजर्षिर्मुचुकुंदो महाबलः॥ प्रययौ भगवांस्तत्र सकालयवनो हरिः॥३६॥

तत्रैवांतर्दधेविष्णुर्मुचिकुंदसमीपतः॥दृष्टतोयवनःप्रासःसुसंसूपमपश्यतः॥३७
ना॰च॰ मन्वातंवासुदेवंसःपादेनाताडयन्नृपं॥प्रबुद्धःक्रोधरक्ताक्षस्तंददाहमहाबलः॥३८
८२ तंदग्ध्वामुचुकुंदोथददर्शकमलेक्षणं॥वासुदेवंचदेवेशंप्रणम्यप्रस्थितोवनं॥३९॥
जगामद्वारकांतस्माद्बलदेवसमन्वितः॥उग्रसेनंनृपंकृत्वाविजहारयथारुचिः॥४०
अहरद्रुक्मिणींकामंशिशुपालःस्वयंवरात्॥राक्षसेनविवाहेनचक्रेदारविधिंहरिः॥
४१॥ततोजांबूवतींसत्यांमित्रविंदांचनाग्निजीं॥कालिंदींलक्ष्मणांभद्रांतथानाग्नजि
तींशुभां॥४२॥पृथक्पृथग्विवाहैस्ताउपयेमेजनार्दनः॥अष्टावेवमहीपालपत्न्यःप्र
सन्नाजनार्दना॥४३॥असूतरुक्मिणीपुत्रंप्रद्युम्नंचारुदर्शनं जातकर्मादिकंतस्यचका
रमधुसूदनः॥४४॥हृतोसौसूतिकागेहात्संवत्सरेणबलीयसा॥नीतश्चस्वपुरंबाबो

लोमायावत्यैसमर्पितः॥४५॥वासुदेवोहृतंदृष्ट्वापुत्रंशोकसमन्वितः॥जगामशरणं
देव्याःभक्तियुक्तेनचेतसा॥४६॥ततोसौयोगमायायाश्चकारपरमांस्तुतिं॥वचोभिःप
रमोदारैःरक्षरैःसुस्वरैःशुभैः॥४७॥श्रीकृष्णउवाच॥ ॥मातर्मयातितपसापरितोषिता
त्वंप्राग्जन्मनिप्रणमनादिभिरर्चितासि॥धर्मात्मजेनबदरीवनखंडमध्येकिंविस्मृतं
जननिमेत्वयिभक्तिभावं॥४८॥सूतीगृहादपहृतःकिमुबालकोमेकेनापितेरुचिरं
यंखलुकौतुकाद्वा॥गर्वापहारकरणायमाद्यनूनंमन्यतचेत्किमथवाकृतकर्मदोष
:॥४९॥दुर्गेमहानितरांनगरीसुगुप्तातत्रापिमेतिसदनंकिलमध्यभागे॥ग्रंतःपु
रंचपिहितंननुसूतिगेहंबालोहृतःखलुसुतथापिममैवमेदोषात्॥५०॥नाहंगतःप
रपुनरेत्ययाहवाप्सुरत्नावतीचकुमारीकिलवीरवर्यैः॥मायातवैवजननिप्रगटप्र

भावायबालकः परिहृतः कुहकेनकेन॥५१॥ नोवेद्म्यहंजननितेचरितंसुगुप्तंकोदेवमं
तिरपिदेवदेहः॥ क्वासौगतोममसुतोनचवेद्मितोवाइत्यंविकेनवनिकातवकल्पितेयं
५२॥ चित्रंनतेत्रपुरजोममभ्रातृगर्भान्नीतस्त्वयाद्ददसमयेकिलमाययासौ॥ यंरोहिणी
हलधरंसुषुवेप्रसीदद्दरेस्थितापतिपरामिथुनंविनावै॥५३॥ सृष्टिंकरोषिविहिता
मनुपालनंच॥ नाशंतथैवपुनरप्यनिशंगुणैस्त्वं॥ कोवेदनेवचरितंदुरितांतकारि
प्रायेणसर्वमखिलंविहितंत्वयैतत्॥५४॥ उत्पाद्यपुत्रमननंनचनवंप्रमोहात्ताघुन
र्विरहजंकिलदुःखभारं॥ त्वंवेत्तनोसलिलतेखलुतेविहारंनोचेत्कथंममसुतापहृ
तिंवृथास्यात्॥५५॥ मातास्यरोतिकुररीवसुतेघबालेदुःखंत्वजनोतिममसाकिल
कंदमाना॥ नत्यंनदेविमिललितेतवनक्किनावादन्यत्कमेवशरणंनवपीडितानां॥५६

सीमासुखस्यसुतजन्मतथाविपत्तिर्दुःखस्यदेविभुवनेविबुधावदंति॥ तत्किंकरो
मिजननिप्रथमेप्रनष्टेपुत्रेममाद्यहृदयंस्फुटतीवमातः॥५७॥ यत्नंकरोमितवतुष्टि
करंव्रतंवाहरानंचपूजनमथाखिलदुःखहारं॥ अंबेसुतोत्रयदिजीवतिदर्शयाशुत्वं
वेत्समासकलशोकविनाशनाय॥५८॥ ॥व्यास उ०॥ ॥एवंस्तुतातदादेवीकृष्णेनामि
ततेजसा॥ प्रत्यक्षदर्शनाभूत्वातमुवाचजगद्गुरुं॥५९॥ ॥देव्युवाच॥ ॥शोकंमा
कुरुदेवेशशापोयंतेपुरातनः॥ तस्ययोगेनपुत्रस्तेशंबरेणहृतोबलात्॥६०॥ख
तस्लेषोडशेवर्षेहत्वातंशंबरंबलात्॥ आगमिष्यतिपुत्रस्तेमत्प्रसादान्नसंशयः॥६१॥
व्यास उ०॥ ॥इत्युक्त्वांतर्दधेदेवीचंडिकाचंडविक्रमा॥ भगवानपिपुत्रस्यशोकंसत्याज
वसुख॥६२॥ ॥इतिश्रीभागवतेमहापुराणेचतुर्थस्कंधेचतुर्विंशोध्यायः॥ राजोवाच

ना॰ च॰ ॥ संदेहो मे मुनिश्रेष्ठ जायते वचनात्तव ॥ वैष्णवांशो भगवति दुःखोसन्निविनो भव ॥१॥ ना
८४ रायणांशसंभूतो वासुदेवोऽच्युतापवान् ॥ कथं स सूतिकागाराद्धृतो बालो हरेरपि ॥२॥
न मुष्णन्नगरेरम्यगुप्तेयसूतिकागृहे ॥ प्रविश्य तेन दैत्येन गृहीतोसौ कथं शिशुः ॥३॥ न
ज्ञातो वासुदेवेन चित्रमेतन्ममाद्भुतं ॥ जायते महदाश्चर्यं चित्ते सत्यवतीसुतः ॥४॥ ब्रू
हि तत्कारणं ब्रह्मन्नज्ञानं केशवेन तत् ॥ हरणं तत्र संस्थेन शिशोः सूतिकागृहात् ॥५
व्यास उ॰ ॥ ॥ मायावती राजन्नराणां मनमोहिनी ॥ त्वांबरी विश्रुता लोके को वा मोहं
न गच्छति ॥६॥ मानुषं जन्म संप्राप्य गुणाः सर्वेपि मानुषाः ॥ भवंति देहजाः काम
नैर्देवान्तथासुरा ॥७॥ क्षुत्तृट् निद्रा भयं तंद्रा व्यामोहः शोकसंशयः ॥ हर्षश्चैवाभि
मानश्च जरामरणमेव च ॥८॥ अज्ञानं ग्लानिरप्रीतिरीर्ष्यासूया मदः श्रमः ॥ एते देह

जवा भावाः प्रभवंति नराधिप ॥९॥ यथा हेममृगं रामस्तु बुबोध पुरो गतं ॥ जा
नकीहरणं चैव जटायुमरणं तथा १० अभिषेकदिने रामवनवासं न वेद च ॥ त
थान ज्ञातवान्कामं समुत्पाद्य मरणं पितुः ११ अज्ञवद्विचचाराशोपश्यमानो व
ने वने जानकीं न विवेद तथा रावणेन कृतां वनात् ॥१२॥ सहायान्वानरान्कृत्वा
हत्वा वालकसुतं बलात् ॥ प्रेषयामास सर्वां सुदिक्षु तान्कपिकुंजरान् ॥१३॥ सागरे सेतु
बंधं च कृत्वोत्तीर्य परं तटं ॥ संग्रामं कृतवान्घोरं दुःखं प्राप रणाजिरे ॥१४॥ बंधनं ना
गपाशेन प्राप रामो महाबलः ॥ गरुडान्मोक्षणं पश्चात्प्राप्तवान् रघुनंदनः ॥१५॥ अ
हनद्रावणं संख्ये कुंभकर्णं महाबलं ॥ मेघनादं निकुंभं च कपितो रघुनंदनः ॥१६॥ अ
दुष्यत्वं च जानकीमानविवेद जनार्दनः ॥ ॥ चरित्रं च कारयामास ज्वलितेऽग्नौ प्रवेशनं ॥१७

लोकापवादाच्च परमात्तत्याज च वने प्रियां॥ आत्मीयां दूषितां मत्वा सीतां दशरथात्मजः
१८॥ न ज्ञातौ स्वसुतौ तेन रामेण च कुशीलवौ॥ मुनिना कथितौ ज्ञातौ तौ महाबलौ॥
१९। पातालगमनं चैव जानन्मानवचज्ञातवान्॥ राघवः कोपसंयुक्तो धरां हंतुं समु
द्यतः॥२०॥ कालस्यागमनं चैव न विवेद खरांतकः॥ मानुषं देहमाश्रित्य चक्रे मानु
षचेष्टितं॥२१॥ तथैव वासुदेवोसौ मानुषं देहमाश्रितः॥ पुपोष मानुषान्भावान्
नात्र कार्या विचारणा॥२२॥ पूर्वकं मनयात्यात्र गोकुले यदुनंदनः। जरासंधभ
यात्पश्चाद्द्वारवत्यां गतो हरिः॥२३॥ अधर्मं कृतवान्लक्ष्म रुक्मिण्या हरणं च
यत्॥ शिशुपालहतायास्तु जानन्धर्मसनातनं॥२४॥ सुतोन्वबालकं त्वथ्यगा
बरेण कृतं बलात्॥ सुमोहज्ञानतातु तं हर्षशोकयुतस्ततः॥२५॥ सत्यनामात्र

यायस्तु युयुधे स्वगतिः किल॥ इंद्रेण पादपार्थे तु स्त्रीजितत्वं प्रकाशयन्॥२६॥ नहारक
त्य वृत्तेयः परान्न्यवशात क्रतुं॥ मानिनीभ्यो नरस्तार्थे हरिश्चक्रधरः प्रभुः॥२७॥ बध्वा
हस्तैर्हरिर्बाणा नारदाय ददौ पतिं॥ हत्वा यकनकं कृष्णमोचयामास तामिनी॥२८॥
इष्ट्वा पुत्रांस्तु रुक्मिण्याः प्रद्युम्नप्रमुखांस्तथा॥ जाम्बवत्यां विनायया चेसंतति
स्तुनो॥२९॥ ययौ पर्वतं कृष्णस्तपसि कृतनिश्चयः॥ उपमन्युमुनिर्यत्र शिवभ
क्तपरंतप॥३०॥ उपमन्युं गुरुं कृत्वा दीक्षां पाशुपतीं हरिः॥ जग्राह पुत्रकामस्तु मुंडी
दंडी बभूव ह॥३१॥ प्रथमं तत्र तपस्तेपे मासमेकं फलाशनः जजाप शिवमंत्रं तु ह
रध्यानपरो हरिः॥३२॥ द्वितीयं तु जलाहारं तिष्ठनेकपदा हरिः॥ तृतीयं वायुभक्षस्तु
पादांगुष्ठाग्रसंस्थितः॥३३॥ षष्ठेथ भगवान्रुद्रः प्रसन्नो भक्तिभावितः॥ दर्शनं च ह

दीतत्रसोमः सोमकलाधरः॥३४॥ आजगाम वृषारूढः सुरैरिंद्रादिभिर्वृतः॥ ब्रह्मावि
ष्णुयुतः साक्षात्यक्षगंधर्वसेवितः॥३५॥ संबोध्य वासुदेवं सच्छंकरस्तमुवाच ह॥ तु
ष्टोस्मि कृष्ण तपसा तपोयेन महामते॥३६॥ ददामि वांछितान्कामान्ब्रूहि यादवनं
दन॥ वरानष्टौ महाबाहो यथेष्टमनसेप्सितान्॥३७॥ ॥व्यास उ॥ ॥ तदृष्ट्वा शंक
रं तुष्टं भगवान्देवकीसुतः॥ पपात पादयोस्तस्य दंडवत्प्रेमसंयुतः॥३८॥ स्तुतिं च
कार देवेशो मेघगंभीरया गिरा॥ स्थितस्य पुरतः शंभोर्वासुदेवः सनातनः॥३९॥
श्रीकृष्ण उ॥ ॥ देवदेव जगन्नाथ सर्वभूतहिते रतः॥ विष्णवे योनेसुरारिघ्न नमस्ते लो
ककारक॥४०॥ नीलकंठ नमस्तुभ्यं त्रिशूलविधृते नमः॥ त्रैलजा वक्त्र नाना
थयज्ञप्रिय नमोस्तुते॥४१॥ धन्योहं कृतकार्योहं दृष्ट्वा त्वां सुव्रत॥ जन्म मे सफ

लं जातं त्वत्पादपंकजं॥४२॥ बद्धोहं स्त्रीमयैः पाशैः संसारेस्मिन्जगद्गुरो॥ शर
णं तेद्य संप्राप्तस्त्रातास्त्वं हि त्रिलोचनं॥४३॥ संप्राप्य मानुषं जन्म षष्ठो हं दुःखना
शन॥ त्राहि मां शरणं प्राप्तं भवभीतं भवाधुना॥४४॥ गर्भवासे महद्दुःखं वासं म
दनदाहक॥ जन्मतः कंसभयजमनुभूतं च गोकुले॥४५॥ जातोहं नंदगोपालो
वत्सवालाकरस्तथा॥ गोरजाकीर्णकेशास्तु भ्रमन्वृंदावने वने॥४६॥ म्लेछरा
जभयत्रस्तो गतो द्वारवतीं पुनः॥ तस्का पेत्र्यं स्रुतदेशा माथुरं मंडलं विभो ४७ म
यातिशापबधेनतस्मै दत्तं मया विभो॥ राज्यं सुपुष्टमपि च धर्मरिंद्वापरेण च॥
उग्रसेनस्य दासत्वं कर्तव्यं सर्वदा मया॥ राजासौ यादवानां वै रूढोतानः पूर्वजैः कि
ल॥४९॥ गार्हस्थ्यं दुःखदं शंभो स्त्रीवशात्वमखंडितं॥ पारतंत्र्यं सदा बंधो मोक्षः

स्वातन्त्र्यमित्यपि ॥५०॥ रुक्मिण्यास्तनयान् दृष्ट्वा नायिजां बुवतीमम ॥ प्रेरयामा
स पुत्रार्थं तपसे मदनांतक ॥५१॥ स कामेन मया तत्र तंतपः पुत्रार्थमिच्छवे ॥ लब्धा ब्रा
ह्मामिदेवेशा प्रार्थिता परमेश्वरा ॥५२॥ कस्त्वामाराध्य देवेशं मुक्तिं त्यक्त्वा वत्सलं ॥
प्रसन्नं याचते मूढः फलं तुच्छं विनाशि च ॥५३॥ सोहं मायाविमूढात्मा याचे पुत्रसु
खं विभो ॥ कामिन्याप्रेरितः शंभो मुक्तिदं त्वां जगत्प्रभो ॥५४॥ जातामिडुः स्वदंश
नो सुखं संसारजं शिव ॥ नाराधमागमस्तु यं तथापि विरतिर्न मे ॥५५॥ नागपात्रा
रायणांशोहं जातोस्मिन्महिमंडले ॥ नोक्तुं बक्रतरंडःखं मायापाशेन यंत्रितः ॥
५६॥ व्यास उवाच ॥ इत्युक्तवंतं गोविंदं प्रत्युवाच महेश्वरः ॥ पुत्रास्ते न भविता तात
बहवः शत्रुसूदन ॥५७॥ स्त्रीणां षोडशसाहस्रे न विष्यतिरातादिकं ॥ पुत्रा द
श दशातासु नविष्यंति महाबलाः ॥५८॥ इत्युक्तो परमामुवां कर प्रियदर्शनः
उवाच गिरिजा देवी प्रणतं मधुसूदनं ॥५९॥ कृष्ण कृष्ण महाबाहो संसारेस्मि
न्नराधिप ॥ गृहस्थ प्रवरो लोके न विष्यति न वा नि इ ॥६०॥ इतो वर्षशतांते पु
द्विजशापाद्धतानिना ॥ गांधार्याश्च तथा शापाद्विलाते कुलं तव ॥६१॥
परस्परं निहत्या जौ पुत्रास्ते रथमोहिता ॥ गमिष्यंति क्षयं सर्वे यादवाश्च तथा
परे ॥६२॥ सानुजस्त्वं तथा दृष्ट्वा त्यक्त्वा यास्यसि वै दिवं ॥ शोक मोहनकर्तव्यो
न वितव्यं प्रतिप्रभो ॥६३॥ अवश्यं भाविनां भावानां प्रतिकारो न विद्यते ॥ तं
त्व शोचो न कर्तव्यो नूनं ममतास दा ॥६४॥ अष्टावक्रस्य शापेन नार्यस्ते म

भा॰ च॰ धुसूदन ॥ चैरेभ्योगृहणंकृष्णगमिष्यंतिमतेत्वयि ॥ ६५ ॥ ॥ व्यासउवाच ॥
८८ इत्युक्त्वांतर्दधेशंभुःसोमःससुरमंडलः ॥ उपमन्युप्रणम्याथकृष्णोपिद्वारकां
ययौ ॥ ६६ ॥ एतत्तेकथितंराजन्मयाख्यानमनुत्तमं ॥ सर्वपापहरंपुंसांपुरा
णंपरमाद्भुतं ॥ ६७ ॥ यइदंशृणुयान्नित्यंपुराणंवेदसंमितं ॥ सर्वपापवि
निर्मुक्तोविष्णुलोकेमहीयते ॥ ६८ ॥ पंचमस्मिन्पुराणेतुस्कंधोयंवैचतुर्थ
क ॥ कथितःपरमाख्यानैर्हितःपावनैःकिल ॥ ६९ ॥ ॥ सूतउवाच ॥ ८८
एतन्मयाश्रुतंव्यासात्कथ्यमानंसविस्तरं ॥ पुराणंपंचमंनूनंश्रीमद्भागव

तान्विधं ॥ ७० ॥ ॥ इतिश्रीभागवतेमहापुराणेष्टादशसाहस्र्यांसंहितायां
वैयासिक्यांचतुर्थस्कंधेकृष्णावतारचरितेपंचविंशोध्यायः ॥ २५ ॥ ॥
॥ ॥ समाप्तोयंचतुर्थस्कंधः ॥ ॥ शुभंभवतु ॥ ॥

भा.पं. श्रीगणेशायनमः॥ ॥ॐनमः श्रीचंडिकायै॥ ॥याविश्वजननीसगुणानिर्गुणा
चमनसान्निगम्यातांधीमहीसदा॥१॥ ऋषयऊचुः॥ ॥भवताकथितंसूतमहदा
१ ख्यानमुत्तमं॥ कृष्णस्यचरितंदिव्यंसर्वपातकनाशनं॥२॥ संदेहोत्रमहाभागवासु
देवकथानके॥ जायतेनप्रोच्यमानेविस्तरेणमहामते॥३॥ वनेगत्वातपस्तप्तंवासु
देवेनदुष्करं॥ विष्णोरंशावतारेणशिवस्याराधनंकृतं॥४॥ वरप्रदानंदेव्याश्चपार्व
त्यायत्कृतंपुनः॥ जगन्मातुश्चपूर्णयातदेवविस्मयोमम॥५॥ सूतउ॥ शृणुध्वं॥
कारणंतत्रमयाव्यासाच्छ्रुतंचतत्॥ प्रब्रवीमिमहाभागाःकथांकृष्णगुणाश्रितां॥ २
६॥ वृत्तांतंव्यासतःश्रुत्वावैराटीतनुजस्तदा॥ पुनःपप्रच्छमेधावीसंदेहंपरमंगतः॥७
जनमेजयउ॥ सम्यक्सत्यवतीसूनोश्रुतंपरंहिकारणं॥ तथापिमनसोवृत्तिश्च

लत्वंनमुंचति॥८॥ कृष्णेनाराधितःशंभुस्तपस्तप्त्वातिदारुणं॥ विस्मयोयंमहाभा
गदेवदेवेनविष्णुना॥९॥ यःसर्वात्माचसर्वेशःसर्वसिद्धिप्रदःप्रभुः॥ सकथंकृत
वान्घोरंतपःप्राकृतवद्धरिः॥१०॥ जगत्कर्तुंक्षमःकृष्णस्तथापालयितुंक्षमः संहर्तुम
पिकस्मात्सचकारदारुणंतपः॥११॥ व्यासउ॥ सत्यमुक्तंत्वयाराजन्वासुदेवोजना
र्दनः॥ समःसर्वेषुकार्येषुदेवानांदैत्यसूदनः॥१२॥ तथापिमानुषंदेहमाश्रितःपर
मेश्वरः॥ कृतवान्मानुषान्भावान्वर्णाश्रमसमाश्रितान्॥१३॥ वृद्धानांपूजनं
चैवगुरुपादाभिवंदनं॥ ब्राह्मणानांतथासेवादेवताराधनंतथा॥१४॥ शोकेशोका
भियोगश्चहर्षेहर्षस्त्वमुन्नति॥ दैन्यविस्मयवादाश्चस्त्रीषुकामोपसेवनं॥१५॥ कामः
क्रोधस्तथालोभःकालेकालेभवंतिते॥ यस्माद्गुणमयेदेहेनिर्गुणंतत्कथंभवेत्॥१६॥

सौबलीशापजाद्दोषात्तथाब्राह्मणशापजात्॥निधनंयादवानांचकस्मात्स्याद्दे
ना·पं· हमोचनं॥१७॥हरणंलुंठनंतद्वत्तस्त्रीनांनराधिप॥अर्जुनस्यास्त्रमोहश्चकी
२ बलंतस्करेषुच॥१८॥अनलंहरणेगेहात्प्रद्युम्नानिरुधयोः॥शांबरेणातिदुष्ट
नतथैवचित्रलेखया॥१९॥सत्राजितवधस्तानंनाचत्वस्थमंसदा॥एवंमा
नुषदेहेस्मिन्मानुषंखलुचेष्टितं॥२०॥विलोरसंगावतारेस्मिन्नारायणमुने
स्तथा॥अंशजेवासुदेवेत्रकिंचित्रंशिवसेवने॥अवताराइरेरेवंत्रजवंतिभुगे
युगे॥योगमायाप्रभावेननात्रकार्याविचारणा॥२२॥पानेत्रपत्तपरिचाजन २
नेनसम्यक्विश्वंसृजत्यवतिचातिनिगूढभावा॥सैवाकरोतिसततंद्रुहिण
च्युतेशान्तनानावतारगहनेपरिनृयमानान्॥२३॥सृतिश्रइाद्रजमसौष्पन

यायुक्तःसंगोपितश्चव्रजवनेपशुपालराजःसंनन्दितश्चमथुरांविनियोजितश्च
नीत्रापितश्चगमितःकिलशारवत्यां॥२४॥निर्मायषोडशसहस्रशताधिकास्ता
नार्याष्टसमिततराःस्वकलासमुत्थाः॥तासांविलासवशगस्तुविधायकामंरासी
कृतोहिभगवानननयाप्यनंत॥२५॥एकापिबंधनविधौयुवतीसमर्थापुंसोय
याहृदबलोहमयीवदाम॥किंनामषोडशसहस्रशताधिकाश्चस्त्रीस्त्रीकृतंमु
कमिवातिनिबंधयंति॥२६॥सात्राजितीवशगतेनमुहाचितेनगत्वासुरेंद्रभु
वनंहरिणातदानीं॥कृत्वामृधंनयवतांविदुतास्तरूणामीशःप्रियासदनभूष
णतांकृतश्च॥२७॥योनीमनांहिकृतवांछितस्तुःपालस्युलकजातन्विधिंनिखिल
धर्मकृतंविधिज्ञः॥२८॥जयाहृतांनिजबलेनचधमपित्नीकोसौविधिःपरकलत्रह

ना॰पं॰ रणाच्चजातः॥२८॥अहंकारवशःप्राणीकरोतिचस्तुनाःस्तुतं॥विमूढोमोहनालेन
तत्कृतेनाभिपातिता॥२९॥अहंकाराद्विसंजातमिदंस्थावरजंगमं॥मूलाधारिह
२ राहीनानुयात्प्रकृतिसंभवात्॥३०॥अहंकारस्तुसर्वेषांपरमंबंधनंस्मृतं॥तन्मुक्त
स्तस्तुविमुक्तोहिबंधस्तद्वशांगतः॥३१॥ननारीनधनंगेहंनपुत्रानसहोदराः॥बं
धनंप्राणिनांराजन्अहंकारस्तुबंधकः॥३२॥अहंकारपरित्यक्तोयदाभवति
पूरुषः॥कस्मात्सजेनिर्मोहोविश्वंविगतकल्मषः॥३३॥अहंकर्त्तामियाचेदकृतं
कार्यंविलीयसा॥करिष्यामिकरोम्येवंस्वयंबध्नातिप्राणभृत्॥३४॥कारणेनवि
नाकार्यंनसंभवतिकर्हिचित्॥यथानदृश्यतेजातोमृत्पिंडेनविनाघटः॥३५॥वि
ष्णुःपालयतेविश्वमहंकारसमन्वितः॥अन्यथासर्वचिंताढ्योकथंभक्तिप्रशांत

धीः॥३६॥अहंकारविमुक्तस्तुयदाभवतिमाधवः॥अवतारप्रवाहेषुकथंभक्तेष्टनाश
यः॥३७॥मूलंमोहस्याहंकारःसंसारस्तत्समुद्भवः॥अहंकारविहीनानांनमोहोनच
संसृतिः॥३८॥विविधस्त्रिपुराजेंद्रकाजेशादिषुसर्वदा॥अहंकारस्तदादेशोक्तोमुनि
भिस्तत्त्वदर्शिभिः॥३८॥त्रिविधःसप्रभोक्तःसात्विकोराजसस्तथा॥तामसस्तु
महाराजब्रह्माविष्णुहरादिषु॥३९॥सात्विकस्त्वथरौनित्यंकल्पनायोरमापतौ॥
छलेनदुष्टदैत्यानांकथंनाशंकरोत्यसौ॥४०॥मायाविमोहितामंदाप्रवदंतिमनी
षिणःकरोमिस्वेच्छयाविष्णुरवतारननेकशः॥४१॥मंदोपिदुःखगहनेगर्भवासा
निसंकटे॥नकरोतिमतिंविद्वान्कथंकुर्यात्सचक्रभृत्॥४२॥कौशल्यादेवकीगर्भे
विष्ठामूत्रसमाकुले॥स्वेच्छयासकथंवासंकुर्याद्विष्णुर्महीपते॥४३॥मायाब

लंन जानामि मूर्खाः पंडितमानिनः॥ तेप्येवं प्रवदंत्यद्य शास्त्रवशे मधुसूदनः॥४४॥ वै
कुंठसदनं त्यक्त्वा गर्भवासे सुखं न किं॥ चिंताकोटिसमुत्पाने दुःखदे तकसंमिते॥४५
स कथं भगवान्विष्णुः स्वतंत्रश्चैक जनार्दनः॥ गर्भवासरुचिः कस्मान्मोहितो वा न
मायया॥४६॥ जानीहि त्वं महाराज योगमायावशे जगत्॥ ब्रह्मादिस्तंबपर्यंतं दे
वमानुषतिर्यगं॥४७॥ मायातता निबंधा वै ब्रह्माविष्णुहरादयः॥ भ्रमंति बंधमा
यांति लीलया चोर्णनाभिवत्॥४८॥ ॥इति श्रीभागवते महापुराणे पंचमस्कं
धे प्रथमोऽध्यायः॥१॥ ॥जनमेजय उ०॥ ॥योगमायाप्रभावो यं कथितस्त्वाति
विस्तरात्॥ ब्रूहि तच्चरितं स्वामिन् श्रोतुं कौतूहलं मम॥१॥ महामायाप्रभावं वै श्रो ४
तुं को नाभिवांछति॥ यो जानाति जगत्सर्वं तदुत्पन्नं चराचरं॥२॥ व्यास उ०॥ शृ

णु राजन्प्रवक्ष्यामि विस्तरेण महामते॥ सुधा या श्रोतुकामाय न ब्रूयात्सो निमंदधीः॥३
पुरा युधमभूद्घोरं देवदानवमेवयो॥ पृथिव्यां पृथिवीपाल महिषाख्ये महीपतौ॥४॥ म
हीपो नाम राजेंद्र चकार तमानद॥ गत्वा हेमगिरौ चोग्रं देवविस्मयकारकं॥५॥ व
र्षाणामयुतं पूर्णं तिष्ठवानशनः सुखं॥ तस्य तुष्टो महाराज ब्रह्मा लोकपितामहः
६॥ तत्र गत्वाब्रवीदाशु हंसारूढश्चतुर्मुखः॥ वरं वरय धर्मात्मन्ददामि तव वांछितं
७॥ महिषासुर उ०॥ अमरत्वं देवदेव वांछामि कृपिण प्रभो॥ यथा मृत्युर्न मे स्यात्तथा
कुरु पितामह॥८॥ ॥ब्रह्मोवाच॥ ॥उत्पन्नस्य ध्रुवं मृत्युर्मृतस्य जन्म सर्वथा॥ स
र्वथा मरणोत्पत्ती सर्वेषां प्राणिनां किल॥९॥ नाशः कालेन सर्वेषां प्राणिनां दैत्यपुं
गव॥ मही महीधराणां च समुद्राणां च सर्वथा॥१०॥ एकस्मात्परित्यज्य मरणस्य

महामते॥ ब्रूहि कारणं तन्मानुषात्ते मनसि शांतिर्वै॥११॥ महिषासुर उ॥ न दे
वान्मानुषाद्दैत्यान्मरणं न पितामह॥ पुंराशात्तच मे मृत्युर्योषा मां का हनिष्यति॥
१२॥ तस्मात्मो मरणं नूनं कामिन्यात्कुरु पद्मज॥ अबला हंतु मां हंतुं कथं शक्ता न वि
ष्यति॥१३॥ ॥ब्रह्मोवाच॥ ॥ यदा कदापि दैत्येंद्र नाधस्तिन्मरणं ध्रुवं॥ न नरेभ्यो म
हाभाग मृतिस्ते महिषासुरः॥१४॥ ॥व्यास उवाच॥ ॥ एवं दत्वा वरं तस्मै पद्मयोनि ब्र
ह्मा निजालयं सोपि दैत्यवरं प्राप्य निजस्थानं मुदान्वितः॥१५॥ ॥राजोवाच॥ म
हिषः कस्य पुत्रोसौ कथं जातो महाबलः॥ कथं च माहिषं रूपं प्राप्तं तेन महात्मनः
१६॥ ॥व्यास उ॥ ॥ दनोः पुत्रौ पुराराजन्विख्यातौ भुवि मंडले॥ रंभश्चैव करंभश्च
द्वावास्तां दानवोत्तमौ॥१७॥ तावपुत्रौ महाराजन्विख्यातौ भुवि मंडले॥ रंभश्चै

व करंभश्च द्वावास्तां दानवोत्तमौ॥१७॥ तावपुत्रौ महाराज पुत्रार्थं तेपतुस्तपः॥ ब
हून्वर्षगणान्काम्यं पुण्ये पंचनदे जले॥१८॥ करंभस्तु जले मग्नश्चकार परमं तपः॥ यक्ष
मालवटं प्राप्य करंभोग्निमसेवत॥१९॥ पंचाग्निसाधनासक्तः स्वकार परमं तपः॥
ज्ञात्वा शचीपतिर्दुःखमवाप दानवोद्यति॥२०॥ गत्वा पंचनदे तत्र ग्राहरूपं चका
रच॥ वासवस्तं करंभं तु जग्राह पादयोस्तदा॥२१॥ निजघान च तं दुष्टं करंभं बलसू
दन॥ भ्रातरं निहतं श्रुत्वा रंभः कोपपरं गतः॥२२॥ स्वशीर्षं पावके होतुमैच्छच्छित्वा
करेण ह॥ केशपाशं गृहीत्वाथ वामेन क्रोधसंयुतः॥२३॥ दक्षिणेन करेणोग्रं ग
हीत्वा खड्गमुज्वलं॥ चिच्छेद च तदा तावद्वह्निना प्रतिषेधितः॥ उक्तश्च दैत्य मूर्खोसि
स्वशीर्षं छेत्तुमिच्छसि॥ आत्मघात्याति दुःसाध्या कथं त्वं कर्तुमिच्छतः॥२४॥ वरं वरय न

इतेददामिचयथेप्सितं ॥२६॥ माम्रियस्वमृतेनाद्यकिंतेकार्यंभविष्यति ॥ चिंतयस्व
मृतस्येहकथानष्टाभविष्यति ॥२७॥ ॥व्यासउवाच॥ ॥तछ्रुत्वावचनंरंभः पावक
स्यसुभाषितं ॥ ततोऽब्रवीद्वचोरंभस्त्यक्त्वाकेशकलापकं ॥२८॥ यदितुष्टोसिमेदेव
देहिमांवांछितंवरं ॥ त्रिलोक्यविजयीपुत्रःस्यान्मेपरबलार्दनः ॥२९॥ अजेयः
सर्वथासस्याद्देवदानवमानवैः ॥ कामरूपीमहावीर्यःसर्वलोकाभिवंदितः ॥३०॥ पा
वकस्तंतथेत्याहभविष्यतितवेप्सितं पुत्रंतवमहाबाहुमरणाद्विरमाधुना ॥३१
व्यासउ ॥ इत्युक्तोवह्निनारंभोवचनंचित्तरंजनं ॥ जगामयक्षयोवह्निदृष्टमालवटंप्रति
३२ ॥ यक्षैःपरिहतंस्थानंरमणीयंश्रियान्वितं दृष्ट्वाचक्रेतदाभावंमहिष्यांतदानवोत्त
१८॥ जानाम्यहं योगबलात्सा सन्नानविष्यति॥ दुःखस्यांतो ह्य युष्माकं दृश्यते ना
त्र संशयः॥१९॥ तस्मिन्शैले देवी तिष्ठति इष्ट मया श्रुतं॥ स्तुताः संपूजिता सद्यो
वांछितार्थं प्रदास्यति॥२१॥ निश्चयं परमं कृत्वा गच्छध्वं सो हिमाचलं॥ सुराः सर्वा
णि कार्याणि सा वः कामं विधास्यति॥२२॥ व्यास उ॥ इति तस्य वचः श्रुत्वा देवास्तेप्र

यथुर्गिरिं॥ हिमालयं महाराज देवीध्यानपरायणाः॥२३॥ नमश्चक्रुर्महामायां भक्त्या
नामन्नयप्रदां॥ तुष्टुवुस्तोत्रमंत्रैश्च भक्त्या परमया युताः॥२४॥ नमो देवि विश्वेश्वरेश्व
एनाथे सदानंदरूपे सुरानंददे ते॥ नमो दानवांतप्रदे दानवानामनेकार्थदे भक्ति
गम्यस्वरूपे॥२५॥ न ते नामसंख्या न ते रूपमीदृक्तया को पि वेदादि देवादि देवा
त्वमेवासि बुद्धिर्जरा पुष्टिस्तुष्टिः कांतिः शांतिसु विद्या लक्ष्मीर्गतिः कीर्त्तिर्मेधा त्वमे
वासि विश्वस्य बीजं पुराणं॥२७॥ यदा यैः स्वरूपैः करोषीह का सुराणां च तेभ्यो न
मोमोघशांत्ये॥ त्वमा योगनिद्राह्वया त्वं विविक्ता स्थिता सर्वजंतेषु या ते स्वरूपैः कृ
तं कार्यमादौ त्वया यत्सुरारेण्णा हतो मह्यारिमद्दांधोइयारिः द्वयाते सहादेवबर्गेषु
देवित्रासिधा पुराणेषु वेदेषु गीताः॥२९॥ किमत्रास्ति चित्रं पदं वास्तु तं संतु

दापालयेत् पोषयेत् सम्यगेव॥ किं त्वं जनित्री सुराणां सहायं कुरुष्वेक चित्तेन
कार्यं समग्रं॥३०॥ न वेत्ते — — — — — — — — वयं देवि जानीमहे विश्ववंद्ये। रूपा
पात्रमित्येवमत्ता तथास्मान् नयेष्मः सदा पाहि पातुं समर्थे॥३१॥ विना बाण
पातैर्विना वज्रयातैर्विना शूलखड्गैर्विना शक्तिदंडैः रिपून् हंतुमेवासि शक्ता वि
नोदाद्वयं विमहे विलहीयं चरित्रं॥३२॥ इदं ज्ञायते त्वं येव हंतीह मूढा न कार्यं विना
कारणं संभवेत्व॥ वयं कल्पयामो नुमानं प्रमाणं त्वमेवास्य कर्त्रास्यविश्वस्य मा
तः॥३३॥ अजः सृष्टिकर्त्ता हरिः पालयी ता हरो नाशकर्तेति सिधा पुराणे॥ किं त्व
त्प्रसूता स्वयं त्वत्सु गादौ त्वमेवासि सर्वस्य तेनेव माता॥३४॥ त्रिभिस्त्वं पुराराधि
तादेवि दत्ता त्वया शक्तिरुग्रा च तेभ्यः समग्रा॥ तया संभृता स्ते प्रकुर्वंति मातर्ज

ना॰पं॰ गत्वा लनोत्पत्तिसंहारमेव ॥३५॥ ते किं न मंदमतयो यनयो विमूढास्त्वां ये न विश्व
जननीं समुपासयंति ॥ विद्यां परां सकलकामप्रदां ते मुक्तिप्रदां विबुधवृंदपवंदि
८१ तां च ॥३६॥ ये वैष्णवाः पाशुपताश्च सौरा दंनाल्ल एव प्रतिजानाति नूनं ॥ ध्यातैला--
कमलां चलज्जां कांति स्थितिं कीर्तिमथापि पुष्टिं ॥३७॥ हरिहरादिभिरप्यसि सेवि
ता त्वमिह देववरैरसुरैस्तथा ॥ नु विन्नजंति न ये त्वधियो नरा जननि ते विधिना
खलु वंचिता ॥३८॥ हरिरमापदपंकजरंजनं -- रसेन करोति रसान्वितः ॥ त्रि
नयनोपि धरा धरजांघ्रिपंकजपरागनिषेवणतत्परः ॥३९॥ किमपरस्य नरस्य
कथानके त्वपदं न भजंति जगंति के ॥ विगतरागगृहाश्च दयास्तमां कलाध
यो मुनयोपि भजंति ते ॥४०॥ दैवितहं क्रिभजते न जनो रतायसंसारकूपप

तिताः पतिता किलामी ॥ तं कष्टगुल्मव्रणमाधियुता भवंति दारिद्र्यदैन्यसहिता
रहिताः सुखौघैः ॥४१॥ येकाष्टभारवहनेयवसावहा रे कार्यं भवंति निगुणा धन
हारहीता ॥ जानीमहे त्वमतिभिर्नवृद्धिसेवा पूर्वं भवे जननि तेन कृता कृतार्थे
४२॥ व्यासउ॥ ॥ एवं स्तुता सुरैः सर्वैरंबिका करुणान्विता ॥ प्रादुर्बभूव तरसा
रूपयोवनसंयुता ॥४३॥ दिव्यांबरधरा देवी दिव्यभूषणभूषिता ॥ दिव्यमाल्य
समायुक्ता दिव्यचंदनचर्चिता ॥४४॥ जगन्मोहनलावण्या सर्वजक्षणलक्षिता
अद्वितीयस्वरूपा सा देवानां दर्शनं गता ॥४५॥ जाकव्यांस्तातु कामाच निर्गता
गिरिगह्वरात् ॥ दिव्यरूपधरा देवी विश्वमोहनमोहिनी ॥४६॥ देवान्स्तुतिपरान्वी
ह मेघगंभीरया गिरा ॥ प्रेमपूर्वं स्मितं कृत्वा कोकिलामंजुवादिनी ॥४७॥ देवुवा

ना.पं. च॥ नोनो सुरवराः कात्र भवद्भिः स्तूयसे ग्रहं॥ किमर्थंस्तुतवः कार्यंचिंताविष्टाः कृतः
पुनः॥४८॥ ॥व्यासउ०॥ ॥तच्छ्रुत्वा भाषितं तस्या मोहितं रूपसंपदा। प्रेमपूर्ण
८२ मनोत्साहास्ताम्बचुः सुरसत्तम॥४९॥ ॥देवाऊचुः॥ ॥देवि त्वां स्तोमि विश्वेशि प्र
णताः स्मः कृपार्णवे॥ पाहिनः सर्वदुःखेभ्यः संविग्नान् दैत्यतापितान्॥५०॥ पुराव
या महामाये निहत्यासुरकंटकं॥ महिषं नो वरो दत्तः स्मर्तव्या ह्यसदापदि॥५१॥
स्मरणाद्दैत्यजां पीडां नाशयिष्याम्यसंशय॥ तेन त्वं संस्मृता देवि नूनमस्माभि
रित्यपि॥५२॥ स्तुंभनिसुंभनौ ताव सुरौ घोरदर्शनौ उत्पन्नौ विघ्नकर्त्तारावह
न्योपुरुषैः किल॥५३॥ देवास्त्वं हंक्तिजनेस्थिरताः सर्वदैवते। दानवैरतिबलै
र्विपदं सुनीताः तान्देवि दुःखरहितान्कुरु भक्तियुक्तान्सकलजन्तुवनरक्षादेविका

यत्नियाद्य॥५५॥ स्वकृतमिति विदित्वा चाविश्वमेतद्युगादौ जननि जगति पीडां हान
वादर्प्ययुक्तां॥ त्वबलमहसमेतास्ते त्वकर्वतिमातः॥५६॥ ॥इति श्री भागवते महापु
राणे पंचमस्कंधे देवीमाहात्म्ये द्वाविंशोध्यायः॥२२॥ व्यासउ०॥ एवं स्तुता तदा देवी दै
:वान्नु निपीडितैः॥ स्वशरीरात्द्वितीयं तु रूपं प्रादुश्चकार ह॥१॥ पार्वत्यास्तु शरीरा
द्वै निःसृता चांबिकाद्भयः॥ कौशिकीति समस्तेषु ततो लोकेषु पम्यते॥२॥ निस्सृ
तायां तु तस्यां सा पार्वती तनुव्यत्ययात्॥ कृष्णरूपाथ संजाता कालिकासा प्रकीर्त्तिता
॥३॥ मिखीवर्णी महाघोरा दैत्यानां नयवर्धिनी॥ कालरात्रीति सा प्रोक्ता सर्वकाम
फलप्रदा॥४॥ अंबिकाया परं रूपं विरराजमनोहरं॥ सर्वभूषणसंयुक्तं लावण्य
गुणसंयुतं॥५॥ ततोंबिकातदा देवा निसुवाच हसन्निव॥ तिष्टन्तु निर्न्नयाद्येव इनि

ना.पं. ष्यामिरिपूनहं॥६॥कार्यंवस्सर्वथाकार्यंविहरिष्याम्यहंरणे॥निशुंभादींश्चधिष्यामि
युष्माकंसुरसहेतवे॥७॥इत्युक्त्वासातदादेवीसिंहारूढमदोत्कटा॥कालिकांपार्श्व
८२ तःकृत्वाजगामनगरंरिपो॥८॥सागत्वोपवनेतस्याबंबिकाकालिकान्विता॥ज
गावथकलंतत्रजगन्मोहनमोहनं॥९॥श्रुत्वातन्मधुरंगानमोहमीयुर्मृगाःखगाः
सुहंसचपरमंप्रापुरमरागगनेस्थिताः॥१०॥तस्मिन्नवसरेतत्रदानवौशुंभसेवकौ
चंडमुंडाभिधौघोरौरममाणौयदृच्छया॥११॥आगतौददृशातेतौतांतदादिव्यरू
पिणीं अंबिकांगानसंसक्तांकालिकांचपुरःस्थितां॥१२॥दृष्ट्वातांदिव्यरूपांचदान
वौविस्मयान्वितौ॥जग्मतुस्त्वरसापार्श्वंशुंभस्यनृपसत्तम॥१३॥तौगत्वातांसमा
सीनंदैत्यानामधिपंगृहे॥ऊचतुर्मधुरांवाणीप्रणम्यशिरसानृपं॥१४॥राजन्

हिमालयाकामंकामिनीकाममोहिनी॥संप्राप्तासिंहमारूढासर्वलक्षणसंयुता
१५॥नेदृशीदेवलोकेस्तिनगंधर्वपुरेस्तथा॥नदृष्टानश्रुताक्वापिप्रथिव्यांप्रमदो
त्तमा॥१६॥गानंचतादृशंराजन्करोतिजनरंजनं॥मृगास्तिष्ठंतितत्पार्श्वेमधुरस्वर
मोहिता॥१७॥ज्ञायतांकस्यपुत्रीयंकिमर्थमिहमागता॥गृह्यतांराजन्शार्दूलित
वयोग्यास्तिकामिनी॥१८॥ज्ञात्वानयगृहेनार्यंकिरुकमललोचनां निश्चयं
नास्तिसंसारेनारीत्वेवंविधाकिल॥१९॥देवानांसर्वरत्नानिगृहीतानित्वयानृ
प कस्मात्त्वेमांवरारोहांनगृह्णासिनृपोत्तम॥२०॥इंद्रस्यैरावतःश्रीमान्पारि
जातस्तरुस्तथा॥गृहीतोच्चैःश्रवाश्चापित्वयानृपरिवाहुतं॥२१॥कुवेरस्यनिधि
पद्मस्त्वयाराजन्समाहृतः छत्रंजलपतेःशुभ्रंगृहीतंतत्वयाबलात्॥२२॥पा

ना॰पं॰ त्वयापि निष्ठुरं तेन त्वातात वनृपोत्तम ॥ गृहीतो ऽसि हि गात्काऽयं वरुणस्य जितस्य च ॥२३
८४ अम्लानपंकजां मालां तुभ्यं जननिधिर्ददौ ॥ त्वया त्वं महाराज रत्नानि विविधानि
च ॥२४॥ मृत्योराक्रियमस्यापि दंडः परमदारुणः त्वयाहृतारुतः कामं किमन्यद्वर्णय
ते नृप ॥२५॥ कामधेनुर्गृहे तेद्य वर्त्तते सागरोद्भवा ॥ मेनकाद्या वरारोराजन्तवतिष्ट
ति चाप्सराः ॥२६॥ एवं सर्वाणि रत्नानि त्वयात्तानि बलादपि कस्मान्न गृह्यते कांता
रत्नमेषा वरांगना ॥२७॥ सर्वाणि ते गृहस्थानि रत्नानि विविधान्यपि ॥ अनया सं न
विष्यंति रत्नभूतानि नृपते ॥२९॥ त्रिषु लोकेषु दैत्येंद्र नेदृशी वर्त्तते प्रिया ॥ तस्मा
न्नामानयाशु त्वं कुरु भार्यां सुखाय वै ॥३०॥ व्यास उ० ॥ इति श्रुत्वा तयोर्वाक्यं मधु
रं मधुराक्षरं ॥ प्रसन्नवदनं प्राह शुंभः सुग्रीवमास्थितं ॥३१॥ गच्छ सुग्रीव दूतत्वं कुरु

कार्यविचक्षणः ॥ वक्तव्यं च तथा तत्र यथाभ्येति कृशोदरी ॥३२॥ उपायौ द्वौ प्रयोक्त
व्यौ कांतासु सुविचक्षणैः ॥ सामदानाविति प्राह शृंगाररसकोविदः ॥३३॥ नेदे प्रयु
ज्यमाने पि रसाभासस्तु जायते ॥ निग्रहे रसभंगः स्यात्तस्मात्तौ दूषितौ बुधैः ॥३४॥ सा
मदानं सुखैर्वाक्यैः श्लक्ष्णैर्नर्मयुतैस्तथा ॥ कानयानिवरोहतकामिनी कामपीडि
ता ॥३५॥ ॥ व्यास उ० ॥ ॥ सुग्रीवस्तु वचः श्रुत्वा शुंभेनोक्तं सुप्रियं पटु जगाम तरसा
तत्र यत्रास्ते जगदंबिका ३६ सोपत्य सुमुखीं कांतां सिंहस्योपरि संस्थितां ३ए
म्पमधुरं वाक्यं उवाच जगदंबिकां ॥३७॥ दूत उवाच ॥ वरोरु त्रिदशाराति शुंभः स
र्वांगसुंदरः ॥ त्रैलोक्याधिपतिः शूरः सर्वजिद्राजते नृप ॥३८॥ तेनाहं प्रेषितः कामं त्व
त्सकाशं महात्मना ॥ त्वद्रूपश्रवणासक्तचित्तेनातिविहृयता ॥३९॥ वचनं तस्य तन्वं

ना·पं· गिष्टणुष्वे मधुरस्वरं॥ प्रणिपत्य यथाप्राह दैत्यानामधिपस्तथा॥४०॥ देवास्मया जि
ताः सर्वे त्रैलोक्याधिपतिस्त्वहं॥ यज्ञभागानहं कांते गृह्णामीह स्थितः सदा॥४१॥ कृ
८५ तसारा कृतान्नूनं द्यौमया रत्नवर्जिता॥ यानि रत्नानि देवानां तानि चाहृतवान
हं॥४२॥ लोकारं सर्वरत्नानां त्रिषु लोकेषु नाविभिन्नौ॥ वशानुगाः सुराः सर्वे
मम दैत्याश्च मानवाः॥४३॥ त्वद्गुणैः कर्णमागत्य प्रविश्य हृदयांतरं त्वदधीनां
कृतः कामं किं करोमि करोमि किं॥४४॥ यदाज्ञापय परं तो कृत करोमि वशानु
गं॥ दासोहं तव चार्वंगी रक्ष मां कामबाणतः॥४५॥ त्वं जमां त्वमरालास्तितवाधी
नं स्मराकुलं॥ त्रैलोक्यस्वामिनं मत्वा भुंक्ष्व भोगाननुत्तमान्॥४६॥ तव चाज्ञाकरः
कांते न वामि मरणावधि॥ अवध्योस्मि वरारोहे सदेवासुरमानुषे॥४७॥ सदासो

नाग्यसंयुक्ता त्वद्विश्वासि वरानने॥ यत्र ते रमते चित्तं तत्र क्रीडस्व सुंदरं॥४८॥ यदा
ज्ञापयसि प्रेम्णा तद्ब्रूहि मधुरं वचः॥ शुंभनाम्नेरितं चैवं लापं गिरा श्रवीम्य हमाशु वै॥४९॥
व्यासउ॥ तद्दूतवचनं श्रुत्वा स्मितं कृत्वा सुपेशलं तं शाह मधुरं वाक्यं देवी देवार्थसा
धकं॥५०॥ ॥श्रीदेव्युवाच॥ ॥जानाम्यहं निशुंभं च शुंभं च चातिबलं नृपं॥ दा
तारं चातिशूरं च सुंदरं सन्मथाकृतिं॥५१॥ द्वात्रिंशल्लक्षणैर्युक्तमवध्यं सुरमान
वैः॥ ज्ञात्वा समागतास्म्यत्र द्रष्टुकामा महासुरं॥५२॥ रत्नं कनकमायाति स्वर्णेना
धिक दृश्यये॥ तथा इत्यलंतिं द्रष्टुं दूरादेवागतास्मि वै॥५३॥ दृष्टा मया सुराः सर्वे मान
वाश्च विमानवा॥ गंधर्वा राक्षसाश्चान्ये ये चातिप्रियदर्शनाः॥५४॥ सर्वे शुंभमया
न्नीता वेपमाना विचेतसः॥ श्रुत्वा शुंभगुणाः तत्र आगतास्म्यह दिदृक्षया॥५५॥

गच्छ दूत महाभाग ब्रूहि शुंभं महाबलं ॥ निशुंभं च श्लक्ष्णया वाचा वचनान्मम
५७॥ त्वां ज्ञात्वा बलिनां श्रेष्ठं रूपेण स्मरसुंदरं उदारं गुणिनं श्रेष्ठं सर्वविद्याविशा
रदं ॥ ५८ ॥ जेतारं सर्वदेवानां दक्षं चौर्य्यकलोद्भवं ॥ भोक्तारं सर्वरत्नानां स्वाधीनं
सबलोन्नतं ॥ ५९ ॥ पति कामास्म्यहं सत्यं न वयोग्या नराधिप स्वेच्छया नगरे त
त्र समायाता महामते ॥ ६० ॥ ममास्ति कारणं किंचिद्विवाहे राक्षसोत्तम ॥ बा
ला भावाहृतं किंचित्कृतं राजन्मया पुरा ॥ ६१ ॥ क्रीडंत्या च वयस्याभिः सह कांते
यहच्छया ॥ स्वदेहबलदर्पेण सखीनां श्र एव तो रहः ॥ ६२ ॥ मत्समात बलः शूरो
रणे मां जेष्यति स्फुटं ॥ तं वरिष्याम्यहं कामं ज्ञात्वा तस्य बलाबलं ॥ ६३ ॥ जहसुर्व
चनं श्रुत्वा सख्यो विस्मितमानसः ॥ किमेतया कृतं क्रूरं व्रतमद्भुतमाशु वै ॥ ६४ ॥ त

स्मात्त्वमपि राजेंद्र ज्ञात्वायमे दृढंव्रतं ॥ जित्वा मां समरे सद्यो वांछितं कुरु चात्म
नः ॥ ६५ ॥ त्वं वा तवानुजो भ्राता समेत्य समरांगणे ॥ जित्वा मां स्वबलेनात्र
विवाहं संविधीयतां ॥ ६६ ॥ ॥ इति श्रीभागवते महापुराणे पंचमस्कंधे देवीमा
हात्म्ये त्रयोविंशोऽध्यायः ॥ २३ ॥ व्यास उवाच ॥ ॥ देव्यास्तद्वचनं श्रुत्वा स तथा
हसु विस्मितः ॥ किं ब्रूमे रुचिरापांगि स्त्रीस्वभावाद्धि साहसात् ॥ १ ॥ इंद्राद्या
निर्जिता येन देवा दैत्यास्तथा परे ॥ तं कथं समरे देवी जेतुमिच्छसि भामिनी ॥ २
त्रैलोक्ये तादृशो नास्ति यः शुंभं समरे जयेत् ॥ कालं कमलपत्राक्षि तस्याग्रे
युधि सांप्रतं ॥ ३ ॥ अविचार्य न वक्तव्यं वचनं कापि सुंदरि ॥ बलं स्वपरयोर्ज्ञात्वा
वक्तव्यं समयं तथा ॥ ४ ॥ त्रैलोक्याधिपतिः शुंभस्त्वद्रूपेण मोहितः ॥ त्वां च प्रार्थ

मा॰मं॰ यतेराजाकुरुतस्यिमितंतथा॥५॥त्यक्त्वामूर्खस्त्विनावंत्वंसंमान्यवचनंमम॥नज
शुंभंनिशुंभंवाहितमेतद्ब्रवीमिते॥६॥शृंगारंसर्वथासर्वैःप्राणिभिःपरस्यामुदा॥
८७ सेवितमोमतिमान्निर्विनासुत्तमंयतः॥७॥मागमिष्यसिचेद्बालेसक्रुधःपृथिवी
पते॥बन्मानानाकरान्त्रेत्वबालान्नेष्यतिसांप्रतं॥८॥केशेषाकृष्यतेनूनंदान
वाबलदर्पिता॥त्वांनयिष्यंतिवामोरुतरसाशुंभसन्निधौ॥९॥स्वल्पनारस्त
तन्वंगीसाइसंसर्वथात्यज॥मानिताग्च्छतत्पार्श्वंपानपात्रंयतोसिवै॥१०॥
क्रयुधंनिशितैर्बाणैःकसुखंरतिसंगजं॥सारासारंपरिचिंत्यकरुमेवचनंहि
तं॥११॥हितायतवचार्वंगिब्रवीमिवचनंपटु॥नजशुंभंनिशुंभंवाप्राप्स्यसिप
रमंसुखं॥१२॥देव्युवाच॥ ॥सत्यंहतमहाज्ञागप्रवक्तुंनिपुणोह्यसि॥शुंभंनि

शुंभंजानामिबलवंताविनिश्चवं॥१३॥प्रतिज्ञामेकृताबाल्यादन्यथासाकथंभ
वेत्॥तस्माद्ब्रूहिनिशुंभंवाशुंभंवाबलिनांवरं॥१४॥विनायुधंनमेभर्ताभवि
ताकोपिसोहृढवात्॥जित्वामांतरसाकामंकरंगृह्णातुसांप्रतं॥१५॥युधेछया
समायातौविधिमामबलांनृप॥युधंदेहिसमर्थोसिवीरधर्मसमाचर॥१६॥वि
न्नेषिममनश्चलाचेद्गच्छपातालमाचिरं॥त्रिदिवंचधरांत्यक्त्वाजीवितेछायदन्ति
चेत्॥१७॥इतिदूतवचःश्रुत्वागत्वास्वपतिमाहरात्॥सविचार्यधियायुक्तंकरि
ष्यतिमहाबलः॥१८॥संसारेहतधर्मोयंयत्सत्यस्यापणंकिल॥राज्ञोपत्योच
धर्मज्ञतथात्वंकरुमाचिरं॥१९॥व्यासउ॥ ॥इत्युक्तस्तुवचःश्रुत्वानीतिमं
द्वचसंयुतं॥हेतुमद्युक्तमगल्भंचविस्मितःप्रययौतदा॥२०॥गत्वादैत्यपतिं

मा॰पं॰ इतोविचार्यचपुनः॥ प्रणम्यपादयोःश्लक्ष्णंभृत्युवाचनृपंप्रति॥२१॥ राजन्नाज्ञा
करवाकंमृदुपूर्वंप्रियंवचः॥ सत्यंचापिप्रवक्तव्यंतेनचिंतापरोह्यहं॥२२॥ सत्यं
९८ प्रियंचराजेंद्रवचनंदुर्लभंकिल॥ अप्रियंवदताकामंराजाकुप्यतिसर्वदा
२३॥ साकाकुतःसमायाताकस्यावाकिंबलाबला॥ नज्ञानगोचरंराजन्किं
ब्रवीमिविचेष्टितं॥२४॥ युधकामामयादृष्टागर्विताकटुभाषिणी॥ तयायत्क
थितंसम्यक्तच्छृणुष्वमहामते॥२५॥ मयाबाल्यात्प्रतिज्ञेयंकृतापूर्वंविनोदतः॥ स
खीनांपुरएवतांकामंविवाहंप्रतिसर्वथा॥२६॥ योमांमृधेजयेत्तथादर्प्पंविविधु
नोतिवै॥ तस्माद्युधस्वधर्मज्ञोजित्वामांशाववंकुरु॥२७॥ तथेतिव्याहृतंराजन्
कृत्वाहंसमुपागतः॥ यथेच्छसिमहाराजतथाकुरुतदप्रियं॥२८॥ सायुधासिंह
वाहना॥ निश्चलावर्त्ततिसम्यक्युद्धोद्यतद्विधीयतां॥२९॥ व्यासउ॥ ॥ इत्या
कर्ण्यवचस्तस्यसुरथस्यनराधिपः॥ पप्रच्छभ्रातरंश्रेष्ठंसमीपस्थंमहाबलं॥३०
शुम्भउ॥ ॥ भ्रातःकिमत्रकर्त्तव्यंब्रूहिसत्यंमहामते॥ नार्येकायोद्धुकामास्ति
मामाकयतिसांप्रतं॥३१॥ अहंगमिष्येसंग्रामेत्वंवागच्छबलान्वितः॥ यथेच्छते
निशुंभाद्यतत्कर्त्तव्यंमयाकिल॥३२॥ निशुंभउ॥ ॥ नमयानत्वयावीरगंतमं
रणमूर्धिवै॥ प्रेषयस्वमहावीरंत्वरितंधूम्रलोचनः॥३३॥ सगत्वातांरणेजि
त्वागृहीत्वाचारुलोचनं आगमिष्यतिशुंभोत्रविवाहंसंविधीयतां॥३४॥
शुंभउवाच॥ ॥ धूम्रलोचनगच्छाशुसैन्येनमहतावृतः॥ गृहीत्वानयतांमुग्धां
स्ववीर्यदर्पमोहितां॥३५॥ देवोवादानवोवापिमनुष्योवामहाबलः॥ तत्पार्ष्णिया

ना·पं·
८९

हतांशाखोऽहंतव्यस्त्वरसात्वया॥३६॥ तस्माश्चविनिर्गिनी कालीहत्वातांगृह्यतांपुनः श्री
घ्रमत्रसमागच्छकृताकार्यमनुत्तमं॥३७॥ रक्षणीयात्वया साधुमुंचन्नश्रीघ्रंशिनीमु
खान्॥ यत्नेनमहतावीरमृडहेवांकुरुतोहरी॥३८॥ तस्सहायाश्च हंतव्यापेरणे
शस्त्रपाणय॥ सर्वथासानहंतव्यारक्षणीयांप्रयत्नतः॥३९॥ ॥व्यासउवाच॥इ
त्यादिष्टस्तदाराज्ञातरसाधूम्रलोचनः॥ वृणान्यष्टंतसैन्येनहतःशीघ्रंययौरणे॥
३९॥ सायुधानांसहस्त्रेणषष्ट्यायुतः तदा॥ सददर्शततोदेवींतुहिनाचलसं
स्थितां॥४०॥ दृष्ट्वातांमृगशावाक्षीं विनयेनसमन्वितः॥ उवाचवचनंश्लक्ष्णं
हेतुमद्रसभूषितं॥४१॥ शृणुदेविमहाभागेशुंभस्त्वद्विरहातुरः॥ दूतंप्रेषितवान्पा
र्श्वेतवनीतिविशारदः॥४२॥ रसरूपंगतस्त्वयाविपिनःसामपूर्वंपिकःस्वरे॥ सेना

गत्यवचःप्रोक्तंविपरीतंवरानने॥४३॥ वचसातेनमेनकांचिंताविष्टमनाकुलःप्र
नूवरसमागम्यशुंभःकामविमोहितः॥४४॥ इतनतेनन्नात्तंहेतुगर्भवचस्त
व॥ योमांजयतिसंग्रामेयउक्तंकगिनंवचः॥४५॥ नज्ञातंतेनसंयामोऽहिविधा
खलुमानिनी॥ रतिजोस्याहजेंद्रेवपात्रभेदेविवक्षितः॥४६॥ रजितस्त्वयिवामो
रुराजुद्धस्याहजःस्मृतः॥ सुखदोप्रथमःकांतेदुःखदश्चापरयःस्मृतः॥४७॥ जाना
म्यहंवरारोहेन्नावर्तेमानसःकिज॥ रतिसंग्रामजावस्तेहृदयेपरिवर्तते॥४८॥ श्र
गितज्ञंविदित्वामालक्स्यकासंतराधिपं॥ प्रेषयामासशुंभोद्य बलेनमहताहृतं॥४९
चतुरापिमहाभागेशृणुमेवचनंमृडु॥ नजस्तुंशंत्रिलोकेचंदेवदर्पनिबर्हणं॥५०
मदूराज्ञीप्रियाभूत्वाशुंभस्यभोगामनुत्तमान्॥ जेष्यतिलांमहाबाहुःशुंभःकामव

भा·पं·
९०

र्थवित्॥५१॥ विचित्रान्कुरुहावांस्त्वां सोपि नाथ करिष्यति॥ भविष्यति कालि
केयं तत्र वै मम साक्षिणी॥५२॥ एवं संगरयोगेन पतिर्मे परमार्थवित्॥ जित्वा त्वां
सुखशय्यायां परिश्रांतां करिष्यति॥५३॥ रक्तदेहां नखाघातैर्दंतैश्च खंडिता
धरां॥ स्विन्नकेशं श्रमश्वासां स विधास्यति भूपतिः॥५४॥ नविता मानसः कामो
रतिस्तं यामजस्तव॥ स्थानि लब्ध एवास्ति स्वस्थः सर्वात्मना प्रिये॥५५॥ वचनं कु
रु मे पथ्यं हितं कृत्वा तिपेशलं॥ भजस्व त्वं नगं गरां ममत्वानिनीयासि मानिनी॥५६
मंदभाग्याश्च ते नूनं शस्त्रयुधप्रियाश्च ये॥ न तद्दृहासिकां ते तां सहास्मुरतवक्षना
श्रीकंक्कुरुराजानं पाह्यातविकाशितं॥ ककलंश्रीधुसेकेन तथा कुरु बकंकु
रु॥५७॥ ॥इति श्रीभागवते महापुराणे पंचमस्कंधे देवीमहात्म्ये चतुर्विंशोध्यायः

२४॥ ॥व्यास उवाच॥ ॥इत्युक्त्वा विरराम सौ वचनं धूम्रलोचनं॥ प्रत्युवाच त
दा काली प्रहस्य ललितं वचः॥१॥ विदूषकोसि जाल्म त्वं शैलूक इव नासि॥ इथा
मे स्यात्तथा चित्ते करोषि मधुरं वदन्॥२॥ बलवान्बलसंयुक्तः प्रेषितोसि दुरात्मना
हत्वा शुंभं निशुंभं च त्वां चान्यान्बलाधिपान्॥३॥ देवी कुथमारायातैव गमिष्यति
निजालयं॥ कासौ मंदमतिः शुंभं के चेबा विश्वमोहिनी॥४॥ नायुक्तः खलु संसारे
विवाहादि धिरे तयोः॥ सिंही किं त्यतिकामार्त्ता जंबूकं कुरुते पतिं॥५॥ करिणी गर्द्भं
ईवापि गवयं सुरभी तथा॥ गच्छ शुंभं निशुंभं च वद सत्यं वचो मम॥६॥ कुरु युद्धं न्वे
घा हि पाताले तरसाधुना॥७॥ व्यास उ॥ ॥ कालिकाया वचः श्रुत्वा स दैत्यो धूम्र
लोचनः॥ तामुवाच महाभाग क्रोधसंरक्तलोचनः॥८॥ दुर्दर्शे तां निहत्वाद्य सिं

हं च मद्गर्वितं ॥ गृहीत्वैनां गमिष्यामि राजानं त्र सहं किल ॥ ९ ॥ रसनंगं तया का
ली विज्ञेमि त्विह सांप्रतं ॥ नो चेत्त्वां निशितैर्बाणैर्हन्मि यकल हप्रिये ॥ १० ॥ कालि
कोवाच ॥ ॥ किं विकत्थसि मंदात्मन् नायं धर्मो धनुष्मतां ॥ स्वशक्त्या मुंच विशिखा
न् गंतासि यमसादनं ॥ ११ ॥ व्यास उवाच ॥ ॥ तच्छ्रुत्वा वचनं दैत्यः संगृह्य कार्मुकं
तथा ॥ कालिकां तं शरासारैश्छादयामास तिशिला शितैः ॥ १२ ॥ देवास्तु प्रेक्षकास्तत्र
गगने घनसंहता ॥ तस्थुर्जयिजयोत्सुकुर्देवी शक्रपुरोगमा ॥ १३ ॥ तयोः परस्परं
युद्धं प्रवृत्तं चातिदारुणं बाणखड्गगदाशक्तिमुशलादिनिसंकटः ॥ १४ ॥ का
लिका बाणघातैस्तु पूर्वं हत्वा खरानथा ॥ बभंजत्तदृथं रूढं जहास च मुमुक्ष च ॥ १५
स चान्यं रथमारूढः कोपेन प्रज्वलन्निव ॥ बाणवृष्टिं चकारोग्रां कालिकोपरि भारत

१६ ॥ सापि चिच्छेद तरसा तस्य बाणान्नसंगतान् ॥ मुमोच चान्यान्सुग्र वेगात् दानवो
परि कालिका ॥ १७ ॥ तैर्बाणैर्निहतास्तत्र पार्ष्णिग्राहाः सहस्रशः ॥ मुमोच चान्यान्सु
ग्रवेगात्तद्दानवो परि कालिका ॥ बभंज च रथं वेगान्सूतं हत्वारानपि ॥ १८ ॥ चिच्छेद
च धनुः सद्य सर्वलोकभयं दृढं ॥ चिच्छेद च धनुः सद्य बाणैरुरगसंनिभैः ॥ सुर
चक्रे सुराणां सा त्राणं खनादं तथाकरोत् ॥ २० ॥ विरथः परिघं गृह्य सर्वलोहमयं दृ
ढं ॥ आजगाम रथोपस्य कुपितो धूम्रलोचनः ॥ २१ ॥ वाचा निर्भर्त्सयन्कालीं
करालः कालसंनिभः ॥ अद्यैव त्वां हनिष्यामि कुरूपे पिंगलोचने ॥ २१ ॥ इत्यु
क्त्वा सहसागत्य परिघं क्षिपते यदा ॥ हुंकारेणैव तं भस्म चकार तरसांबिका ॥
२२ ॥ देवास्तं निहतं दृष्ट्वा दानवं धूम्रलोचनं ॥ मुमुचुः पुष्पवृष्टिं वै मुदिता गगने स्थि

ता॥२४॥रणभूमिस्तदाराजन्दारुणा समपद्यत॥ निहतैर्दानवैरश्वैः खरैरश्चवा
रणैस्तथा॥२५॥गृध्राः कंकाबराः श्येनाः वरकाजंबुकास्तथा॥ नंनतुश्चा क्रघुमे
तान्पतितान्रणभूमिषु॥२६॥अंबिका तद्रणस्थानं त्यक्त्वाक्रूरस्थलां तरे॥ग
त्वाचकारचाप्युग्रं शंखनादं भयप्रदं॥ तच्छ्रुत्वा हरन्नाद्दं तु शुंभः सद्मनि संस्थि
तः॥ दृष्ट्वा यदानवा भग्ना नागता रुधिरोक्षतान्॥२८॥छिन्नपादकरांकांश्चित्
मंचकारोपितानपि॥ नष्टदृष्टकटिग्रीवाक्रंदमानाननेकशः॥२९॥ वीक्ष्य शुं
भस्तु पप्रच्छ क्र गतो धूम्रलोचनः॥ क्रतं कालीकया कर्म रणभूमावमानुषं॥३०
कथं भग्नाः समायाता नानीता किं वरांगना॥ सैन्यं कुत्र गतं मंदाः कथयंतु यथोचि
तं॥३१॥ कस्यायं शंखनादो हि श्रूयते भयवर्द्धन॥ गणाऊचुः॥ बलं च पातितं

सर्वं निहतो धूम्रलोचनः॥ शंखनादोंबिकायास्तु गगनं व्याप्य राजते॥३२॥ हर्ष
दः सुरसंघानां दानवानां च शोककृत्॥३३॥ गदा निपातिताः सर्वे तेन केशरिणा वि
भो॥ रथनद्धाइयाः श्वेव बाणयाते विनाशिता॥३४॥ गगनस्थाः सुराः स्वकः पु
ष्पवृष्टिं मुदान्विताः॥ दृष्ट्वा भग्नबलं सर्वं घातितं धूम्रलोचनं॥३५॥ विनाशः सर्व
दैत्यानां दृश्यते पुरुषर्षभ विचार्यं कुरु राजेंद्र मंत्रिभिः सह मंत्रणं॥३६॥विस्म
योयं महाराज यदेका नगरे बिका॥ नवद्भिः सह युधा य संस्थिता सैन्यवर्जिता॥३७
भिन्नर्यैका किंनी बाला सिंहारूढा मदोत्कटा॥ चित्रमत्र महाराज न्त्रानते कुतमं
जसा॥३८॥ संधिर्वा विग्रहो वा यस्या नं निर्याणमेव वा॥ मंत्रयित्वा महाराज कुरु
कार्यं यथा रुचि॥३९॥ तयोस इव बलं नास्ति तथापि राज्ञुतापन॥ पार्ष्णिग्राहः सु

ना॰पं॰ राःसर्वेन्नविध्यंतिकिलायदि॥४०॥यक्षोरगाश्चगंधर्वाकिंनरामानुजास्तथा॥तं
१८३ सहायाश्चमंतव्यासमयेसुरतापन॥४१॥समयेतत्समीपस्थोयावतेहरिवं
करौ लोकपालाःसमीपेद्यवर्त्तिगगनेस्थिता॥४२॥अस्माकंमतिमान्नेनेत्रा
यतेसर्वथेदृशं॥अंबिकायासहायानानैककार्यकरावन॥४३॥एकानाशयि
तुंशक्ताजगत्सर्वंचराचरं॥काकथादानवानांतुसर्वेषामितिनिश्चयः॥४४॥इ
तिज्ञात्वामहानागयथारुचितथाकुरु॥हितंसत्यंमितंवाक्यंवक्तव्यंमनुयायि
त्विः॥४५॥ ॥व्यासउ॥ ॥तच्छ्रुत्वावचनंतेषांशुंभःपरबलार्दनः॥कनीयांसं
समानीयपप्रच्छरहसिस्थितः॥४६॥भ्रातस्त्वंकालिकाकामंनिहत्योधूम्रलोचनः
बलंचनाशितंसर्वंमित्येनाःसमागताः॥४७॥अंबिकाशंखनादंचैकरोतिमद

गर्विता॥ज्ञानिनांचैवदुर्ज्ञेयागतिःकालस्यसर्वथा॥४८॥तृणवज्जायतेनूनंवज्रं
चैवतृणायते॥बलवान्बलहीनःस्याद्दैवस्यगतिरीदृशी॥४९॥पृच्छामित्वांमहा
नागकिंकर्त्तव्यमतःपरं अनेनाप्यंबिकानूनंकारणादत्रचागता॥५०॥युक्तंप
लायनंवीरयुधंवावदसत्वर॥जयुज्येष्ठंविज्ञानामित्वामहंकार्यसंकटे॥५१॥
निशुंभउवाच॥नाद्यपलायनंयुक्तंनउग्रंग्रहणंतथा॥युद्धमेवपरंश्रेयःसर्वथै
वानपानयः॥५२॥ससैन्योहंगमिष्यामितरसालब्ध्वामिमां॥५३॥अथवा
बलवान्कामःकर्त्ताकिंवासईश्वरः॥मृतेमयित्वयाकार्यंविमृष्यचपुनःपुनः॥५४
इतितस्यवचःश्रुत्वाशुंभःप्रोवाचचानुजं॥तिष्ठत्वंचंडमुंडौद्वौगच्छतौबलसंयुतौ
५५॥शशाकंग्रहणात्वैनयुक्तंगजमोचनं॥चंडमुंडौमहावीरौतंहंतुंसर्वथा

भा·पं·
९४

त्तमौ ॥५६॥ इत्युक्त्वानंतरं शुंभः संज्ञाप्य च महाबलौ ॥ हंतुं तामबलां शीघ्रं निर्ल
ज्जां मदगर्वितां ॥५७॥ गच्छतां चंडमुंडौ द्वौ स्वसैन्यपरिवारितौ ॥ हंतुं तामबलां शी
घ्रं गम्यतां बलवत्तरौ ॥५८॥ उवाच वचनं राजा चंडमुंडौ पुरःस्थितौ ॥ गंतव्यं शी
घ्रं तत्र कर्तव्यं कार्यमुत्तमौ ॥५९॥ गृहीत्वा मह्नातां कालिकापिंगलोचना ॥
आगम्यतां महस्त्वागौ कृत्वा कार्यमहत्तरं ॥६०॥ सा नायाति गृहीतापि गर्विता सां
बिका यदि ॥ तथा बाणैर्महातीक्ष्णैर्हंतव्याहवमंडिता ॥६१॥ ॥इतिश्री भागवते
महापुराणे पंचमस्कंधे पंचविंशोध्यायः ॥२५॥ व्यास उवाच ॥ ॥इत्याज्ञप्तौ त
दा वीरौ चंडमुंडौ महाबलौ ॥ जग्मतुस्त्वरसैवाजौ सैन्येन महतावृतौ ॥१॥ दृष्ट्वा त
त्र स्थितां देवीं देवानां हितकारिणीं ॥ ऊचतुस्तौ महावीर्यौ बलसामान्वितां वच ॥२॥

बाले त्वं किं न जानासि शुंभं सुरबलार्दनं ॥ निशुंभं च महावीर्यं तुरासाहजयोधतं
३॥ त्वमेकासि वरारोहे कालिका सिंहसंयुता ॥ जेतुमिच्छसि दुर्बुद्धे शुंभं सर्वबला
न्वितं ॥४॥ मतिर्दःका ममेवास्ति नाथ नरो पिवा ॥ हैवास्त्वां प्रेरयंत्येव विनाशायत
वैवते ॥५॥ विमृष्य कुरु तन्वंगि कार्यं स्वपरयोर्बलं अष्टादशभुजलात्वं गर्वं चि
त्कुरुषे मृषा ॥६॥ किं बहुजैर्बकनिवर्थैरायुधैः ॥ किं श्रमपदे ॥ शुंभस्यासुरसं
घानां कर्तुः कार्यमनुत्तमं ॥७॥ शुंभः स्याग्रे सुराणां वै जेतुः समरशालिनः ॥ ऐ
रावणकरच्छेत्तुर्दंतदारणकारिणः ॥८॥ जयिनः सुरसंघानां कर्तुं कार्यमनुत्तमं
॥९॥ वृथा गर्वायसे कांते कुरु मे वचनं प्रियं ॥ हितं तव विशालाक्षि सुखदं दुःखना
शनं ॥१०॥ दुःखोत्तराणि कार्याणि त्याज्यानि हरतो बुधैः ॥ सुखांतानि च सेव्यानि

ना·पं· शास्त्रतत्वविशारदे॥ १०॥ चतुरापि कालापेपरयशुंभ्नवलंमहत्॥ प्रत्यक्षंसुरसं
८५ घानामर्द्दनाक्षमहोदयं॥ ११॥ अत्यक्तं च परित्यज्यस्थैवानुमतिः किल॥ संदेहस
हितेकार्येनविशंसः प्रवर्त्तते॥ १२॥ दृष्टिलग्नं सुखंहित्वा किंफलंनाविचिंतने॥ न
वतीनन्वत्येवमा विकार्यवरानने॥ १३॥ शत्रुः सुराणांपरमः शुंभः समरदुर्जयः तस्मा
त्वांप्रेरयत्यत्र देवादैत्येशपीडिता॥ १४॥ तेषांत्वंवचनैः स्निग्धैर्वंचितासिशुचिस्मिते
दुःखायत्वं देवानां शिवा स्वार्थस्य साधका॥ १५॥ कार्यमित्रं परित्यज्य धर्ममित्रंसमा
श्रयेत्॥ देवाः स्वार्थपराः कामं त्वामहं सत्यमब्रुवं॥ १६॥ नजंभुं नं सुरेशानं नेतारंचु
वनेश्वरं॥ चतुरंसुंदरंश्रूरंकामशास्त्रविशारदं॥ १७॥ ऐश्वर्यसर्वलोकानांत्रा
प्यमिशुंभ्नशासनात्॥ निश्चयंपरमंकृत्वा नर्त्तारंभज शोभनं॥ १७॥ ऐश्वर्यंसर्व

लोकानांप्राप्स्यसि शुंभशासनात्॥ निश्चयंपरमंकृत्वा नत्तारिंभजशोभने॥ १८
व्यासउ॥ इतितस्यवचः श्रुत्वा चंडस्यजगदंबिका मेघगंभीरनिनदंजगर्ज्जप्र
नरब्रवीत्॥ १९॥ गच्छजाल्ममृषा किंत्वं नाषसे वचनावचः त्यक्त्वाहरीहरींद्रश्च
शुंभंवककरंवंपतिं॥ २०॥ नमेकश्चित्पतिं कामं न कार्यं पतिना मम॥ स्वामिन्त्वं स
र्वभूतानामहमेवनिशामय॥ २१॥ शुंभ्नामेवहवोदृष्टा निशुंभाश्चसहस्रशः
घातिताश्चमया पूर्वं शतशो दैत्यदानवाः॥ ममाग्रेदेववृंदानि विनष्टानि युगेयुगे
नाश्यंयास्यंतिदेवानांपृथ्वा निश्चनरद्य वै॥ २३॥ कालएकागतः कामं दैत्यसंहारका
रकाः॥ वृथात्वंकुरुषे यत्नंरक्षणायात्मसंततिं॥ २४॥ कुरुयुद्धंवीरधर्मंरक्षणायोम
हामते॥ मरणंनाविदुस्ता ज्ञयशोरक्षमहात्मनिः॥ २५॥ किंतेकार्यंनिशुंभेनशुं

वा·पं.
७६

नचदुरात्मना ॥ वीरधर्मंपरंप्राप्यस्वर्गंहिस्वर्गंसुरालयं ॥२६॥ शुंभोनिशुंभश्चैवाने
येचान्येतवबांधवाः ॥ सर्वेतिवानुगाःकामंमागमिष्यंतिसांप्रतं ॥२७॥ क्रमशःस
र्वदैत्यानांकरिष्याम्यद्यसंक्षयं ॥ विषादंत्यजमंदात्मन्कुरुयुधंमयासह ॥२८॥ ला
महंनिहनिष्यामिन्मातरंतवसांप्रतं ॥ ततःशुंभंनिशुंभंचरक्तबीजंमदोत्कटं ॥२९
अन्यांश्चासुरान्सर्वान्हत्वाहंसमरांगणे गमिष्यामियथाकामंतिष्ठवागच्छवाशु
तं ॥३०॥ गच्छशुंभंतथापृष्टकुरुयुधंमयाधुना ॥ किंजल्पसिमृषावाक्यंसर्वथाकात
रप्रियं ॥३१॥ ॥व्यास उ॥ ॥ तयेत्थंप्रेरितोदैत्यश्चंडमुंडःक्रुधान्वितः ॥ ज्याशब्दंतरसा
घोरंचकारबलदर्पितः ॥३२॥ सापिशंखस्वनंचक्रेपूरयन्सकलादिशः ॥ सिंहोपिकुपि
तस्तावन्नादंसमकरोद्बली ॥३३॥ तेननादेननाकाद्याजहर्षुरमरास्तदा मुनयोयक्ष

गंधर्वाःसिद्धाःसाध्याश्चकिंनराः ॥३४॥ युधंपरस्परंतत्रजातंकातरभीतिदं ॥ चंडि
काचंडयोस्तीक्ष्णंबाणखड्गगदासिभिः ॥३५॥ चंडमुक्तांश्छरान्देवीचिछेदनिशि
तैःशरैः ॥ मुमोचपुनरुग्राश्चानंबिकापन्नगानिव ॥३६॥ गगनंछादितंतत्रसंध्या
मेविशिखैस्तदा शलभैरिवमेयांतेकर्षुकानांभयप्रदैः ॥३७॥ मुंडोपिसैनिकैः
साकंपपाततरसारणे ॥ मुमोचबाणवृष्टिंचक्रुद्धःपरमदारुणः ॥३८॥ बाण
जालंमहद्दृष्ट्वाक्रुधातत्रांबिकाभृशं कोपेनवदनंतस्याबभूवघनसंनिभं ॥३९
कदलीपुष्पनेत्रंचभ्रुकुटीकुटिलंतदा निःक्रांताचतदाकालीललाटात्फलका
ततः ॥४०॥ व्याघ्रचर्मांबराक्रूरागजचर्मोत्तरांबरं मुंडमालांधराघोराशुष्क
कसरोदरा ॥४१॥ खड्गपाशधरातीवभीषणाभयदायिनी ॥ खट्वांगधारिणी

ना॰पं रोशकाजरात्रिश्विापरा॥४२॥ विस्तीएविरनाजिव्हाचालनाद्भयदायिनी॥ विस्ता
८१ रजघनावेगात्क्रधनासुरसैनिकान्॥४३॥ करेत्तलामहावीरास्तरसाग्रहस्तमुकु
मुखेचिक्षेपदैत्यायायान्पिपेषदशनैः शनैः॥४४॥ गजान्घंटान्वितान्हस्तोगृही
त्वानिदधौमुखे॥ सारोहान्त्त्रसयित्वाजौसाट्टहासंचकारच॥४५॥ तथैवतुर
गानोष्ट्रान्रथान्सारथिसंयुतान्॥ निक्षिप्यवक्त्रेदशनैश्चर्वयंत्यतिरौद्रं॥४६
हन्यमानंबलंप्रेक्ष्यचंडमुंडमहासुरौ॥ छादयामासतुर्देवींबाणासारैरनंतरैः॥४७॥
चंडश्चंडकरप्रायंचक्रंचक्रधरायुधं॥ चिक्षेपतरसादेवीननादसमुरुर्मुहुः॥४८॥
नदंतंवीक्ष्यतंकालीरथांगंचरविप्रभं बाणेनैकेनचिछेदसुप्रभंतत्सुदर्शनं॥४९
तंजयान्नशरैस्तीक्ष्णैश्चंडचंडशिलाशितैः मूर्छितोसौपपातोर्व्यांदेवीबाणार्दितोभृशं

५०॥ पतितंभ्रातरंवीक्ष्यमुंडोडःखार्दितस्तदा॥ चकारशरवृष्टिंचकालिकोपरिकोपितः
५१॥ चंडिकामुंडनिर्मुक्तांशरवृष्टिंसुदारुणां॥ ईषिकास्त्रैर्बलान्मुक्तैश्चकारतिलशःक्षणा
त्॥५२॥ अर्धचंद्रेणबाणेनताडयामासतंपुनः पतितोसौमहावीर्योमेदिन्यांमद
वर्जितः॥५३॥ हाहाकारोमहानासीद्दानवानांबलेतदा॥ जहृषुरमराःसर्वेगगन
स्थागतव्यथा॥५४॥ विहायमूर्छांचंडस्तुसंगृह्यमहतींगदां॥ तरसाताडयामास
कालिकादक्षिणेभुजे॥५५॥ वंचयित्वागदायातंतंबबंधमहासुरं तरसाबाण
पाशेनमंत्रयुक्तेनकालिका॥५६॥ उत्थितस्तुतदामुंडोचंडंबधंमहाबलं॥ आ
जगामसुसन्नधःशक्तिंकलाकरेहरं॥५७॥ आगच्छंतंततःकालीदानवंवीक्ष्यस
त्वरं॥ बबंधतरसातंतुद्वितीयंभ्रातरंनृप॥५८॥ गृहीत्वातौमहावीर्यौचंडमु

भा॰ पं॰ डोशशाविव॥ कुर्वती विपुलं हासमाजगामांबिकां प्रति॥ ५९॥ आगत्य ताम
९८ थोवाच गृहाणेमौ पशू प्रिये॥ रणयज्ञार्थमानीतौ दानवौ रणदुर्जयौ॥ ६०॥
तावानीतौ तदा वीक्ष्य चंडमुंडौ वृकाविव॥ ६१॥ अंबिका कालिकां प्राह मिष्या
संयुतं वच॥ ६ न त्वं मा कुरु मा मुंच यथेच्छसि तथाथवा॥ देवानां कार्यसंसिद्धिः
कर्तव्या तरसा त्वया॥ ६२॥ ॥ व्यास उ॥ ॥ ~~न त्वं मा कुरु मा मुंच यथेच्छसि त~~
~~था थवा॥ देवानां कार्यसंसिद्धिः कर्तव्या तरसा त्वया॥ ६२॥ व्यास उ॥~~ इति तस्य
वचः श्रुत्वा कालि प्राह तां पुनः॥ हिंसा नैव करिष्यामि वधे मौ वध्यमागतौ॥ ६३
युधयज्ञेति विख्याते खड्गयूपे प्रतिष्ठिते॥ आलंभं च करिष्यामि यथा हिंसा न
जायते॥ ६४॥ इत्युक्त्वा सा तदा देवी खड्गेन शिरसी तयो॥ चकर्त तरसा काली प

पो च रुधिरं मुदा॥ ६५॥ एवं दैत्यौ हतौ दृष्ट्वा मुदितो वाच चांबिका॥ कृतं कार्यं सु
राणां ते ददाम्यद्य वरं शुभं॥ ६६॥ चंडमुंडौ हतौ यस्मात्तस्मात्ते नाम कालिके॥ चा
मुंडेति सुविख्यातं भविष्यति धरातले॥ ६७॥ ॥ इति श्रीभागवते महापुरा
णे पंचमस्कंधे देवीमाहात्म्ये चंडमुंडवधो नाम षड्विंशोध्यायः॥ २६॥ व्यास
उ॥ हतौ तौ दानवौ दृष्ट्वा हतशेषाश्च सैनिकाः॥ पलायनं ततः कृत्वा जग्मुः सर्वे
नृपं प्रति॥ भिन्नांगा विशिखैः केचित्केचिच्छिन्नकरास्तथा॥ रुधिरं स्रावयंतश्च
रुदंतो निर्ययुः पुरे॥ २॥ गत्वा दैत्यपतिं सर्वे चक्रुर्बुंबारवं मुहुः॥ रक्ष रक्ष महाराज
नह्यपलद्य कालिका॥ ३॥ तया हतौ महावीरौ चंडमुंडौ सुरार्दनौ॥ भक्षिताः सेन
का सर्वे वयं भग्ना भयातुराः॥ ४॥ नीतिं दंत्वरणं स्यानं कालिकृतं कथा प्रभो॥ ५॥

मा॰पं॰ तितेगजवीरैस्थैश्चम्बैपदातिभिः॥५॥ शोणितौघवहाकुल्याछन्नामांसानिकर्द
मा॥ केशशैवालिनीनग्नरथवप्राविराजिता॥६॥ छिन्नबाकाशिमछाद्यापुंडातु
९९ विफलान्विता॥ नयदाकातराणांवैसुराणांप्रोदवर्धिनी॥७॥ कलेवरंत्वमहाराज
पातालंगच्छसत्वरः॥ क्रुधोदेवीत्वयंसद्यकरिष्यतिनसंशयः॥८॥ सिंहोपिनक्त
यत्याजौदानवान्हंतुमेश्वर॥ तथैवकालिकादेवीहंतिबाणैरनेकधा॥९॥ तस्मात्त
मपिराजेंद्रमरणायमृषामतिं॥ करोषिसहितोभ्रातुःशुंभेनकुशिलाशयः॥१०
किंकरिष्यतिनारीयंबाक्रूराकुलविनाशिनी॥ यस्यहेतोर्महाराजहंतुमिच्छसिबां
धवान्॥११॥ दैवाधीनौमहाराजलोकेजयपराजयौ॥ ज्ञात्वार्थायमहद्दुःखंबुधि
मान्नप्रकल्पयेत्॥१२॥ चित्रंपश्यविधेःकर्मयदिदधीनंजगद्विभो॥ निहताराक्ष

सः सर्वेस्त्रियायनैकयानया॥१३॥ जेतात्वंलोकपालानांसैन्ययुक्तोसिसांप्रतं॥
एकाप्रार्थयतेबालायुधायेतिसुसंभ्रमः॥१४॥ पुरात्वयातपस्तप्तंपुष्करेदेवता
पनं वरदानायसंप्राप्तोब्रह्मालोकपितामहः॥१५॥ धात्रोक्तस्त्वंमहाराजवरं
वरयसुव्रत॥ तदात्वयापरंत्वंचप्रार्थितंब्रह्मणःकिल॥१६॥ देवदैत्यमनुष्येभ्यन
नवेन्मरणंमम॥ सर्पकिंनरयक्षेभ्यःपुल्लिंगवाचकादपि॥१७॥ तस्मात्त्वंहंतु
कामैषाप्राप्तायोषिद्वराधमो॥ युधंकुरुत्वंराजेंद्रविचार्यवंधियाधुना॥१८॥ देवी
त्वेषामहामायाप्रकृतिंपरमामता॥ कल्पांतकालराजेंद्रसर्वसंहारकारिणी॥१९
उत्पादिनीचलोकानांदेवानामीश्वरीशिवा॥ त्रिगुणातामसीदेवीसर्वशक्तिस
मन्विता॥२०॥ अजयाचाक्षयानित्यासर्वज्ञाचसदोदिता वेदमाताचगायत्रीसं

मा·पं· ध्यासर्वसुरालया ॥२१॥ निर्गुणा सगुणा सिंधा सर्वसिद्धिप्रदाव्यया ॥ आनंदनंद
१०० दा गौरी देवानामभयप्रदा ॥२२॥ एवं ज्ञात्वा महाराज वैरं त्वं वत्स ज्ञातया ॥ शरणं
व्रज राजेंद्र देवी त्वां पालयिष्यति ॥२३॥ आज्ञाकरो न चेत्तस्याः संजीवयति जकुलं
हतशेषाश्च ये दैत्यास्ते भवंतु चिरायुषा ॥२४॥ व्यास उ॰ ॥ ॥ इति तेषां वचः श्रुत्वा
शुंभः सुरबलार्दनः उवाच वचनं तथ्यं वीरवर्यगुणान्वितं ॥२५॥ ॥ शुंभ उ॰ ॥ ॥
मौनं कुर्वंतु भो मंदा यूयं भग्ना रणाजिरात् ॥ शीघ्रं गच्छंतु पातालं जीविताशाव
लीयसा ॥२६॥ देवाधीनं जगत्सर्वं का चिंता तत्र पामराः ॥ देवास्तथैव ब्रह्माद्या दे
वाधीना वयं यथा ॥२७॥ ब्रह्मा विष्णुश्च रुद्रोपि यमोग्निर्वरुणस्तथा ॥ सूर्यश्चं
द्रस्तथा शक्रः सर्वे दैववशाः किल ॥२८॥ का चिंता तर्हि मे मंदा यद्भावि तद्भविष्यति ॥

उद्यमस्तादृशो नृणां यादृशी भवितव्यता ॥२९॥ सर्वथैवानिवार्येति न शोचंति बुधाः क
चित् स्वधर्मं न मुंचंतीह ज्ञातीमरणाद्भयात् ॥३०॥ सुखं दुःखं तथैवायुर्जीवि
तं मरणं नृणां कालेन भवति संग्रामे सर्वथा दैवनिर्मितं ॥३१॥ ब्रह्मा पतति काले स्व
विष्णुः पार्वतीपतिः ॥ नाशं गच्छंत्यायुषोंते सर्वे देवाः सवासवाः ॥३२॥ तथाह
मपि कालस्य वशगः सर्वथाधुना ॥ नाशं जयं वा गंतास्मि स्वधर्मपरिपालनात् ॥
३३॥ आगतोप्यनया कामं युद्धायाबलया किल ॥ पलायनपरो भूत्वा जीवेयं शर
दां शतं ॥३४॥ करिष्याम्यद्य संग्रामं यद्भावि तद्भविष्यति जयो वा मरणं वापि स्वी
करोमि यथा तथा ॥३५॥ दैवमप्यतिविक्रांता सा वदंत्युद्यमवादिनः ॥ युक्तियुक्तं च
वचस्तथ्यं येनात्यं त्यक्तुं नाशितुं ॥३६॥ उद्यमेन विना कामं न सिध्यंति मनोरथाः

कामान्तमस्मत्संतिपञ्चाग्यंतज्ञविष्यति॥३७॥ अदृष्टंनलवान्भूत्वा प्रवदंतिनपंडिताः
प्रमाणातत्रकिंदृष्टेस्मन्मतंप्रब्रुवंतुते॥३८॥ अदृष्टंक्वापिदृष्टस्यादेषामूर्खविनी
षिका॥ अबलंबलवातेषांदुःखमुमनेधारणा॥३९॥ चक्रीसमीपेसंविष्टासुस्थि
तापिष्टकारिणी॥उद्यमेनविनापिष्टंनन्नवत्येवनिश्चयः॥४०॥ उद्यमेचकृतेका
र्यसिधंयातीतिसर्वथा॥कदाचिद्विधाकाकतालीन्यायेननन्नवत्यपि॥४१॥ देशंका
लंचविज्ञायस्वबलंशत्रुजबलं॥ कृतंकार्यंनवत्येवहहस्मातिवचोयथा॥४२॥ त
स्मादहंकरिष्यामिसंग्रामंचसहानया॥ मरणंवाजयोवापिनवत्यात्रवृथाकथा॥
४३॥ व्यासउ॥ इतिनिश्चित्यदैत्येंद्रोरक्तबीजंमहासुरं॥प्रेषयामाससंग्राममसैमे
नमहताहृतं॥४४॥ शुंभउ॥ रक्तबीजमहाबाहोगच्छत्वंसमरांगणे करुयुधंम

हानागयथातेबलमाहितं॥४५॥ रक्तबीजउ॥ महाराजनतेकार्याचिंतास्व
ल्पतरापिवा॥ अहमेनांहनिष्यामिजित्वेमांसमरेबलात्॥४६॥ व्यासउ॥ इ
त्याज्ञाप्यकुरुश्रेष्ठरक्तबीजोमहासुरः॥ जगामरथमास्थायस्वसैन्यपरितः॥
४७॥ हस्त्यश्वरथपादातिवृंदैश्चपरिवेष्टितः॥ निर्जगामरथारूढोदेवीशैलोप
रिस्थिता॥४८॥ तमागच्छंतमालोक्यदेवीशंखमवादयत् नयदंसर्वदैत्यानांदे
वानांमोदवर्धनं॥४९॥ श्रुत्वाशंखस्वनंचोग्रंरक्तबीजोतिवेगवान्॥गत्वासमी
पेचामुंडांबनाषेवचनंमृदु॥५०॥ ॥रक्तबीजउ॥ ॥किमंनीषयसीबालेमत्वा
मांकातरंकिल शंखनादेनतत्वंगिवेत्सिकिंधूम्रलोचनं॥५१॥ रक्तबीजोस्मिता
नाम्नाहंलसकाशामिहागत॥ युधेच्छाचेत्तिकाजापेसज्जानवनयंनमे॥ पश्या

धमेवलंकांतेदृष्टायेकातरास्त्वया॥ पगितंवार्थविज्ञातंतद्भ्रोष्टीकृतायवा॥५५॥सा
हित्यतंत्रविज्ञानंचेदस्तितवसुंदरि॥ श्रृणुमेववचनंपथ्यंतथ्यंभ्रमितिहंहितं॥५६॥
रसानांचनवानांवैद्वावेवमुख्यतांगतौ॥ श्रृंगारशांतिचिरसौविद्धिकमनसत्तमासुच
५७॥ तयोःश्रृंगारएवादौनूपन्नावेप्रतिष्ठितः॥ वर्त्मतःसर्वदेवानांमनुष्याणांगरसं
सां॥५८॥ गंधर्वाणांचयक्षाणांकिंनराणांतथैवच पक्षिणांचसर्वेषांस्थावराणं
वरानने॥५९॥ विष्णुर्लक्ष्म्यामहालक्ष्म्यावैसावित्र्याचतुराननः॥ शचेंद्रःशैलसुतयाः
शंकरःसहशेरते॥६०॥ वल्ल्यावृक्षोमृगोमृग्याःकपोत्याचकपोतकः एवंसर्वेप्राण
न्तःसंयोगःरसिकाःस्त्रर्वं॥ अप्राप्तनोगविनवायेचाप्येकांतराःस्मृताः॥ नवंतिय
तयस्तेवैसा~~विक्र्याचतुराननः॥ शचेंद्रःशैलसुतयाःशंकरःसहशेरते॥~~ ६०॥

मूढोदैवेनवंचिता॥६२॥ असंसाररसाज्ञास्तेवंचितावंचनापरैः॥ मधुरालाप
निपुणैस्तैःप्रतीणचित्तारकैः॥६३॥ क्वज्ञानंक्वचवैराग्यंवर्त्तमानेमनोभवे॥ लोभेक्रो
धेचदुर्धर्षेमोहेमतिविनाशके॥६४॥ तस्मात्त्वमसिकल्याणिकुरुकांतमहाबलं
शुंभंसुराणांजेतारंनिशुंभंवामहाबलं॥६५॥ व्यासउ०॥ इत्युक्त्वास्कंधीनोसौविरर
मपुरःसरं श्रुत्वानहासचामुंडाकालिकाचांबिकानथा॥६६॥ ॥इतिश्रीभाग
वतेमहापुराणेपंचमस्कंधेसप्तविंशोऽध्यायः॥२७॥ व्यासउ०॥ ॥श्रुत्वाहास्यंततोदे
वीतत्सुवाचविशांपते॥ मेघगंभीरयावाचायुक्तियुक्तमिदंतदा॥१॥ पूर्वमेवमया
प्रोक्तंमंदात्मन्नकिंविकत्थसे॥ दूतस्याग्रेयथायोग्यंवचनंहितसंयुतं॥२॥ सदृशो
ममरूपेणबलेनविभवेनच॥ त्रिलोक्यांयदिकोपिस्यात्तंपतिंप्रवृणोम्यहं॥३॥ वृ

ना·पं हिंस्यं तं निशुंभं च प्रतिज्ञा मे पुरा कृता॥ तस्माद्युध्यस्व जित्वा मां विवाहं विवल्कुरुष्व
१०३ त्वं वै तदा त्वया शात तस्य कार्यसिध्यये॥ संग्रामं कुरु पातालं गच्छ वा पतिता सह॥५
व्यासउ॥ तच्छ्रुत्वा वचनं देव्याः स दैत्यो मर्षपूरितः॥ मुमोच तरसा बाणान् सिंहस्यो
परि दारुणान्॥६॥ अंबिकाचापनिर्मुक्तैः कणक्लिष्टैः शिलाशितैः॥ देवीबाण्या
हतः पापो मूर्छ्छ भिापरस्थोपरि॥७॥ पतिते रक्तबीजे तु हाहाकारो महानभूत्॥ से
निकास्तु कस्तुः सर्वे हा हतास्मेति विब्रुवन्॥८॥ ततो वु वा रवं श्रुत्वा शुंभः परमदारु
णं॥ उद्योगं सर्वसैन्यानां दैत्यानामादिदेश ह॥९॥ शुंभउ॥ निर्यांतु दानवाः सर्वे कां
बोजाः सबलैर्वृताः॥ अन्येप्यतिबलाः शूराः कालिकेया विशेषतः॥१०॥ व्यासउ॥
इत्याज्ञप्तं बलं सर्वं शुंभेन च चतुर्विधं निर्जगाम मराविष्टं देवी समरमंडले॥११॥ तमा

गच्छंतमालोक्य चंडिका दानवं बलं॥ घंटानादं चकाराशु ज्याघषं जयदं शुभं॥१२॥ आ
स्वनं शंखनादं च चकार जगदंबिका॥ तेन नादेन संजाता काली विस्तारितानना॥
१३॥ श्रुत्वा तं निनदं घोरं सिंहो देव्याश्च वाहनं जगर्ज सोपि बलवान् जयन् नय
मद्भुतं॥१४॥ तन्निनादमुपश्रुत्य दानवाः क्रोधमूर्छिताः॥ चिक्षिपुरायुधान्सर्वे
देवीं प्रति महाबलाः॥१५॥ तस्मिन्नेवायते युद्धे दारुणे लोमहर्षणे॥ ब्रह्मादीनां च
देवानां शक्तयश्चंडिकां ययुः॥१६॥ यस्य देवस्य यद्रूपं यत्नामयच्च वाहनं॥ ताद
ृग्रूपास्तदा देव्या प्रययुः समरांगणे॥१७॥ ब्रह्माणी वरदा रूढा साक्षसूत्रकमं
डलुः॥ आगता ब्रह्मणः शक्तिः ब्रह्माणीति प्रतिष्ठिता॥१८॥ वैष्णवी गरुडारूढी
शंखचक्रगदाधरा॥ पद्महस्ता समायाता पीतांबरविभूषिता॥१९॥ शांकरी च

ना·पं· हषारूढा शंखचक्रगदाधरा॥ चंशार्धधारिणी देवी तथा हि वलया शिवा॥१९॥ कौ
मारी मयूरारूढा शक्तिहस्ता वरानना॥ वज्रहस्ता तिन्द्रषाद्या संयामाभिमुखा
१०४ ययु॥२२॥ याम्या महिषमारूढा दंडहस्ता भयप्रदा॥ समायाता च संग्रामे यम
रूपा सुविस्मिता॥२३॥ वाराही शूकराकारारूढा प्रेतासना वृता॥ नारसिंही
नृसिंहस्य सदृशं बिभ्रती वपु॥२४॥ तथैव वारुणी शक्तिः कौवेरी च मदोत्कटा
एवंविधास्तदाकारा राययुः स्वबलैर्वृताः॥२५॥ आगतास्ताः समालोक्य देवी मुद
मवाप हा॥ स्वस्यामुमुदिरे देवा दैत्याश्च भयमाययुः॥२६॥ ताभिः परिवृतस्तत्र
करो लोकशंकरः समागम्य च संग्रामे चंडिकामित्युवाच ह॥२७॥ इत्यताम
सुराः शीघ्रं देवानां कार्यसिद्धये॥ शुंभं चैव निशुंभं च ये चान्ये दानवाः स्थिताः

२८॥ हत्वा दैत्यबलं सर्वं कृत्वा च निर्भयं जगत्॥ स्थानिस्थानि च धिष्ण्यानि समाग
छंतु शक्रयः॥२९॥ देवा पश्यन्तु जः संतुष्टा स्वर्णायजने रताः ब्राह्मणाः संतुसं
तुष्टाः सर्वे स्थावरजंगमाः॥३०॥ शम्यानु तथोत्पाता दृश्यन्ते तथा पुनः॥ घनाः
कालेप्रवर्षन्तु कृषिर्बहुफलास्तथा॥३१॥ ॥व्यास उ॥ ॥एवं ब्रुवति देवेशे शंकरे रि रो
नयंकर॥ चंडिकायाः शरीरात्तु निर्गता शक्तिरद्भुता॥३२॥ भीषणातिप्रचंडा च शि
वाशतनिनादिनी॥ घोररूपा च पंचास्यमित्युवाह सन्निवः॥३३॥ देवदेव ब्रजाशु
त्वं दैत्यानामधिपं प्रति॥ दूतत्वं कुरु कामारे ब्रूहि शुंभं स्मराकुलं॥ निशुंभं च मदो
त्सिक्तं वचनान्मम शंकर॥ मुक्त्वा त्रिविष्टपं यातु पूयं गच्छतु मा शुवे॥३५॥ देवाः स
र्वे तु स्वयां तु तु राषाड्ख्यासनं सुतं॥ भागो तु त्रिदिवस्थानं यज्ञभागांश्च देवता॥३६

ना·पं· देवदेवप्रजाश्चत्वंदैत्यानामधिपंप्रति॥ इतत्वंकुरुकामारेब्रूहिशुंभंमहासुरं॥३४
निशुंभंचमहोत्सिक्तंवचनान्ममशंकरं मुक्त्वात्रिविष्टपंयातुयूयंगच्छतुमाशुचे॥३५
१०५ देवाःस्वर्गसुखंपांतुतुराषाडस्तमनंतसं॥ प्राप्नोतुत्रिदिवंस्थानंयज्ञभागांश्चदेव
ता॥३६॥ जीवितेच्छायुष्माकंयदिकालंमहत्तरं तर्हिगच्छंतुतरसापातालंयत्रदा
नवाः॥३७॥ अथवाबलमास्थाययुद्धेच्छामरणायचेत्॥ तदागच्छंतुतृप्यंतुमच्छि
वाःपिशितेनवः॥३८॥ ॥व्यासउ०॥ ॥तच्छ्रुत्वावचनंतस्याःशूलपाणिस्त्वरान्वि
तः॥ गत्वाहदैत्यराजानंशुंभंसंसदिसंस्थितं॥३९॥ ॥शिवउ०॥ ॥राजन्दूतोहमं
बायास्त्रिपुरांतकरोहरः॥ त्वत्सकाशमिहायातोहितकृत्तुनिवासिनं॥ त्यक्त्वास्वर्गं
तथाभूमिंयूयंगच्छंतुसत्वरं॥ संग्रामेवोहनिष्यामिसर्वानिवाहमाशुवै॥४१ ॥

व्यासउ०॥ इतितस्यवचःश्रुत्वाशंकरस्यचदानवाः॥ बभूवुःक्रोधयुक्तास्तेप्रत्याया
ताश्चशूलभृत्॥४२॥ ययासौप्रेरितःशंभुर्दूतत्वेदानवान्प्रति॥ शिवदूतीतिवि
ख्याताजातात्रिभुवनेखिले॥४४॥ तेपिश्रुत्वावचोदेव्याःशंकरोक्तंसुदुष्करंसु
धायनिर्ययुश्शीघ्रंशिताःशस्त्रपाणयः॥४५॥ तरसारणमागत्यचंडिकांप्र
तिदानवाः॥ ववर्षुःशरजालानिरोषयुक्तासमंततः॥४६॥ देवीचिच्छेदतरसा
बाणैःशस्त्राण्यनेकशः॥ निर्जघानशरैस्तीक्ष्णैःकर्णाकृष्टैःशिलाशितैः॥
४७॥ कालिकाशूलपातेनत्वन्नादाशक्तिविदारितान् कुर्वतीव्यचरत्तत्रभक्षयं
तीचदानवान्॥४८॥ कमंडलुजलाक्षेपगतप्राणान्महाबलात्॥ ब्राह्मणीचा
करोत्तत्रदानवान्समरांगणे॥४९॥ माहेश्वरीवृषारूढात्रिशूलेनातिरंहसा॥

भा॰पं॰ जघानदानवान्संख्ये पातयामास भूतले ॥५०॥ वैष्णवी चक्रघातेन गदापातेन दा
१०६ नवान् ॥ गतप्राणांश्चकारोग्रा चोत्तमांगविवर्जितान् ॥५१॥ ऐंद्री वज्रप्रहारेण पात
यामास भूतले ऐरावणकराघातपीडितान्दैत्यपुंगवान् ॥५२॥ वाराही तु
उंडघातेन दंष्ट्राग्रघातनेन च ॥ जघान क्रोधनेयुक्ता शतशो दैत्यदानवान् ॥५३॥
नारसिंही नखैस्तीक्ष्णैर्दारितान्दैत्यपुंगवान् ॥ नदयंती चचाराशु ननाद च मु
हुर्मुहुः ॥५४॥ शिवदूती साट्टहासैः पातयामास भूतले ॥ तांश्चखादाथ चा
मुंडा कालिका च त्वरान्विता ॥५५॥ शिवसंस्था च कौमारी कराक्लिष्टैः शिली
मुखैः निजघान रणे शत्रून्देवानां च हिताय वै ॥५६॥ वारुणीपाशसंब
धान्दैत्यान्समरमस्तके पातयामास नष्टेष्टान्मूर्छितान्गतजीवितान् ॥५७

एवं मातृगणे जीवन्नतिवीर्यमदान्वितं मर्दितं दानवसैन्यं पलायनपरं त्वभू
त् ॥५८॥ बुबारवस्तु सुमहान्भूत्तत्र बलार्णवे ॥ पुष्पवृष्टिं ततो देवाश्चक्रुर्देव्या
गणोपरि ॥५९॥ तच्छ्रुत्वा निनदं घोरं जयशब्दं च दानवाः ॥ रक्तबीजस्तु कोपात्तु
दृष्ट्वा दैत्यान्पलायनः ॥६०॥ गर्जमानांस्तथा देवान्वीक्ष्य दैत्यो महाबलः रक्त
बीजोस्तु तेजस्वी रणमभ्याययौ तदा ॥६१॥ सायुधो रथसंविष्टः कुर्वन्नादम
द्भुतं ॥ आजगाम तदा देवीं क्रोधरक्तेक्षणोसुरः ॥६२॥ ॥इति श्रीभागवते म
हापुराणे पंचमस्कंधे रक्तबीजसंग्रामे अष्टाविंशोऽध्यायः ॥२८॥ ॥व्यास उ॥
वरदानमिदं तस्य दानवस्य शिवार्पितं ॥ अत्यद्भुतं नरेश त्वं शृणु तत्र ब्रवीम्यहं
२९॥ तस्य देहाद्रक्तबिंदुर्यदा पतति भूतले ॥ समुत्पतंति दैत्यास्तद्रूपास्तत्पराक्र

ना॰पं॰ मा॥२॥ असंख्यातामहावीर्यद्दानवारक्तसंभवाः॥ प्रनवंलितिरूपेण स्तोत्स्य
१०७ स्तुष्टुतोवरः॥३॥ सतेनवरदानेनदर्पितः क्रोधसंयुतः अस्यगात्ररसांसंख्येह
तुदेवीसकालिकां॥४॥ सदृष्ट्वा वैष्णवीशक्तिंगरुडोपृष्ठसंस्थितां शक्तानघा
नदैत्येंद्रस्तांच कमललोचनां॥५॥ गदयावारयामासशक्तिंसाशक्तिसंभुता
अताडयच्च चक्रेण रक्तबीजंमहासुरं॥६॥ रथांगाहतदेहात्तु बहुसुस्रावशोणि
तं वज्राहतगिरेःशृंगान्निर्जराश्वगैरिकात्॥७॥ यत्रयत्रतदाम्भोपतितारक्त
बिंदवा॥ समुत्पन्नास्तकाराः पुरुषाश्चसहस्रशः ऐंद्राणीचततोवेगात् वज्रेण नि
जघानतं॥ रक्तबीजंक्रुधाविष्टनिःससारचशोणितं॥८॥ ततस्तस्माद्दानवाजा
तारक्तबीजात्यनेकशः॥ तदीयाश्चितदाकाराःसायुधायुधदुर्दरा १० ब्रह्माणीब्रह्म

दंडेनक्रुपितात्यहनच्छरं॥ माहेश्वरीत्रिशूलेनदारयामासदानवं ११ नारसिं
हीनखाग्रेणतंविव्याधचमहासुरं॥ अहनत्तुंडघातेनक्रुधातरात्क्ष्साधमं॥१२
कौमारीचतथाशक्त्यावक्षस्यताडयच्छरं सोपिक्रुधोशराघाते ————
———॥१३॥ गदाशक्तिप्रहारेणछलाखंडंपृथक्पृथक्॥ शक्तैश्चैत्रशराया
तैर्विव्याधातिप्रकोपिता॥१४॥ तस्यशस्त्राणिचिछेदचंडिकास्वशरैःसितैः॥
जघानात्यैश्चविशिखैस्तंक्रुपितान्वशं १५ तस्यदेहात्तुसुस्रावरुधिरंबहु
धात्तुयत्॥ सन्नद्धैःसायुधैःकामंकर्वद्भिर्युधमद्भुतं॥१६॥ प्रहरंतश्चतानदृष्ट्वार
क्तबीजाननेकशः॥ जयन्तीतासुरास्तत्रविषण्णाशोककर्शिता॥१७॥ कथमद्यत्व
यंदेत्यागमिष्यंतिसहस्रशः॥ महाकायामहावीर्यादानवारक्तसंभवाः॥१८॥ एके

मा·पं· वचंडिकाकामेतथाकामेश्चमातरः॥ एतान्निहनिवाःसर्वेजितमन्याकष्टमेवतत्॥२०॥शुं
१०८ भोवाथनिशुंभोवासहसाबलसंवृतः॥ आगमिष्यतिसंग्रामेततःकिंस्यादहोन
यं॥२१॥ ॥व्यासउ॥ ॥चामुंडेकरुविस्तीर्णंविदनंत्वरिताकुतं मच्छस्त्रघातसंभू
तरुधिरंपिबसत्वरा॥२२॥ नत्वंकरुसुसंभूताम्हानवानद्यकामतः॥ इनि
ष्यामिरारैस्तीक्ष्णोगदासिमुशलैस्तथा॥२३॥ तथाकुरुविशालास्यपानंत
द्रुधिरस्यच॥ बिंदुमात्रंयथाभूम्यांनपतत्यपिसांप्रतं॥२४॥ भक्ष्यमाणास्त्व
यादैत्यानचोत्पत्स्यंतिचापरे॥ एवमेषांक्षयंनूनंभविष्यंतिनचान्यथा॥२५॥
ग्रातयिष्याम्यहंकामंत्वमश्निसत्वरारिपून्॥ पिबतीहतजःसर्वंयातनमानारिसं
तये॥२७॥ इत्यदैत्यक्षयंहत्वा राजंसुरालयं॥ इंद्रायसुस्थिरंसर्वंगमिष्यामिय

थासुखं॥२८॥व्यासउ॥ ॥इत्युक्त्वांबिकयादेवीचामुंडाचंडविक्रमा॥ पपौचक्षत
जंसर्वंरक्तबीजशरीरज॥२९॥ अंबिकातंजघानाशुखड्गेनमुशलेनच॥ च
खाददेहराकलान्चामुंडातानृकशोदरी॥३०॥ सोपिक्रुधोगदाघातैश्चामुं
डांसमताडयन् तथापिचपपावाशुक्षतजंतमक्षयत्॥३१॥ येन्येरुधि
रजाःकूरारक्तबीजमहाबलाः तेपिनिपातिताःसर्वेनिहिताःगतशोणिताः
३२॥ कत्रिमाभक्षिताःसर्वेयस्तुस्वानाविकोसुराः॥ सोपिनिपातितोहत्वाख
ड्गेनातिविकंपिता ३३ रक्तबीजहतेशेषेयेचान्येदानवारणे पलायनंततः
कृत्वागतास्तेनयकंपिता॥३४॥ हाहतेतिभुवनस्तेशुंभंप्रोचुस्तुविकलाः॥ रु
धिररक्तदेहाश्चविगतास्राविचेतसः॥३५॥ राजन्नंबिकयारक्तबीजोसोवि

निपातितः॥ चामुंडा तस्य देहात्तु पपौ सर्वं च शोणितं॥३६॥ ये चान्ये दानवाः शू
रा वाहनेनाति रंहसा सिंहेन निहताः सर्वे काश्चाच्च भक्षिता परे॥३७॥ वयंलोक
थयितुं राजन्नागता युधि चेष्टितं॥ चरितं च तथा देव्याः संग्रामे परमाद्भुतं॥३८॥
अजेयेयं महाराज सर्वथा दैत्यदानवैः॥ गंधर्वासुरयक्षैश्च पन्नगोरगराक्षसै
ः॥३९॥ अन्यास्तत्र गता देव्यः इंशप्रमुखान्नृपं॥ युध्यमाना महाराज वाहनै
रायुधैर्युता॥४०॥ ताभिः सर्वं हतं सैन्यं दानवारायुधेः॥ रक्तबीजोपि राजेंद्र तर
सा विनिपातितः॥४१॥ एकापि ऽसह्या देवी किं पुनस्ताभिरन्विताः सिंहोपि हंति
संग्रामे रक्षसानमितप्रभः॥४२॥ अतो विचार्य सचिवैर्युक्तं तद्विधीयतां नवैर
मनया युक्तं संधिरेव सुखप्रदं॥४३॥ आश्चर्यमितदखिलं यन्नारी हंति राक्षसान्

रक्तबीजोपि निहतः पीतस्यास्तिशोणितं॥४४॥ अन्येपि पातिता दैत्याः संग्रामे
विकयानृप चामुंडया च मांसं वैन क्षितं सकलं रणे॥४५॥ वरं पातालगम
नं तस्याः सेवाथवा तदा॥ संग्रामं वा महाराज कार्यमेकया सह॥४६॥ न नारी
प्राकृता त्वेषा देवकार्यार्थसाधनी॥ मायेयं परमा देवी सिंहस्योपरिसंस्थिता
॥४७॥ व्यास उ॥ इति तेषां वचः सत्यं श्रुत्वा कालविमोहितः मुमूर्षुः प्रत्युवाचेदं
शुंभः प्रस्फुरिताधरः॥४८॥ ॥संजय उ॥ ॥देवीं गच्छं तु पातालं शरणं वा नमा
तुराः॥ हनिष्याम्यहमद्यैव तां तां ताश्च समुद्यतः॥४९॥ जित्वा सर्वान्सुरान्नो
कला राज्यं सुरालये॥ — — — — — — — हिमः पातालं प्रविवेशाह॥५०॥ निहत्य
पार्षदान्सर्वान् रक्तबीजमुखान् रणे॥ प्राणप्राणप्रयं गंतास्मि रथारूढो

रणाजिरे ॥५१॥ हत्वा तामागमिष्यामि नागमिष्याम्यतोन्यथा ॥ त्वं तु सेनायुतो
वीर पार्ष्णिग्राहो भवस्व मे ॥५२॥ त्राणं त्राणाय गन्तास्मि हित्वा स्वविपुलं यशः ॥ म
रणं त्वं निवार्यं वै प्राणिनां कालकल्पितं ॥५३॥ तद्भयात्कन्मनोपात्रं त्यजेयं य
शउज्वलं ॥ निशुंभोहं गमिष्यामि रथारूढो रणाजिरे ॥५४॥ हत्वा तामागमि
ष्यामि नागमिष्याम्यतोन्यथा ॥५५॥ त्वं तु सेनायुतो वीर पार्ष्णिग्राहो भवस्व मे ॥
तरसा तां शरैस्तीक्ष्णैर्नयिष्यामि यमालयं ॥ निशुंभ उवाच ॥ अहमद्य हनिष्यामि
गत्वा दुष्टां च कालिकां ॥ आगमिष्याम्यहं शीघ्रं गृहीत्वा तामथांबिकां ॥५६॥ मादि
ता कुरु राजेंद्र वराक्यास्तु कारणे ॥ केषा बाला धकमेवाद्भुतं यं विश्ववशंकरं ॥५७
त्वत्कीर्त्तिं विपुलां भ्रातर्नुत्सनो गानतुत्रमान् ॥ आनयिष्याम्यहं कामं मानिनां

मानसंयुतां ॥५८॥ मयि तिष्ठति ते राजन् न युक्तं गमनं रणे ॥ गत्वाहमानयिष्या
मि तवार्थे वै जयश्रियं ॥५९॥ व्यास उ० ॥ ॥ इत्युक्त्वा तरं —— — न्बलगर्वितः ॥ र
थमास्थाय विपुलं सन्नद्धः सबलावृतः ॥५९॥ जगाम नगरात्तूर्णं संगरे कृतमंग
लः ॥ संस्तुतो बंदिसूतैश्च सायुधः सपरिस्कर ॥६०॥ ॥ इति श्रीभागवते महापु
राणे पंचमस्कंधे देवीमाहात्म्ये एकोनत्रिंशोऽध्यायः ॥२९॥ व्यास उ० ॥ निशुंभो
निश्चयं कृत्वा मरणाय जयाय वा ॥ सोद्यमः सबलः श्रीरणे देवीमुपाययौ ॥
१॥ तत्राजगाम शुंभोपि स्वबलेन समावृतः ॥ प्रेक्षकोऽभूद्रणे राज्ञा संग्रामरस
पंडिता ॥२॥ गगने संस्थिता देवास्तदा नपदलावृताः ॥ द्रष्टुकामास्तु संग्रामं सें
द्रयक्षगणास्तथा ॥३॥ निशुंभो थ रणे गत्वा धनुरादाय शार्ङ्गवं ॥ चकारवारह

ना.पं. हिंसः त्रीषयन्नू जगदंबिकां ॥४॥ मुंचंतं शरजालानि निशुंभं चंडिकारणे ॥ वी
१११ क्षाहायधनुः श्रेष्टं जहास सुस्वरं मुहुः ॥५॥ उवाच कालिकां देवी पश्यमूर्षतमे
तयो ॥ मरणायैवागतौ कामं मम समीपमिहाधुना ॥६॥ दृष्ट्वा दैत्यवधं घोरं रक्षवा
जात्ययं तथा ॥ जयाशां कुरुतस्त्वेतौ मोहितौ सुरमायया ॥७॥ आशा बलव
ती ह्येषा न जहाति नरं कचित् ॥ नष्टं कृतबलं नष्टं गनपश्यं विचेतसं ॥८॥ आ
शापाशनिबद्धौ ह्येतौ युद्धाय समुपागतौ ॥ निहंतमौ मया कामं शुंभं नि
शुंभकौ ॥९॥ आसन्नमरणावेतौ संत्राप्तौ देवमोहितौ ॥ पश्यतां सर्वदेवानां
हनिष्याम्यहमासुवै ॥१०॥ व्यास उ॰ ॥ इत्युक्त्वा कालिकां चंडीकर्णाकृष्टशरोत्क
रैः ॥ छादयतयोः परस्परं युधं बभूवातिभयानकं ॥१२॥ केशरी केशबालानि

धुन्वानः सैन्यसागरं ॥ गाहयामास बलवान् सरसीं वारणो यथा ॥१३॥ नखैर्दंतै
र्ममर्दजीवो दानवान्पुरुतः स्थितान् ॥ चखाद कश्चिद्विशीर्णांगान्गजानिव मदो
त्कटान् ॥१४॥ एवं विमथ्यमाने तु सैन्ये केसरिणा तदा ॥ अन्यधावन्निशुंभो थावि
कृष्टकार्मुकः ॥१५॥ अन्येपि क्रुधा दैत्येशा देवीं हंतुमुपाययुः ॥ संदष्टदंतवसना
रक्तनेत्रा ह्यनेककराः ॥१६॥ तत्राजगाम तरसा शुंभः सैन्यसमाहतः ॥ निहत्य का
लिकां कोपात् गृहीतुं जगदंबिकां ॥१७॥ तत्रागत्य ददर्शाजी अंबिकां च पुरः स्थि
तौ ॥ रौद्ररससंयुक्तां कां तां शृंगाररासनासमिश्रितां ॥१८॥ तां वीक्ष्य विपुलापांगीं
त्रैलोक्यवरसुंदरीं ॥ सुचारुनयनां रम्यां कौधरक्ते क्षणां तथा ॥१९॥ विवाहेच्छां
परित्यज्य जयाशां दूरतस्तथा ॥ मरणे निश्चयं कृत्वा तस्यावाहितकार्मुकः ॥२०

भा·पं· तं दृष्ट्वा दानवं देवी स्मितपूर्वमिदं वचः ॥ बभाषे मृ एवतां ते घांदैत्यानां रयामस्तके
२१॥ गच्छध्वं पामरा कामं पाताले वा जलार्णवे ॥ जीविताशां स्थिरां कृत्वा सत्क्षात्रे
११२ वायुधानि च ॥२२॥ अथवा मच्छरांघात कृतप्राणा रणाजिरे ॥ प्राप्य स्वर्गसुखं
सर्वक्रीडं तु विगतज्वरा ॥२३॥ कातरत्वं च शूरत्वं नन्न कर्मैव सर्वथा दृष्ट्वामृत्यु
यद्दानं वै यातु सर्वं यथासुखं ॥२४॥ व्यास उ॥ ॥ इत्याकर्ण्य वचस्तस्या निशुंभो
मदगर्वितः ॥ निशितं खड्गमादाय चर्म चैवाष्टचंद्रकं ॥२५॥ धावमानस्तु तर
सा विनासिंहं मदोत्कटं ॥ जघान निबलान्मूर्ध्नि त्रामय जगदंबिका ॥२६॥ त
तो देवी स्वगदया वंचयित्वासिपातनं ॥ ताडयामास तं बाहोर्मूले परशुना तदा
२७॥ खड्गेन निहतः सोपि बाहुमूले महाबलः ॥ संस्तभ्य वेदनां तूर्यो जघान चं

डिकां तदा ॥२८॥ सापि घंटास्वनं घोरं चकारस्तनयद्दुत्तां ॥ पपौ पुनः पुनः पानं
निशुंभं हंतुमिच्छति ॥२९॥ एवं परस्परं युद्धं बभूवाति भयप्रदं ॥ देवानां दान
वानां च मुनीनां भावितात्मनां ॥३०॥ पलादाः पक्षिणः क्रूराः सारमेयाश्च जंबु
काः ॥ ननृतुश्चापि संतुष्टाः गृध्राः कंकाश्च वायसाः ॥३१॥ रणे नृत्यन्ति तूपिष्टाः प
तिताः सुरवर्मके ॥ रुधिरस्रावसंयुक्ता गजाश्वदेहसंकुला ॥३२॥ पतितान्दा
नवान्दृष्ट्वा निशुंभोतिरुषान्वितः घययौ चंडिकां तूर्णं गदामादाय दारुणं।
३३॥ सिंहं जघान गदया मासयसकसंमल्लके मदगर्वितः ॥ ब्रह्मल्पचस्मितं कृता
पुनर्देवीमताडयत् ॥३४॥ सापि तं कंपिताती वनिशुंभं पुरतः स्थितं ॥ प्रहरंतं
समीक्ष्याथ देवी वचनमब्रवीत् ॥३५॥ तिष्ठ मंद मतेतावत् यावत्खड्गमिदं

ना॰ पं॰
११३

तव॥श्रीवाद्यांत्रेरयामास्यगंतासियमसादनं॥३६॥ ॥ऋ॥सउवाच॥रस्युक्त्वात
रसादेवीप्रसार्यखड्गमाहितं॥चिछेदमस्तकंतस्यनिशुंभस्याशुवैष्णवी॥३७॥सछि
न्नमस्तकोदैत्याकबंधातीवदारुणः॥बभ्रामचगदापाणिस्त्रासयन्देवताग
णान्॥३८॥देवीतस्यशितैर्बाणैश्छिछेदचरणौकरौ पपातोव्यथितःपापोगता
सुःपर्वतोपमः॥३९॥तस्मिन्निपतितेदैत्येनिशुंभेन्नीमविक्रमे॥हाहाकारो
महानासीत्तसैन्येत्तयकंपिते॥४०॥त्यक्त्वायुधानिसर्वाणिसैनिकाःक्षतजाः
प्लुताः जग्मुर्बुबारवंसर्वेक्रुर्वाणाराजमंदिरं॥४१॥तानागतान्संप्रेक्ष्यशुंभः
शत्रुनिषूदनः पप्रच्छकनिशुंभोसौकथंयूयंपलायिताः ४२ तच्छ्रुत्वावचनंरा
ज्ञस्तेप्रोचुःप्रणताःनृपं॥राजन्तेनिहतोभ्राताशेतेसमरमूर्धनि॥४३॥

तयानिपातिताःशूराःयेचतेप्यनुजानुगाः॥वयंतांकथयितुंसर्वेरिवांतंसमुपा
गताः॥४४॥निशुंभोनिहतस्तत्रकामरूचंडिकयाधुना॥नहियुधस्यकालोद्यतव
राजन्रणांगणे॥४५॥नानारूपधरातीव्रमायायुद्धविशारदा॥विचित्रभूषणा
देवीसर्वायुधधराशुभा॥४६॥वृत्तंतस्मिन्स्थितादेवास्तांस्तुवंत्यकृतोभया॥कृत
कार्याच्चकवर्णावैष्णवीपरमाद्भुता॥४७॥देवकार्यसमुद्दिश्यकाप्ययंपरमां
गता॥इत्थंदैत्यकुलंनूनंघ्रातेतिपरिचिंतय॥४८॥नैषाप्राकृतापोषैवदेवी
शक्तिरनुत्तमा॥अचिंत्यचरिताकापिदुर्ज्ञेयादेवतैरपि॥४९॥गहनागुरुच
रिताकाला।रात्रीरिवापरा॥अपारापारगापूर्णासर्वलक्षणसंयुता॥५०
अतस्तेनचयद्दृष्टंतथैवानुमितिःकृता॥ गतनैविजयोराजन्नविमृष्यकुरु

संगरं॥५१॥ पलायनं परो धर्मः सर्वथा देहरक्षणं॥ रक्षिते किल देहेस्मिन् कालेस्मि
न्मुखतां गते॥५२॥ संग्रामे विजयो राजन्न भविता तेन संशयः॥ कालः करोति ब
लिनं समये निर्बलं क्वचित्॥५३॥ तं पुनः सबलं कृत्वा जयायोपस्थापितं हि॥ दा
तारं याचकं कालः करोति समये क्वचित्॥५४॥ भिक्षुकं धनदातारं करोति सम
यांतरे॥ विष्णुः कालवशो नूनं ब्रह्मा पार्वतीपतिः॥५५॥ इंद्राद्या निर्जराः सर्वे
काल एव प्रभुः स्वयं॥ तस्मात्कालं प्रतीक्षस्व विपरीतं तवाधुना॥५६॥ सन्मु
खं देवतानां च दैत्यानां नाशहेतुकं॥ एक एव गतिर्नास्ति कालः किल नृपते॥
५७॥ नानारूपधरः सोस्ति ज्ञातव्यं तस्य चेष्टितं॥ कदाचित्संभवो नृणां कदाचित्प्र
लयस्तथा॥५८॥ उत्पत्तिहेतुः कालोन्यः क्षयहेतुस्तथापरः॥ प्रसन्नं ते महारा

जदेवाः सर्वे सवासवाः॥५९॥ करदास्ते कृताः कामं कालेन सन्मुखेन च॥ तेनै
व विमुखेनाद्य बलिनो बलयासुराः॥६०॥ निहतानि तोहे कालः करोति वस्तु
नाम्तुनं॥ नैवात्र कारणं कालो नैव देवाः सवासवाः॥६१॥ यथा ते रोचते राजन्
यथा कुरु विमृश्य च॥ कालोयं नाशहेतुस्ते दानवानां तथा पुनः॥६२॥ त्वरय
तो गतः शक्रो नम्रः संरंभे निरायुधः॥ तथा विष्णुस्तथा रुद्रो वरुणो धनदो यम
॥६३॥ तथात्वमपि राजेंद्र वीक्ष्य कालबलं महत्॥ पातालं गच्छ तरसा जीव
न्नत्र मया क्षमसि॥६४॥ मृते त्वयि महाराज नश्चात्र वस्ते सुहृदान्विताः॥ मंगला
नि प्रगायंतो विहरिष्यंति सर्वतः॥६५॥ ॥इति श्री भागवते महापुराणे देवी
माहात्म्ये पंचम स्कंधे त्रिंशोध्यायः॥३०॥ व्यास उ॥ ॥ इति तेषां वचः श्रु

मा·पं· तान्शुंभोदैत्यपतिस्तदा॥उवाचसैनिकानास्तुकोपाकुलितलोचनः॥१॥शुं
नउ॥शाल्मा: किंबूतदुर्वाचिंकृत्वाजीवितुमुत्सहे॥निहत्यसचिवान्भ्रातॄन्नि
११५ र्लज्जोविचरामि किं॥२॥कालःकर्त्ताशुभानांवाशुभानांबलवत्तरः॥काचिंताम
मउर्वारैतस्मिन्नीशेव्यरूपके॥३॥यद्भवतुतद्भवतुयत्करोतिकरोतुतत्॥नमे
चिंतास्तिकुत्रापिमरणाज्जीवनात्तथा॥४॥सकालोप्यन्यथाकर्त्तुंनाविनोनेश
तेकिल॥नवर्षतिचपर्जन्योश्रावणेमासिसर्वथा॥५॥कदाचिन्मार्गशीर्षेवापौ
षेमाघेथफाल्गुने॥अकालवर्षतिवाशुकालस्यकिंबलंतदा॥६॥कालोनिमि
त्तमात्रंतुदैवंहिबलवत्तरं॥दैवेननिर्मितंसर्वंनान्यथाभवतीसदः॥७॥दैवमेव
परंमन्येधिक्पौरुषमनर्थकं॥जेतायःसर्वदेवानांनिशुंभोप्यतयाहतः॥८॥रक्त

बीजोमहाशूरःसोपिनाशंगतोयदा॥तदाहंकीर्तिमुत्सृज्यजीविताशांकरोमि
किं॥९॥प्राप्तेकालेस्वयंब्रह्मापरार्धद्वयसंमिते॥निधनंयातितरसाजगत्क
र्त्तास्वयंप्रभुः॥१०॥तथैववह्निगुणेकालेशंकरःशांतिमेतिच॥तथैववह्निगुणेवि
ष्णुर्मरणायोपकल्पते॥११॥चतुर्युगसहस्रेतुब्रह्मणोदिवसेकिल॥पतंतिम
नवःपंचनवचेंद्रास्तथापुनः॥१२॥काचिंतामरणेमूढाःनिश्चलेदैवनिर्मिते॥महीं
महीधराणांचनाशःसूर्यशशांकयोः॥१३॥जातस्यहिध्रुवंमृत्युर्ध्रुवंजन्ममृतस्यच
अध्रुवेस्मिन्शरीरेतुरक्षणीयःशशाःस्थिरं १४ रथंमेकल्पतांशीघ्रंगमिष्यामिर
णाजिरे जयोवामरणंवापिभवतुदैववशात्प्रतं॥१५॥इत्युक्त्वासैनिकान्शुंभोरथमा
स्थायसत्वरः॥प्रययावंबिकायत्रसंस्थिताहिमालये॥१६॥सैन्यंप्रचलितंतस्मा

गेतच्चतुर्विधं॥ हस्त्यश्वरथपादातिसंयुतं बहुसायुधं॥१७॥ तत्र गत्वा चलेत्तु
ङ्गः संस्थितां जगदंबिकां॥ त्रैलोक्यमोहिनीं कांतामपश्यत्स इमां स्थितां॥१८॥
सर्वाभरणभूषाढ्यां सर्वलोकसंयुतां॥ स्तूयमानां सुरैः खस्थैर्गंधर्वैर्यक्षकिंनरैः॥१९
पुष्पैः सुपूज्यमानांश्च मंदारः पारियाद्रवैः॥ कंकणिशंखनिर्ह्रादंघंटानादमनोह
रं॥२०॥ दृष्ट्वा तं मोहमगमच्छंभुः कामविमोहितः॥ पंचबाणहतः कामं मनसा स
मचिंतयत्॥२१॥ सुकुमारातितन्वंगी सद्यःप्रकटयौवना॥ चित्रमेतदसौ बाला
कामभावविवर्जिता॥२२॥ कामकांतासमा रूपे सर्वलक्षणलक्षिता॥ स्वविका
राकिमेतन्नुघ्नंति सर्वान्हि ह्यबलान्॥२३॥ किमुपायो मया ह्यद्य येन मे वशगा भवेत्॥
मंत्रायंत्रादरानाहीसाधनेनातियंत्रिता॥२४॥ सर्वमंत्रमयी ह्येषा मोहिनी म

दगर्विता॥ लध्यलसाकथंमेस्याद्वशगा वरवर्णिनी॥२५॥ पातालगमनं मेघ
नयुक्तं समरांगणात्॥ सामदानविभेदैश्च नेयं साध्या महाबला॥२६॥ किंक
रोमि क्व गच्छामि विषमे समुपस्थिते॥ मरणं नोत्तमं लघ्वस्त्रीकृतयशनाशक
न्॥२८॥ मरणं त्वृषिभिः प्रोक्तं संगरे मंगलास्पदं॥ यत्र समानबलयो युध्यत
युध्यतः किल॥२९॥ प्राप्तोयं दैवरचिता नारीनरत्नातोत्तमा नाम्नायास्मत्तु
जायेह सर्वथातिबलावला॥३०॥ वृथा किं साम वा क्वानि सांप्रतं तत्र वीर्य्यहं
हननायागता ह्येषा किं तु साम्राप्रसीदति॥३१॥ न दाने ह्यालितुं योग्या नो
नास्त्यत्र बुभुषिता॥ भेदस्तु विफलाः कामं सर्वदेववशानुगाः॥३२॥ सर्वथाम
रणं श्रेयो न संग्रामात्पलायनं॥ जयो वा मरणं वापि नवतेवस्थिरो भवं॥३३॥ अ

सउवाच॥ ॥इतिसंचिंत्यमनसाशुंभःसत्वान्वितोऽभवत्॥युद्धायसुस्थिरोभूत्वा
तामुवाचपुरस्थितां॥३४॥ कामंयुध्यस्वकांतेद्यश्रमायंतेपरिश्रमः॥ मूर्खासिकिल
नारीणांनायंधर्मःकदाचन॥३५॥ नारीणांलोचनेबाणाःभ्रुवौचैवशरासनं॥ हावा
न्यानिचशस्त्राणिपुमान्लक्ष्यंविचक्षणः॥३६॥ सन्नाहश्चांगरागोत्ररथश्चापिमनो
रथः॥ तूणंस्तारुण्यमतुलंहस्तीमानमदोत्कटः॥३७॥ मंदहलपितंनेरीचाहेनान
कदाचन युध्यमानावरानारीकर्कशोवाग्विहन्यते॥३८॥ अन्यास्त्रधारणंस्त्रीणांवि
डंबनमशंसकं लज्जैवभूषणंकांतेनचधार्यंकदाचन॥३९॥ स्तनौस्तंगोपनीयौवै
कथंयुद्धेरमर्षणे॥ किंमंदगमनंभूपागदामादायधावनं॥४०॥ बुद्धिराकालिका
नेत्रचामुंडापरनायका॥ चंडिकामंत्रमध्यस्थाजालनेसुस्वराशिवा॥४१॥ वाहनं

भा·ष· ४७॥ त्वरेणमुग्धां समालोक्य सुरा देवीं पुरःस्थितां॥ नाना इत्रणनं वाकिवः का
र्यं ब्रुवंतु नो॥४८॥ देवा ऊचुः॥ ॥ मोहयेनं रिपुं हत्वं देवानां चातिदुःखदं॥ य
२२ था विश्वसते देवान् तथा कुरु विमोहितं॥४९॥ व्यास उवाच॥ ॥ तथेत्युक्त्वा
भगवती तत्रैवांतरधीयत॥ स्थानि स्थानि च स्थानानि जग्मुर्देवा मुदान्वि
ता॥५०॥ इति श्रीभागवते महापुराणे षष्ठस्कंधे वृत्रोपाख्याने पंचमोध्या
यः॥५॥ व्यास उवाच॥ ॥ एवं प्राप्ता वरा देवास्तपयंतं तपोधनाः॥ जग्मुः स
र्वे प्पसंमं त्रह व्रत्स्याश्रममनुत्तमं॥१॥ ददृशुस्तत्र ते वृत्रं ज्वलंतमिव तेजसा॥ ध २२
क्ष्यंतमिव त्रीन् लोकान् ग्रसंतमिव चामरान्॥२॥ ऋषयोथ ततस्ते स ह
तमूचुः प्रियं वचः॥ देवकार्यार्थसाम सुक्तं रसालकं॥३॥ ऋषय ऊचुः॥

वृत्र वृत्र महाभाग सर्वलोकभयंकर॥ व्याप्तं त्वयैतत्सकलं ब्रह्मांडमखिलं
किल॥४॥ शक्रेण तव वैरं यत्तत्किं सुखविघातकं युवयोदुःखदं काम
चिंता हृदिकरं परं॥५॥ न त्वं स्वपिषि संतुष्टो न चापि मघवा तथा॥ सुखं स्व
पिति चिंतार्तः उभयोर्वैरिजं भयं॥६॥ युवयोर्युध्यतः कालो व्यतीतस्तु महानिह
पीडितेच प्रजाः सर्वाः सदेवासुरमानवा॥७॥ संसारे सुखं प्राप्य दुःखं हे
यमिति स्थितिः॥ न सुखं न च वैरस्य भवतीति विनिर्णयः॥८॥ संग्रामरसिकाः
शूराः प्रशंसंति न पंडिताः॥ सुखं स्मृत्वा च तुरा इंद्रियार्थविघातकं॥९॥ पुष्पै
रपि न योद्धव्यं किं पुनर्निशितैः शरैः॥ युद्धे विजयसंदेहो निश्चयं बाणताड
नं॥१०॥ दैवाधीनमिदं विश्वं तथा जयपराजयौ देवाधीनविति ज्ञात्वान

 योद्व्यं कदाचन॥११॥ कोलेयभोजनं स्वाध्यायायां शयनं तथा॥ परिच
 र्यापरान्नाय संसारे सुखसाधनं॥१२॥ किं सुखं सुरतः संरेषवाणदृष्टिन
यंकरे॥ खड्गपातातिरोइ चतथारातिसुखप्रदे॥१३॥ संग्राममरणात्स्वर्ग
सुखप्राप्तिरितिस्फुटं घलोन्ननपरं वाक्यं नोरनार्थनिरर्थकं॥१४॥ छित्वा
देहं व्यथां प्राप्य स्पृष्टं गात्रं कंककाकनिः॥ पश्चात्स्वर्गसुखावाप्तिः को वा वांछति
मंदधी॥१५॥ सख्यं भवतु तेहं वेश्याकेणसहनित्सदा॥ स्ववाप्स्यसि सुखं त्वं
च शक्रस्यापि निरंतरं॥१६॥ वयं च तापसाः सर्वे गांधर्वा विनिजाश्रमे॥ सु
खवासं गमिष्यामः शांतवैरधुनेववा॥१७॥ संग्रामे युवयोर्घोरैर्वर्तमाने दि
वानिशं॥ पीड्यते मुनयः कामं गंधर्वाः किंनरा नराः॥१८॥ सर्वेषां शांतिका
मा वां सख्यमिछुमहे वयं॥ मुनयस्त्वं च शक्रस्य श्रावं वंतु सुखं किल॥१९॥ म
धस्थात्र वयं हन्त्र युवयोः सख्यकारणे श पथं कारयित्वा च योजयामो मि
थः प्रियं॥२०॥ शक्रस्तु शपथान्कृत्वा यथोक्तांश्च तवाग्रतः॥ चित्तं ते प्रीति सं
युक्तं करिष्यति सुसांप्रतं॥२१॥ सत्याधारा धरा नूनं सत्येन च दिवाकरः तप
त्यं च यथा —— वायुः सत्येन वात्यथ॥२२॥ उद्वलानपि मयादिं मत्सत्येनैव वर्तु
चति॥ तस्मात्सत्येन सख्यं वां भवतु यथा सुखं॥२३॥ एकत्र शयनं क्रीडा
जलकेलिः सुरासनं॥ युवाभ्यां सर्वथा कार्यं कर्तव्यं सख्यमेव च॥२४॥ वा
स उ॥ ॥ महर्षिवचनं श्रुत्वा तानुवाच महामतिः॥ अवश्यं नगवंतो मेमा
निनीयास्तपस्विनः॥२५॥ भवंतो मुनयः कापि न मिथ्यावादिनो मतं॥ स

हाचारासुरं तान्न नविडः नकारणं॥२६॥ हतं वैरत्रांतेन तद्धेकामुकेनगत
घृणे॥ निर्लज्जे नैव कर्तव्यं सख्यं मतिमता सदा॥ निर्लज्जो यदुराचारी ब्रह्म
हा लंपटः शठः॥ न विश्वासस्तु कर्तव्यः सर्वथैव हि दुर्जने॥२७॥ भवंतो निपु
णाः कामं नरोहमतयः सदा॥ अनभिज्ञाः सुरांतत्वात्सरचित्राभिवादिनां
२९॥ मुनय ऊचुः॥ जंतुकः तस्यचोक्तो वेत्तु नाशुभस्य कर्मणः॥ यो हंत्वा
कुतः शांतिमाप्नुयात्स पचेतनः॥३०॥ विश्वासघातकं त्वरि नरकं यांति
निश्चयः॥ दुःखं च समवाप्नोति नूनं विश्वासघातकः॥३१॥ निःकृति ब्रह्म
घातीनां सुरामानां च निःकृति॥ विश्वासघातिनां नैव मित्रद्रोहकृतामपि
पि॥३२॥ समयं च हि सर्वत्र यथा तेचेत सिद्धं तं॥ तेनैव समयेनाद्य संधिस्या

न्नयो किल॥३३॥ इंद्र उ॥ न शुष्केण न चार्द्रेण नाश्मना न च दारुणा॥ न वज्रे
ण महाभाग न निशा न तथा॥३४॥ वध्योनेवयं विप्रेंद्रः शक्रस्य सह दैवतैः॥ ए
वं मे रोचते संधिः शक्रेण सह नान्यथा॥३५॥ व्यास उ॥ ऋषयस्ते तदा श्रुत्वा
दमित्येवमाहता॥ समयं श्रावयामासुस्तत्रानीय सुरेश्वरं॥३६॥ इंद्रोपि शप
थान्नत्र चकार विगतज्वरः॥ सोग्निकं पावकं कृत्वा मुनीनां सन्निधौ॥३७॥ इ
त्थं तु वचनैस्तस्य विश्वासमगमत्तदा॥ बभूव मित्रवच्छक्रे सह च यपिराय्यणः
॥३८॥ कदाचित्तं दनवेनेचोभौ कदाचिद्गंधमादने॥ कदाचिदुदधेस्तीरे मोद
मानौ विचेरतुः॥३९॥ एवं कृते च संधाने वृत्रः प्रमुदितोभवत्॥ शक्रोपि वधका
मः स तु पायावक चिंतयन्॥४०॥ संधान्वेषी समुद्विग्नः स्तदा सन्न घवा

एवंचिंतयतस्तस्यकालःसमभिवर्त्तत॥४१॥ विश्वासंपरमंप्राप्यहतःशक्रे
तिदारुणे॥ वृत्रस्यमरणोपायान्चिंतयन्सशचीपतिः॥४२॥ एवंकतिह

र्षाणिगतानिसमयेऽन्तरे॥४३॥ त्वष्टैकदासुतंप्राहविश्वरूपंकृतासने॥४४
पुत्रहस्त्रमहाभाग शृणुमेवचनंहितं॥ नविश्वासस्त्वकर्त्तव्यःकृतवैरेकथंच
न॥४५॥ तस्मात्त्वंत्रिषुलोकेषुनास्तिपुत्रश्रुतंमया॥ पक्षोपचवशानोपेतिध
र्मंपरिरक्षति॥४६॥ मघवान्कृतवैरस्तेसदाप्नुयःपरःपरैः॥ लोभेनोन्मत्तोदेव
परतःपरदुःखोऽस्यवान्वितः॥४७॥ परलंपटःसदापापबुद्धिःशतारकः॥ रंध्रा
न्वेषीछिद्रपरोमायावीमदगर्वितः॥४८॥ यःप्रविश्योदरेमातुर्गर्भच्छेदंचका
रह॥ सप्तसप्तपश्चात्तुलंदमानामनातुरः॥४९॥ तस्मात्तुत्वनकर्त्तव्योवि

श्वासोसकथंचनं॥ ततपापस्यकालज्ञांपुनःपुत्रप्रकुर्वतः॥५०॥ व्यासउ॥
एवंप्रबोधितोपित्रावचनैर्हेतुसंयुतैः॥ नबुबोधउपाहर्त्रेसुकर्त्रेतीव्रदारुणे
५१॥ ततःसंचिंत्यमघवावरदानंमहात्मनां॥ संध्येयंवर्त्ततेघोरानरात्रिर्दिव
सोनच॥५३॥ हंतव्योयंमयाचाद्यछलेनैवनसंशयः॥ एकाकीविजनेचा
त्रमंशासःसमयोन्वितः॥५४॥ तमात्मनाप्यसहस्वात्मःसस्मारहरिमव्ययं॥
तत्राजगामभगवानहरूपःपुरुषोत्तमः॥५५॥ वज्रमध्येप्रविश्यासौ
संस्थितोभगवान्हरिः॥ इंद्रोबुद्धिंचकाराशुतदावृत्रवधंप्रति॥५६॥ इति
संचिंत्यमनसाकथंहन्मिरिपुंरणे॥ अजेयंसर्वथासर्वैर्देवैश्चदानवैस्त
था॥५७॥ यदित्वंनहन्म्यवंचयित्वामहाबलं॥ नश्रेयोममनूनंस्यात्स

वधाद्रिपुरक्षणात् ॥५८॥ अब्धिफेनं तदापश्यत्समुद्रे पर्वतोपमं ॥ नायं शुष्को
न चार्द्रो यन्नवा स्वमिदं तथा ॥५९॥ अपां फेनं तदा शक्रो जग्राह क्रीडया यथा ॥ व
ज्रं तदाहतं तन्न चकार विष्णुसंयुतं ॥६०॥ केनाहतं पश्चिंतत्वा शक्रश्चित्ते पतं
त्रति ॥ हरिणा संयुतं हत्वे तथा यत्नतो घन ॥६१॥ तमाक्रय हरिः श्रेला हत्वं
निकटम्मा स्थितं ॥ जघान जलफेनेन वृत्रमत्रिव कोडते ॥६२॥ सहतो निपपा
तासु वज्राहत इवाचलः ॥ वासवस्तु प्रहृष्टात्मा वृत्रं वनिहतेत दा ॥६३॥ अथ
यष्टुं महेंद्रं तं मस्तु वविधैः स्तवैः ॥ हतशत्रुः प्रहृष्टात्मा वासवः सदैवतैः ॥६४
विष्णुं त्रिभुवनश्रेष्ठं पूजयामास वासवः ॥ ततो हते महावीर्ये वृत्रे देवभयंकरे ॥
६५॥ प्रववौ च शिवो वायुः प्रहृष्टदेवतास्तथा ॥ हते तस्मिन्न गंधर्वाश्च राक्ष

सकिंनरा ॥६६॥ हतं तं पतितं दृष्ट्वा विष्णुर्विष्णुपुरीं ययौ ॥ मनसा शंकमानस्तु त
स्य हत्याकृतं भयं ॥ ॥इति श्रीभागवते महापुराणे षष्ठस्कंधे षष्ठोध्यायः ॥६॥ वा
सउ ॥ ॥ इंद्रोपि भयसंत्रस्तो ययौ विष्णुपुरीं ततः ॥ मुनयो भयसंविग्ना स्तस्तवविड
तपिवै ॥२॥ किमस्माभिः कृतं पापं यद्वसो वंचितः किल ॥ मुनिशार्दूलहृथानानः
सुरेशस्य च संगमात् ॥३॥ अस्माकं वचनाद्वृत्र विश्वासमगमत्किल ॥ विश्वास
घातिनः संगात्तवयं विश्वासघातकाः ॥४॥ धिगियं मम तापापमूलमेव मनर्थक
त् ॥ यदस्माभिः छलेतात्रा पर्थिवो वंचितो सुरः ॥ मंत्रलबुद्धिदाता प्रेरकः पापका
रिणां ॥ पापात्मा गरसंभवेन्नूनं पत्तकृतातिथैव च ॥६॥ विष्णुनापि कृतं पापं यस्म
त्समात्सवाद ॥ वंचनाविश्वस्य येनासौ घातितः सत्वमूर्तिना ॥७॥ नूनं स्वार्थं प

रः प्राणी न पात्रां समाप्नुयात्॥ हरिणा हरिसंगेन सर्वथा दुःखतं तते॥ व्याघ्रादिवा
स्तां पदार्थानां शाकेव निधनं गतौ॥ प्रथमस्य तु रीपस्य त्रिषु लोकेषु नास्तिवै॥ ९॥ अ
र्थकामौ प्रवाहौ ह्येतौ सर्वेषु संमतौ प्रियौ॥ धर्माधर्मेतिवाग्वादे दुर्ज्ञेयं महतामपि॥ १०॥
मुनयोपि न सुस्वापमेवं तत्वा पुनः पुनः॥ जग्मुः स्वानाश्रमानेव विमनस्का हतोद्यम
११॥ दृष्ट्वा तं निहतं कृत्वा पुत्रमिंद्रेण भारत॥ रुरोद दुःखसंतप्तो निर्वेदमगम
मुनः॥ १२॥ यत्रासौ पतितस्तत्र गत्वा वीक्ष्य तथागतं॥ संस्कारं कारयामास विधिव
सारलौकिकं॥ १३॥ स्नात्वास्य सलिलं दत्वा चैवौर्ध्वदैहिकं॥ त्वाष्ट्रः पुत्रसंशोकार्तः पा
पिष्टं नित्र धातं॥ १४॥ यथा मे निहतः पुत्रः प्रलोभ्य च वापथे त्वया॥ तथैवेशोपि मह
दुःखं प्राप्नोतु दैवनिर्मितं॥ १५॥ इति शप्त्वा सुरेशानं त्वष्टा तापसमन्वितः मेरोः शिखि

रमास्थाय तपस्तेपे सुदुःस्तरं॥ १६॥ जनमेजय उ॰॥ हत्वा त्वाष्ट्रं सुरेशोथ कामव
स्थामवाप्तवान्॥ सुखं वा दुःखमेवाग्रे तन्मे ब्रूहि पितामह॥ १७॥ व्यास उ॰॥ किं पृच्छ
सि महाभाग संदेहकारणं त्वरं॥ अवश्यमेव भोक्तव्यं कृतं कर्म शुभेनोक्तव्यं कृतं क
र्म शुभाशुभं॥ १८॥ बलिष्ठैर्दुर्बलैर्वापि स्वल्पं वा बहु वा कृतं सर्वथैव हि भोक्तव्यं
सदेवासुरमानुषे॥ १९॥ शक्रायेत्य मतिर्दत्ता हरिणा हननं प्रातने॥ प्रविष्टोथप
विविष्णुः सहाय समपद्यत॥ २०॥ न चापदि सहायोत्र हासुरेवः कमंचन॥ स
मये स्वजनः सर्वः संसारेस्मिन्नराधिप॥ २१॥ दैवे विमुखतां प्राप्ते न कोप्यस्ति
सहायवान्॥ पिता माता तथा भार्या भ्राता वाथ सहोदरः॥ सेवको वापि मित्रं वा
पुत्रश्चैव तथौरसः॥ प्रतिकूले गते दैवे न कोप्येति सहायतां॥ २२॥ लोकाः पा

 पश्यपुण्यस्यकर्त्तान्निवर्तिसर्वथा॥ वृत्रंहत्वागतःस्वर्गंनिजस्तिजम्बुशचीपतिः॥
२४॥ शोभुत्त्वतंत्रिदशाःसर्वेब्रह्महत्याभुवंदाने॥ कोनामशापथाकृत्वासत्यंद
 त्वावचःपुनः॥२५॥ जिघांसतिसुविष्णुस्त्वंमुनिश्चप्रतारितं॥ वेदप्रमाणंमु
क्त्वस्त्रीत्वंतंसौगतंमतं॥२६॥ यद्वयंनिहतःशत्रुर्वंचयित्वातिसाहसात्॥ को
नामवचनंदत्वाविपरीतमथाचरेत्॥२७॥ विनाशाकंहरिंवापियथायंविनि
पातीतः॥ एवंविधाःकथाचान्यसमाजेषुजनवक्तृरां॥२८॥ शुभ्रावंशोपिवि
शाःस्वकीर्तिहानिकानिच॥ पस्यकीर्तिहानिकानिच॥ यस्याकीर्तिंहि
त्वालोकेधिकृतस्यैवकुजीवितं॥२९॥ यंदृष्ट्वापथिगछतंशत्रुःस्मेरमुखोभ
वेत्॥३०॥ इत्थंहैक्ष्वाकोपिराजर्षिःपातितःकीर्तिसंक्षये॥ सगरिस्ततपापो

सोपापत्क्किंनपात्यते॥३१॥ स्वल्पेपराधेपिनृपोययातिपतितःकिल॥
नृगःकर्कटतांप्राप्तोयुगानह्यादयैवतु॥३२॥ भृगुपत्नीशिरछेदात्तुभगवा
न्हरिरच्युतः॥ ब्रह्मशापात्समुत्पन्नोमोसंजातोमकरादिषु॥३३॥ विष्णुस्त्ववा
मनोभूत्वायाचनार्थंबलिगृहे॥ गतःकिमपरंदुःखंप्राप्नोतिदुःखतीनरः॥३४
रामोपिवनवासेषुसीताविरहजंबहु॥ दुःखंचप्राप्तवान्घोरंभृगुशापेन
भारत॥३५॥ तथैशोपिब्रह्महत्याकृतंप्राप्यमहद्भयं॥ नत्वाप्यंशापगेहेसौ
सर्वसिद्धिसमन्वितं॥३६॥ पुंजोमीतंपश्चात्तीर्णंदृष्ट्वाप्रोवाचवासवं॥ निस्वसं
तंभयचकितंनष्टसंज्ञंविचेतनं॥३७॥ किंवन्नोधुनयान्नोसिमृतस्त्वंदारुणेरि
पु॥ काचिंतावर्त्ततिकांततवशत्रुर्यनचिंतापरोभवान्॥३९॥ इंद्र॥ ॥

 नारातिर्बलवान्मेन्मित्रग्रांतिनिस्सुखं तथा ॥ ब्रह्महत्साऽन्यथा शक्तिर्बिनेमि
सततं गृहे ॥ ४०॥ नंदनं दुःखाकारं नामृतं नगरं तव ॥ गंधर्वाणां तथा गेयं न
 त्वमस्सरसां पुनः ॥ तत्वं सुखकरा नारी मा श्वसुरयोषितः ॥ न तथा कामधेनु
श्च देवद्रुमः सुखप्रदः ॥ ४२॥ किं करोमि क्व गच्छामि कथं मे मम जायते इति
चिंतापरः कांते न लेभे सुखमात्मनि ॥ ४३॥ व्यास उ० ॥ ॥ इत्युक्त्वा वचनं शक्रः
प्रियं परमकातरं ॥ निर्जगाम गृहात्तस्माद्दैमानसं सुरसत्तमं ॥ ४४॥ पद्मनालप्र
विष्टोसौ न्ययात् शोककर्शितः ॥ नज्ञायत देवैस्तत्र निभृतश्चकल्पखे
: ॥ ४५॥ प्रतिष्ठितो वसत्सप्सु चेष्टमान इवोरगः ॥ असहायस्तु राधार्ह्वै चिं
तातो विकलेंद्रियः ॥ ४६॥ ततः प्रणष्टे देवेंद्रे ब्रह्महत्याभयार्दिते ॥ सुराश्चिं

तातुरा श्वासन्नुत्पाताभ्यानवन्तथा ॥ ४७॥ ऋषयः सिद्धगंधर्वानिर्गयोश्चा
नवद्रुतं अनके जगत्सर्वमभिभूतमुपद्रवैः ॥ ४८॥ अवर्षणं तदा जात
पृथिवी क्षीणवैभवा ॥ विच्छिन्नस्रोतसो नद्यः सरांस्यनुदकानि ते ॥ ४९॥
एवमराजके जाते देवता मुनयस्तथा ॥ विचार्य निहुषं चक्रु शक्रं सर्वे दिवौ
कसः ॥ ५०॥ सम्प्राप्य नहुषो राजा धर्मिष्ठोपि रजोबलात् ॥ बभूव विषया
सक्तः पंचबाणशराहतः ॥ ५१॥ अप्सरोभिर्वृतः क्रीडन्देवोद्यानेषु नार
त ॥ शक्रपत्नीगुणान्श्रुत्वा चकमेतां स पार्थिवः ॥ ५२॥ कथं नाहं किमि
न्द्राणी नोपगच्छति मां किल ॥ नवद्भिश्चामरैः सर्वैः कृतो हं वासवास्त्विह ॥ ५३
प्रेषयध्वं सुराः कामं सेवार्थं मम वेश्मनि ॥ प्रियं चेत्मम कर्तव्यं सर्वथा मुनयो

ना॰ष॰ पराः॥५४॥ अहमिंद्रोद्य देवानां लोकानां च तथेश्वरः॥ आगच्छतु शची मह्यं
क्षिप्रमद्य निवेशनं॥५५॥ इति तस्य वचः श्रुत्वा देवा देवर्षयस्तथा॥ गत्वा
३० चिंतातुराः प्रोचुः पुलोमी वचनं तास्ततः॥५६॥ इंद्रपत्नी दुराचारो नहुषस्त्वा
मिहेच्छति॥ कुपितोस्मानुवाचेदं प्रेषयध्वं शचीमिह॥५७॥ किं कुर्मस्त्वद
धीनाः स्म येनेशोयं कृतः किल॥ तच्छ्रुत्वा दुर्मना देवी बृहस्पतिमुवाच ह॥५८
रक्ष मां नहुषाद्ब्रह्मन्त्वदास्मि शरणं गता॥ बृहस्पतिरुवाच॥ ॥ या देवी
नहुषात्पापमोहितान्॥५९॥ नाहं त्वास्यामि तां वत्से त्यक्त्वा धर्मं सनातनं
शरणागतमार्तं च यो ददाति नराधम॥६०॥ स एवं नरकं याति यावदाहूत
संप्लवः॥ स्वस्थानवद्यपुण्याणि न त्यजामि कदाचन॥६१॥ ॥इति श्रीमा

गवते महापुराणे षष्ठस्कंधे वृत्रवधे सप्तमोध्यायः॥७॥ व्यास उ॥ नहुषस्त्व
थैतां श्रुत्वा गुरोस्तु शरणं गतां॥ चुक्रुधास्मरबाणार्त्तमंगिरसमात्मवे॥
१॥ देवानां हा गिरासूनुर्हंतव्योयं मया किल यदिंद्राणी गृहे मूढो रक्षतीति
मदाश्रुतं॥२॥ इति तं कुपितं दृष्ट्वा देवाः सर्षिपुरोगमाः॥ अब्रुवन्नहु
षं घोरं समाश्रयं विचक्षणा॥३॥ क्रोधं संहर राजेंद्र त्यज पापमतिं प्रभो॥
निंदितं धर्मशास्त्रेषु परदाराभिमर्शनं॥४॥ शक्रपत्नी सदा साध्वी जी
वमाने पतौ पुनः॥ कथमन्यं पतिं कुर्यस्सुन्नगाति पतिव्रता॥५॥ त्रिलो
कीशस्त्वमधुना त्राता त्वं धर्मस्य वै विभो॥ इहेंद्रधर्ममातिष्ठेत दानवेष्वत्र
जाध्रुवं॥६॥ सर्वथा प्रभुणा कार्यं शिष्टाचारस्य रक्षणं॥ यद्यदाचरते रा

जात्रजातमनुवर्त्तते ॥७॥ तस्मात्त्वया महाराज कर्त्तव्यं धर्मरक्षणं ॥ वारमु
ख्याश्च शालत्रां वर्त्तते त्वत्राची समाः ॥८॥ रतिस्तु कारणं प्रोक्तं शृंगारस्य म
हात्मभिः ॥ रसहानिर्बलात्कारकृते सुंदरि संगमे ॥ उभयोः सदृशं प्रेम यदि
पार्थिवसत्तम ॥ तदा वै सुखसंपत्तिरुभयो रुपजायते ॥१०॥ तस्माज्ज्ञाव
मिमं मुंच परदाराभिमर्शनं ॥ सज्जावक्र रुद्देवेंद्र पदं प्राप्तोसनुत्तमं ॥११॥
अधित्तयस्तु यापेन पुण्येन नाति वर्द्धनं ॥ तस्मात्तापं परित्यज्य सन्मतिं कु
रु पार्थिव ॥१२॥ नघुष उ ॥ ॥ गौतमस्य यदा नुक्ता हारा शक्रेण देवताः ॥ वा
चस्पते स्तु सोमेन भूयं कसंस्थिता स्तदा ॥१३॥ परोपदेशे कुशलाः भवं
ति नराः किल ॥ कर्त्तव्ये चैवोपदेष्टा वै दुर्लभाः पुरुषो भवेत् ॥१४॥ ना त्वार

छतु मा देवी हि नंस्या दकृतं हि वः ॥ एतस्याः परमं देवाः सुखमेवं भविष्यति
॥१६॥ इति तस्य वचः श्रुत्वा देवा श्चिंतनयस्तथा ॥ तमूचु श्चुभ्भा ति संत्रस्ता न
घुषं मदनातुरं ॥१७॥ इंद्राणीमानयिष्यामो सामपूर्वं तवांतिकं ॥ इत्युक्त्वा ते
तदा जग्मुर्बृहस्पतिनिकेतनं ॥१८॥ व्यास उ ॥ ते गत्वांगिरसः पुत्रं प्रोचुः
प्रांजलयः सुराः ॥ जातीमत्रारण्णं प्राप्ता मीद्रा णीतव वेश्मनि ॥१९॥ सा
देयान्नघुषा याद्य वासवो सौ क्षतो यतः ॥ वृणोत्वियं वरीहा पतित्वे वरव
र्णिनी ॥२०॥ बृहस्पतिः सुरानाह तच्छ्रुत्वा दारुणं वचः ॥ शचीनाहं त्यजिष्या
मि सतीं च शरणागतां ॥२१॥ ॥ देवा ऊचुः ॥ ॥ उपायोन्यत्र कर्त्तव्यो ये
न सीदति न्यथा ॥ कोपसंयुक्तो नराधिपो भविष्यति ॥२२॥ बृहस्पतिरु

ना.ष. ॥ तत्र गत्वा शची नृपं पप्रच्छ लोभ्यवचसा नृपं ॥ करोतु समयं बाल पतिं ज्ञात्वा
३२ मृतं त्वजे ॥ २३ ॥ इंद्रे एरा जीवति मे कांते कथं नत्वं करोम्यहं ॥ अन्वेषणाय
गंतव्यं मया तस्य महात्मनः ॥ २४ ॥ इति सा समयं कृत्वा वंचयित्वा च नृप
तिं तत्तु राज्ञयने यत्नं करोतु मम वाक्यतः ॥ २५ ॥ व्यासउवाच ॥ इति संचिंतते
सर्वे बृहस्पतिपुरोगमाः ॥ नहुषसहिता जग्मुरिंद्राद्या दिवौकसः ॥ २६ ॥
तानागतान् समीक्ष्याय तदा तत्रिम वासवः ॥ जहर्ष चतुरश्चाधुकं तां वी
क्ष्य मुदितो ब्रवीत् ॥ अद्यासि त्वा सव:कांते न जनं मां चारुलोचने ॥ पति
त्वे सर्वलोकस्य पूज्योहं विहितः सुरैः ॥ २८ ॥ इत्युक्ता सा नृपं प्राह हरीयुक्ता वे
पतीन्तवरां ॥ वरमिच्छाम्यहं राजन्नत्वत्तः प्राप्तु सुरेश्वरः ॥ २७ ॥ अद्यासि त्वा

सव:कांतिर्नन मां चारुलोचने ॥ पतित्वे सर्वलोकस्य पूज्योहं विहितः सुरैः ॥
२९ ॥ इत्युक्ता सा नृपं प्राह हरीयुक्ता वेपतीन्तवरां ॥ वरमिच्छाम्यहं राजन्नत्वत्तः
प्राप्तुं सुरेश्वरः ॥ ३० ॥ किंचित्कालं प्रतीक्षस्व यावत्कर्तामि निर्णयं ॥ इंद्रो ली
ति नवा स्तीति संदेहे मे हृदि स्थितं ॥ ३१ ॥ ततस्त्वाहमुपस्थास्ये कृत्वा निश्च
यमात्मनि ॥ ३२ ॥ तर्हि विज्ञायते शक्रः प्राप्तः किं वा कवा गतः ॥ एवमुक्त
:स्तदा एषा नहुषः प्रीतिमानभूत् ॥ ३३ ॥ विसर्जयत तां देवीं तथेत्युक्ता
मुदान्वितः ॥ सा विसृष्टा नृपेणाशु गत्वा प्राह सुरात्मनी ॥ ३४ ॥ इत्थमागम
नेयत्नं कुरुतावल्लोद्यमाः ॥ श्रुत्वा तद्वचनं देवा इंद्राण्यासर्वबुद्धि ॥
३५ ॥ मंत्रयामासुरेकाग्राः शक्रार्थं नृपसत्तमं ॥ ते गत्वा वैष्णवं धामतु

हुवुः परमेश्वरं॥ आदिदेवं जगन्नाथं शरण्यं वत्सलं॥३६॥ ऊचुश्चैनं समुद्विग्नाः
भा॰भ॰ वाक्यं वाक्यविशारदः॥ देवदेव सुरपतिः ब्रह्महत्याप्रपीडितः॥३७॥ अदृश्यः सर्वभू
२२ तानां क्वापि तिष्ठति वासवः॥ त्वष्ट्रीये निहते विप्रे ब्रह्महत्याहतः प्रभो॥३८॥ त्वं ग
तिस्तस्य भगवन् चास्माकं च तथैव हि॥ वाडिनः परमापन्नान्मोक्षं तस्य विनि
र्दिश॥३९॥ देवानां वचनं श्रुत्वा कातरं विष्णुरब्रवीत् यजतामश्वमेधं वै शक्रः
पापनिवारकं॥४०॥ पुण्येन हयमेधेन पावितः पाकशासनः पुनरेष्यति दे
वानामिंद्रत्वमकुतोभयः॥४१॥ इंद्राणी कुरुतां नित्यं भगवत्याः प्रपूजनं आ
राधनं शिवायास्तु सुखकारि भविष्यति॥४२॥ नहुषोपि जगन्मातुर्मायया
मोहितः किल॥ विनाशं स्वकृतेनाशु गमिष्यत्येव सासुराः॥ कृत्वैतच्चाश्वमेधे

नतुराषाडुपविवेशन॥ आश्वास्य चिरकालेन स्वमासनमनुत्तमं॥४४॥ ते तु श्रु
त्वा तु तां वाणीं विष्णोरमिततेजसः॥ जग्मुस्तं देशमनिशं यत्रास्ते पाकशास
नः॥४५॥ तमाश्वास्य सुराः शक्रं बृहस्पतिपुरोगमाः कारयामासुर्विधिवद
श्वमेधं महाक्रतुं॥४६॥ विभज्य ब्रह्महत्यां तु वृक्षेषु च नदीषु च॥ पर्वतेषु पृथि
व्यां च स्त्रीषु चैवाक्षिपद्विभुः॥४७॥ तां विसृज्य बभूवेशः विपाप्मा पाकशासनः
विज्वरः विज्वरः समभूयः कालाकांक्षी स्थितो जले॥४८॥ अदृश्यः सर्वभूतानां
पद्मनाले त्वतिष्ठत देवास्तु निर्गताः स्थाने च्छन्ता कार्यं तदद्भुतं॥४९॥ पुलो
मात्मजा गुरुं प्राह दुःखिता विरहातुरा॥ शतयज्ञोपि मे नाकिमहत्वस्य पुरंदरः ५०
कथं देवि प्रियं स्वामिन्नुपायं वद सत्वरं॥५१॥ बृहस्पतिरुवाच॥ तमाराधय देवेशं

नीं भगवतीं शिवां ॥ दर्शयिष्यति तेनायं देवी विगतकल्मषं ॥ ५२ ॥ आराधिता भ
गवती नघुषं वारयिष्यति ॥ मोहयित्वा नृपस्याना तानयिष्यति चैंबिका ॥ ५२ ॥ इ
त्युक्त्वा सा तदा तेन राजपत्नी सुमानसा ॥ जयार्द्रमंत्रं विधिवद्गुरोर्देव्याः सुसा
धनं ॥ ५३ ॥ विद्यां प्राप्य गुरोर्देवी देवीं त्रिभुवनेश्वरीं ॥ सम्यगाराधयामास वनितेषु
व्यार्चनैः शुभैः ॥ ५४ ॥ सत्कानेनैव संजाता तापसीवेषधारिणी ॥ चकार पूजनं
देव्याः प्रियदर्शनलालसा ॥ ५५ ॥ कालेन कियता तुष्टा तत्क्षणदर्शना भवत् ॥ सौ
म्यरूपधरा देवी वरदा हंसवाहनी ॥ ५६ ॥ तामुवाच प्रसन्नासा राजपत्नी सुमान
सा ॥ जयाहमंत्रं विधिवत्तोषिता ॥ मेयगंनार्द्राहेनमुद्यान्नुदतीन्नतां ॥ ५७
देव्युवाच ॥ ॥ वरं वरय सुश्रोणि वांछितं राजवल्लभे ॥ ददाम्यद्य प्रसन्नास्मि पूजि

तास्तु भक्तांत्वया ॥ ५८ ॥ इत्युक्त्वा सा तया देवी ता महत्प्रणता पुरः ॥ राजपत्नी भग
वतीं प्रसन्नां परमेश्वरीं ॥ ५९ ॥ वांछामि दर्शनं मातः पत्युः परमदुर्लभं ॥ नघुषाद्
यनाशं च स्वपदप्रापणं तथा ॥ ६० ॥ देव्युवाच ॥ ॥ त्वरा गच्छ मया सार्द्धं मानससर
सुत्तमं तत्र पश्यसि राजकत्वं दुःखितं नयविकुलं ॥ ६१ ॥ मोहयिष्यामि सज्जानं का
लेन कियता पुनः ॥ तस्मात्तव विशालाक्षि करोमि नत्वेप्सितं ॥ ६२ ॥ न्हदर्शयिष्या
मि नृपालं मोहितं त्रिदशासनात् ॥ इत्युक्त्वा तां गृहीत्वा सा राजपत्नीं त्वरान्वि
तां ॥ प्रापयामास सान्निध्यं स्वपत्युः परमेश्वरी ॥ ६३ ॥ सा दृष्ट्वा तं पतिं बालाभु
रेखांगुप्तसंस्थितं मुदिता भूरि देवी सं बभूव जानानि वांछितं ॥ ६४ ॥ ॥ इति
श्रीभागवते महापुराणे षष्ठस्कंधे द्वे नवधेराजकस्वर्नि नाम अष्टमोध्यायः ॥ ८ ॥

ना॰ प॰ व्यास उ॥ तां वीक्ष्य विपुलापांगीं रहः शोकसमन्वितां॥ आखंडलः प्रियां भार्यां वि
स्मितश्चाब्रवीत्तदा॥१॥ कथमत्रागता कांते कथं ज्ञातस्त्वयाप्यहं॥ दुर्ज्ञेयः सर्वभू
३५ तानां सखि स्मितमुखानने॥२॥ शच्युवाच॥ देव देव्याः प्रसादेन ज्ञातोसि ह्यत्र वासि नि
द्रुः पुनस्तस्याः प्रभावेन शापान्मुक्त्वा दिवस्पते॥ नहुषो नाम राजर्षिः स्थापितोत्र
वरासने॥ त्रिदशैर्मुनिभिश्चैव स मां बाधयते भृशं॥४॥ पतिं मां कुरु चार्वंगि तुरा
षाहं सुराधिपः॥ एवं वदति मां पापः किं करोमि बलार्दन॥५॥ इंद्र उ॥ कालाकां
क्षी वरारोहे संस्थितोस्मि यदृच्छया॥ तथा त्वमपि कल्याणि कुरुष्व सुस्थिरं मनः॥६
व्यास उ॥ ॥इत्युक्ता तेन सा देवी पतिना निमिता॥ तमुवाच निःश्वासैः नीवेप
मानातिदुःखिता॥७॥ कथं तिष्ठे महाभाग पापात्मा मां वशानुगां॥ करिष्यति

मदोन्मत्तो वरदानेन गर्वितो॥८॥ देवाश्च मुनयः सर्वे मामुचुस्तद्भयाकुलाः॥ तं
भजस्व वरारोहे देवराजं स्मरातुरं॥९॥ बृहस्पतिस्तु शत्रुघ्ने वाडवो बलवर्जितः
कथं मां रक्षितुं शक्तो नवे देवानुगः सदा॥१०॥ तस्माच्चिंतास्मि महती नाथ्यहं देववरा
वर्त्तिनी अनाथा किं करोम्येवं विपरीते विधौ प्रभो॥११॥ नास्मि हकुलटास्मानि
त्यचित्तातिपतिव्रता॥ नास्ति मे शरणं तत्र यो मां रक्षति दुःखितां॥१२॥ इंद्र उ॥
उपायं प्रब्रवीम्यद्य तं कुरुष्व वरानने॥ शीलं ते दुःस्थिते काले परित्राणं न विष्ण
ति॥१३॥ यत्नेन रक्षिता नारी न भवेत्तु पतिव्रता॥ उपायैः कोटिभिः कामं निमित्त
चित्तातिचंचला॥१४॥ शीलमेव हि नारीणां सदा रक्षति पापतः॥ तस्मात्त्वं शील
मास्थाय सुस्थिरा भव सुव्रते॥१५॥ यदा तां नहुषो राजा बलात्कर्षयेत्खल

ना.प. तदा तं समयं ज्ञात्वा गुप्तं वंचयन्नृपतिः ॥ एकांते तत्समीपे त्वं गत्वा वरस्व सुंदरी ॥
ऋषियानेन दीव्येन मानुषे हि जगत्स्तते ॥१७॥ एवं वरो तव श्रीता न विष्यामिती
३६ मेव्रतं ॥ निश्चयं मम राजेंद्र कर्त्तव्यं यदि मे हितं ॥१८॥ कामांधसो मुनीमानेयोज
यिष्यति पार्थिवः ॥ अवश्यं तापसो नूपं शापं दग्धं करिष्यति ॥१९॥ व्यास उ॥ इ
त्याख्याता ज्ञाची तेन जगाम नघुषं प्रति ॥ तथेत्युक्त्वा ति विश्वस्ता नावि कार्यं ततो
द्यमा ॥ महीपस्तां समालोक्य मुदितो वाक्यमब्रवीत् ॥ स्वागतं सत्यवचने त्वद
धीनोस्मि कामिनि ॥ दासोहं तव सत्येन मानितं वचनं त्वया ॥२१॥ यदागता समी
पे तु तुष्टोस्मि पिकभाषिणी ॥ नववीडा त्वया कार्यम्निकं मां नजसुस्मिते ॥ का
र्यं विशालाक्षि करिष्यामि तव प्रियं ॥२३॥ शचिरुवाच ॥ सर्वं कृतं त्वया कार्यं मम त्व

त्रिमवासव ॥ मनोरथोस्ति मे देव श्रुणुष्वैकं धनाविभो ॥२४॥ वांछितं कुरु क
ल्याण त्वद्दशाहम तःपरं ॥ ब्रवीमि मनसा स्माहं त्वं न कर्तुमिहार्हसि ॥२५॥ नघु
ष उ॥ त्वरिता ब्रूहि वंशस्ये करोमि तव वांछितं ॥ अलभ्यमपि दास्यामि तुभ्यं सु
श्रुवदस्व मां ॥२६॥ ॥शच्युवाच॥ ॥कथं ब्रवीमि राजेंद्र प्रत्ययो नास्ति मे त
व ॥ वचसा वार्थयाम्याहं ददासि न ददासि चेत् ॥२७॥ शपथं कुरु राजेंद्र पल
रोमि प्रियं तव ॥ पश्चाद्ब्रवीम्यहं राजन्नज्ञाला सत्येन यंत्रितं ॥२८॥ कृते मे मांछि
तेनूस दाते वशवर्तिनी ॥ न विष्यामि तु राजाधि सत्यमेतद्वचो मम ॥२९॥ श्च
वच्पेमेव कर्त्तव्यं वचनं तव सुंदरि ॥ शयामि सुकृतेनाहं यज्ञदानकृतेन वै ॥
३०॥ शच्युवाच ॥ इंद्रस्य हरयो वाहा गजश्चैवरथस्तथा ॥ गरुडो वासुदेव

ना.ष. स्वयमस्यमहिषस्तथा ॥३१॥ वृषभश्चः शंकरस्यापि ब्रह्मणो वरटापति ॥ मयूरो
कार्त्तिकेयस्य गजास्यस्तु चमूषकः ॥३२॥ इच्छाम्यहमपूर्वं वा हनं ते सुराधिप ॥
३७ यत्र विष्णोर्गरुडस्य ना सुराणां न रक्षसां ॥३३॥ वृहत्तुलाम हाराजमुनयः संश्रि
तव्रताः ॥ सर्वेन्द्रा विकयाराजन्नेतद्धि मम वांछितं ॥३४॥ सर्वदेवाधिकस्त्वं वेजा
नामिव सुधाधिप ॥ तेन से तेजसोऽद्दिवां छ्याम्यहमतंद्रिता ॥३५॥ व्यासउ॥
तस्यास्तद्वचनं श्रुत्वा शाकृष्यतत्तानदुर्वलिः ॥ उवाच व- नं नृपसंस्तुवन्वा
सवप्रियां ॥३६॥ नहुषउ॥ ॥ समस्तमुक्तं त्वया तन्विवाहनं रुचितं मम ॥ करि ३७
ष्यामि सुकेशांते वचनं तव सर्वथा ॥३७॥ नत्यल्पवीर्यो भविता यो वाहं कुरुते
मुनीन् ॥ अहमारुह्ययानेन तत्रामेष्यामि सुचिस्मिते ॥३८॥ व्यासउ॥ ॥इत्यु

क्तां तां सुसंतुष्टां विसर्ज्य च हरिप्रियां ॥ मुनीनात्मयसर्वांस्तानित्कवांच स्मयान्वित
॥३९॥ नहुषउ॥ ॥ अहमिन्द्रो द्यतो विप्राः सर्वशक्तिसमन्वितः ॥ कार्यमेकं भ
वंतु नवंतो विंगतस्मयाः ॥४०॥ इन्द्रासनं मया प्राप्तं नेन्द्राणी मामुपैति च ॥ श्र
कारिता च मां ब्रूते प्रेमपूर्वमिदं वचः ॥४१॥ मुनियानेन देवेन्द्र मामुपैहि सुराधि
प ॥ देवदेव महाराज मत्प्रियं कुरु मानद ॥ एतत्कार्यं मुनिश्रेष्ठा ममात्यंतदुरास
दं ॥ नवद्भिस्तु प्रकर्तव्यं सर्वथैव दयालुभिः ॥४३॥ मनो दहति मे कामः शक्र प
त्यां प्रवर्तितं ॥ नवंतः शरणं मेद्य कुरुध्वं कार्यमिच्छुतं ॥४४॥ व्यासउ॥ अग
स्तिप्रमुखास्तस्य श्रुत्वा वाक्यमतत्करं श्रृंगी चकार तं विलाकृपयापरमर्ष
यः ॥४५॥ श्रृंगीत्तस्तेयतशाक्यो मुनिर्निमित्तवदर्शिनः ॥ तुदं शापः नृपकामं पु

लोमीकृतमानसः॥४६॥ आरुह्य शिबिकां रम्यां संस्थितस्त्वरयान्वितः॥ वाहा
न्कृत्वा मुनीन्दिव्यान् सर्प सर्पेति चाब्रवीत्॥४७॥ कामार्त्तः स स्पृशन्मूढः पादेन मस्त
के मुनिं॥ अगस्तिं तापसश्रेष्ठं लोपामुद्रापतिं तदा॥४८॥ वातापिनाशकं वीरं
समुद्रस्यापि शोषकं॥ शकया ताडयामास पंचबाणशराहतः॥४९॥ इंद्राणी
गतचित्तो सौ सर्प सर्पेति चाब्रवन्मुनिं॥ तस्य शापं मुनिः क्रुद्धः शकाघातमनुस्म
रन्॥५०॥ सर्पो भव दुराचार त्वं न घोरवपुर्महान्॥ दशवर्षसहस्राणि सर्परूपध
रो भवान्॥५१॥ विचरिष्यसि वीर्येण पुनः स्वर्गमवाप्स्यसि॥ दृष्ट्वा युधिष्ठिरं नाम
तव मोक्षो भविष्यति॥५२॥ अगस्त्यान्मुनिवरान्श्रुत्वा धर्मपुत्रमुखात्ततः॥५३॥
व्यासउ॥ ॥ एवं शप्तः स राजर्षिः स्तुत्वा तं मुनिसत्तमं॥ स्वर्गात्पपात सद्यः सर्व

रूपधरो भवत्॥५४॥ बृहस्पतिस्ततो गत्वा तरसा मानसं प्रति॥ इंद्राय सर्ववृ
त्तांतं कथयामास विस्तरात्॥५५॥ बृहस्पतिस्ततो गत्वा तस्मा मानसं प्रत्युत्ताम
घवा शक्रः स्वर्गाच्च भवनात्स्वकं॥ मुदितात्मा महाराज स्थितस्तत्रैव वासवः॥५६॥
देवाश्च मुनयो दृष्ट्वा नहुषं पातितं भुवि॥ जग्मुः सर्वेपि तत्रैव यत्रेंद्रः सरसि स्थितः॥
५७॥ तमानीयासुराः सर्वे मुनिभिः सहितास्तदा॥ स्वर्गे संस्थापयामासुर्मनिपूर्वं
शचीपतिं॥५८॥ समागतं ततः शक्रं सुरा॥ संस्थाप्यासने विधिवद्दृष्टिषेकं दधु
ः शिवं ५९ इंद्रोपि स्वासनं ततः प्राप्य सह सुरालये॥ चक्रीडनंदने रम्ये काननेन
प्रेमयुक्तया॥६०॥ एवमिंद्रेण संप्राप्तं दुःखं परमदारुणं॥ हत्वा वृत्रासुरं कामं
विश्वरूपं महामुनिं॥६१॥ एतत्ते सर्वमाख्यातं वृत्रासुरवधं प्रति॥ यत्पृष्टो हं त

भा·प· याराजन्कथानकमनुत्तमं॥६२॥यादृशंकुरुतेकर्मतादृशंफलमाप्नुयात्।
३९ अवश्यमेवभोक्तव्यंकृतंकर्मशुभाशुभं॥६३॥ ॥इतिश्रीभागवतेमहापुराणे
षष्ठस्कंधेइंद्रमोक्षोनामनवमोध्यायः॥९॥ ॥जनमेजयउ०॥ ॥कथितंचरि
तंब्रह्मन्शक्रस्याद्भुतकर्मणः॥स्थानभ्रंशंतथादुःखप्राप्तिरुक्ताविशेषतः॥१
संदेहोत्रममाप्यस्तियच्छक्रोपिमहातपा॥देवाधिपत्यमाप्यपुःसहंदुःखमन्व
भूत्॥मखानांतुशतंकृत्वाप्राप्तंस्थानमनुत्तमं देवेशत्वंचसंप्राप्यभ्रष्टःस्था
नादसौकथं॥३॥तस्यापिकारणंप्रोक्तंब्रह्महत्यासमुद्भवं॥अत्यंतपातकंकृ
त्वादुःखितोभूच्छतक्रतुः॥४॥पूर्वजामेमुनिश्रेष्ठपांडवाःकृष्णसंश्रयाः॥सदा
चाराःसुशांताश्चद्विजभक्तिपरायणाः॥५॥देवतांशाःसमुद्भूताःदेवकल्पामहा

बला॥राजसूयमखंकृत्वासंपूर्णदक्षिणंक्रतुं॥६॥पूजयित्वाजगन्नाथंकृष्णंकमल
लोचनं॥दुःखाद्दुःखतरंप्राप्ताद्देवरूपाजितव्रता॥७॥नाद्भुतंपातकंतैस्तुकृतं
किंचिदिहप्रभो॥कथंतेपतिताब्रह्मन्नगाधेदुःखसागरे॥८॥द्रुपदीचमहाभाग
दिव्यरूपापतिव्रता॥वेदीमध्यात्समुत्पन्नादेवतांशात्व्ययोनिजा॥९॥कथमे
वंविधंदुःखमनुभूतं—थाद्विज॥सभायांवनवासेनविराटनगरेतथा॥१०॥की
चकेःक्लेशितासाध्वीकृष्णसेवापरायणाः॥रमांराजामहात्मासस्त्रीलाप
तिसंश्रया॥११॥अस्मिञ्जन्मनिनामित्रानकिंचिदुःकृतंकृतं॥मनसा
कर्मणावाचाज्ञानाद्ज्ञानतस्तथा॥१२॥किमत्रकारणंब्रूहिद्रुपदीदुःखभा
जनं जाताकृष्णपरासाध्वीद्विजसेवापरायणा॥१३॥केनकर्मविपाकेन

ना·प॰ पांचालीपांडवास्तथा ॥ दुःखानां भाजनं जाताः सर्वे सत्यव्रते स्थिताः ॥१८॥ उ
५० क्तं त्वया महाभाग पूर्वं कृष्णार्जुनाविमौ ॥ कारणादिह संजातौ नारायणावुभौ ॥
१६॥ अत्रापि च मुनिश्रेष्ठ संदेहोस्ति ममाद्भुतः ॥ वासुदेवांशसंभूतौ धर्मपुत्रौ
सुतापसौ ॥१७॥ प्राप्तज्ञानौ मुनी सम्यक् जन्मतस्तपसि स्थितौ ॥ गंगातीरे
जितात्मानौ विशाले बदरीवने ॥१८॥ किमर्थं तु तपस्तप्तं ताभ्यां तत्राश्रमोत्तमे शो
षयित्वा शरीरे वै मुनीभ्यां मुनिसत्तम ॥१९॥ एवंविधं तपस्तप्तं जातौ कृष्णार्जु
नौ भुवि केन कर्मविपाकेन गर्भवासमवापतुः ॥२०॥ ततः परं नृणां दुःखं सं
सारेस्मिन् परंतप ॥ विद्यते जठरे वासो विष्टामूत्रमये दृढे ॥२१॥ मासानां द
शकं पूर्णं स्यात्तत्र मुद्रितः किल ॥ निमिषार्द्धमपि स्यान्नात्रैव वह्निः शरणं ततः

केनात्र कारणेनेमौ नरनारायणौ मुनी ॥ गर्भवासं गतौ शांतौ सर्वेषामप्रियं
भृशं ॥ गर्भवासस्तथा जन्म तपस्य रतिमानवः ॥ तत्सुताभ्यामनुप्राप्तं तपस्तप्त्वा
तिदारुणं ॥२४॥ देवकार्यार्थसिद्ध्यर्थं यदि जातौ निजेच्छया ॥ दैवाधीनौ क
थं चोक्तौ बभूवतुर्महाबलौ ॥२५॥ असंगतमिदं भाति सर्वं सत्यवतीसुत ना
रायणांशसंभूतौ दुःस्थितौ यद्बभूवतुः ॥२६॥ युधिष्ठिरस्तथा शोकः शापाद्भ
स्मीकृते स्वयं सकष्टं संप्रवृत्तस्तु कुकर्मणि दुरोदरे ॥२७॥ एतत्सर्वं समाच
क्ष्व कारणं करुणानिधे ॥ सर्वज्ञोसि मुनिश्रेष्ठ पुराणानां प्रवर्तकः ॥२८॥ ना
वाच्यं महतां किंचिच्छिष्ये च श्रद्धयान्विते ॥ तस्मात्कुरु महाभाग संदेहापनो
दनं ॥२९॥ सूत उ॰ ॥ इति पृष्टः स राज्ञा वै तदा सत्यवतीसुत ॥ तमाह अति प्र

ना·प· सन्नात्मायथामुक्रममुत्तरान्॥३०॥ व्यासउ॥ निबोधनृपतिश्रेष्ठकारणं परमा
४१ द्भुतं॥ कर्मणस्तु त्रिधा प्रोक्ता गतिस्तत्वविदां वरैः॥३१॥ संचितं वर्त्तमानं च प्रार
ब्धमिति तन्नेदृतः॥ अनेकजन्मसंजातं प्राक्तनं संचितं स्मृतं॥३२॥ सात्विकं रा
जसं कर्मतामसं त्रिविधं पुनः॥ शुभं वाप्यशुभं नृप संचितं वर्त्तकालिकं॥३३॥
अवश्यमेव नो क्षय्यं सुखं तं दुःखं तं तथा॥ जन्मजन्मनि जीवानां संचितानां
च कर्मणां॥३४॥ निःशेषस्तु क्षयो नास्ति कल्पकोटिशतैरपि॥ क्रियमाणं
च यत्कर्म वर्त्तमानं तदुच्यते॥३५॥ देहं प्राप्य शुभं वापि त्वशुभं वा समाचरेत्
संचितानां पुनर्मध्यात्समाहृत्य कियत्किल॥३६॥ देहारंभसमये च कालं प्रे
रयतीव तत्॥ प्रारब्धं कर्म विज्ञेयं भोगात्तस्य क्षयः स्मृतः॥३७॥ प्राणिनिः स्व

सुनो कर्मप्रारब्धं नात्र संशयः॥३८॥ पुराकृतानि राजेन्द्र त्वशुभानि शुभानि च
अवश्यमेव कर्माणि भोक्तव्यानीति निश्चयः॥ देवैर्मनुष्यैरसुरैर्यक्षगंधर्वपन्नगैः
॥३९॥ कर्मैव हि महाराज देहारंभस्य कारणं॥ कर्मक्षये जन्मनाशः प्राणिनां
नात्र संशयः॥४०॥ ब्रह्मा विष्णुस्तथा रुद्र इंद्राद्याः सुरास्तथा॥ मानवा यक्ष
गंधर्वाः सर्वे कर्मवशाः किल॥४१॥ अन्यथा देहसंबंधः कथं भवति भूपते॥
कारणं यत्तु भोगस्य देहिनः सुखदुःखयोः॥४२॥ दुःखात्मकस्य भोगस्य
कारणं पातकं स्मृतं॥ सुखात्मकस्य पुण्यं वै सर्वेषां हि ताकिल॥४४॥ सु
कृतैस्तु सुरा राजन् भवंते हि मानवाः॥ पुण्यपापक्षये पुनस्ते वै नूतनं भवंति मा
नवाः॥४५॥ तथा नारायणो राजन्नरश्च धर्मजावुभौ॥ जातौ [illegible]

कामंमंशोनारायणस्यतो॥४६॥ पुराणपीतिकेयंवैमुनिभिः परिकीर्तिता।
ना.प. देवांशःसतुविज्ञेयोयोनविद्भिर्वाधिकः॥४७॥ नाऋषिःकुरुतेकाम्यनरु
४२ शोरुद्रमर्चति॥ नादेवांशोददात्यन्नंनाविष्णुःपृथिवीपतिः॥४८॥ इंद्रात्स्थैर्य
माद्विष्णोईनदादितिनृपते॥ यमात्तचपलात्पंचकोपंचैवपराक्रमं॥४९॥ आ
हारायक्रियतेनूनंशरीरमितिनिश्चयं॥ कथितोमुनिभिःसिद्धसततनावि
तात्मभिः॥५०॥ यःकश्चिद्बलवान्लोकेनाग्यवानथनोगवान्॥ विद्यावा
न्दानवान्वापिसदेवांशःप्रपद्यते॥५१॥ तथैवेतेसमाख्यातापांडवाःपृथिवी
पते॥ देवांशावासुदेवोपिनारायणसमप्रकृतिः॥५२॥ शरीरंप्राणिनांनूनं
भाजनंसुखदुःखयोः॥ शरीरीप्राप्नुकामंसुखदुःखमनंतरं॥५३॥ देहीनस्व

शःकोपिदैवाधीनःसदैवहि॥ जननंमरणंदुःखंसुखमाप्नोतिचावशः॥५४॥
पांडवास्तिवनेजाताःप्राप्तास्तुस्वगृहंपुनः॥ वनवासंपुनःप्राप्तावद्दुःखकरंप
रं॥५५॥ अर्जुनेननतस्तप्तंदुःकारंत्यजितेंद्रियैः॥ सतुष्टैस्तुसुरैर्दत्तंवरस्थानंपुनः
श्रुतं॥५६॥ नरदेहस्ततंपुण्यंपश्यगतंबहुवार्षिकं॥ नरदेहेतपस्तप्तंचोर्यंवार
रिकाश्रमे॥५७॥ नार्जुनस्यशरीरेतत्फलंदंसंबभूवह॥ प्राणिनांदेहसंबंधेगह
नाकर्मणोगतिः॥५८॥ दुर्ज्ञेयासर्वैर्मनिवानांतुकाकथा॥ वासुदेवोपिसंजातः
कारागारेतिसंकटे॥५९॥ नीतोसोवासुदेवेननंदगोपस्यगोकुलं॥ एकादशै
ववर्षाणिसंस्थितस्तत्रभारत॥६०॥ पुनःसमथुरांगत्वाजघानोग्रसुतंब
लात्॥ मोचयामासपितरौबंधनात्सदुःखितौ॥६१॥ उग्रसेनंचराजानंच

भा·षं· कारमात्मुरेपदे॥ जगामद्वारवत्यांसम्लेछराजन्तयालुनः॥ स्वर्वज्ञाविवशाक्क
ष्मिःभ्रतवान्घोरुषंमहत्॥६२॥ कृत्वाकार्याण्यनेकानिद्वारवत्यांजनार्दन
४३ देहंत्यक्त्वाप्रभासेतुसकुटंबोदिवंगतः॥६३॥ पुत्राःपौत्राश्चसुहृदोभ्रातरो
जामयस्तथा॥ भ्रासेयादवाःसर्वेविप्रशापात्क्षयंगता॥६४॥ एवंतेकथि
ताराजन्कर्मणांगहनागतिः वासुदेवोपिव्याधस्यबाणेननिधनंगतः॥६५
॥ ॥इतिश्रीभागवतेमहापुराणेषष्ठस्कंधेदशमोध्यायः॥१०॥ जनमेजयउ
॥भारावतारणंयथपिकथितंजन्मकृष्णयोः॥ संशयोयंद्विजश्रेष्ठहृदयेमाधिति
ष्ठति॥१॥ पृथिवीगोस्वरूपेणब्रह्माणंशरणंगता॥ द्वापरांतेतिदीनात्तिपुरु
भारपीडिता॥२॥ वेधसाप्रार्थितोविष्णुःकमलापतिरीश्वरः भूभारोत्तारणा

र्थायदयतामेदिनींप्रति॥३॥ भगवन्भूभारतेखंडेदेवैःसहजनार्दनः॥ अवतर
स्वजगन्नाथवसुदेवगृहेविभो॥४॥ एवंसंप्रार्थितस्तैथाभगवान्देवकीसुतःब
भूवसहरामेणभूभारोत्तारणायवै॥५॥ कियदुत्तारितोभारोहत्वाउष्टनेककाः
ज्ञातासर्वेपुराचाराःनपापबुद्धीन्नृपाभिदः॥६॥ हतोभीष्मोहतोद्रोणोविराटो
द्रुपदस्तथा॥ बाल्हीकःसोमदत्तश्चकर्णोवैकर्तनस्तथा॥७॥ यैर्दुर्गितंधनंसर्वं
हताश्चतस्तयोपितः॥ युधिष्ठिरादयःदुष्टास्तेस्थितापृथिवीतले॥८॥ आभीरा
श्चकाम्लेछानिषादानिषादाःकोटिशःस्थिताः॥ भारावतारणंकिंतुकृतंतेन
हरिणाधीमता॥९॥ संदेहंमहांतभगवन्निवर्तितिचित्ततः॥ कृष्णावस्मिन्प्रजाःपुष्ट
:प्रपतःपापनिश्चयाः॥१०॥ व्यासउ॥ ॥राजन्नवस्मिन्युगेयादृक्प्रजाभव

तिकालतः नान्यथा मङ्गवेन्नूनं युगधर्मोत्र कारणं ॥ येधर्मरसिका नीवस्तेवै
ना·ध· सत्ययुगेभवत् ॥ धर्मार्थरसिकायेतु तेवैत्रेतायुगेभवत् धर्मार्थकामरसि
४४ काद्वापरेचाभवत्युगे ॥ अर्थकामपराः सर्वे कलावस्मिन्भवंति हि ॥ १३ ॥ युगध
र्मास्तु राजेंद्र नयांति विलयं पुनः ॥ कालकर्त्तास्तिधर्मस्यत्वधर्मस्यच वैपुनःध
राजोवाच ॥ येतु सत्ययुगे जीवा भवंति धर्मतत्पराः ॥ कुत्रते यमहाभागति
ष्ठंति पुण्यभागिनः ॥ १५ ॥ त्रेतायुगे द्वापरेवा येदानव्रतकारकाः वर्त्तंति
तेमुनिश्रेष्ठ कुत्रब्रूहि पितामह ॥ १६ ॥ कलावद्य दुराचाराः येवसंति गृहाणा
श्चाद्य युगे कयास्युतिपापिष्ठा वेदनिंदका १७ एतत्सर्वं समाचक्ष्वविस्तरेण
महामते ॥ सर्वथाश्रोतुकामोस्मि यदेतद्धर्मनिर्णयं ॥ १८ ॥ व्यास उ ॥ येवैकृ

तयुगे राजन्भवंति हि मानवाः स्वत्वा ते पुण्यकर्माणि देवलोकान्व्रजंति वै ॥
१९ ॥ ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्च नृपसत्तम ॥ स्वधर्मनिरतायांति लोका
न्कर्मजितान्किल ॥ २० ॥ सत्यं दया तथा दानं स्वदारगमनं तथा ॥ अद्रोहः सर्व
भूतेषु समता सर्वजंतुषु २१ एतत्साधारणं धर्मं कृत्वा सत्ययुगे पुनः ॥ स्वर्गं यांति
न रेवणाधर्मतो राजकाश्यप ॥ २२ ॥ तथा त्रेतायुगे राजन्द्वापरेथ युगे तथा ॥ कला
वस्मिन्युगे पापेन रकं यांति मानवा ॥ २३ ॥ तावत्तिष्ठंति ते तत्र यावत्साधकगप
र्ययः पुनश्च मानुषे लोके भवंति तु विमानवाः ॥ २४ ॥ यदा सत्ययुगस्याहिः कले
रंतस्य पार्थिव ॥ तदास्वर्गात्तु एपन्नतो जायंते किल मानवाः ॥ २५ ॥ यदा सत्ययुग
स्याहीः कलेरंतस्य पार्थिव तदास्वर्गात्तु रुपन्नतो जायंते किल मानवाः ॥ २५ ॥

ना·पं· महाकलियुगस्यादिः कलेरंतस्यपार्थिव॥ तदास्वर्गात्तुयेभ्रष्टास्तेजायंतेकिलमा
४५ नवाः॥२६॥ एवंकालसमाचारोनान्यथाभूतलेनघ॥ तस्मात्कलिरसत्कर्ता
तस्मिंस्तुतादृशीः प्रजाः॥२७॥ कदाचिद्दैवयोगात्तुप्राणिनांव्यत्ययोभवेत्॥ क
लौयेसाधवः किंचित्तेभवंतिहिद्वापरे॥२८॥ तथात्रेतायुगेकेचित्केचित्सत्ययुगे
तथा॥ दुष्टाः सत्ययुगेयेतुतेभवंतिकलावपि २९ स्वकर्मप्रभावेनप्राप्नोतिज
न्मतादृशं॥ पुनस्तुतादृशंकर्मकरोतियुगभावतः॥३०॥ जनमेजयउ॥ युगध
र्मान्महाभागब्रूहिसर्वानशेषतः॥ यस्मिन्वैयादृशोधर्मः ज्ञातुमिच्छामितत्तथा
३१॥ व्यासउ॥ निबोधनृपशार्दूलदृष्टांतंतेब्रवीम्यहं॥ साधूनामपिचेतांसियु
गभावाच्चलंतिवै॥३२॥ पितुर्यथातेराजेंद्रबुद्धिर्विप्रावहेलने॥ स्वतेवकालिना

कामंधर्मज्ञस्यमहात्मनः॥३३॥ अन्यथाक्षत्रियोराजाययातिकुलसंभवः॥ ता
पसस्यगलेसर्पंनृपकस्मादयोजयत्॥३४॥ सर्वथायुगबलंराजन्वेदितव्यंविजानता
प्रयत्नेनहिकर्तव्यंधार्मकर्मविशेषतः॥३५॥ नूनंसत्ययुगेराजन्ब्राह्मणावेदपा
रगाः स्वकर्मनिरताः कर्मनिरताः कामंसत्यशौचदयान्विताः॥३६॥ त्रय्याक्ष
कर्मनिरतास्तत्त्वज्ञानविशारदाः॥ धर्मवत्क्षत्रियास्तत्रप्रजारक्षणतत्परा
३७॥ वैश्यास्तुकृषिवाणिज्यगोसेवानिरतास्तदा॥ शूद्राः सेवापरास्तत्रपुण्येस
त्ययुगेनृप ३८ धर्मात्रेतायुगेकिंचिन्न्यूनाधर्मस्यसंस्थिति द्वापरेचविशे
षेणन्यूनासत्ययुगान्नृप॥३९॥ पूर्वंयेराक्षसाराजंस्तेकलौब्राह्मणाःस्मृताः
पाषंडनिरताः कामंभवंतिलोकवंचकाः॥४०॥ शूद्रसेवापराः केचिन्नानाध

मंत्रवर्त्तकाः॥ वेदनिंदाकराः क्रूराः धर्मविद्वेषतिवादुकाः॥४१॥ यथायथा कलिर्वृ
द्धिं याति राजंस्तथा तथा॥ धर्मस्य सत्यमूलस्य क्षयः सर्वात्मना न्नवत्॥४२॥ नैष्ठि
वन्ति यावैश्याः शूद्राश्च धर्मवर्जिताः॥ असत्यवासिनो पापास्तथा वर्णेतराः
कलौ॥४३॥ शूद्रधर्मरता विप्रा मूर्षाः प्रतिग्रहे रताः॥ भविष्यंति कलौ राजन्वृ
गेवृद्धिं गते किल॥४४॥ कामचाराः स्त्रियः कामलोभमोहसमन्विताः॥ मिथ्या
भिवादिनीः पापा सदा कैतवरता मिथः॥४५॥ स्वनर्तवित्तंका नित्यं मिथ्या भाषणे
पंडिताः॥ भवत्येवंविधा नार्यः पापिष्टाश्च कलौ युगे॥४६॥ आहारशुद्ध्या नृपते
चित्तशुद्धिस्तु जायते॥ शुद्धे चित्ते प्रकाशः स्यात् धर्मस्य नृपसत्तम॥४७॥ वृत्तिसंक
रदोषेण जायते धर्मसंकरः॥ धर्मस्य संकरे जाते नूनं स्याद्वर्णसंकरः॥४८॥ एवं

कलियुगे नृप सर्वधर्मविवर्जिते॥ चित्रं किमत्र नृपालाः परस्परविरोधिनः॥४९
यादवा धर्मनिरता द्वारकावासिनः पुनः॥ स्वैराः स्नेहयुक्ताश्च ज्ञानिनः कृष्णपा
लिताः॥५०॥ तेऽस्य निमित्त कलहं कृत्वा सर्वे परस्परं॥ कृत्वा युद्धमनयदिं ना
सेनिधनं गताः॥५१॥ न ज्ञातं वासुदेवेन कुटुंबकदनं महसौ त सहसा नाविभा
वत्तां पुरीं त्यक्त्वा विनिर्गता॥५२॥ प्लाविता च समुद्रेण द्वारिका नगरी पुनः॥
देहदाहार्जुनि नैवाविदत कृष्णरामयोः॥५३॥ देवैर्दैवैः सुदुर्ज्ञेयं किं पुनर्मानवै
र्भुवि॥ तदधीनं जगत्सर्वं संवादे सुरमानकं॥५४॥ ब्रह्मा विष्णुस्तथा रुद्रश्च
द्रसूर्यौ विश्वावसु॥ वासवो वरुणः पूषा यमश्च धनदस्तथा॥५५॥ वसिष्ठो वाम
देवश्च नारदः कपिलः क्रतुः॥ सनकाद्याः ब्रह्मपुत्राः सर्वे दैववशाः किल॥५६॥

कामक्रोधस्तथालोभोविभ्रमोहर्षएवच॥ अहंकारश्चविद्वेषोह्यसूयाकलहस्तथा
५७॥ एतेचान्येवराजेंद्रभावादेहस्यदेहिनः॥ भवंतिदेहसंयुक्ताःसर्वेषांकाल
योगतः॥५८॥ येषाममीनदेहेषुनतेदेववरान्नृप॥ संकल्पश्चविकल्पश्चहर्ष
शोकौसविभ्रमौ॥५९॥ देहेयस्यनविद्यंतिसकिंनदेवयंत्रितः॥ विवशश्च
महाराजपरतंत्रःसदैवहि॥६०॥ रीतिरियंपुराणानांसर्वत्रनृपसत्तमः॥ देवा
नांव्रततीर्थानांदानानांसमयेस्तुतिः॥६१॥ निंदाचसमयेक्वापिनोहनाचवि
नीषिका॥ द्विविधोचार्थवादोहिस्तुतिनिंदात्मकोकिल॥६२॥ तथाजनविमुरु
शणांस्तुतिप्रोक्तामहात्मभिः॥ उपासनार्थमेतद्वैकारणंकथितंबुधैः॥६३॥ मे
दास्तथार्थवादाश्चभवंतिकलौयुगे॥ अन्येपाषंडधर्माश्चनतेन्येषुयुगेषु

वै॥६४॥ वेदधर्माःसत्ययुगेत्रेताद्वापरयोस्तथा॥ कलौपुराणधर्माश्चभं
वंतिनृपसर्वथा॥६५॥ स्त्रीशूद्रद्विजबंधूनांत्रयीनश्रुतिगोचरा॥ तेषामेव
हितार्थायपुराणसंहिताकृता॥६६॥ ॥इतिश्रीभागवतेमहापुराणेषष्ट
स्कंधेएकादशोध्यायः॥११॥ ॥जनमेजयउ०॥ ॥तीर्थानितुविमुख्यानिब्रूहि
मेमुनिसत्तम॥ गम्यानिमानवैर्देविःक्षेत्राणिसरितस्तथा॥१॥ फलंचया
दृष्टंयत्रतीर्थेषुस्नानदानैःसरस्वती॥ नर्मदागंडकीसिंधुर्गोमतीतमसात
था॥३॥ कावेरीचंद्रभागाचपुण्यावेत्रवतीशुभा॥ चर्मण्वतीचसरयूस्तापी
साभ्रमतीशिवा॥४॥ एताश्चकथिताराजन्नन्याश्चशतशःपुनः॥ तासांस
मुद्रगाःपुण्याःस्वल्पपुण्यास्त्वसमुद्रगाः॥५॥ भवंतिहृष्टियोगेनग्राम्यवारि

ना·प· वक्षस्तथा॥ तासु स्नानं न कर्तव्यं कलिले सलिले सति॥६॥ गंगायां च सरस्वत्यां सा
ञ्जं दिनत्रयं बुधैः॥ स्नाने नैमित्तिके चैव न त्रयं बुधैः॥ स्नाने नैमित्तिके चैव न तु रो
४८ षः कदाचन॥७॥ पुष्करं च कुरुक्षेत्रं धर्मारण्यं सुपावनं॥ प्रभासं च प्रयागं च
नैमिषारण्यमेव च॥८॥ विख्यातं चार्बुदारण्यं शैलाश्च पावनास्तथा॥ श्रीशैल
श्च सुमेरुश्च पर्वतो गंधमादनः॥९॥ सरांसि चैव पुण्यानि मानसं सर्वविख्यातं
तथा बिंदुसरः श्रेष्ठं मच्छोदं नाम पावनं॥१०॥ आश्रमास्तु तथा पुण्या मुनीनां भा
वितात्मनां॥ विख्यातस्तु सदा पुण्यो ख्यातो बदरिकाश्रमः॥११॥ नरनाराय
णौ यत्र तेपाते तौ मुनी तपः॥ वामनाश्रमविख्यातः ज्ञातयूपाश्रमस्तथा॥
१२॥ येत्र यत्र तपस्तप्तं तस्यानाम्नाति विख्यतः॥ एवं पुण्यानि स्थानानि क्षि

संख्यातानि भूतले॥१३॥ मुनिभिः परिगीतानि पावनानि महीपते॥ तीर्थानि नृप
दानानि व्रतानि च मखास्तथा॥१४॥ तपांसि पुण्यकर्माणि सोपेक्षाणि महीपते॥
द्रव्यशुद्धिं क्रियाशुद्धिं मनःशुद्धिमुपेक्ष्य च॥१५॥ पावनानि हितार्थानि तपां
सि च व्रतानि च॥ कदाचिद्द्रव्यशुद्धिः स्यात् क्रियाशुद्धिः कदाचन॥१६॥ दुर्लभा म
नसः शुद्धिः सर्वेषां सर्वदा नृप॥ मनस्तु चंचलं कामं मनेकविषयाश्रितं॥१७॥ क
थं शुद्धं भवेद्राजन् नानाभावसमाश्रितं॥ कामक्रोधौ तथा लोभो ह्यहंकारो मद
स्तथा॥१८॥ सर्वे विघ्नकरा मत्या तेन पतीर्थव्रतेषु च॥ अहिंसा सत्यमस्तेयं शौच
मिंद्रियनिग्रहः॥१९॥ स्वधर्मपालनं राजन् सर्वतीर्थफलप्रदं॥ नित्यकर्मपरि
त्यागात् नार्यसंसर्गदोषतः॥२०॥ सर्वतीर्थाधिश्रयणं पापमेवावशिष्यते॥ना

मा॰प॰ लयंति हि तीर्थानि सर्वथा देहजं मलं ।।२१।। मानसं क्षालितुं तानि समर्थानि नृप
राक्षानि यदि चेत्तानि गंगातीरनिवासिनः ।।२२।। मुनयो ह्येहसंसक्ताः कथं स्युर्वि
४९ जितात्मनः ।। वसिष्ठसदृशाः कामं विश्वामित्रादयः किल ।।२३।। रागद्वेषरताः सर्वे
कामक्रोधाकुलाः सदा ।। चित्तशुद्धिः परं तीर्थं गंगा हि स्रोतिपावनं ।।२४।। यदि
स्यादिह वियोगेन त्वा जयंत्यंतरं मलं ।। क्लिशेन तु सत्संगं कारणं तत्र भूपते ।।२५।। न
वेदा न च शास्त्राणि न व्रतानि न तपांसि नः ।। न मखा न च दानानि चित्तशुद्धेः सुका
रणं ।।२६।। वसिष्ठो ब्रह्मणः पुत्रो वेदविद्याविशारदः ।। रागद्वेषान्वितः कामं गं
गातीरकृताश्रमः ।।२७।। आडीबकं महायुद्धं विश्वामित्रवसिष्ठयोः ।। जातं निरर्थकं द्वे
षाद्देवानां विस्मयप्रदं ।।२८।। विश्वामित्रो बकः स्तत्र जातः परमतापसः ।। शापतः स

तु वशिष्ठेन हरिश्चंद्रस्य कारणात् ।।२९।। कौशिकेन वशिष्ठोपि शापादाडी देह
नाकृतः ।। शापादाडीबकौ जातौ तौ मुनि विशदव्रतौ ।।३०।। निवासं प्राप
तुः कामं नीडे मानसरोवरे ।। चक्रतु दारुणं युद्धं नखचंचुघताडनैः ।।३१।। व
र्षाणामयुतं यावत् क्राष्टमीक्रोधसंयुतौ ।। युयुधाते महोन्मत्तौ सिंहाविव पर
स्परं ।।३२।। ।। राजोवाच ।। ।। कथं तौ मुनिशार्दूलौ तापसौ धर्मतत्परौ ।। प
रस्परं वैरपरौ संजातौ केन हेतुना ।।३३।। शापपरस्परं केन कारणेन महामती
दत्तवंतौ निषः क्लेशकारकौ दुःखदौ नृणां ।।३४।। व्यास उवाच ।। हरिश्चंद्रो
नृपः श्रेष्ठस्त्रिशंकुतनुजः पुरा ।। वभूव रविवंशीयो रामचंद्रस्य पूर्वजः ।।३५
अनपत्यः स राजर्षिर्वरुणायाशं महाकेतुं प्रतिपन्ते पुत्रकामो नरमेधं उ

गा·प·
५०

रामदं॥३६॥बभूवसंतुष्टोहृष्टोभार्यासहोहरं॥ चकारविधिवत्कर्मस्वस्त्याक
रणपूर्वकं॥३८॥सुषुवेतनयंनारीसर्वलक्षणसंयुतं॥सुदंचापनृपस्तत्रपु
त्रेजातेविशांपते॥३९॥कृतवान्जातकर्मादिसंस्कारविधिमुत्तमं॥ददौहिर
ण्यगाःकामंब्राह्मणेभ्योविशेषतः॥४०॥जन्मोत्सवेतिसंवृत्तेतस्यपादसांप
तिः॥आजगाममहाराजविप्रवेषधरस्तदा॥४१॥पूजितःपार्थिवेनार्घ्यैर्दत्वाविधि
वदासनं॥कार्यमुद्दिश्यब्रवीद्वाक्यंवरुणोहमितिनृपतिं॥४२॥कुरुयज्ञंसुतं
लब्धापशुंपरमपावनं॥सत्यवाग्भवराजेंद्रसंकल्पस्तुत्वयाकृतः॥४३॥तच्छ्रुत्वा
वचनंराजाबभूवातिभयाकुलः॥संस्थंभ्याधिंनृपःप्राहवरुणंसंकृतांजलिः
४४॥ स्वामिन्करोमितंयज्ञंसर्वथाविधिपूर्वकं॥मयातेप्रतिज्ञातंनवानि

सत्यवागहं॥४५॥पूर्णेमासेविशुद्धेतधर्मपत्नीसुरोत्तम॥विशुद्धायांतुभार्या
यांकर्तव्यःसपशुर्मखः॥४६॥व्यासउ॥ ॥इत्युक्तेवचनेराज्ञावरुणःस्वगृहंग
तः॥राजाबभूवसंतुष्टःकिंचिच्चिंतातुरस्तथा॥४७॥पूर्णेमासेपुनःपाशीपरीक्षार्थं
नृपालये आजगामद्विजोभूत्वासुवेषःसुपुस्तकः॥४८॥ततोर्हणंसुखासीनं
नृपतिस्तंसुरोत्तमं॥उवाचविनयोपेतोहेतुगर्भंवचस्तदा॥४९॥असंस्कृतं
सुतंस्वामिन्पशुवध्यामितंकथं॥संस्कृत्यक्षत्रियंत्वत्वायजेहंयज्ञमुत्तमं॥५०॥
यत्स्मेयदिदेवत्वंतात्वादीनस्वसेवकं॥असंस्कृतस्यबालस्यनाधिकारोस्तिकु
चित्॥५१॥वरुणउ॥ वृतारयसिराजेंद्रइत्युक्त्वासमयंततः॥ऽःस्वजस्तवनानाभि
सुतस्नेहोत्यप्रवृत्तिणः॥५२॥गृहंव्रजामिनृपालवचनान्नवकोमत्तोते॥किंप

कालंप्रतीक्ष्यसांप्रमामिष्यामितिगद्दं॥५३॥नवितथ्यंत्वयातातत्तदास्यस्यविधायकं
अन्यथात्वयिमुंचामिकोपंशापसमन्वितं॥५४॥ ॥राजोवाच॥ ॥समावर्त्तक
मंतिसर्वथायादसांपते कृत्वापुत्रंपशुंयज्ञंयजिष्येविधिपूर्वकं॥५५॥मासउ॥
तच्छ्रुत्वावचनंराज्ञोवरुणःप्रीतमानसः॥तथेत्युक्त्वाययौतूर्णंनृपस्तुसुस्थितोभवत्
५६॥रोहितास्यइतिख्यातःसुतस्तस्यविहद्विमान्॥संजातश्चतुरःसर्वविद्यानांच
विशारदः॥५७॥यज्ञस्यकारणंतेनज्ञातंसविस्तरं॥नयत्नीतस्ततःसोतिज्ञात्वा
मरणमात्मनः॥५८॥जगामजायनंवीरोगतोसौगिरिगह्वरे अगम्येन
पतेकांमस्थितस्तत्रस्नयातुरः॥५९॥प्रातेकालेथवरुणोयज्ञार्थीनृपतेर्गृहं॥
गत्वातमाहनृपाजंकुरुयज्ञंविशांपते॥६०॥चंस्त्वानवरुणोराजातमाह

व्यथितेंद्रियः॥किंकरोमिगतःक्वापिसुतोमेसुरसत्तम॥६१॥श्रुत्वातद्वचनंरा
ज्ञःकुपितोयादसांपतिः॥सशापतंनृपंकोपात्सत्यवादिनंमूर्ख॥६२॥जलोदरा
भिधोव्याधिर्देहेत्वचतुतेनृप॥यतःप्रतारितःश्राद्धंत्वयाकपटपंडित॥६३॥इ
तिशप्त्वाययोधामस्वकंपाशाधरस्तदा॥राजाचिंतातुरस्तस्थौभवनेव्याधिपी
डितः॥६४॥यदातिव्याधितोराजारोगेनशापजेनह॥तदासुश्रावपुत्रोपिपित
रंव्याधिपीडितं॥६५॥पांथिकःशापपुत्रोपिपितातेदुःखदुःखितः॥जलोदरं
विकारेणशापजेननृपात्मज॥६६॥धिग्मंदजीवितंतेद्यहथाजातस्यउमति
यत्स्वकापितरंदुःस्थंत्राहोसिगिरिगह्वरं॥६७॥किमेतेनशरीरेणप्राप्तंतेजन्म
नःफलं॥देहहंदुःखितंकृत्वास्थितोस्यत्रसुताधम॥६८॥आगत्यास्वाज्याःपितुः

ना.ष. कार्यसिपुत्रेणे तिसत्तमः ।। त्वदर्थे दुःखितो राजा कंदति व्याधिपीडितः ।।६९।। व्या
सउ ।। ।। तदाकर्ण्य वचस्तथ्यं पांथिकाद्धर्मसंयुतं ।। मनश्चक्रे मनो गंतुं द्रष्टुं तातं
५२ रुग्यातुरं ।।७०।। तदा विप्रवपुर्भूत्वा वासवस्तमुपागमत् ।। रहः प्राह हितं वाक्यं
दयावान् इव भारत ।।७१।। मूर्खोसि राजपुत्र त्वं गमयमातिंहपा ।। करोषि
पितरं त्वं न जानासि पितुर्मतिं ।।७२।। ।।इति श्रीभागवते महापुराणे षष्ठस्कं
धे द्वादशोध्यायः ।।१२।। व्यासउ ।। ।। सोहं संस्तुतवान् राजा पूर्वं यत्कृतिको मख
:।। वरुणाय प्रजार्थे वै पुत्रं कृत्वा पशुं प्रिये ।।१।। गते त्वयि पिता कामं बद्धा भूपे
दृणाःपुनः ।। पशुं कृत्वा महाबुद्धे वधिष्यति व्यथातुरः ।।२।। इति निषेधितः पुत्रः
शक्रेणामिततेजसः ।। स्थितस्तत्रैव मायेशं मायया मोहितो नरः ।।३।। यदाय

दा पुनः श्रुत्वा पितरं रोगपीडितं ।। गमनाय मतिं चक्रे वासवः प्रतिषेधत ।।
हरिश्चंद्रोति दुःखार्त्तः पप्रच्छ गुरुमंतिके ।। स्थितं वसिष्ठमेकांते सर्वज्ञ
त्वं हितत्परं ।।५।। ।।राजोवाच ।। ।।भगवन् किं करोम्यद्य कातरोस्मि तथा कृत
श्चाहिमाऽदुःखसंतप्तं व्याधिनयातुरं ।।६।। वसिष्ठउ ।। ।। राजन्नुपायोस्ति रोग
नाशे प्रतिस्त्ववत्रियो दशविधाः पुत्राः कथितो धर्मसंग्रहे ।।७।। तस्मात्क्रीतं
सुतं कृत्वा जयस्त्वमखमुत्तमं ।। द्विजं दत्वा यथोद्दिष्टमानयः स्वद्विजातिजं ।।८।।
एवं कृते मखे भूप रोगनाशो भविष्यति ।। वरुणोपि प्रसन्नात्मा भविष्यति य
थासुखं ।।९।। व्यासउ ।। इति तस्य वचः श्रुत्वा राजा प्रोवाच मंत्रिणं ।। अन्वेष
य महाबुद्धे विषये प्रतियत्नतः ।।१०।। कदाचित् लोभिलो भाथी दत्वाप्रिस्वसुतं

पिता॥ समानियधनं दत्वा यावत्प्रार्थयति प्रसौ॥११॥ सर्वार्थविसमाने यो यज्ञार्थे
द्विजबालकः॥ न कार्यस्त्रिपणा बुद्धिस्त्वया मत्कार्यहेतवे॥१२॥ प्रार्थितमस्त्वया
पुत्रः कस्यचिदितिवादिना॥ इत्थं एणं देहि यज्ञार्थकर्त्तव्यो सो पशुः किल॥१३॥ इ
ति संचोदितस्तेन सचिवः कार्यहेतवे॥ प्रार्थितव्यस्त्वया पुत्रः कस्यचिदितिवा
दिना॥१४॥ इत्थं एणं देहि यज्ञार्थकर्त्तव्यो सो पशुः किल॥ इति संचोदितसचिवः
कार्यहेतवे॥१५॥ अन्वेषयामास गुरोर्ग्रामे ग्रामे गृहे गृहे॥ एवमन्वेषयंस्तस्य
विषये कश्चिद्द्विजातुरः॥१६॥ निर्धनस्त्रिसुतश्चासीदजिगर्त्तेति नामतः॥ तस्य पुत्रं
शुनः सेफं मध्यमं मंत्रिसत्तमः॥१७॥ आनयामास मोहत्वार्थं प्रार्थितं धनं ततः॥ स
मानीय शुनः सेफं सचिवः कार्यतत्परः॥१८॥ राज्ञे निवेदयामास पशुर्यो यज्ञसिद्धि

जबालकं॥२१॥ प्रार्थयाम्यहमायुष्मन्सुखं ते हि भविष्यति॥ कंदत्ययं शुनः शे
फो कारुण्यान्मां तु नोत्यपि॥ दयावानृपराजेन्द्र कुरु मे वचनं नृप॥ परदेहस्य र
क्षार्थे स्वदेहं ये दयापराः॥२३॥ ददाति क्षत्रियाः कामं स्वर्गकामाः शुचिव्रताः
त्वं स्वदेहस्य रक्षार्थं हंसि द्विजसुतं बलात्॥२४॥ पापं मा कुरु राजेन्द्र दयावा
नेव बालके॥ सर्वेषां सदृशी प्रीतिर्देहे वेत्सि नृप स्वयं॥२५॥ मुंचैनं बालकं तस्मा
त्समानं यदि मे वचः॥ व्यासउ॥ ॥ अनादृत्य च तद्वाक्यं राजा रुखातुरो भृशं॥२६
न मुमोच मुनिस्तस्मै चुकोप प्रवीत्सुनः॥ उपदेशाद्ददौ मुनिः शुनः शेफाय कौशिक
॥२७॥ मंत्रयास धरः स्याथ दयावान्वेदवित्तमः॥ शुनः शेफो पि तं मंत्रं म सलं इंध
कर्षितः॥२८॥ सुतस्वरेण चुक्रोश सस्मरन्वरुणं न्नवा॥ स्तुवंतं मुनिपुत्रं तं

ना.ष. ज्ञात्वा यथार्थसंपति ॥२९॥ तत्रागत्य सुनःशेफमुमोचयदसंक्रमं ॥ रोगहीनं नृपं कृ
५४ त्वा वरुणस्य गृहं ययौ ॥३०॥ विश्वामित्रस्तु तं पुत्रं स्मृतवान्मोचितं मृतं ॥ नष्टं तं वच
नं राज्ञा कौशिकस्य महात्मनः ॥३१॥ रोषं दधार मनसा राज्ञोपरि समाधिजः ॥ ए
कस्मिन् समये राजा हयारूढो वनं गतः ॥३२॥ शूकरं हंतुकामस्तु मध्याह्ने कौशिकी
तटे ॥ दृष्ट्वा ब्राह्मणवेषेण विश्वामित्रेण वंचितः ॥३३॥ सर्वस्वं प्रार्थितं तस्य गृही
तं राज्यमद्भुतं ॥ पीडितोसौ हरिश्चंद्रो यजमानो यतो न्हरं ॥३४॥ वशिष्टकौशि
कं शशाप वने प्राप्तं यदृच्छया ॥ क्षत्रियाधम दुर्बुद्धे मम ब्राह्मणवेषधृक त ॥ बक
ध्यानपरो यस्मात्तस्मात्त्वं वै बको भव ॥३५॥ बकधर्म्मं तथा किं त्वं गर्वं वहसि दांभि
क ॥ कस्मात्त्वया नृपश्रेष्ठो यजमानो ममायसो ॥ अपराधं विना जाल्मगमितो दुः

खमद्भुतं ॥ बकध्यानपरो यस्मात्तस्मात्त्वं वै बको भव ॥३६॥ इति शप्तो वशिष्ठेन कौ
शिकः प्राह तं पुनः ॥ त्वमप्याडी भवाशु ष्मन् बकोहं यावदेव तु ॥३७॥ आसत्त ॥
एवं परस्परं दत्त्वा शापं तौ क्रोधपीडितौ ॥ अंडजौ तरसा जातौ सरस्याडीबकौ मु
नी ॥३८॥ एकस्मिन्मादपे नीडं कृत्वा सो बकरूपवान् विश्वामित्रः स्थितस्तत्र दि
व्यमानसरोवरे ॥३९॥ अन्यस्मिन्पादपे कृत्वा वसिष्ठो नीडमुत्तमं ॥ आडीरूपध
रस्तस्थावन्योन्यं द्वेषतत्परौ ॥४०॥ दिने दिने ततो संग्रामं चक्रतुः क्रोधसंयुतौ ॥
दुःखदं सर्वलोकानां क्रंदमानौ भृशोत्कटं ॥४१॥ चंचापक्षप्रहारैस्तु नखाघातै
परस्परं ॥ जघ्नतू रुधिरक्लिन्नौ किंशुकाविव पुष्पितौ ॥४२॥ एवं बहूनि वर्षाणि
पक्षिरूपधरौ मुनी ॥ स्थितौ तत्र महाराज न्यायपारीनयंस्थितौ ॥४३॥ राजो वा

च॥ कथं मुक्तौ मुनिश्रेष्टौ शापाद्वाशिष्टकौशिकौ॥ तन्ममाचक्ष्व विप्रर्षे परं कौतु
हलं हि मे॥ ४४॥ व्यास उवाच॥ ४४॥ सुषमा नाकुनौ हष्ट्वा ब्रह्मा लोकपितामहः त
त्राजगाम निमिषैः वृतः सर्वैर्दयापरः॥ ४५॥ तावाश्वास्य जगत्कर्त्ता निवार्य युध्य
तौ तदा॥ शापं संमोचयामास तयोः क्षिप्तं परस्परं॥ ४६॥ ततो जग्मुः सुराः सर्वे
स्वानि धिष्ण्यानि पन्नगाः सत्यलोकं जगामाशु हंसारूढः प्रतापवान्॥ ४७॥
विश्वामित्रोप्यगात्तूर्णं वसिष्टस्याश्रमं गतः॥ मिथः स्नेहं ततः कृत्वा प्राप्तावुपशमोप
देशतः॥ ४८॥ मित्रावरुणिनाप्येवं कृतं युद्धमकारणं॥ कौशिकेन समं नृप दुःख
दं च परस्परं॥ ४९॥ कोनाम मानवो लोके देवो वा दानवोपि वा॥ अहंकारज
यं कृत्वा सर्वदा सुखमाप्नुवेत॥ ५०॥ परयरमनृपालं कर्तव्यं धर्मसाधनं॥ तीर्थदा

नं जपो होमः स्वाध्यायं विप्रभोजनं॥ ५१॥ श्रद्धात्र विविधा प्रोक्ता सात्विकी राजसी
तथा॥ तामसी सर्वदेहेषु देहिनां धर्मकर्मसु॥ ५२॥ सात्विकी उत्तमा श्रद्धा यथो
क्ताफलदा सदा॥ तदर्धफलदा प्रोक्ता राजसा विधिसंयुता॥ ५३॥ तामसी त्वफ
ला राजन्ननुत्तकीर्तिकरी पुनः॥ कामक्रोधाभिभूतानां नां नृपसत्तम॥ ५४॥
इति श्रीभागवते महापुराणे षष्टस्कंधे त्रयोदशोध्यायः॥ १३॥ जनमेजय उ॥ मि
त्रावरुणिरित्युक्तं नाम तस्य मुनेः कथं॥ वसिष्टस्य महाराज ब्रह्मणस्तनुजस्य ह
किमसौ कर्मतो नाम प्राप्तवान्गुणतस्तथा॥ ब्रूहि मे वदतां श्रेष्ठ कारणं तस्य ना
मजं॥ २॥ व्यास उ॥ ॥ निबोध नृपतिश्रेष्ठ वसिष्ट ब्रह्मणः सुतः॥ निमिशापात्तु
तत्का पुनर्जातो महाकृतिः॥ ३॥ मित्रावरुणयोर्यस्मात्तस्मात्तन्नाम विश्रुतं॥

ना॰ प॰ मित्रावरुणिरित्यस्मिंल्लोके सर्वत्र पार्थिवः॥४॥ राजोवाच॥ ॥कस्मात्स म-
सधर्मात्मा राज्ञा ब्रह्मात्मजो मुनिः॥ चित्रमेतन्मुनिश्रेष्ठो राज्ञः शापोतिदारुणः
५६ ५॥ अनागसं मुनिं राजा किमसौ शप्तवान्मुने कारणं वद धर्मज्ञ तस्य शापस्य
मूलतः॥६॥ व्यास उ॰॥ ॥कारणं तु मया प्रोक्तं तव पूर्वं विनिश्चितं॥ संसारोयं
त्रिभिर्व्याप्तो राजन्मायागुणैः किल॥ धर्मकर्ता तु नृपा लालसपरं तु तापसाः
सर्वे तु गुणैर्विद्धा नो — लक्ष्ये वै हि ह॥८॥ कामक्रोधाभिभूतास्च राजानो मुनय-
स्तथा॥ नो नाहंकारसंसक्ता अस्वरं तिष्ठस्वरं तपः॥९॥ यतंति ह ते क्रियायज्ञात्
रजोगुणसमावृताः॥ ब्राह्मणास्तु तथा राजन्नन्को पि सत्वसंयुतः॥१०॥ अ-
पि गौ निमिः शप्तः स्तनयो मुनिः पुनः॥ दुःखाद्दुःखतरं प्राप्ता तु ना चपि

स्वभावतः॥११॥ द्रव्यशुद्धिः क्रियाशुद्धिर्मनसः शुद्धिसात्त्विकी॥ दुर्लभा प्राणि-
नां नृप संसारे त्रिगुणात्मके॥१२॥ इक्ष्वाकुकुलसंभूतो निमिर्नाम नराधिप
॥रूपवान्गुणसंपन्नो धर्मज्ञो लोकरंजकः॥१३॥ सत्यवादी दानपरो याज्ञ-
को ज्ञानवान्शुचिः॥ द्वादशात्मनवो धीमान्प्रजापालनतत्परः॥१४॥ पुरं
निवेशयामास गौतमाश्रमसंनिधौ॥ जयंतपुरसंज्ञं तु ब्राह्मणानां हिता-
यसः॥१५॥ बुद्धिस्तस्य समुत्पन्ना यजेयमिति राजसी॥ यज्ञेन बहुकालेन
दक्षिणा संयुतेन च॥१६॥ इक्ष्वाकुं पितरं दृष्ट्वा यज्ञकार्य पार्थिवः॥ कारयामा-
स संभारं यथादिष्टं महात्मभिः॥१७॥ भृगुमंगिरसं चैव वामदेवं च गौतमं॥ वसि-
ष्ठं च पुलस्त्यं च ऋचीकं पुलहं क्रतुं॥१८॥ मुनीनामंत्रयामास सर्वज्ञान्वेदपारगान्॥ प

भा·प·
५१

त्रवीद्याप्रवीणांश्च तापसान्वेदवित्तमान्॥१९॥ राजोवाच॥ निमिसंज्ञस्ततः संभा
रः संपूज्य गुरुमात्मनः॥ वसिष्ठं प्राह धर्मज्ञं विनयेन समन्वितः॥२०॥ यज्ञे हं मु
निश्रेष्ठ इलियाजेय स्वल्पनिधे॥ गुरुस्त्वं सर्ववेत्तासि कार्यमेकं कुरुष्व तं॥२१
यज्ञोपकरणं सर्वसमानीतं सुसंस्कृतं॥ पंचवर्षसहस्रांदीक्षां कर्तुमतिश्च मे
२२॥ तच्छ्रुत्वा सो निमेर्वाक्यं वसिष्ठः प्राह नृपतिं॥ इंद्रेणाहं हतः पूर्वं यज्ञार्थं नृपसत्त
मः॥२३॥ सदीक्षां गमिता देवः पंचवर्षशतात्मिकां॥ तस्मात्त्वमंतरं तावत्प्रतिपा
लय पार्थिव॥२४॥ इंद्रयज्ञे समाप्ते च तत्वा कार्ये दिवस्यसि आगमिष्यामि अहं रा
जन् तावत्त्वं प्रतिपालय॥२५॥ राजोवाच॥ मयानिमंत्रिताश्चान्ये मुनयो यज्ञकार
णात्॥ संभाराः संभृताः सर्वे पायया मिकथं पुरी॥२६॥ इक्ष्वाकुणां कुलेब्रह्मन्

गुरुस्त्वं वेदवित्तम॥ कथं त्यक्त्वाद्य मे कार्यमुद्यतो गंतुमुद्यवे॥२७॥ नते युक्तं द्विज
श्रेष्ठ यदुक्तं सम स्वं मम॥ किंबलं मे त्वयि प्राज्ञ लोना कलित चेतसि॥२८॥ निवा
रितोपि राज्ञा स जगाम इंद्रमखं गुरुः॥ राजापि विमना भूत्वा गौतमं समपूजयत्॥
२९॥ इयाज हिमवत्पार्श्वे सागरस्य समीपतः॥ दत्तिया बकुना हत्वा पंचवर्षश
तात्मके॥३०॥ विप्रेभ्यो मखवकर्माणि॥ निमिना पंचसाहस्त्रीदीक्षा तत्र कृता नृप
ऋत्विजः पूजिता कामं धनेर्गो भियुता पिता॥३१॥ शक्रयज्ञे समाप्ते तु पंचवर्ष
शतात्मके आजगाम वसिष्ठस्तु राज्ञः सत्रदिदृक्षया॥३२॥ आगत्य संस्थितस्त
त्र दर्शनार्थं नृपस्य च॥ तदा राजा प्रसुप्तस्तु निद्रयापहृतो नरः॥३३॥ नासौ प्र
बोधितो भृत्यैर्नागतस्तु मुनिं नृप॥ वसिष्ठस्य ततो मन्युः प्रादुर्भूतो वमाननात्

भा.ष. ३४ अदत्वानात्निमेस्तत्र चुकोप मुनिसत्तमः॥ शापं च दत्तवांस्तस्मै शरीरमनुव
५८ र्त्तांगतः॥३५॥ यस्मात्त्वं मां गुरुं त्यक्त्वा त्वन्यं गुरुमात्मनः॥ दीक्षितोसि बलान्मे
दमामवज्ञाय पार्थिवः॥३६॥ वारितोपि मया तस्माद्विदेहस्त्वं भविष्यसि॥ पत
त्वेशरीरं ते विदेहोनवन्नृपते॥३७॥ व्यासउवाच॥ ॥ इति तद्दारुणं श्रुत्वा राज्ञस्तु
परिचारकाः॥ सद्यः प्रबोधयामासु निमिं गुरुःप्रकोपितं॥३८॥ कुपितं तं समाग
त्य राजा विगतकल्मषः॥ उवाच वचनं श्लक्ष्णं हेतुगर्भं च युक्तिमत्॥ मम दोषो ना
स्ति धर्मज्ञ गतस्त्वं तु स्वया कुलं॥ हित्वा मां यजमानं वै प्रार्थितोपि मया भृशं॥
४०॥ न लज्जसे द्विजश्रेष्ठ त्यक्त्वा कर्म जुगुप्सितं॥ संतोषी ब्राह्मणः श्रेष्ठो जानन् ५८
धर्मस्य निश्चयं॥४१॥ पुत्रोसि ब्राह्मणः साक्षाद्वेदवेदांगवित्तम॥ नवेत्सि विप्र ध

र्मस्य गतिः सूक्ष्मां दुरासदां॥४२॥ आत्मदोषमविज्ञात्वा मां वृथा शप्तुमिच्छसि
त्यक्तस्तु मुख्यजैः क्रोधश्चांडालादधिको यतः॥४३॥ वृथा क्रोधपरीतेन म
यि शापः प्रपातितः॥ तवापि च पतत्वद्य देहोयं क्रोधसंयुतः॥४४॥ एवं श
प्तो मुनी राज्ञा राजा च मुनिना तथा॥ आप्य परस्परं शापं दुःखितौ तौ बभूव
तुः॥४५॥ वसिष्ठस्त्वति चिंतार्त्तो ब्रह्माणं शरणं गतः॥ निवेदयामास तदा
शापं नृपकृतं महत्॥४६॥ वसिष्ठ उवाच॥ ॥ राज्ञा शप्तोस्मि देहोयं पतत्व
त्वैति वै॥ किं करोमि पितः प्राप्तं कष्टं कायभयात्मकं॥४७॥ अन्यसमुत्पत्तौ
कारणं वद सांप्रतं॥ यथा मे देहसंयोगः पूर्ववत्सम पद्यत॥४८॥ त्वत्तोमतो वा
देहो मे प्राडुर्भवति तत्कुरु॥ समर्थोसि महाराज प्रसादं कर्तुमर्हसि॥४९॥ व

 शिष्टस्य वचः श्रुत्वा ब्रह्मा प्रोवाच तं सुतं।। मित्रावरुणयोस्तेजस्त्वं प्रविश्य स्थिरो
 भव।।५०।। तस्मात्त्वयोनिजः कालेन विता नात्र संशयः।। पुनर्देहं समासाद्य धर्म
युक्तो भविष्यति।।५१।। सूतात्मा वेदवित्कामं सर्वज्ञः सर्वपूजितः।। एवमुक्तस्त
दा पित्रा प्रययौ वरुणालयं।।५२।। कृत्वा प्रदक्षिणं प्रीत्या प्रणम्य च पितामहं।।
विवेशासतयोर्देहौ मित्रावरुणयोः किलः।।५३।। जीवांशेन वशिष्ठोऽथत्यक्त्वा
